पुरा क्रूरस्य विसृपो विरप्शिन[4] उदादाय पृथिवीं जीरदानुम् ।
तामैरय॰ श्वन्द्रमसि स्वधाभिस्तां धीरासः कवयो ऽनुदिश्यायजन्त[5] ॥

॥ १० ॥ Vgl. 4, 1, 10. — TS 1, 1, 9 (vedih); Kâṭh. 1, 9; Kap. S. 1, 9; VS 1, 24—28; Mân. Çr. 1, 2, 4.

प्रत्युष्ट॰ रक्षः प्रत्युष्टा रातिरायुः प्राणं मा निर्माजीश्चक्षुः श्रोत्रं मा निर्माजीर्वाङ्मा निर्माजीर्यज्ञं प्रजां म[illegible] ऽसि शुक्रमसि ज्योतिरस्यमृतमसि वैश्वदेवमसि ॥

हविरसि वैश्वानरमुन्नीतशुष्म॰ सत्यौजाः[6] ।
सहो ऽसि सहस्वारातिं॰ सहस्व पृतनायतः ॥
सहस्रवीर्यमसि तन्मा[7] जिन्वाज्यस्याज्यमसि हविषो हविः सत्यस्य

1) So P; dagegen M 1 u. 2, Bb परावती; B °वतो; vgl. übrigens Anm. 7 auf S. 5. 2) So betonen alle accentuirten Mss. (M 1 u. 2, H, Bb); der P अपाररुमित्यप. अररुं। 3) P पृथिव्याः। 4) So die Mss.; der P वि. रप्शिनः। 5) So haben M 1 u. 2, in Uebereinstimmung mit der Lesung in VS 1, 28. H und Bb haben नुदृश्चायजंत in Uebereinstimmung mit TS, Kâṭh. u. Kap. S.; dem entsprechend auch P अनु. दृश्च। अयजंत।; B नुदश्चा०. Der Vers ist durch Einschiebung von कवयो gestört, vgl. TS, VS, Kâṭh., Kap. S. 6) So alle Mss.; P सत्यौजा इति सत्य। ओजाः।; die gleiche Form auch in Kâṭh. u. Kap. S. Aehnliche Neutralformen auf âs s. bei Lanman, Noun Inflection, S. 560. 7) So deutlich M 1; P तत्। मा।; M 2 undeutlich; aber H, Bb u. B तन्वा.

सत्यꣳ सत्याभिघृतꣳ[1] सत्येन त्वाभिघारयाम्यद्ब्धेन[2] त्वा चक्षुषावेक्षे रायस्पोषाय सुप्रजास्त्वाय ॥

धामासि प्रियं देवानामनाधृष्टं देवयजनम् ।
देववीत्यै त्वा गृह्णामि ॥

देवीरापः शुद्धा यूयं देवान्युयुध्वꣳ[3] शुद्धा वयꣳ सुपरिविष्टाः परिवेष्टारो वो भूयास्म कृष्णोऽस्याखरेष्ठा[4] अग्नये घृतं भव वेदिरसि बर्हिषे त्वा जुष्टं प्रोक्षामि बर्हिरसि वेद्यै त्वा जुष्टं प्रोक्षामि स्वाहा पितृभ्यो घर्मपावभ्यः ॥ ११ ॥ Vgl. 4, 1, 12 und 13. — TS 1, 1, 10 (âjyagrahaṇam); Kâṭh. 1, 10 u. 11; Kap. S. 1, 10 u. 11; VS 1, 29—31; 2, 1; Mân. Çr. 1, 2, 5.

पूषा ते ग्रन्थिꣳ विष्यतु विष्णोः स्नुपोऽस्युरु प्रथस्वोर्णम्रदꣳ स्वासस्थं देवेभ्यो गन्धर्वोऽस विश्वावसुर्विश्वस्मादीषमाणो[5.6] यजमानस्य परिधिरिड ईडितः[7] इन्द्रस्य बाहुरसि दक्षिणो यजमानस्य परिधिरिड ईडितः मित्रावरुणौ [illegible] परिधत्तां यजमानस्य परिधिरसीड ईडितः[7] ॥

नित्यहोतारं त्वा कवे द्युमन्तः समिधीमहि ॥

वर्षिष्ठे अधि नाके पृथिव्याः सूर्यस्त्वा रश्मिभिः पुरस्तात्पातु कस्याश्चिदभिशस्त्या विश्वजनस्य विधृती स्थो वसूनाꣳ रुद्राणामादित्यानाꣳ सदोऽसि सुचाꣳ योनिर्द्यौरसि जन्मना जुहूर्नाम प्रिया देवानां प्रियेण नाम्ना ध्रुवे सदसि सीदान्तरिक्षमसि[8] जन्मनोपभृन्नाम प्रिया देवानां प्रियेण नाम्ना ध्रुवे सदसि सीद पृथिव्यसि

1) So M 1 u. 2; P सत्य. अभिघृतं ।; aber H, Bb u. B सत्याभिहितꣳ. 2) Hu. Bb धारयाꣳ. 3) So M 2 u. B; H u. Bb युयुध्वꣳ; aber M 1 यूयुध्वꣳ u. P ebenso, nur ohne Accent. Vgl. unten 1, 2, 16; 3, 10, 1. 4) P आखरेष्ठः । आखरेस्थ इत्याखरे. स्थः। 5) P विश्वावसुरिति विश्व. वसुः । 6) So M 2, H, Bb; P ईषमाणः; aber M 1 °दिषमाणो; B fehl. °दीपमाणो; TS विश्वस्माद्वीषतो; ebenso Kâṭh., nur ohne Accent; Kap. S. विश्वस्मादृषतो; VS 2, 3a विश्वस्मादिष्यै. 7) P इड्डः । ईडितः । 8) P. सीद् । अन्तरिक्षं । 9) P. उप. भृत् ।

जन्मना ध्रुवा नाम प्रिया देवानां प्रियेण नाम्ना ध्रुवे सदसि सीद ऋषभोऽसि शाक्करो वषट्कारस्य त्वा नाम्नायाऽसादयामि ॥ ध्रुवा[1] असदन्नृतस्य[2] योनौ सुकृतस्य लोके ता[3] विष्णो पाहि ॥ पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञन्यूम् ॥ विष्णुनि[4] स्थ वैष्णवानि धामानि स्थ प्राजापत्यानि ॥ १२ ॥ Vgl. 4, 1, 13.— TS 1, 1, 11 (idhmâbarhihsrucâm prokshaṇâdi) und 10; Kâṭh. 1, 11; Kap. S. 1, 11; VS. 2, 2—6; Mân. Çr. 1, 2, a. E. und 6.

सूयंमे[5] मे ऽद्य स्त[6] स्वावृतौ सूपावृता[7] अग्राविष्णू विजिहाथां मा मा हिꣳसिष्टं लोकं मे लोककृतौ कृणुतं मा मोदोषिष्टमात्मानं मे पातꣳ शिवौ भवतमद्य नो विष्णोः स्थामासीत[8] इन्द्रस्तिष्ठन्वीर्यमकृणोद्देवताभिः समारभ्य[9] ॥

ऊर्ध्वो अध्वरो दिविस्पृगहुतो यज्ञो यज्ञपतेः ।
इन्द्रवान्त्स्ववान्बृहद्भाः[10] ॥

वीहि मधोर्घृतस्य स्वाहा सं ज्योतिषा ज्योतिः ॥

वाजस्य मा [illegible] विनोद्भाभेणोदजियभत ।
अथा[11] सपत्नानिन्द्रो मे निग्राभेणाधरं[12] अकः ॥

उद्भाभश्च निग्राभश्च ब्रह्म देवं[13] अवीवृधत ।
अथा[14] सपत्नानिन्द्राग्नी मे विषूचीनान्व्यस्यताम् ॥

---

1) P. ध्रुवाः । 2) So das Verb ohne Accent in M 2 u. P.; dagegen असदꣳ in M 1., H u. Bb. 3) P ताः । 4) So M 1., H u. P; dagegen haben M 2, Bb u. B विष्णुनि, vergl. noch Âp. 2, 10, 7 u. a. bei Hillebrandt, das altindische Neu- und Vollmondsopfer, S. 72, Anm. 1. 5) So M 1 u. 2, H u. B; ebenso Mân. Çr. 1, 3, 1; P । सुयंमे इति सु-यंमे । 6) P । मे । अद्य । स्त । 7) So M 1 u. 2; P सूपावृता इति सु-उपावृतौ ।; H, Bb u. B सुपावृता 8) Der P löst ganz fehlerhaft auf । मा । मा । उ । दो । षिष्टं । während die Form doch von उष् c. उद् herkommt; s. Çat. Br. 1, 5, 1, 25 und vgl. in Kâṭh. u. Kap. S. मा मा सं ताप्तं 9) P स्थाम । असि । इतः । 10) So M 1 u. 2; P auch समारभ्येति सं । आरभ्य । Aber H, Bb u. B समारभ्यः ॥ Vgl. unten 4, 1, 14. 11) So M 1 u. 2; P बृहद्भा इति बृहत्-भाः ।; aber H u. Bb बृहद्भाः (vgl. TS 1, 1, 12). 12) M 1 अथो, vgl. Anm. 15. 13) So M 1 u. 2; aber H, Bb, B: °धराꣳ; P अधरान् । s. Vorr. 14) So M 1 u. 2; aber H, Bb u. B: देवाꣳ; P देवान् । 15) So alle Mss., auch M 1.

वसुरस्युपावसुरसि[1] विश्वावसुरस्यभ्रुभी[2.3] रिहाणा व्यन्तु वयो वशा पृश्निर्भूत्वा मरुतो गच्छ[4] ततो नो वृष्ट्यावत[5] ॥
स꣡ꣳस्रावभागाः स्थेषा बृहन्तः प्रस्तरेष्ठा[6] बर्हिषदश्च देवाः ।
इमा꣡ꣳ वाचमभि विश्वे गृणन्तः स्वाहा देवा अमृता मादयन्ताम् ॥
देवा गातुविदो गातुꣳ वित्त्वा गातुमित मनसस्पते सुधात्विमꣳ यज्ञं दिवि देवेषु वाते धाः स्वाहा ॥ १३ ॥ Vgl. 4, 1, 14. — TS 1, 1, 12 (âghârâu) und 13 (srugvyûhanâdi); Kâṭh. 1, 12; Kap. S. 1, 12; VS 2, 7—9; 17, 63 u. 64; Mân. Çr. 1, 3, 1—4.

॥ इति प्रथमकाण्डे प्रथमः प्रपाठकः ॥

आपो देवीः शुन्धत मा मधुमन्तं मधुमतीर्वयज्याये ॥
ओषधे त्रायस्वैनꣳ स्वधिते मैनꣳ हिꣳसीः
या ते शिवतमा तनूस्तयमु[illegible] ॥
देवश्रुदमाम्प्रवपे स्वस्त्युत्तरं[7] अशीय ॥
हिरण्यवर्णाः शुचयः पावकाः प्रचक्रमुर्हित्वावद्यमापः[8] ।
शतं पविचा विततान्यासु तेभिर्मो देवः सविता पुनातु ॥

1) So B (nur ohne Accent); H u. Bb lesen °स्रपावसुर°; M 1 u. 2 °स्रुपवसुर°; P उपवसुरित्युपवसुः । 2) P विश्वावसुरिति विश्व-वसुः । 3) P अभ्रुभिः । रिहाणाः । 4) P auffällig । मरुतः । अगच्छत् ।: vgl. aber auch TS 1, 1, 13, 1—2 u. Kap. S. 1, 12 (गच्छ). 5) So M 2, H u. Bb; der P वृष्ट्या । अवत ।, nur M 1 वृष्ट्यावत. 6) P प्रस्तरष्ठाः । प्रस्तरेस्था इति प्रस्तरेस्थाः । 7) M 1 u. 2 lesen उत्तरं (natürlich für उत्तरान° nach der Orthographie unserer Mss.); B fehlerhaft स्वस्त्वतरं; H u. Bb °त्युत्तर; der P । उत्तरं ।; der Sinn fordert eine Correctur in °त्तरमशीयod. °त्तराण्शीय (wie TS 1, 2, 1, 1 liest); dass aber der Fehler sehr alt sein muss, sehen wir aus Kâṭh. 2; 1: स्वस्त्युत्तरा꣡ꣳअशीय u. Kap. S. 1, 13: स्वस्त्युत्तरानशीय; auch Mân. Çr. 2, 1, 1 स्वस्त्युत्तरं आशीयेति; der P weist auf die Corr. °त्तरम°, doch fragt es sich, ob er nicht einfach den Saṃh. Text wiedergiebt. 8) So M 1; M 2, H, Bb u. B °मुरिहित्वा°; P । चक्रमुः । हित्वा ।

आपो मा मातरः सूदयन्तु घृतेन मा घृतप्वः[1] पुनन्तु ।
विश्वꣳ हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः[2] शुचिरा पूत एमि[3] ॥
विष्णोः शर्मासि शर्म मे यच्छ यजुषा मह्यां पयोऽस्यपामोषधीनाꣳ
रसो वर्चोधा असि वर्चो मे धेहि ॥ वृत्रस्यासि कनीनिका चक्षुषो
मे वयोधा अन्तरहं त्वया द्वेषो अन्तररातीर्दधे[4] महतां पर्वतेन
चक्षुष्पा असि चक्षुर्मे पाहि ॥ चित्पतिस्त्वा[5] पुनातु वाचस्पतिस्त्वा
पुनातु ॥

देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण ।
वसोः सूर्यस्य रश्मिभिः ॥

तस्य ते पवित्रपते पवित्रेण यस्मै कं पुने तञ्चकेयम् ॥ १ ॥ Vgl. 3, 6, 2 u. 3. — TS 1, 2, 1, (somakrayapraçnaḥ; prâcînavaṁçaçâlâkhyapraveçaḥ); Kâṭh. 2, 1; Kap. S. 1, 13; VS. 4, 1—4; Mân. Çr. 2, 1, 1.

आकूत्यै प्रयुजे अग्नये स्वाहा मेधायै मनसे अग्नये स्वाहा दीक्षायै
तपसे अग्नये स्वाहा [redacted] अग्नये स्वाहा ॥
आपो देवीर्बृहतीर्विश्वशंभुवो द्यावापृथिवी उरो अन्तरिक्ष ।
बृहस्पतिर्नो हविषा वृधातु ॥ स्वाहा ॥
विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् ।
विश्वो राय इषुध्यति द्युम्नꣳ वृणीत पुष्यसे ॥ स्वाहा ॥
ऋक्सामयोः शिल्पे स्थस्ते वामारभ[6] आ मोदिषः[7] पातꣳ विष्णोः
शर्मासि शर्म मे यछ नमस्ते अस्तु मा मा हिꣳसीः ॥

---

1) So M 1 (s. auch RV. 10, 17, 10); aber H, Bb u. P घृतप्वः (M 2 undeutlich). 2) P । इत् । 3) M 1 u. 2 येमि; ebenso Kap. S 1, 13! 4) So schreibe ich im Anschluss an M 2 u. P अंतः । अंरातीः ।: dagegen M 1 अंतरारातीं°; Hu. Bb अंतरारा°; B ebenso, nur ohne Accent, vgl. übrigens unten 1, 5, 1. 5) So alle Mss. in Uebereinstimmung mit Pâ. 6, 2, 19; nur der P. hat चित् पतिः ।; die Oxytonirung auch MS 3, 6, 3 (s. Ztschr. DMG XXXIII, S. 198). 6) P । आ । रभे । 7) P । मा । उदृच इत्युत् ऋचः ।

इमां धियꣳ शिक्षमाणस्य देव क्रतुं दक्षꣳ वरुण सꣳ शिशाधि।
ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावꣳ रुहेयम् ॥
सूर्याग्नी द्यावापृथिवी उरो अन्तरिक्षाप ओषधया[2] उप मा दीक्षायां दीक्षापतयो[3] हूयध्वं[v] देव सवितस्त्वं दीक्षाया[4] दीक्षापतिरसीत्थं मा सन्तं पाह्यूर्गस्याङ्गिरस्यूर्णम्रदा[5][v] ऊर्जं मयि धेहीन्द्रस्य योनिरसि[v] 5
गोपाय मा[v] नमस्ते अस्तु[v] मा मा हिꣳसीः ॥
कृषिꣳ सुसस्यामुत्कृषे सुपिप्पलां[6] ओषधीस्कृधि।
विषाणे विषूचीं[7] ग्रन्थिꣳ यदस्य गुष्पितꣳ हृदि मनो यदस्य गुष्पितम्॥
बृहन्नसि वानस्पत्यः[v] सुद्युम्नो द्युम्नꣳ यजमानाय धेहि[v] नक्षत्राणां मातीकाशात्पाहि[8] ॥ 10

आ वो देवास ईमहे वामं प्रयत्यध्वरे।
यज्ञो देवास आगुरि यज्ञियासो[9] हवामहे ॥
स्वाहा यज्ञं मनसः स्वाहा दिवः स्वाहा पृथिव्याः स्वाहोरोरन्तरिक्षात्स्वाहा वातात्परिगृह्णामि[v] स्वाहा॥ २॥ Vgl. 3,6,4. 5, 8. — TS1,2,2 vratasaṃ pâdanadîkshâ); Kâṭh. 2, 2 u. 3; Kâp. S. 1, 14—16; VS 4, 7—10. 5 u. 6; Mân. Çr. 2,1,2.

नक्षत्राणाꣳ सकाशान्मा[10] योषꣳ[v] व्रतं चरत ॥ 15

दैवीं धियं मनामहे सुमृडीकामभिष्टये।
वर्चोधाꣳ यज्ञवाहसꣳ सुतीर्था नो असद्वशे ॥
ये देवा मनुजाता[11] मनोयुजः[12] सुदक्षा दक्षपितरस्ते नो ऽवन्तु[v] ते नः पान्तु[v] तेभ्यः स्वाहा ॥

1) M 1 u. 2 धीयꣳ 2) So M 2; P । आपः । ओषधयः ।; M 1 liest °त्राप ओषधया; H, Bb u. B °त्रापः ॥ ओषधया 3) So M 1 u. 2, sowie P; dagegen in H u. Bb betont दीक्षापतयो 4) So M 1; P दीक्षायाः ।; aber M 2 दोक्षायां; in H, Bb u. B fehlt das Wort ganz. 5) P । आंगिरसी । ऊर्णम्रदा इत्यूर्ण-म्रदाः । 6) P सुपिप्पला इति सु-पिप्पलाः । 7) P वि । स्व । 8) P । मा । अतीकाशादित्यति-काशात् । 9) M 2 यज्ञीयासो. 10) P सकाशात्. 11) So alle Mss.; der P मनु-जाताः ।; dasselbe unten 3, 6, 9; Mân. Çr. 2, 1, 3; auch Kâṭh. 2, 4 u. Kap. S. 1, 16 मनुजाता; anders TS 1, 2, 3, 1 u. VS 4, 11. 12) So auch die verwandten Texte; nur Kâṭh. hat मनुयुजस्तु°.

शिवाः पीता भवत यूयमापो अस्माकꣳ योना उदरे सुशेवाः ।
इरावतीरनमीवा अनागसः शिवा नो भवत जीवसे ॥
कामो हविषा[1] मन्दिष्ठो ऽग्ने त्वꣳ सु जागृहि वयꣳ सु मन्दिषीमहि[2] ।
गोपाय नः स्वस्तये प्रबुधे नः पुनस्कृधि ॥
पुनर्मनः पुनरायुर्न आगात्पुनः[3] प्राणः पुनराकूतमागात्[4] ।
वैश्वानरो ऽदब्धस्तनूपा अपबाधतां दुरितानि विश्वा ॥
त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा[5] ।
त्वꣳ यज्ञेष्वीड्यो[6] व्रतमस्मासु धारय ॥
पूषा सनीनाꣳसोमो राधसांv[7] मा पृणन्पूर्त्या[8] विराधिष्टv मा[9] वयमायुषा
वर्चसा चv रास्वेयत्सोमा[10] भूयो भरv देवः सविता वसोर्वसुदावाv
वायुर्गोपास्त्वष्टाधिपतिःv पूषा प्रतिग्रहीता[11]v देवीरापो अपां नपाद्व
ऊर्मिर्हविष्मू[12] इन्द्रियावान्मदिन्तमस्तꣳ[13] वो मा क्रमिषꣳ[14]v यां पशूना-
मृषभे वाचस्ताः सूर्यो अग्ने शुक्रो अग्ने[15] ताः प्रहिणोमि यथाभागꣳ
वो अचv शिवा नः पुनरायन्तु वाचोv वायवे त्वा वरुणाय त्वाv
रुद्राय त्वा निर्ऋत्यै त्वेन्द्राय त्वा मरुद्भ्यस्त्वा ॥ ३ ॥ Vgl. 3, 6, 9. 10.— TS 1, 2, 3 (devayajanam); Kâṭh. 2, 4; Kap. S. 1, 19; VS 4, 11. 12. 14—16; Mân. Çr. 2, 1, 3.

1) H u. Bb lesen हविषा; übrigens beginnt der Vers offenbar eigentlich erst mit अग्ने त्वꣳ cet. (vgl. TS 1, 2, 3, 1 u. VS 4, 14), aber in unsern Mss. ist कामो cet. noch dazu gerechnet, was sowohl aus dem Trennungsstrich wie aus der Elision des अ von अग्ने hervorgeht. 2) So M 1 u. P; dag. M 2, H, Bb u. B: मंधिषी॰. 3) P । नः । आ । अगात् । 4) P आ । अगात् । 5) P देवः । आ । मर्त्येषु । आ ।; M 1 hat देव आ मर्तेष्वा; M 2 u. B देवा आमर्त्येष्वा; H u. Bb देवा अमर्त्येष्वा. 6) H u. Bb: ॰ष्वीड्यो; B ॰ज्यो. 7) Hier ist wohl ein Verbum des Spendens zu ergänzen; ebenso lautet die Stelle Kap. S. 1, 16; vgl. übrigens TS 1, 2, 3, 2. 8) P पर्त्या । 9) So M 1. 2 u. P; dag. haben H, Bb u. B माꣳ, vgl. übrigens TS 1, 2, 3, 2; Kâṭh. 2, 4: माहमायुषा वर्चसा वि राधिषि. 10) P । रास्व । इयत् । सोम । आ । 11) H u. Bb प्रतिगृहीता 12) P । ऊर्मिः । हविष्मूः । 13) M 2 u. P इंद्रीयावा॰. 14) So M 1 u. 2; P । तं । वः । मा । क्रमिषं ।; dagegen H, Bb u. B: मा क्रमीषꣳ; Kâṭh. 2, 4 liest मा क्रमिषँ; Kap. S. मा क्रमिषं; aber TS 1, 2, 3, 3 माव क्रमिषम् 15) Der P fehlerhaft सूर्यः । अग्ने । शुक्रः । अग्ने ।

इयं ते शुक्र तनूरिदं वर्चस्तया संभव भ्राजं गच्छ जूरसि धृता मनसा जुष्टा विष्णवे तस्यास्ते सत्यसवसः प्रसवे तन्वो यन्तमशीय स्वाहा शुक्रमसि चन्द्रमस्यमृतमसि वैश्वदेवमसि[1] चिदसि मनासि[2] धीरसि दक्षिणासि यज्ञियासि[3] क्षत्रियास्यदितिरस्युभयतःशीर्ष्णी[4] सा नः सुप्राची सुप्रतीची भव मित्रस्त्वा पदि बध्नातु पूषाध्वनः पात्विन्द्रायाध्यक्षायानु त्वा माता मन्यतामनु[5] पितानु भ्राता सगर्भ्यो ऽनु सखा सयूथ्यः सा देवि देवमछेहीन्द्राय सोम रुद्रस्त्वावर्तयतु स्वस्ति सोमसखा पुनरेहि वस्यसि[6] रुद्रास्यदितिरस्यादित्यासि चन्द्रासि रुद्रासि बृहस्पतिष्ट्वा सुम्ने रमणातु रुद्रो वसुभिरा चके पृथिव्यास्त्वा मूर्धन्नाजिघर्मि यज्ञिया[7] इडायास्पदे घृतवति[8] स्वाहासे रमस्वासे ते रायस्तव रायस्तव तव[9] रायो मा रायस्पोषेण वियौषम त्वष्टिमन्तस्त्वा[10] सपेम ॥ ४ ॥

Vgl. 3, 7, 5—7. TS 1, 2, 4 (somakrayaṇîgamanam) u. 5 (somakrayaṇîpadasaṃgrahaḥ); Kâṭh. 2, 5; Kap. S. 1, 17 u. 18; VS 4, 17—22; Mân. Çr. 2, 1, 3; 1, 4, 2.

सूर्यस्य चक्षुरारुहमग्नेरक्षणः[11] कनीनिकाम् ।
यदेतशेभिरीयसे[12] भ्राजमानो विपश्चिता ॥

---

1) nur M 1 विश्वदेवम°. 2) So M 1. 2; ebenso Mân. Çr. 2, 1, 3; M. Paddh. II S. 62. 65; Kap. S. 1, 17 u. TS 1, 2, 4, 1; VS 4, 19; der P मना । असि ।; aber H, Bb u. B haben मना असि u. Kâṭh. ebenso! 3) M 2 यज्ञीयासि चचीयास्य°. 4) Im P ist das Wort Oxytonon. 5) Im P das Verb ohne Accent; vgl. unten 1, 2, 15. 6) M 2 वस्वीयसि. 7) P fehlerhaft यज्ञिया (das Richtige wäre natürlich °चे). 8) M 2 °वती; auch P घृतवती इति घृतवति । 9) So M 1. 2, H, Bb; in B fehlt ein तव; in P beide betont; Kâṭh. 2, 5 auch तव तव; VS 4, 22 तोतो; TS 1, 2, 5, 2 तोते; cf. Pet. W. s. v. तोतस्. 10) So M 1 u. 2, sowie M. Paddh. II S. 23 u. Kap. S. 1, 18; aber H, Bb u. B त्वष्ट्रीम°; u. P त्वष्ट्रीमंत इति त्वष्ट्रि. मंतः ।; vgl. Pet. W. s. v. त्वष्टीमन्; Böhtl. Wört. s. v. त्वष्टीमती flg.; unten 3, 7, 7 lesen auch H, Bb u. B त्वष्ट्रि°. 11) So M 1 u. P; dagegen H, Bb, B °क्षणः; M 2 °क्षिणः. 12) alle Mss. °तसे°; nur P °तशे°.

अपि पन्थामगन्महि[1] स्वस्तिगामनेहसम्[2] ।
येन विश्वाः परि द्विषो[3] वृणक्ति विन्दते वसु ॥
आस्माकौ[4] ऽसि शुक्रस्ते ग्रहः स्वाहा त्वा विचिन्वः ॥
अभि त्यं देवꣳ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवसꣳ
रत्नधामभिं प्रियं मतिम्[5] ।
ऊर्ध्वो यस्यामतिर्भा[6] अदिद्युतत्सवीमनि[7] हिरण्यपाणिर-
मिमीत सुक्रतुः कृपा स्वः ॥
प्रजाभ्यस्त्वा प्रजास्त्वानुप्राणन्तु प्रजाः पाहि शुक्रं ते शुक्र शुक्रेण
चन्द्रं चन्द्रेणामृतममृतेन क्रीणामि देव सोम शक्र[8] यत्ते गोरसे ते
चन्द्राणि तपसस्तनूरसि प्रजापतेर्वर्णः सहस्रपोषं पुष्यन्ती[9] परमेण
पशुना क्रीयस्वास्मे[10] ते बन्धुः सुवाङ्भ्राडङ्कारे[11] बम्भारे ऽस्तरहस्त[12] कृशान[13]
एते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन् दुश्वक्षा वो मावक्रशत्[14]
॥ ५ ॥ Vgl. 3, 7, 7. — TS 1, 2, 6 (somonmânam) u. 7 (somakrayaḥ); Kâṭh. 2, 6; Kap. S. 1, 19; VS 4, 32. 29. 24—27; Mân. Çr. 2, 1, 3 u. 4.

---

1) In H u. Bb betont °न्महि. 2) So M 1 u. 2; in H u. Bb स्वस्ति गाम°; P sogar स्वस्ति। अगां। 3) M 1 liest द्वेषो; in M 2 eig. ebenso geschrieben, dann aber in द्विषो corrigirt. 4) So M 1. 2 u. B; aber H u. Bb अस्माकौ; P अस्माकः। 5) M 2 प्रियं मतिं. 6) P यस्य। अमतिः। भाः। 7) P सवीमनि। 8) So M 1. 2 u. P; in H u. Bb ohne Accent; es hängt dies Wort offenbar auch noch von क्रीणामि ab, vgl. übr. TS 1, 2, 7 u. VS 4, 26; Kap. S. liest auch शक्र 9) So M 1; H, Bb u. B पुष्यंति; in M 2 ursprünglich ebenso, dann ì eingeschoben, aber wieder gestrichen; P पुष्यतिं।; Kap. S. u. Kâṭh. पुष्यंती; vgl. auch TS 1, 2, 7. 10) M 1 पशुनाक्रिय°; M 2 पशूना क्रु°; B पशुनाक्री०; in Bb wohl °शु°; P पशुना। क्रीयस्व। Kap. S. पशूना क्रीयसे 11) So richtig in M 1 u. 2; vgl. Pet. W. s. v. नभ्राज् u. Pâ. 6, 3, 75; H u. Bb सुवाङ्गभ्राड°; B सुवांगभ्राङ्ड°; P ganz fehlerhaft सुवा। अस्तः। भाट्। अंधारे। M. Paddh. II S. 14 सुवाङ्गभाट्; Mân. Çr. 2, 1, 4 सुवाꣳ भाडित्यनुदिशति; Kâṭh. स्वान्नभाडांधारे; Kap. S. स्वान भाजंधारे; vgl. übrigens die Vorr.; s. unten 3, 7, 7 u. 3, 8, 10. 12) So M 1 u. 2; H, Bb u. B: °रहस्तः; P अ। हस्त। 13) P कृशानो। 14) M 1 u. 2 मावक्षत्; H u. B मावक्ष्यत्; Bb मवक्ष्यत्; P मा। वक्षत्।; vgl. übrigens unten 1, 2, 13 u. 1, 3, 9, sowie Vorr.

स्वजा असि स्वभूरस्यसे कर्मणे जातऽऋतेन त्वा गृह्णाम्यृतेन[2] नः पाहि[3] मित्रो ना एहि सुमित्रधः सह रायस्पोषेणेन्द्रस्योरुमाविश[4] दक्षिणमुशन्नुशन्त स्योनः स्योनम् ॥

उदायुषा स्वायुषोदोषधीना[5] रसेन ।
उत्पर्जन्यस्य धाम्नोदस्थाममृतं[6] अनु ॥ 5

उ३वन्तरिक्ष ३वीह्यदित्याः सदा आसीद ॥

अस्तभ्नाद् द्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्याः ।
आसीदद्विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि ॥
वनेषु ३व्यन्तरिक्षं ततान वाजमर्वत्सु पयो अघ्यासु ।
हृत्सु क्रतु वरुणं दि३क्ष्वग्निं दिवि सूर्यमदधात्सोममद्रौ ॥ 10

धूरसि धूर्व धूर्वन्त यो अस्मान्धूर्वाद्य[7] वयं धूराम तं धूर्व ॥ वारुणमसि वरुणस्त्वोत्तभ्नातु[8] वरुणस्य स्कम्भो ऽसि ॥

प्रच्यवस्व भुवनस्पते[9] विश्वान्यभि धामानि ।
मा त्वा परिपरिणो मा परिपन्थिनो मा त्वा वृका अघायवो[10] विदन् ॥ 15

श्येनो भूत्वा परापत यजमानस्य नो गृहे स सुकृतम् । देवेभ्यः सुत्यायै ॥

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत ।
दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शंसत ॥

---

1) P जातः । 2) H, Bb u. B गृहणा°. 3) H u. Bb पाहि. 4) सह रायस्पोषेण fehlt im P. 5) So betone ich im Hinblick auf TS 1, 2, 8, 1; VS 4, 28; und gestützt auf den P । सु-आयुषा ।; die Mss. schwanken; M 1 स्वायु°; M 2 स्वायुं°; H u. Bb स्वायु°. 6) P अमृतान् । 7) So M 1; P ध्वरात् । यं ।; M 2 ध्वराज्यं°; H, Bb u. B ध्वरा यं°; cf. oben 1, 1, 4. 8) P उत् । स्तभ्नातु । 9) P भुवः । पते । 10) P अघायवः । अघयव इत्यघ-यवः ।

वारुणमसि ᵛ वरुणस्त्वोत्तभ्नातु ᵛ वरुणस्य स्कम्भसर्जनमसि ॥ विचृत्तो वरुणस्य पाशः ᵛ प्रत्यस्तो वरुणस्य पाशो ᵛ नमो वरुणस्य पाशायाग्नेस्तनूरसि ᵛ विष्णवे त्वा ᵛ सोमस्य तनूरसि ᵛ विष्णवे त्वातिथेरातिथ्यमसि ᵛ विष्णवे त्वाग्नये त्वा रायस्पोषदे ᵛ विष्णवे त्वा ᵛ श्येनाय त्वा सोमभृते ᵛ विष्णवे त्वा ᵛ वारुणमसि ᵛ वरुणो ऽसि धृतव्रतो ᵛ वरुणस्य ऋतसदनमासीद ᵛ वरुणाय त्वा ॥ ६ ॥ Vgl. 3, 7, 8. 9. — TS 1, 2, 8 (somasya çakaṭârôpaṇam) u. 9 (âropitasya somasya prâcînava ᵛ çam prati gamanam) u. 10 (âtithyeshṭiḥ); Kâṭh. 2, 7; Kap. S. 1, 19 u. 2, 1; VS 4, 27. 28. 30. 31. 34—36; 5, 1; Mân. Çr. 2, 1, 4. 5.

अग्नेर्जनित्रमसि ᵛ वृषणौ स्थ[1] ᵛ उर्वश्यस्यायुरसि ᵛ पूरूरवा[2] असि ᵛ गायत्रमसि ᵛ त्रिष्टुबसि ᵛ जगदसि ॥ भवतं नः समनसौ समोकसौ सचेतसा अरेपसौ॥ मा यज्ञं हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ ᵛ शिवौ भवतमद्य नः ॥ अमा[3] अग्निश्चरति प्रविष्टा[4] ऋषीणां पुत्रो अधिराज[5] एषः ॥ तस्मै विधेम हविषा वयं ᵛ मा देवानाꣳ यूयुपाम[6] भागधेयम् ॥ आपतये त्वा गृह्णामि[7] ᵛ परिपतये त्वा गृह्णामि[8] ᵛ तनूनप्त्रे शक्मने शाक्वराय शक्मना[10] ओजिष्ठायानाधृष्टमस्यनाधृष्य[11] देवानामोजः ॥ अभिशस्तिपा अनभिशस्तेन्यम्॥ अनु म इदꣳ व्रतꣳ व्रतपतिर्मन्यतामनु दीक्षां दीक्षापतिरृक्षसा ᵛ सत्यमुपागाꣳ ᵛ सुविते मा धा[12] ᵛ अग्ने व्रतपते या मम तनूरेषा सा त्वय्यग्ने व्रतपते या तव तनूरियꣳ सा मयि ᵛ सह नौ व्रतपते व्रतिनोर्व्रतान्यꣳशुरꣳशुष्टे देव सोमापायतामिन्द्रायैकधनविदा[13] ᵛ आ त्वमिन्द्राय प्यायस्वा[14] तुभ्यमिन्द्रः प्यायतामापायय

---

1) P स्थः ।; H, Bb u. B irrig स्था 2) B पुरूरवा; P पुरूरवाः ।; M 1. 2, Bb पुरुरवा 3) P अमौ । 4) P प्र. विष्टः । 5) P अधि. राजः । 6) So M 1, H, Bb u. P; aber M 2 युयुपाम; B सूयुपाम 7) H, Bb u. B गृहणामि 8) H u. Bb गृहणामि; B गृहाणामि. 9) M 2 u. B तनुनप्त्रे । 10) P शक्मने । 11) P ओजिष्ठाय । अनाधृष्ट । 12) P धाः । 13) P एकधन. विदे । 14) P प्यायस्व । आ ।

संखीनसन्या मेधया स्वस्ति ते देव सोम सुत्यामशीय[1] स्व३रुत्युद्यचमेष्टा[2] रायाः[3] एष्टा[4] वामानि[5] प्रेषे[6] भगाय ऋतमृतवादिभ्यो नमो दिवे नमः पृथिव्यै ॥

या ते अग्ने ऽयाशया[7] तनूर्वर्षिष्ठा गहनेष्टा।
त्वेषं वचो अपावधीरुग्रं[8] वचो अपावधीः ॥ स्वाहा ॥ 5

या ते अग्ने रजाशया[9] या ते अग्ने हराशया[10] या ते अग्ने रुद्रिया[11] तनूस्तया नः पाहि तस्यै ते स्वाहा ॥ ७ ॥ Vgl. 3, 7, 10; 3, 8, 2; 3, 9, 5. — TS 1, 2, 10 (âtithyeshṭih) u. 11 (upasadaḥ); Kâṭh. 2, 8; Kap. S. 2, 2 u. 3; VS 5, 2—8; Mân. Çr. 1, 7, 1; 2, 2, 1.

तन्नायनी[12] मे ऽसि वित्तायनी[13] मे ऽस्यवतान्मा[14] नाथितमवताद्व्यथितमग्ने अङ्गिरो ३यो ऽस्यां पृथिव्यामध्यस्यायुना नाम्नेहि[15] वसवस्त्वा हरन्तु गायत्रेण छन्दसा वित्स्व[16] यज्ञपतेर्यत्ते ऽनाधृष्टं धामानाधृष्यं 10
तेन त्वादधे[17] ऽग्ने अङ्गिरो यो द्वितीयस्यां पृथिव्यामध्यस्यायुना नाम्नेहि[16] रुद्रास्त्वा हरन्तु त्रैष्टुभेन छन्दसा वित्स्व[16] यज्ञपतेर्यत्ते ऽनाधृष्टं धामानाधृष्यं तेन त्वादधे[17] ऽग्ने अङ्गिरो यस्तृतीयस्यां पृथिव्यामध्यस्यायुना नाम्नेह्यादित्यास्त्वा[16] हरन्तु जागतेन छन्दसा वित्स्व[16] यज्ञपतेर्यत्ते ऽनाधृष्टं धामानाधृष्यं तेन त्वादधे विदेरग्ने[18] 15

1) So M 1, 2 u. P; aber H, Bb u. B सुत्यम°. 2) So lese ich mit M 1; vgl. auch Ait. Br. 1, 26; Kâṭh. 2, 8 स्वस्त्युदृचमे cet., wo offenbar nur der U-Strich fehlt; aber M 2 स्व३स्त्यौदृचमे°; H, Bb u. B स्व३रत्यौदृचेमे°; P स्वस्ति। आ। उदृचमित्युत्-ऋचं। 3) P एष्टा इत्या-इष्टाः। रायः। 4) So M 1. 2; aber B एष्या; Bb ऐष्या; P एष्टा इत्या-इष्टा। 5) H, Bb u. B वामनि. 6) P प्र। इषे। 7) So auch TS 1, 2, 11, 2, Kâṭh. 2, 8 u. Kap. S. 2, 3; M 2 liest यत्राशया; P अयत्राशयेत्यय-आशया। 8) P अप। अवधीः। 9) P रज आशयेति रज-आशया। 10) P हराशयेति हरा-आशया। 11) M 1 u. 2 रुद्रीया. 12) P तन्नायनीति तन्न-अयनी। 13) P वित्त-अयनी। 14) P अवतात्। 15) P नाम्ना। आ। इहि। 16) Im P ohne Accent. 17) P त्वा। आ। दधे।; H, Bb u. B elidiren das अ von अग्ने nicht; aber der Accent in H u. Bb त्वादधे deutet schon auf die correcte Lesung, die sich auch in M 1 u. 2 findet. 18) P विदेः। अग्नेः।; Kap. S. 2, 3 liest विदेदग्निर्नभो; ebenso VS 5, 9 (bis auf den Accent in नभो); vgl. unten 3, 8, 5.

नभो नाम यज्ञे सि॰हीरसि महिषीरसि देवेभ्यः शुन्धस्व देवेभ्यः शुम्भस्वेन्द्रघोषास्त्वा[1] पुरस्ताद्वसुभिः पान्तु पितरस्त्वा मनोजवा दक्षिणतः पान्तु रुद्रास्त्वा प्रचेतसः पश्चात्पान्तु विश्वकर्मा त्वादित्यैरुत्तरात्पातु सि॰हीरसि सपत्नसाही स्वाहा सि॰हीरसि रायस्पोषवनिः स्वाहा सि॰हीरसि सुप्रजावनिः स्वाहा सि॰हीरस्यादित्यवनिः सजातवनिः स्वाहा सि॰हीरस्यावह देवान्देवायते यजमानाय स्वाहा भूतेभ्यस्त्वा विश्वायुरसि पृथिवीं द्ँह ध्रुवक्षितिरस्यन्तरिक्षं द्ँहाच्युतक्षिदसि दिवं द्ँहाग्नेर्भस्मास्यग्नेः पुरीषमस्यग्नेः कुलायमसि ॥

विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपता[3] अविहुतम् ।
वातजूतो[4] यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा विराजति॥८॥

Vgl. 3, 8, 5. — TS 1, 2, 12 (uttaravedih); Kâṭh. 2, 9; Kap. S. 2, 3; VS 5, 9—13; 33, 30; Mân. Çr. 1, 7, 3.

देवश्रुतौ देवेष्वाघोषेथाम् ॥
युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः।
वि होत्रा[5] दधे वयुनाविदेका[6] इन्मही देवस्य सवितुः परिष्टुतिः॥
अप जन्यं भयं नुद मा चक्रा आवृत्सत[7] ।
गृहं॰ सोमस्य गछतं गछतिन्द्रस्य निष्कृतम् ॥
इदं॰ विष्णुर्विचक्रमे त्रेधा निदधे पदा ।
समूढमस्य पा॰सुरे ॥
इरावती धेनुमती हि भूत॰ सूयवसिनी[8] मनवे यशस्ये[9] ।

1) P इन्द्र॰घोषाः। 2) So M 1. 2 u. Bb (ebenso unten 3, 8, 5); in H ohne Accent; P irrig देवाय। ते। 3) P यज्ञ॰पती। 4) So M 1 u. 2; P वात॰जूतः।; aber H, Bb u. B: वातयुतो 5) P होत्राः। 6) P एकः। 7) So M 1 u. H; M 2 चक्रा आवृक्त; Bb आवृत्सत; B अवृत्सत; P चक्रा। आ वृत्सतः। 8) P सूयवसिनी इति सु॰यवसिनी। 9) P यशस्ये।

व्यूष्कभ्ना[1] रोदसी विष्ण एतं दाधर्थ पृथिवीमभितो मयूखैः ॥
सुवागावद देव दुर्यं[3] अरिष्यन्नरिषतः ॥
आ नो वीरो जायतां कर्मण्यो ऽभिशस्तिपा अनभिशस्तेन्यः[4] ।
यं बहवो ऽनुजीवान्यो बहूनामसद्वशी ॥
वैष्णवमसि विष्णुस्त्वोत्तभ्नातु ॥ 5
दिवो[5] विष्ण[6] उत वा पृथिव्या उरोर्वा विष्णो बृहतो अन्तरिक्षात्।
हस्तौ पृणस्व बहुभिर्वसव्यैरा[7] प्रयच्छ दक्षिणादोत[8] सव्यात् ॥
विष्णोर्नु क वीर्याणि प्रवोच यः पार्थिवानि विममे रजाꣳसि।
यो अस्कभायदुत्तरꣳ सधस्थ विचक्रमाणस्त्रेधोरुगायः ॥
विष्णोः पृष्ठमसि विष्णो रराटमसि विष्णोः शिप्रे[9] स्थो विष्णोः 10
स्नूरसि[10] विष्णोर्ध्रुवो ऽसि वैष्णवमसि विष्णवे त्वा ॥
प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति[11] भुवनानि विश्वा ॥ ९॥

Vgl. 3, 8, 7.— TS 1, 2, 13 (havirdhânamaṇḍapanirmâṇam); Kâṭh. 2, 10; Kap. S. 2, 4; VS 5, 14—21; Mân. Çr. 2, 2, 2.

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामादद[12]
ऽभिरसि नारिरसीदमहꣳ रक्षसो ग्रीवा अपिकृन्तामीदमहꣳ यो मे 15
समानो यो ऽसमानो ऽरातीयति[13] तस्य ग्रीवा अपिकृन्तामि बृहन्नसि
बृहद्राया[14] बृहतीमिन्द्राय वाचꣳ वद रक्षोहणꣳ वलगहनꣳ वैष्णवीꣳ

1) P वि । अस्कभ्नाः । 2) P विष्णो इति विष्णोः ।; M 2 विष्णु एतं । 3) M 1 दुर्यꣳ; die andern Mss. दुर्यं; auch der P auffälligerweise, da er vielmehr दुर्यान् lesen müsste. 4) M 2 u. P °तेन्यूः । 5) Hier fordert das Metrum Einfügung eines वा, welches aber die Mss. nicht bieten, vgl. TS 1, 2, 13, 2; VS 5, 19. 6) P विष्णो इति विष्णो । 7) So M 1; P आ । प्र । यच्छ ।; s. TS 1, 2, 13, 2 u. VS 5, 19; H, Bb u. B lesen °रात्प्रयच्छ; M 2 °राट् प्र° । 8) P आ । उत । 9) H, Bb u. B सिप्रे; Kâṭh. शृप्रेः Kap. S. wie VS 5, 21 शृप्रे; TS 1, 2, 13, 3 शृन्यप्रे । 10) So M 1; P स्नूः ।; ebenso Mân. Çr. 2, 2, 2; aber M 2, H, Bb u. B: स्नुरः; ebenso Kap. S.; aber Kâṭh. सूरः । 11) M 1 u. 2 क्षीयन्ति । 12) B °दधे. 13) P अरातीयति। 14) So M 1. 2, Bb, H u. B; P: बृहद्राया इति बृहत् । रायाः ।; dieselbe Form MS 3, 8, 8; Mân. Çr. 2, 2, 3 बृहन्नसि बहद्राय इति; dagegen TS 1, 3, 2, 2 u. Kâṭh. 2, 11 बृहद्वावा; VS 5, 22 u. Kap. S. 2, 5 बृहद्वा

सम्राडसि सपत्नहेदमहं तान्वलगानुड्वपामि यान्मे समानो यानसमानो निचखान यं कुल्फदग्ने निरस्तो वलगः स्वराडस्यभिमातिहेदमहं तान्वलगानुड्वपामि यान्मे सजातो यानसजातो निचखान यं जानुदग्ने निरस्तो वलगो विराडसि रक्षोहेदमहं तान्वलगानुड्वपामि यान्मे सबन्धुर्यानसबन्धुर्निचखान यं नाभिदग्ने निरस्तो वलगः सचराडस्यशस्तिहेदमहं तान्वलगानुड्वपामि यान्मेभ्रातृव्यो यानभ्रातृव्यो निचखान यं अंसदग्ने निरस्तो वलगः सर्वराडस्यरातीयतो[3] हन्तेदमहं तान्वलगानुड्वपामि यान्मे सजन्यो यानसजन्यो निचखान यं शीर्षदग्ने निरस्तो वलगः ॥

संमृश इमानायुषे वर्चसे च देवानां निधिरसि द्वेषोयवनः[4]।
युयोऽध्यस्मद्द्वेषाꣳसि[5] यानि कानि च चकृम ॥
देवानामिदं निहितꣳ यदस्त्यथाभाहि[6] प्रदिशश्चतस्रः।
कृणवानो अन्यं[7] अधरान्सपत्नान्॥ १० ॥ Vgl.3,8,8. — agnîshomîyapaçupraçnaḥ in TS 1,3,1 (sadonirmâṇam) u. 2 (havirdhânagatoparavanirmâṇam); Kâṭh. 2,11; Kap. S. 2,5; VS 5,22—24; Mân. Çr. 2,2,3; 1,8,2.

पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वा शुन्धन्तां लोकाः पितृषदना यवो ऽसि यवय[8] द्वेषो अस्मद्ययारातिं[9] पितृषदनं त्वा लोकमवस्तृणामि ॥

उच्छ्रयस्व वनस्पते सजूर्देवेन बर्हिषा।
नितानस्त्वा मारुतो निहन्तु मित्रावरुणौ ध्रुवेण धर्मणा ॥

1) H, Bb °दग्ने. 2) H u. Bb संजातो. 3) So M1u.2; P अरातीयतः।; H u. Bb अरातीयतो। 4) So M1u.2; Bb द्वेषो यवनः; P auch। यवनः।, ob er aber द्वेषः। liest, oder ohne Accent, ist undeutlich. 5) Im P युयोधि। ohne Accent. 6) P अथ। आ। भाहि। 7) P अन्यान्। 8) So M 1; in M2 eig. यावय geschrieben, aber in यवय corr.; H, Bb u. B यावय।; P यावयं।; TS 1,3,1,1 liest यवय; ebenso Kap. S. u. VS 5,26; aber Kâṭh. यावय; vgl. übr. unten 1,2,14. 9) So M 1, H, Bb u. B; in M2 wie oben; P यावय।; TS u. VS यवय; Kâṭh. u. Kap. S. यावय; MPaddh.II S.52 यवयारातिं

ब्रह्मवनिं त्वा क्षत्रवनिं पर्यूहामि ब्रह्म दृꣳह क्षत्रं दृꣳह रायस्पोषं दृꣳह प्रजां दृꣳह सजातानस्मै[1] यजमानाय दृꣳह ॥ घृतेन द्यावापृथिवी आपृण विश्वजनस्य छायासि ॥

परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः ।
वृद्धायुमनु वृद्धयो जुष्टा[2] भवन्तु जुष्टयः[3] ॥ 5

इन्द्राय त्वेन्द्रस्य स्यूरसीन्द्रस्य[4] ध्रुवो ऽस्यैन्द्रमसीन्द्राय त्वा रक्षोघ्नो वो वलगघ्नः प्रोक्षामि वैष्णवान् रक्षोहणं त्वा वलगहनमवसिञ्चामि वैष्णवꣳ रक्षोहणं त्वा वलगहनमवस्तृणामि वैष्णवꣳ रक्षोघ्नी वाꣳ वलगघ्नी उपदधामि वैष्णवी रक्षोघ्नी वाꣳ वलगघ्नी पर्यूहामि वैष्णवी रक्षोहणं त्वा वलगहनमास्तृणामि वैष्णवम् ॥ ११ ॥ 10

Vgl. 3, 8, 9. — TS 1, 3, 1 u. 2 (s. oben); Kâṭh. 2, 12; Kap. S. 2, 6; VS 5, 26—30. 25; Mân. Çr. 2, 2, 3; 1, 8, 2.

विभूरसि प्रवाहणो वह्निरसि हव्यवाहनः श्वात्रो ऽसि प्रचेतास्तुथो ऽसि विश्ववेदा अवस्युरसि[5] दुवस्वानङ्गारिरसि[6] बम्भारिरꣳ[6]शिगसि कविः शुन्ध्युरसि माजालीयः सम्राडसि कृशानुः परिषद्यो ऽस्यास्त३व्यो[7] नभो ऽसि प्रतक्वासंमृष्टो[8][9] ऽसि हव्यसूदनः सगरो ऽसि विश्ववेदा ऋतधामासि[10] स्वर्ज्योतिः[11] समुद्रो ऽसि विश्वव्यचा ऋ३जो ऽस्येकपादहिरसि बुध्नयः कव्यो[12] ऽसि कव्यवाहनो रौ- 15

1) P ऋक्षी । ohne Accent. 2) P जुष्टाः। 3) So nur im P, doch ist dies die richtige Form; die andern Mss. betonen जुष्टयः 4) M 2, H, Bb u. B स्युर° nur M 1 स्यूर°; P स्यूः।; vgl. oben 1, 2, 9. 5) So M 1 u. 2, H u. Bb; dagegen B अवस्यूर° u. P अवस्यूरित्यव. स्यूः।; TS, Kâṭh. u. Kap. S. lesen अवस्युर°; aber VS 5, 32 अवस्यूर° 6) Diese Betonung findet sich freilich nur im P अङ्गारिः। und बंभारिः।, aber die Vergleichung mit TS, Kap. S. u. VS 5, 32 erweist sie als die richtige; in den andern Mss. der MS sind diese Wörter Paroxytona. 7) P आ. स्तव्यः। 8) P प्र. तक्वा। 9) P सं. मृष्टः।; vielleicht auch in M 2 oxytonirt; vgl. übr. असंमृष्टो in TS; असंमृष्टो in Kap. S.; प्रतक्व सम्मृष्टो in Kâṭh. 10) M 2 eig. ऋतुधामा, dann corr.; auch Kap. S. ऋतुधामा. 11) P स्वर्ज्योतिरिति स्वः. ज्योतिः। 12) M 2 बुध्न कव्यो u. ebenso betont Kap. S.

द्रेणानीकेन पाहि माग्ने ऽपिपृहि मा ऽनमस्ते अस्तु मा मा हिꣳसीः ॥ १२ ॥ Vgl. 3, 8, 10. — TS 1, 3, 3 (dhishṇiyâḥ); Kâṭh. 2, 13; Kap. S. 2, 7; VS 5, 31—34; Mân. Çr. 2, 2, 4.

त्वꣳ सोम तनूकृद्भ्यो द्वेषोभ्यो ऽन्यकृतेभ्यः ।
उरु यन्तासि वरूथम् ॥ स्वाहा ॥
जुषाणो अप्तुराज्यस्य वेतु ॥ स्वाहा ॥
अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो[2] भूयिष्ठां ते नमउक्तिꣳ विधेम ॥
उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि ।
घृतं घृतवने पिब प्र प्र यज्ञपतिं तिर ॥ स्वाहा ॥
एवा[3] वन्दस्व वरुणं बृहन्तं नमस्या धीरममृतस्य गोपाम् ।
स नः शर्म त्रिवरूथꣳ वियꣳसत्पातं नो द्यावापृथिवी उपस्थे ॥
उ३वन्तरिक्षꣳ ३वीह्यदित्याः सदा आसीद देव सवितरेष ते सोमस्तꣳ रक्षस्व मा त्वा दभन् दुश्वक्षास्ते मावक्शदेतत्त्वं[4] देव सोम देवानुपावृत[5] इदमहं मनुष्यान्त्सह रायस्पोषेण प्रजया चोपावर्ते[6] नमो देवेभ्यः स्वधा पितृभ्यो निर्वरुणस्य पाशादमुष्मि स्वरभिव्यृक्शं[7] ज्योतिर्वैश्वानरमग्ने व्रतपते या तव तनूर्मय्यभूदेषा सा त्वय्यग्ने व्रतपते या मम तनूस्त्वय्यभूदियꣳ सा मयि पुनर्नौ व्रतपते व्रतिनोव्रतानि यथायथं नौ व्रतपते व्रतिनोव्रतानि वि व्रतानि सृजावहै ॥ १३ ॥ Vgl. 3, 9, 1. — TS 1, 3, 4 (dhishṇiyâḥ); Kâṭh. 3, 1; Kap. S. 2, 8; VS 5, 35. 36. 38—40; Mân. Çr. 2, 2, 4.

---

1) H, Bb u. B तनु°. 2) P युयोधि। अस्मत्। 3) P एवं। 4) So liest M 2; dagegen M 1 मावक्षदे°; H, Bb u. B मावक्ष्यदे°; P मा। वक्षत्। ; vgl. Vorr. 5) P उपावृत इत्युप.आवृतः।; M 1 °नुपावृत्त 6) P उप.आवर्ते। 7) M 1 स्वरभिर्व्यृक्शꣳ°; auch Mân. Çr. 2, 2, 4 स्वरभिर्व्यृक्शम°; M 2 स्वरभिर्व्यृक्शं; H u. B स्वरभिर्व्यृक्ष्यं; Bb स्वरभिव्यृक्ष्य; P अभि। वि। अक्शं।; Kâṭh. u. Kap. S. स्वरभिव्यक्शं; vgl. Vorr.

अत्यन्यानगां नान्यानुपागामविक्षा परो ऽवरेभ्यो ऽविदं[1]
तं त्वा जुषामहे देवयज्यायै जुष्टꣳ विष्णवे विष्णवे त्वा ॥
उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि।
घृतं घृतवने पिब प्र प्र यज्ञपतिं तिर ॥ स्वाहा ॥
ओषधे चायस्वैनꣳ स्वधिते मैनꣳ हिꣳसीः। 5
या ते शिवतमा तनूस्तयैनमुपस्पृश ॥
यं त्वामयꣳ स्वधितिस्तिग्मतेजाः प्रणिनाय महते सौभगाय।
दिवमग्रेण मा हिꣳसीरन्तरिक्षं मध्येन पृथिव्या संभव भ्राजं गच्छ।
वनस्पते शतवल्शो[2] विरोह सहस्रवल्शा[2] वि वयꣳ रुहेम ॥
पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वा सुन्वन्तां लोकाः पितृषदना यवो 10
ऽसि यवयास्मद्द्वेषो अस्मद्रयावयारातिं[4] पितृषदनं त्वा लोकमवस्तृणामि॥
स्वावेशो[5] ऽस्यग्नेर्गा नेतृणामधि[6] त्वा स्थास्यति तस्य वित्स्व ॥ घृतेन
द्यावापृथिवी आपृण देवस्त्वा सविता मध्वानक्तु॥ इन्द्रस्य चषालम-
सि सुपिप्पला[7] ओषधीस्कृधि दिवमग्रेणोत्तभानान्तरिक्षं मध्येनापृण
पृथिवीमुपरेण[8] हꣳह ॥ 15
ता ते धामान्युश्मसि गमध्यै[9] गावो यत्र भूरिशृङ्गा अयासः।
अत्राह[10] तदुरुगायस्य विष्णोः परमं पदमवभाति भूरि ॥
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे।
इन्द्रस्य युज्यः सखा ॥

1) P अविद्।; s. 3, 9, 2 ऽविदम्॰ 2) So M 1; P शत॰ वल्शः। u. सहस्र॰ वल्शाः।; aber M 2, H, Bb u. B lesen ॰वलिशो u. ॰वलिशा; s. oben 1, 1, 2; Kâṭh. 3, 2 u. TS 1, 3, 5, VS 5, 43 lesen wie M 1; dagegen Mân. Çr. 1, 3, 1 u. Kap. S. 2, 9 wie die andern Mss. 3) So M 1 u. wohl auch in M 2 so corrigirt; ebenso TS 1, 3, 6; Kap. S. 2, 10; VS 6, 1; dagegen H, Bb, B u. P यावय; ebenso Kâṭh. 3, 3. 4) So M 1. 2, H, Bb u. B; nur P यावय। अरातिं।; Kâṭh. und Kap. S. lesen wie P; aber TS u. VS wie die andern Mss. 5) M 1 ॰वेशो; P सु॰ आवेशः। 6) So M 1 u. P; aber H, Bb u. B नेतृ॰ 7) P सु॰ पिप्पलाः। diese Form auch MPaddh. II, S. 5. 8) H u. Bb ॰मपरेण. 9) So M 1 u. P, Kap. S. u. VS; dagegen B u. Bb गमध्यै wie Kâṭh. u. TS. 10) P अत्र। अह।

ब्रह्मवनिं त्वा क्षत्रवनिं पर्यूहामि ब्रह्म दꣳह क्षत्रं दꣳह रायस्पोषं दꣳह प्रजां दꣳह सजातानस्मै यजमानाय दꣳह ॥

तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः।
दिवीव चक्षुराततम् ॥

परिवीरसि परि त्वा दैवीर्विशो व्ययन्तां परीमꣳ यजमानं मनुष्याः[1] सह रायस्पोषेण प्रजया च व्ययन्तां दिवः सानूपेष[2] दिवं ते धूमो गच्छत्वन्तरिक्षं ज्योतिः पृथिवीं भस्म स्याहा ॥ १४ ॥ Vgl. 3,9,2—4. — TS 1,3,5 (yûpachedaḥ) und 6 (yûpasthâpanam); Kâṭh. 3,2 u. 3; Kap. S. 2,9 u. 10; VS 5, 42. 41. 43; 6,1—6; Mân. Çr. 1,8,1. 2.

इषे त्वोपावीरस्युपो[3.4] देवान्दैवीर्विशः प्रागुर्वहूय[5] उशिजो बृहस्पते धारया[6] वसूनि हव्या ते स्वदं[7] देव त्वष्टर्वसु रणे[8] रेवती[9] रमध्वं देवस्य त्वा सवितुः प्रसꣳवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ऋतस्य त्वा देवहविः[10] पाशेन प्रतिमुञ्चाम्यसौ मुष्मै त्वा जुष्टं धर्षा[11] मानुषा[12] अद्भ्यस्त्वौषधीभ्यो जुष्टं प्रोक्षाम्यग्नेः त्वा माता मन्यतामनु

1) Nur der P hat hier das Richtige: मनुष्टाः। die andern Mss. °ष्टान्सह oder °ष्टात्सह; vgl. TS 1, 3, 6, 2, wo ebenfalls Nom. pl. steht; ganz anders Kap. S. 2, 10 परीमं रायो मनुष्यम°; u. VS 6, 6 परीमं यजमान रायो मनुष्टाणां 2) So M 1 u. 2; ebenso Mân. Çr. 1, 8, 2; MPaddh. II, S. 53; P सानू। पेष।, welche Trennung offenbar unrichtig ist; wir lösen vielmehr auf in सानु। उप। इष।, was genau mit dem Accent in M 1. 2 stimmt, und übersetzen: „zu des Himmels Rücken strebe auf!“ Vgl. Böhtl. W., Nachtrag zum 2. Th., s. v. इष् c. उप; Hu. Bb सानुपेष; B सानुषेष; vgl. aber auch Kâṭh. 3, 3 अन्तरिक्षस्य सानूपेष; Kap. S. 2, 10 नानूपेष; anders TS 1, 3, 6, 2 u. VS 6, 6. 3) So M 2; P उप. अवीः।: aber M 1, H, Bb u. B °पावीर°. 4) P उप। उ। 5) P प्र। अगुः। 6) P धारय। 7) P स्वदम्।; Kap. S. 2, 11 auch स्वदं; aber TS 1, 3, 7, 1 u. VS 6, 7 स्वदन्ताम्; Kâṭh. 3, 4 अस्वदन्. 8) So alle Mss.; P वसु रणे।, also zwei Worte; Kâṭh. 3, 4 u. Kap. S. 2, 11 lesen वसु रण; TS 1, 3, 7, 1 वसु रख; Sây. sieht auch zwei Worte darin u. erklärt रख durch रमनीयं कुरु (s. Webers Ausg. S. 30 Anm.); VS 6, 7 वसु रम. 9) P रेवतीः। 10) P देवहविरिति देव. हविः। 11) P धर्ष।; M 2 धरिषा; Kap. S. 2, 11 धरिर्षा; Kâṭh. 3, 5 वर्षा; VS 6, 8 u. TS 1, 3, 8, 1 धर्षा; unten 3, 9, 6 auch धर्षा; desgleichen MPaddh. II S. 54. 133. 148, nur ohne Accent. 12) So alle Mss.; P मानुषः।; dasselbe MPaddh. II S. 54. 148; auch Kap. S. 2, 12 मानुष। अ°; VS मानुषः॥; aber Kâṭh. मानुषꣳ अ°; TS मानुषान°

पितानु भ्राता सगर्भ्यो ऽनु सखा सयूथ्यो ऽनुमानावह[1] देवान्देवायते[2] यजमानायापां पेरुरसि स्वात्त꣡ꣳ सद्धविरापो देवीः स्वदन्तु सं ते वायुर्वातेन गच्छता꣡ꣳ स꣡ꣳ यजत्रैरङ्गानि[3] स꣡ꣳ यज्ञपतिराशिषा घृतेनाक्तौ पशू꣡ꣳस्त्रायेथाम् ॥

ये बध्यमानमनु बध्यमाना अन्वैक्षन्त[4] मनसा चक्षुषा च ।
अग्निष्टे[5] अग्ने प्रमुमोक्तु देवः प्रजापतिः प्रजया[6] स꣡ꣳरराणः ॥
रेवति[7] प्रेधा[8] यज्ञपतिमाविशोरो अन्तरिक्ष सजूर्देवेन वातेन ॥
त्मनास्य[9] हविषो यज समस्य[10] तन्वा भव ।
वर्षीयो वर्षीयसो यज꣡ꣳ यज्ञपतौ धाः ॥

स्वर्विदसि स्वर्वित्त्वा स्वरिहि ३स्वर्मह्य꣡ꣳ स्वः पशुभ्यो लोकविदसि लोक꣡ꣳ वित्त्वा लोकमिहि लोकं मह्यं लोकं पशुभ्यो नाथविदसि नाथ꣡ꣳ वित्त्वा नाथमिहि नाथं मह्यं नाथं पशुभ्यो गातुविदसि गातु꣡ꣳ वित्त्वा गातुमिहि गातुं मह्यं गातुं पशुभ्यः ॥

न वा एतन्म्रियसे[11,12] नोत[13] रिष्यसि देव[14] इदेषि पथिभिः शिवेभिः । 15

यत्र यन्ति सुकृतो नापि दुष्कृतस्तत्र त्वा देवः सविता दधातु ॥
शमितार उपेतन[15] यज्ञं देवेभिरन्वितम् ।

---

1) P अनु । मान । आ । वह ।; s. ebenso 3, 9, 6; in Kâṭh. u. Kap. S. fehlt अनुमान; es ist wohl ein Nomen, abgeleitet von मन् c. अनु mit Beziehung auf den vorhergehenden Satz. 2) So alle Mss.; nur P देवायते ।; vgl. oben 1, 2, 8. 3) So betonen M 1.2 u. P; in H u. Bb यजत्रै॰ ohne Accent. 4) M 2 अन्वैक्षत; vgl. übrigens AV. 2, 34, 3; TS 3, 1, 4, 2. 5) P अग्निः । तान् । 6) H, Bb u. B प्रजाया 7) Bb रेवती 8) Ebenso 3, 9, 7; vgl. das adverbiale प्रियधा in TS 1, 3, 8, 1; aber P प्रेधाः । प्रियंधा इति प्रियं धाः ।; zu dieser Auffassung stimmt VS 6, 11 प्रियं धा आविश; Kâṭh. 3, 6 u. Kap. S. 2, 13 lesen ebenfalls प्रेधा 9) P आत्मना । अस्य । 10) P सं । अस्य ।; vgl. aber TS 1, 3, 8, 2; Kap. S. 2, 13 u. VS 6, 11. 11) P एतत् । 12) H u. Bb das Verb ohne Accent. 13) P न । उत । 14) P देवान् । 15) So betonen die Mss.; P irrig उपेत इत्युप । इत । न ।

पाशात्पशुं प्रमुञ्चत बन्धाद्यज्ञपतिं परि ॥
अदितिः पाशान्प्रमुमोक्तेतान्पशोः पाशान्पशुपतेरधि ।
यो नो द्वेष्ट्यधरः स पद्यतां तस्मिन्पाशान्प्रतिमुञ्चाम[1] एतान ॥

॥ १५ ॥ Vgl. 3,9,6.7. — TS 1, 3, 7 (paçor upâkaraṇam) und 8 (paçoḥ saṃjñapanam); Kâṭh. 3, 4—6; Kap. S. 2, 11—13; VS 6, 7—11; 23, 16; Mân. Çr. 1, 8, 3.

नमस्त आतानानर्वा[2] प्रेहि[3] यजमानाय घृतस्य कुल्यामनु सह रायस्पोषेण देवीरापः शुद्धा यूयं देवानुयुध्वं[4] शुद्धा वयं सुपरिविष्टाः परिवेष्टारो वो भूयास्म वाचमस्य मा हिꣳसीः प्राणमस्य मा हिꣳसीश्चक्षुरस्य मा हिꣳसीः श्रोत्रमस्य मा हिꣳसीर्यत्ते क्रूरꣳ यदास्थितं तदेतेन शुन्धस्व देवेभ्यः शुम्भस्व गात्राण्यस्य मा हिꣳसीश्चरित्रानस्य[5] मा हिꣳसीर्नाभिमस्य मा हिꣳसीर्मेढ्रमस्य मा हिꣳसीः पायुमस्य मा हिꣳसीः शमह्नः ॥

ओषधे चायस्वैनꣳ स्वधिते मैनꣳ हिꣳसीः ।
या ते शिवतमा तनूस्तयैनमुपस्पृश ॥

पृथिव्यै त्वा रक्षसां भागो ऽसीदमहꣳ रक्षो ऽवबाध[6] इदमहꣳ रक्षो ऽधमं[7] तमो नयामीषे त्वोर्जे त्वा देवेभ्यः शुन्धस्व देवेभ्यः शुम्भस्व ॥
घृतेन द्यावापृथिवी प्रोर्णुवातामुर्वी[8] त्वा जुष्टं नमः सूर्यस्य संदृशे ॥
उ३र्वन्तरिक्षꣳ वीहि प्रत्युष्टꣳ रक्षः प्रत्युष्टारातिर्वायोः स्तोकानां

---

1) P मुञ्चामः। 2) So M1 in Uebereinstimmung mit TS 1, 3, 8, 2; Kâṭh. 3, 6; VS 6, 12; Mân. Çr. 1, 8, 4; MPaddh. II S. 58; der P liest auch आतान। अनर्वा।; aber H, Bb u. B आतानानर्वाक् und ebenso Kap. S. 2, 13; in M2 fehlend; vgl. unten 3, 10, 1. 3) P प्र। इहि। 4) So alle Mss.; nur P यूयध्वं।; s. oben 1, 1, 11; Kâṭh. 3, 6 यूढ्वं; Kap. S. 2, 13 युद्वं; TS 1, 3, 8, 2 ऊढ्वꣳ; VS 6, 13 वोढ्वꣳ 5) So M1; aber H u. Bb चरित्राणस्य; M2, B ebenso, nur ohne Accent; P चरित्रान्। 6) P अव। बाधे। 7) P अधमं। 8) P प्र। ऊर्णुवातां।

प्रयुता ह्वेषाꣳसि स्वाहोर्ध्वनभसं[1] मारुतं देवं गच्छतम् ॥ १६ ॥

Vgl. 3, 10, 1 fig. — TS 1, 3, 8 (paçoḥ saṃjñapanam) und 9 (vapotkhedaḥ); Kâṭh. 3, 6; Kap. S. 2, 13; VS 6, 12—16; Mân. Çr. 1, 8, 4.

जुष्टं देवेभ्यो हव्यं घृतावद्जुषाणे[2] त्वा जुष्टꣳ रेडस्यग्निष्ट्वा[3] श्रीणात्वापस्त्वा समरिणन्वातस्य त्वा ध्राज्यै पूष्णो रꣳह्या[4] ऊष्मणोऽव्यथिषे[5] ऽपामोषधीनाꣳ रसो घृतं घृतपावानः पिबत वसाꣳ वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा त्वा वाताय दिशः प्रदिश आदिशो विदिश उद्दिशो दिशऽ ऐन्द्रः प्राणो अङ्गे अङ्गे निदीध्यदैन्द्रो[7] ऽपानो अङ्गे अङ्गे निबोभुवदैन्द्रो व्यानो अङ्गे अङ्गे विबोभुवत् ॥

देव त्वष्टर्भूरि ते सꣳसमेतु[8] संलक्ष्म यद्विषुरूपं बभूव।

देवचा यन्तमवसे सखायो अनु त्वा माता पितरो मदन्तु ॥ १७ ॥

Vgl. 3, 10, 4. — TS 1, 3, 10 (vasâhomaḥ); Kâṭh. 3, 7; Kap. S. 2, 14; VS 6, 18—20; Mân. Çr. 1, 8, 5.

समुद्रं गच्छ स्वाहान्तरिक्षं गच्छ स्वाहा देवꣳ सवितारं गच्छ स्वा-

---

1) P ऊर्ध्व॰नभसं।; vgl. unten 3, 1, 10. 2) So die Mss., nur P घृतवदिति घृतं. वत्। 3) P रेट्। 4) P रꣳह्यै। 5) M 1, Hu. Bb ऊष्माणो und ebenso M 2 u. B, nur ohne Accent; nur der P उष्मणः।; merkwürdig, dass auch Kâṭh. 3, 7 ऊष्माणो liest; aber richtig Kap. S. 2, 14 ऊष्मणो; ebenso VS 6, 18; in TS fehlend; Mân. Çr. 1, 8, 5 स्वाहोष्मणो व्यतिष इत्यूष्माणमनुमन्त्रयते MPaddh. II, S. 63. 119. 136 स्वाहोष्मणो व्यथिषे. 6) So H u. Bb; ebenso M 2 u. B, nur ohne Accent; M 1 व्यथीषे, P व्यथिषे।; desgl. MPaddh. II S. 63. 119. 136. vgl. Kâṭh. 3, 7 ऽव्यथिष्या अ॰ u. Kap. S. 2, 14 ऽव्यथिष्या अ॰, wo wir also genau den von Pâ. 3, 4, 10 als vedisch überlieferten Infinitiv अव्यथिषै vorfinden, vgl. meine Abh. „das Kâṭh. u. die Mâitr. S.“, Monatsber. d. K. Akad. d. Wiss. z. Berlin, 1879, S. 685 fg. In VS 6, 18 verstümmelt zu व्यथिषत्. 7) So M 2, nur ohne Accent; P नि। दोधत्।; M 1 नीदोध्यद्॰; H, Bb u. B निदिध्यद्॰; Kâṭh. u. Kap. S. निदीधद्॰; VS 6, 2 निदीध्यद्॰; TS निदेध्यद्॰; vgl. übrigens Pet. W. s. v. 1. धी c. नि 8) So schreibe ich gegen P सꣳ समिति सꣳ। सम्। एतु।; ebenso in allen vier verwandten Saṃhitâ's. Dagegen M 1 संत्समेतु; M 2 u. B ebenso, nur ohne Accent, H u. Bb संत्समेतु, wo die Betonung ebenfalls auf die Lesart des P und der andern Saṃhitâ's hindeutet.

हाऽहोरात्रे गछ स्वाहा ऽमित्रावरुणौ गछ स्वाहा ऽद्यावापृथिवी गछ स्वाहा ऽछन्दा ऽसि गछ स्वाहा ऽसोमं गछ स्वाहा ऽयज्ञं गछ स्वाहा ऽदिवं नभो गछ स्वाहाऽग्निꣳ वैश्वानरं गछ स्वाहा ऽमनो हार्दिꣳ[1] यछौ ऽषधीभ्यस्त्वा ॥

धाम्नो धाम्नो राजन्नितो वरुण नो मुञ्च यदापो अह्या वरुणेति शपामहे[2] ।
ततो वरुण नो मुञ्च ॥
उदुत्तमꣳ वरुण पाशमस्मदवाधमꣳ वि मध्यमꣳ श्रथाय ।
अथा[3] वयमादित्य व्रते तवानागसो अदितये स्याम ॥
सुमित्रा ना आपा[4] ओषधयः सन्तु दुर्मित्रास्तस्मै सन्तु ।
यो अस्मान्द्वेष्टि यं च वयं द्विष्मः॥१८॥Vgl. 3, 10, 7. — TS 1, 3, 11 (guḍakâṇḍena upayaṭsaṃjñakahomâḥ); Kâṭh. 3, 8; Kap. S. 2, 15; VS 6, 21 u. 22; Mân. Çr. 1, 8, 6.

॥ इति प्रथमकाण्डे ऽध्वरो नाम द्वितीयः प्रपाठकः[5] ॥

हविष्मतीरिमा आपो हविष्मान्देवो अध्वरः ।
हविष्मं[6] आविवासति हविष्मं अस्तु सूर्यः ॥

---

1) Nur P हार्दि । u. MPaddh. II S. 66; so freilich auch die andern Saṃhitâ's, daher vielleicht vorzuziehen; s. aber unten 3, 10, 7 mehrmals auch das Masc.; auch Mân. Çr. 1, 8, 6 मनो हार्दिꣳ यछेति 2) M 2 शपामहि 3) P अथ । 4) P आपः । 5) So die Unterschrift in H, Bb u. B, nur dass diese Mss. अध्वर नाम schreiben; in M 1 u. 2 lautet die Unterschrift अध्वरो द्वितीयः प्रपाठकः 6) P हविष्मान् ।

अग्नेर्वो ऽपन्नगृहस्य[1] सदसि सादयामि देवानां भागधेयीः स्थेन्द्राग्न्योर्भागधेयीः स्थ मित्रावरुणयोर्भागधेयीः स्थ विश्वेषां देवानां भागधेयीः स्थ सुम्नायुवः[2] सम्न्याय[3] सुम्नं धत्त ॥

हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा ।
ऊर्ध्वमिममध्वरं दिवि देवेषु होत्रा यच्छ ॥

शृणोत्वग्निः समिधा हवं मे शृण्वन्त्वापो धिषणाश्च देवीः[4]।
शृणोत ग्रावाणो विदुषो नु यज्ञं शृणोतु देवः सविता हवं मे ॥

देवीरापो अपां नपाद्य ऊर्मिर्हविष्य इन्द्रियावान्मदिन्तमस्तं देवेभ्यः शुक्रपेभ्यो दात येषां भागः स्थ स्वाहा कार्षसि[5] समुद्रस्य वो ऽक्षित्या[6] उन्नये वसूनां रुद्राणामादित्यानां पत्नीजनीः[7] स्थ वसवो रुद्रा आदित्या एतां वः पत्नीजनीः[7] समुद्रं गन्धर्वेष्टामन्वातिष्ठत[8] वातस्य पत्मनेडिता[9] वामी ते संदृशि[10] विश्व रेतो धेषीय[11] तव वामीरनु संदृशि[12] ॥

---

1) P अपन्न-गृहस्य । 2) M 1 सुम्नायुव, aber H u. Bb betonen richtig die erste Sylbe; ebenso P सुम्नायुव इति सुम्ना-युवः ।; (M 2 u. B ohne Accent). 3) So M 1 u. P; in M 2 u. B ebenso, nur ohne Accent; Bb सुम्न्या u. so wohl auch H; Kâṭh. सुम्नायवस्सुम्न्याय सुम्न्यन्वत्तें°, wo wohl wie in MS सुम्नं zu schreiben ist; Kap. S. verstümmelt सुम्नाय इवं सुम्नाय सुम्नं; der Sinn ist wohl: „Ihr Huldreichen, schenkt Huld dem, der Huld verdient!“ TS 1, 3, 12 सुम्नाय सुम्निनीः सुम्नं मा cet. 4) So H, Bb u. B in Uebereinstimmung mit TS, Kap. S., VS 6,26; M 1 धिषणा च देवी; ebenso P; auch M 2, nur ohne Accent. 5) So M 1, H; auch M 2, B, MPaddh. III, S. 41, nur ohne Accent; P कार्षिः । असि ।; Bb कर्ष्यसि; Kâṭh. कार्ष्यसि; Kap. S. कर्षिरसि; TS 1, 3, 13 u. VS 6, 28 कार्षिरसि 6) P अक्षित्यै । 7) P पत्-नेजनीः । 8) Dies auch in Kap. S.; im Kâṭh. गंधवेष्टाम°; P गंधर्वैष्टां । गंधर्वेष्टामिति गंधर्वे-ष्टाम् । 9) P पत्मना । ईडिता । 10) So M 1, H, Bb; ebenso M 2 u. B, nur ohne Accent; P संदृशोति सन्-दृशी ।; Kâṭh. वामो ते सन्दृशि; Kap. S. वाम्या ते संदृशि; unten 4, 5, 4 schwanken die Mss. zwischen संदृशि und संदृशी 11) Kâṭh. u. Kap. S. धिषीय. 12) So M 1; auch M 2 u. B, nur ohne Accent; P संदृशीति सन् । दृशि ।; H u. Bb °शी oder °शो; Kâṭh. वाम्यनु सन्दृशि; Kap. S. वाम्यनु संदृशि

यमग्ने पृत्सु मर्त्यमवा[1] वाजेषु यं जुनाः ।
स यन्ता शश्वतीरिषः ॥

जुष्टो वाचो भूयासं जुष्टो वाचस्पतिर्यद्वाचो मधुमत्तस्मै स्वाहा स्वाहा सरस्वत्यै ॥ १ ॥ Vgl. 4, 5, 1—4. — Somâbhishavaḥ in TS 1, 3, 12 (vasatîvarîṇâṃ grahaṇam) und 13 (somasya çakaṭâd upâvarohaḥ); Kâṭh. 3, 9; Kap. S. 2, 16; VS 6, 23—29; Mân. Çr. 2, 2, 5; 2, 3, 1. 2.

निग्राभ्याः स्थ देवश्रुतस्तर्पयत मायुर्मे[2] तर्पयत तर्पयत मा प्राणं मे तर्पयत तर्पयत मापानं मे तर्पयत तर्पयत मा व्यानं मे तर्पयत तर्पयत मा चक्षुर्मे तर्पयत तर्पयत मा श्रोत्रं मे तर्पयत तर्पयत मा मनो मे तर्पयत तर्पयत मा वाचं मे तर्पयत तर्पयत मात्मानं मे तर्पयत तर्पयत मा प्रजां मे तर्पयत तर्पयत मा गृहान्मे तर्पयत तर्पयत मा पशून्मे तर्पयत तर्पयत मा गणौर्मा[3] मा वितीतृषत[4] तर्पयत मा ॥ २ ॥ Vgl. Kâṭh. 3, 10; Kap. S. 2, 17; VS 6, 30 u. 31; Mân. Çr. 2, 3, 2 a. E.; 2, 4, 1.

देवस्य त्वा सवितुः प्रसऽवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ग्रावास्यध्वरकृद्देवेभ्यो गभीरमिममध्वरं कृधि ॥

इन्द्राय त्वा सुषुत्तमं मधुमन्तं पयस्वन्तम् ।
इन्द्राय त्वाभिमातिघ्न इन्द्राय त्वा वसुमते रुद्रवता इन्द्राय त्वादित्यवते ॥

अग्नये त्वा रायस्पोषदे विष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वा ॥

---

1) P अवाः । 2) P मा । आयुः । 3) So die Mss.; P गणैः ।; vgl. aber die folgende Anmerkung. 4) So H u. Bb; auch M 2 u. B, nur ohne Accent; M 1 वितितृषत; P वि । तीतृषत् ।; Mân. Çr. 2, 4, 1 गणान्मे मा वितीतृषत्; Kap. S. गणान्मे तर्पयत त मे मा वितृषं, wohl zu corr. in ते मे मा वितृषन्, vgl. VS 6, 31; in TS 3, 2, 5, 3 heisst es गणान्मे मा वितीतृषः

श्वात्राः स्थ वृचतुरो राध्वं गूर्ता[1] अमृतस्य पत्नीः[2] ।
ता देवीर्देवत्रेमं[3] यज्ञं धत्तोपहूताः सोमस्य पिबत ॥
यत्ते सोम दिवि ज्योतिर्यत्पृथिव्यां यदुरा अन्तरिक्षे तेनास्मै यज्ञपतय
उरु राये कृध्यधि धात्रे वोचो मा भेर्मा संविक्था[4] ऊर्जे धत्स्वो-[5]
र्जमस्मासु धेहि धिषणे ईडिते[6] ईडेथामूर्जे दधाथामूर्जमस्मासु धत्तं मा 5
वा हिंसिषं मास्मान्युवं[7] हिंसिष्टम् ॥ ३ ॥ Vgl. 4, 5, 4. — Grahapraçnaḥ in TS. 1, 4, 1 (somâbhishavaḥ); Kâṭh. 3, 10; Kap. S. 2, 17; VS 6, 30. 32—35; Mân. Çr. 2, 3, 3.

वाचस्पतये पवस्व वृष्णो[8] अंशुभ्यां गभस्तिपूतः ॥ देवो देवानां
पवित्रमसि येषां भागो ऽसि ॥ मधुमतीनां[9] इषस्कृधि स्वांकृतो[10]
ऽस्युं३वन्तरिक्षं वीहि[11] विश्वेभ्य इन्द्रियेभ्यो[12] दिव्येभ्यः पार्थिवेभ्यो
मनस्त्वाष्टु[13] स्वाहा त्वा सुभव[14] सूर्याय देवेभ्यस्त्वा मरीचिपेभ्यः 10
प्राणायत्वा यत्ते सोमादाभ्यं[15] नाम जागृवि तंसैते सोमसोमाय स्वाहा

---

1) So die Mss.; P राध्वंगूर्त्ता इति राध्वं.गूर्त्ताः । also als Compositum gefasst; ein solches ist es jedenfalls in der Schreibung von TS 1, 4, 1, 1 u. VS 6, 34 राधोगूर्ता; Kap. S. राधोगूर्ता; die Bedeutung ist wohl: „um der Gaben willen gepriesen". Der Text in MS ist wohl verdorben; wie er vorliegt, bedeutet er wohl: „spendet, ihr gepriesenen!" Dann müssen aber gegen den P zwei Worte darin gesehen werden. Bb übrigens राध्वगू° 2) So M 1 u. P; ebenso Kap. S., TS u. VS; in H u. Bb ohne Accent. 3) P देव.त्रा । इमम् । 4) P विक्थाः । oder वित्याः ।; M 2 व्यक्था od. व्यथा; VS 1, 23 u. 6, 35 संविक्था(:) Kap. S. 2, 17 संभित्था(:) 5) P धत्स्व । 6) So die Mss., auch P, (nur Bb इडिते); desgl. 4, 5, 4; Kap. S. ईडिते ईडथेथाम°; Kâṭh. 3, 10 वीते वीडयेथाम्; TS 1, 4, 1, 2 वीडू सती वीडयेथाम°; VS 6, 35 वीड्वी सती वी° 7) P मा अस्मान् । 8) So M 1; P वृष्णः ।; aber H u. Bb विष्णो; ebenso M 2 u. B, nur ohne Accent; TS 1, 4, 2 u. VS 7, 1 वृष्णो; Kâṭh. 4, 1, वृष्णा अं°; in Kap. S. 3, 1 eig. विष्णो, aber am Rande verbessert in वृ° 9) P नः । 10) So die Mss. in Uebereinstimmung mit 4, 5, 5; TS 1, 4, 2; VS 7, 3; Kap. S. 3, 1 (2 Mal); P स्वांकृत इति स्वां.कृतः ।; nur Kâṭh. hat स्वंकृतो 11) P वि । इहि । 12) M 2 इंद्रीयेभ्यो 13) So M 1; P त्वा । अष्टु । dasselbe TS 1, 4, 2 u. VS 7, 3; dagegen lesen H, Bb u. B त्वाष्ट्र und ebenso Kap. S. 3, 1 (2 Mal); M 2 त्वाष्ट; Kâṭh. 4, 1 त्वष्ट und weiter unten त्वाष्ट 14) P सुभवेति सु.भव ।; nur M 1 सुपव; VS सुभव; TS सुभवः; Kap. S. सुभो (2 Mal). 15) P सोम । आदाभ्यं ।

प्रागंपागधरागुदगेतास्त्वा दिश आधावन्त्वंश्व निस्सर[1] समरि-
र्विदाम[2] ॥ ४ ॥ Vgl. 4, 5, 5. 7. — TS 1, 4, 2 (upâ°çugrahaḥ) und 1 (s. oben); Kâṭh. 4, 1; Kap. S. 3, 1 u. 2, 17; VS 7, 1—3 u. 6, 36; Mân. Çr. 2, 3, 3. 4.

उपयामगृहीतो ऽसि ॥

अन्तर्यच्छ मघवन्पाहि सोममुरुष्य रायः समिषो यजस्व ।
अन्तस्ते[3] द्यावापृथिवी दधाम्यन्तर्दधाम्युऽर्वन्तरिक्षम् ।
सजोषा देवैरवरैः परैश्चान्तर्यामे मघवन्मादयस्व ॥

वाक्त्वाष्टु[4]स्वाहा त्वा सुभव[5] सूर्याय देवेभ्यस्त्वा मरीचिपेभ्यो ऽपानाय त्वा ॥ ५ ॥ Vgl. 4, 5, 6. — TS 1, 4, 3 (antaryâmaḥ); Kâṭh. 4, 1; Kap. S. 3, 1; VS 7, 4—6; Mân. Çr. 2, 3, 4.

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।
उपो[6] ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम् ॥

उपयामगृहीतो ऽसि वायवे त्वा ॥

इन्द्रवायू इमे सुता[7] उप प्रयोभिरागतम् ।
इन्दवो वामुशन्ति हि ॥

उपयामगृहीतो ऽसि वायव इन्द्रवायुभ्यां त्वैष ते योनिः सजोषोभ्यां त्वा ॥ ६ ॥ Vgl. 4, 5, 8. — TS 1, 4, 4; (âindravâyavaḥ); Kâṭh. 4, 2; Kap. S. 3, 2; VS 7, 7 u. 8; Mân. Çr. 2, 3, 5.

अयं वां मित्रावरुणा सुतः सोम[8] ऋतावृधा ।
ममेदिह श्रुतं हवम् ॥

---

1) So M 1, H, Bb u. B; M 2 निःस्सर; P निः । स्सर ।; Kap. S. 2, 17 निस्सर; TS 1, 4, 1, 2 निष्वर; VS 6, 36 निष्पर 2) So H, Bb; ebenso B u. M 2, nur ohne Accent; P सम् । अरिः । विदाम् ।; M 1 समरीर्विदां; Kâṭh. 3, 10 समरिर्विदः; Kap. S. 2, 17 समरीर्विदं; VS 6, 36 समरीर्विदाम् 3) P irrig अंतस्थ इत्यंत·स्थे । 4) So M 1; vgl. TS u. VS 7, 3; H, Bb, B u. wohl auch M 2 त्वाष्ट्र; P वांक् । त्वा । अष्ट्र ।; aber vgl. gerade den P oben S. 31, Anm. 13. 5) P सु.भव ।; nur M 1 सुपव; vgl. oben S. 31, Anm. 14. 6) P उपो इत्युपो । 7) P सुताः । 8) P सोमः ।

उपयामगृहीतो ऽसि मित्रावरुणाभ्यां त्वैष ते योनिर्ऋतायुभ्यां त्वा ॥ ७ ॥ Vgl. 4, 5, 8. 4, 6, 5. — TS 1, 4, 5 (maitrâvaruṇaḥ); Kâṭh. 4, 2; Kap. S. 3, 2; VS 7, 9 u. 10; Mân. Çr. 2, 3, 5.

यां वां कशा मधुमत्यश्विना सूनृतावती।
तया यज्ञं मिमिक्षतम् ॥

उपयामगृहीतो ऽस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वा ॥ ८ ॥ Vgl. 4, 6, 1. — TS 1, 4, 6 (âçvinaḥ); Kâṭh. 4, 2; Kap. S. 3, 2; VS. 7, 11; Mân. Çr. 2, 3, 6.

उपयामगृहीतो ऽसि देवेभ्यस्त्वोपयामगृहीतो ऽसि विश्वेदेवेभ्यस्त्वोपयामगृहीतो ऽसि विश्वेभ्यस्त्वा देवेभ्यः ॥
दितेः[1] पुत्राणामदितेरकारिषमुरुशर्मणां[2.3] बृहताम् वरूथिनाम्[4]।
येषां नामानि विहितानि धामशश्वत्तैर्यजन्ति भुवनाय जीवसे ॥
उपयामगृहीतो ऽसि विष्णोस्त्वोरुक्रमे[5] गृह्णामि विष्णो[6] उरुक्रमैष ते सोमस्तꣳ रक्षस्व मा त्वा दभन्दुश्चक्षास्ते[7] मावक्शदयꣳ[8] वसुः पुरो-वसुर्वाक्पा[9] वाचं मे पात्वयꣳ वसुर्विदद्वसुश्चक्षुष्पाश्चक्षुर्मे[10] पात्वयꣳ वसुः सꣳयद्वसुः[11] श्रोत्रपाः श्रोत्रं मे पातु ॥ ९ ॥ Vgl. TS 3, 2, 10 (pratinirgrâhyamantrâḥ); Kâṭh. 4, 2; Kap. S. 3, 2; Mân. Çr. 2, 3, 8.

---

1) H u. Bb दितेः 2) M 1 u. P अकार्षम्, wogegen das Metrum; übrigens betonen H u. Bb °कारिषम° 3) M 1 °मुरुशर्मणां 4) M 1. 2. u. Bb वरूथिनां 5) P उरु. क्रमे।; der Sinn wohl: „In Vishṇu's Weitschritt schöpfe ich dich." Vgl. Kap. S. 3, 2 इन्द्रवायुभ्यां त्वैष ते योनिर्विष्णोरुरुक्रम उपयामगृहीतो ऽसि मित्रावरुणाभ्यां त्वैष ते योनिर्विष्णोरुरुक्रम उपयामगृहीतो ऽस्यश्विभ्यां त्वैष ते योनिर्विष्णोरुरुक्रमे तं रक्षस्व; ebenso Kâṭh. 4, 2; unter V's. „Weitschritt" ist offenbar jedes Mal einer der bekannten drei Schritte, in symbolischer Nachahmung, gemeint. 6) M 2 u. B विष्णु; P विष्णो इति विष्णो। 7) P दभन्। (die andern Mss. दभं) 8) So M 1; M 2 liest मावचद°; B मावच्यद°; H u. Bb मांचय्यद°; P irrig मा। वचत्।; vgl. oben 1, 2, 5 a. E. und 1, 2, 13; Kap. S. 3, 2 a. E. liest auch मावचत्; aber Kâṭh. 4, 2, मावख्यत्; TS 3, 2, 10 मावख्यन् 9) P वाक्. पाः। 10) P विदत्. वसुः। 11) P संयत्. वसुः।

अयꣳ वेनश्चोदयत्पृश्निगर्भा[1] ज्योतिर्जरायू[2] रजसो विमाने।
इममपाꣳ संगमे सूर्यस्य शिशुं न विप्रा मतिभी[3] रिहन्ति॥
उपयामगृहीतो ऽसि[v] शण्डाय[4] त्वैष ते योनिर्वीरिताय त्वा॥ १०॥

Vgl. 4, 6, 3. — TS 1, 4, 8 (çukrâmanthinàu); Kâṭh. 4, 3; Kap. S. 3, 3; VS 7, 16. 12; Mân. Çr. 2, 3, 5.

तं प्रत्नथा पूर्वथा विश्वथेमथा[5] ज्येष्ठराजं बर्हिषदꣳ स्वर्विदम्।
प्रतीचीनꣳ[6] वृजनं[7] दोहसे गिरांशुं[8] जयन्तमनु यासु वर्धसे॥
उपयामगृहीतो ऽसि[v] मर्काय त्वैष ते योनिः[v] प्रजाभ्यस्त्वा॥ ११॥

Vgl. 4, 6, 3. — TS 1, 4, 9 (çukrâmanthinâu); Kâṭh. 4, 3; Kap. S. 3, 3; VS 7, 12. 16.

अपनुत्ती शण्डामर्कौ[9] सह तेन यं द्विष्मो[v] ऽछिन्नस्य ते देव सोम दक्षस्य रायस्पोषस्य सुवीर्यस्याभिग्रहीतारः स्याम॥ तुथो ऽसि जनधाया[10] [v] देवास्त्वा शुक्रपाः प्रणयन्तु[v] तुथो ऽसि जनधाया[10v] देवास्त्वा मन्थिपाः प्रणयन्त्वनाधृष्टासि[11v] सुवीराः प्रजाः प्रजनयन्परीहि[v] सुप्रजाः प्रजाः प्रजनयन्नभिपरीहि॥

इन्द्रेण मन्युना युजावबाधे पृतन्यतः।
घृता वृत्राण्यप्रति॥

संजग्मानौ दिवा पृथिव्या शुक्रौ शुक्रशोचिषौ तौ देवौ शुक्रामन्यिना[12] आयुर्यज्ञे धत्तमायुर्यज्ञपतौ[v] पुमाꣳसं गर्भमाधत्तं गवीन्योः[13v]

---

1) P पृश्नि-गर्भाः। 2) P ज्योतिर्जरायुरिति ज्योतिः। जरायुः।; M 1. 2 u. Bb °जरायु 3) P मतिभिरिति मति-भिः। 4) M 1 षण्डाय, M 2 खण्डाय 5) P इमर्धेतीम-था। 6) So betonen M 1 u. P; dagegen H u. Bb प्रतीचीन° 7) H, Bb u. B वृजिनं 8) P गिरा। आशुम्। 9) M 2 खण्डा° 10) P जन-धायाः। 11) So die Mss.; P irrig अनाधृष्ट। असि।; M 2 अनादृष्टासि; auch Kap. S. 3, 3 und VS 7, 12 अनाधृष्टासि; desgl. Kâṭh. 4, 4, nur ohne Accent. 12) P शुक्रा-मंथिनौ।; H, Bb u. B शुक्रम° 13) Alle Mss. haben den Cerebral; M 1 गवीष्णोः; ebenso M 2, nur ohne Accent; H u. Bb गविष्णोः; P गवीष्णो।

प्राणान्यज्ञेषु यच्छत॰ शुक्रस्याधिष्ठानमसि मन्थिनो ऽधिष्ठानमसि निरस्तः शण्डो[1] निरस्तो मर्कः सह तेन यं द्विष्मः ॥

या प्रथमा सं॰स्कृतिर्यज्ञे अस्मिन्यः परमो बृहस्पतिश्चिकित्वान् ।

यो मध्यमो वरुणो मित्रो अग्निस्तस्मा इन्द्राय सुतमा- 5
जुहोत तस्मै सूर्याय सुतमाजुहोत ॥ १२ ॥

Vgl. 4, 6, 3. — Kâṭh. 4, 4; Kap. S. 3, 3; VS 7, 12—15. 17. 18; TBr. 1, 1, 1, 1—5; Tândya Br. 1, 4, 3. Mân. Çr. 2, 4, 1.

ये देवा[2] दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।

अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥

उपयामगृहीतो ऽस्यायायणो[3] ऽसि स्वाायायणो[4] जिन्व यज्ञं जिन्व यज्ञपतिमभि सवनानि पाह्यंतस्त्वा विष्णुः पातु विशं त्वं पाही- 10
न्द्रियेणैष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ १३ ॥ Vgl. 4, 6, 4. — TS 1, 4, 10 (âgrayaṇaḥ); Kâṭh. 4, 5; Kap. S. 3, 4; VS 7, 19. 20; Mân. Çr. 2, 3, 5.

उपयामगृहीतो ऽसि ॥

इन्द्राय त्वा बृहद्बते वयस्वत उक्थायुवम्[5] ।

यन्न इन्द्र बृहद्वयस्तस्मै[6] त्वा विष्णवे त्वा ॥

एष ते योनिरिन्द्राय त्वोपयामगृहीतो ऽसि देवेभ्यस्त्वा देवायुवं 15

---

1) P शुंडः ।; M 1 षंडो; M 2 खण्डो 2) P देवाः । 3) So die besten Handschriften, M 1 u. 2 (letzteres ohne Accent) u. P आयायणः ।; (vgl. auch 4, 6, 4 u. 4, 7, 4); diese Form auch aus Kâṭh. belegt, s. Böhtl. W.; ferner häufig in Mân. Çr.; H, Bb u. B °ग्रयणो 4) M 1 स्वाायायणो; M 2 ebenso, nur ohne Accent; P स्वाायायण इति सु॰आयायणः ।; H, Bb u. B °ग्रयणो; desgl. Kap. S. 5) P उकथा॰ युवं । 6) So mit P बृहत् । वयः ।; vgl. TS u. VS; M 1, H u. Bb बृहद्वयस्त॰; M 2 u. B ohne Accent.

गृह्णामि[1] ऽ पुनर्हविरसि ऽ देवेभ्यस्त्वा देवायुवं[2] पृणच्मि[3] यज्ञस्यायुषे ॥ १४ ॥ Vgl. 4, 6, 5. — TS 1, 4, 12 (ukthyaḥ); Kâṭh. 4, 5 u. 6; Kap. S. 3, 4; VS. 7, 22. 21; Mân. Çr. 2, 3, 5; 2, 4, 3.

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत[4] आ जातमग्निम् ।
कविꣳ सम्राजमतिथिं[5] जनानामासन्ना[6] पात्रं जनयन्त देवाः ॥
उपयामगृहीतो ऽसि ऽ वैश्वानराय त्वा ॥ ध्रुवो ऽसि ध्रुवक्षितिर्ध्रुवाणां
5 ध्रुवतमो ऽच्युतानामच्युतक्षित्तम ऽ एष ते योनिर्वैश्वानराय त्वा ॥
ध्रुवं ध्रुवेण हविषा वः सोमं नयामसि ।
यथा नः सर्वा इज्जनः[7] संगमे सुमना असत् ॥
दिवि दिव्यान्दꣳहान्तरिक्षे[8] अन्तरिक्ष्यान्पृथिव्यां पार्थिवान् ॥ १५ ॥
Vgl. 4, 6, 6. — TS 1, 4, 13 (dhruvaḥ); Kâṭh. 4, 5; Kap. S. 3, 5; VS 7, 24. 25; Mân. Çr. 2, 3, 5.

उपयामगृहीतो ऽसि ऽ मधवे त्वा ऽ माधवाय त्वा ऽ शुक्राय त्वा ऽ शुचये
10 त्वा ऽ नभसे त्वा ऽ नभस्याय त्वेषाय[9] त्वोर्जाय[10] त्वा ऽ सहसे त्वा ऽ सहस्याय त्वा ऽ तपसे त्वा ऽ तपस्याय त्वा ॥ १६ ॥ Vgl. 4, 6, 7. — TS 1, 4, 14 (ṛtugrahâḥ); Kâṭh. 4, 7; Kap. S. 3, 5; VS 7, 30; Mân. Çr. 2, 4, 2.

इन्द्राग्नी आगतꣳ सुतं गीर्भिर्नभो वरेण्यम् ।
अस्य पातं धियेषिता[11] ॥
उपयामगृहीतो ऽसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वा ॥ १७ ॥
Vgl. 4, 6, 8. — TS 1, 4, 15 (âindrâgnaḥ); Kâṭh. 4, 7; Kap. S. 3, 5; VS 7, 31; Mân. Çr. 2, 4, 2. 3.

---

1) H u. B गृहणामि; Bb गृहाणामि 2) P देवा.युवं। 3) So corrigirt nach Kâṭh. 4, 6, wo die Form mehrmals sich wiederholt; H liest पृणच्मिं; M 1 पृणुच्मि; B पृणम्मि; Bb bloss पृण; M 2 unleserlich; P प्रण। च्मीति प्र. नच्मि।; auch in Kap. S. 3, 4 consequent wiederholt पृणच्मि; MPaddh. II S. 115. 139 प्रणच्मि; Mân. Çr. 2, 4, 3 वृणच्मि 4) P ऋतं। 5) M 2 संभ्राजम° 6) P आसन्। आ। 7) P सर्वः। इत्। जनः। 8) So betonen M 1, H u. Bb; (in M 2 u. B überhaupt keine Accente); der P schreibt दृꣳह। ohne Accent. 9) P इषाय। 10) P ऊर्जाय। 11) P धिया। इषिता।

ओमासश्चर्षणीधृतो[1] विश्वे देवासा[2] आगत।
दाश्वांसो दाशुषः सुतम् ॥
उपयामगृहीतो ऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ १८ ॥ Vgl. 4, 6, 8. — TS 1, 4, 16 (vâiçvadevaḥ); Kâṭh. 4, 7; Kap. S. 3, 5; VS 7, 33; Mân. Çr. 2, 4, 2.

इन्द्र मरुत्व[3] इह पाहि सोमं यथा शार्याते अपिबः सुतस्य।
तव प्रणीती तव शूर शर्मन्नाविवासन्ति कवयः सुयज्ञाः[4] ॥
उपयामगृहीतो ऽसीन्द्राय त्वा मरुत्वत[5] एष ते योनिरिन्द्राय त्वा मरुत्वते ॥ १९ ॥ Vgl. 4, 6, 8. — TS 1, 4, 18 (marutvatîyaḥ); Kâṭh. 4, 8; Kap. S. 3, 6; VS 7, 35; Mân. Çr. 2, 4, 4.

जनिष्ठा[6] उग्रः सहसे तुराय मन्द्र[7] ओजिष्ठो बहुलाभिमानः[8]।
अवर्धन्निन्द्रं मरुतश्चिदत्र माता यद्वीरं जजनज्जनिष्टम्[9] ॥
उपयामगृहीतो ऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥ २० ॥ Vgl. 4, 6, 8. — TS 1, 4, 18 a. E. (marutvatîyaḥ); TBr. 2, 8, 3, 4 u. 5; Kâṭh. 4, 8; Kap. S. 3, 6; VS 33, 64; 7, 35 a. E.; Mân. Çr. 2, 4, 4.

मरुत्वन्तं वृषभं वावृधानमकवारिं[10] दिव्यं शासमिन्द्रम्।
विश्वासाहमवसे[11] नूतनायोग्रं सहोदामिहा तं हुवे ॥
उपयामगृहीतो ऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥ २१ ॥ Vgl. 4, 6, 8. — TS 1, 4, 17 (marutvatîyaḥ); Kâṭh. 4, 8; Kap. S. 3, 6; VS 7, 36.

---

1) P चर्षणीधृतः। चर्षणिधृत इति चर्षणि-धृतः। 2) P देवासः। 3) P मरुत्वः। 4) M 2 सुयज्ञाः। 5) P मरुत्वते। 6) P nachlässig जनिष्ठा। 7) P मंद्रः। 8) P बहुल-अभिमानः। 9) So M 1; M 2 जजनजनिष्टं; P जजनत्। जनिष्टं।; H, Bb u. B यजनज्जनिष्टं; जजनत् ist eine correcte Form, war nur bisher nicht belegt; vgl. Pâ. 6, 1, 192 schol. und Kâç.; dieselbe Form unten 1, 9, 1; vgl. Vorr. — RV X, 73, 1 liest दधनद्वनिष्ठा; desgl. VS 33, 64 und TBr. 2, 8, 3, 5; Kâṭh. दधनद्वनिष्ठा; Kap. S. दधन ध्वनिष्ठा 10) P अकवारिमित्यकव। अरिं। 11) P विश्वासाहं। विश्वसहमिति विश्व-सहं।

मरुत्वं[1] इन्द्र वृषभो रणाय पिबा[2] सोममनुष्वधं मदाय।
आसिञ्चस्व जठरे मध्व ऊर्मिं[3] त्वं राजासि प्रदिवः सुतानाम्॥
उपयामगृहीतो ऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते॥ २२॥ Vgl. 4, 6, 8. — TS 1, 4, 19 (marutvatîyaḥ); Kâṭh. 4, 8; Kap. S. 3, 6; VS 7, 38.

सजोषा[4] इन्द्र[5] सगणो[6] मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान्।
जहि शत्रूँरप[7] मृधो[8] नुदस्वाथाभयं[9] कृणुहि विश्वतो नः॥
उपयामगृहीतो ऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते॥ २३॥ Vgl. 4, 6, 8. — TS 1, 4, 42 (shoḍaçin); Kap. S. 3, 6; VS 7, 37; Mân. Çr. 2, 4, 6.

महँ[10] इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ[11] इव।
स्तोमैर्वत्सस्य वावृधे[12]॥
उपयामगृहीतो ऽसि महेन्द्राय[13] त्वैष ते योनिर्महेन्द्राय त्वा॥ २४॥
Vgl. 4, 6, 8 a. E. — TS 1, 4, 20 (mâhendraḥ); Kâṭh. 4, 8; Kap. S. 3, 6; Mân. Çr. 7, 2, 4.

महँ[14] इन्द्रो नृवदा चर्षणिप्रा[15] उत द्विबर्हा[16] अमिनः सहोभिः।
अस्मद्र्यग्वावृधे वीर्यायोरुः[17] पृथुः सुकृतः कर्तृभिर्भूत्॥
उपयामगृहीतो ऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा॥ २५॥
Vgl. 4, 6, 8 a. E. — TS 1, 4, 21 (mâhendraḥ); Kâṭh. 4, 8; Kap. S. 3, 6; VS 7, 39; Mân. Çr. 2, 4, 6.

---

1) So M 1 u. 2; P मरुत्वान्।; H, Bb, B मरुत्वां; vgl. aber Vorr.; TS मरुत्वाꣳ desgl. Kâṭh., Kap. S. u. VS. 2) P पिब 3) So M 1 u. 2; H, Bb, B u. P ऊर्मिं; ebenso Kâṭh. 4) P स.जोषाः। 5) M 2 इंद्रः 6) M 2 सगुणो 7) So M 1; P शत्रून्। अप।; M 2 शत्रूनरप; H, Bb u. B शत्रूँरपा; vgl. aber die verwandten Texte und RV. III, 47, 2. 8) P मृधः। 9) P नुदस्व। अथ। अभयं। 10) P महान्।; M 2 महꣳ; H u. Bb महं; M 1 u. B महं 11) P वृष्टिमं इव। वृष्टिमनिवेति वृष्टिमान् इव। 12) P वावृधे। ववृध इति ववृधे। 13) P महेंद्रायेति महा.इंद्राय। 13) So M 1. 2, B; H u. Bb महं; P महान्। 15) P चर्षणि.प्राः। 16) P द्वि.बर्हाः। 17) So M 1; cf. RV. VI, 19, 1; P अस्मद्रुङ्।; in H, Bb, B, M 2 अस्मद्रियग्व°; Kâṭh. अस्मद्रगवा°; Kap. S. अस्मदृयग्वा°

कदा चन स्तरीरसि नेन्द्र[1] सश्चसि दाशुषे।
उपोपेन्नु[2,3] मघवन्भूया[4] इन्नु[3] ते दानं देवस्य पृच्यते ॥
उपयामगृहीतो ऽस्यादित्येभ्यस्त्वा ॥
कदा चन प्रयुछस्युभे निपासि जन्मनी।
तुरीयादित्य[5] सवनं त[6] इन्द्रियमातस्था[7] अमृतं दिवि ॥
उपयामगृहीतो ऽस्यादित्येभ्यस्त्वा ॥
यज्ञो देवानां प्रत्येतु सुम्नमादित्यासो भवता[8] मृडयन्तः।
आ वो ऽवाची सुमतिर्ववृत्यादंहोश्चिद्या वरिवोवित्तरासत् ॥
अहं परस्तादहमवस्तादहं विश्वस्य भुवनस्य राजा।
अहं सूर्यमुभयतो ददर्श यदन्तरिक्षं तदु नः पिताभूत्[9] ॥
उन्नभय[10] पृथिवीं भिऽन्ध्यदौ[11] दिव्यं नभः।
उद्नो[12] दिव्यस्य नो धातरीशानो विषा[13] हतिम्[14] ॥ २६ ॥

Vgl. 4, 6, 9. — TS 1, 4, 22 (âdityaḥ) und 2, 4, 8, 2; Kâṭh. 4, 10; Kap. S. 3, 8 VS 8, 2—4. 9; Mân. Çr. 2, 5, 1.

अदब्धेभिः सवितः पायुभिष्ट्वं शिवेभिरद्य परिपाहि नो वृधे।
हिरण्यजिह्वः[15] सुविताय नव्यसे रक्षा[16] माकिर्नो[17] अघशंस ईशत ॥
उपयामगृहीतो ऽसि सावित्रो ऽसि जनधाया[18] जिन्व यज्ञं जिन्व यज्ञपतिमभि सवनानि पाह्यतस्त्वा विष्णुः पातु विशं त्वं पाहीन्द्रियेण ॥ २७ ॥ Vgl. 4, 7, 1. — TS 1, 4, 24 (sâvitraḥ); Kâṭh. 4, 10; Kap. S. 3, 8; VS 33, 69. 84; Mân. Çr. 2, 5, 1.

---

1) P नं। इंद्र। 2) P उपोपेत्नुप.उप। 3) P इत्। नु। 4) P भूयः। 5) P तुरीय। आदित्य। 6) P ते। 7) P आ। तस्थौ। 8) P भवत। 9) P पिता। अभूत्। 10) P irrig उत्। स्तंभय। 11) M 1 भिं३ध्यादौ; H भी३ध्यादौ; ebenso M 2 u. B, nur ohne Accent; Bb भो३ध्यादौ; nur P ganz correct भिंधि। अदः। 12) H, Bb u. B उघ्नो। 13) P वि। स्व। 14) H, Bb u. B धृतिं 15) M 1 हिरण्यजिह्व। 16) P रक्ष। 17) P माकिः। 18) जन.धायाः।

उपयामगृहीतो ऽसि ॥ सुशर्मासि[1] सुप्रतिष्ठानो[v] बृहदुक्षे[2] नमः ॥ एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ २८ ॥ Vgl. 4, 7, 1. — TS 1, 4, 26 (vaiçvadevaḥ); Kâṭh. 4, 10; Kap. S. 3, 8; VS 8, 8; Mân. Çr. 2, 5, 1.

उपयामगृहीतो ऽसि[v] बृहस्पतिसुतस्य त इन्द[3] इन्द्रियावतः[4] ॥ पत्नीवन्तं ग्रह[v] राध्यासम ॥ अग्गा३इ[5] पत्नीवा३न्त्सजूस्त्वष्ट्रा[6] सोमं पिब ॥ २९ ॥ Vgl. 4, 7, 4. — TS 1, 4, 27 (pâtnîvataḥ); Kâṭh. 4, 11; Kap. S. 3, 9; VS 8, 9 u. 10; Mân. Çr. 2, 5, 2.

उपयामगृहीतो ऽसि[v] हरिरसि हारियोजनो[7] हरिवान्हर्योः[8] स्थाता[v] स्तुतस्तोमस्य ते देव सोम शस्तोक्थस्येष्टयजुषः[9] ॥ हरिवतो हारियोजनस्य[10] हरिवन्तं ग्रह[v][11] राध्यासम ॥ हर्योर्धानां हरिवतीः सहसोमा[12] इन्द्राय[v] रय्यै त्वा[v] पोषाय त्वा ॥ ३० ॥ Vgl. 4, 7, 4. — TS 1, 4, 28 (hâriyojanaḥ); Kâṭh. 4, 11; Kap. S. 3, 9; VS 8, 11 u. 12; Mân. Çr. 2, 5, 4.

---

1) P सु. शर्मा । असि । 2) P बृहत्. उक्षे । 3) So M 2 und dazu vgl. TS इन्दो; P richtig इंदो इंतीदो ।; M 1, B u. H इंद्र; Bb इद्र; in Kap. S. fehlend; MPaddh. II, S. 124 इद इं° 4) M 2 इंद्रीयावत 5) So schreibe ich; cf TS 1, 4, 27. Die ३ bloss im P über dem इ angedeutet अग्गाइ३ ।; vgl. aber 1, 6, 10. 1, 8, 5. 7; M 1 अग्गाई; in M 2 verwischt; H, Bb अग्गाइ; desgl. B ohne Accent; vgl. die folgende Anmerkung. 6) Die Mss. schwanken; M 1 पत्नीवांत्स°; in M 2 verwischt, aber der Schluss °न्त्स° ist deutlich; P पत्नीवानिति पत्नीवान् । H, Bb पत्नीवान्; desgl. B ohne Accent. Dasselbe steckt in der corrumpirten Lesung von Mân. Çr. 2, 5, 2 ग्गाइ यसीवानिति; Kâṭh. 4, 11 अग्गा३इ पत्नीवा३न्त्सजूस्त्वष्टा cet.; Kap, S. 3, 9 अग्गा इ पत्नीवान्स°; VS 8, 10 (पत्नीवंत्स°) steht dieser Lesung näher als TS पत्नीवा३: Für den Accent cf. Whitney, Indische Gramm. §. 78; ferner unten 1, 6, 10. 1, 8, 5. 7. 7) So M 1; P हारि. योजनः ।; H, Bb u. B हार्योजनो; in M 2 eigentlich auch so geschrieben, dann in हारी° corrigirt; TS u. VS stimmen zu M 1, Kap. S. zu H, Bb u. B; unten 4, 7, 4 hat die beste Hdschr. (Ben.) हारियो° 8) Bb हरीवान् 9) P richtig शस्तोक्थस्येति शस्त. उक्थस्य । इष्टयजुष इतीष्ट. यजुषः ।; aber M 1 शस्तोक्थस्येष्टयजुषः; H, Bb शस्तोक्थस्येष्टयजुषः; (M 2 u. B ohne Accent.) 10) M 1 u. P हारियोजनस्य; M 2, H, Bb u. B हार्यो° 11) H u. Bb गृह 12) P सह. सोमाः ।; M 1 सह सोमा

अग्ना[1] आयूꣳषि पवसा[2] आसुवोर्जमिषं च नः।
आरे बाधस्व दुछुनाम् ॥
उपयामगृहीतोऽस्यग्नये त्वायुष्मत एष ते योनिरग्नये त्वायुष्मते॥३१॥
Vgl. 4, 7, 3. — TS 1, 4, 29 (atigrahaḥ); Kâṭh. 4, 11; Kap. S. 3, 9; VS 19, 38; 35, 16; Mân. Çr. 7, 2, 2.

ओजस्तदस्य तित्विष[3] उभे यत्समवर्तयत[4]।
इन्द्रश्चर्मेव रोदसी ॥
उपयामगृहीतोऽसीन्द्राय त्वौजस्वत एष ते योनिरिन्द्राय त्वौजस्वते
॥ ३२ ॥ Vgl. TS 1, 4, 30 (atigrahaḥ); Kâṭh. 4, 11; Kap. S. 3, 9; VS 8, 39.

अहश्चनस्य[5] केतवो वि रश्मयो जनं[6] अनु।
भ्राजन्तो अग्नयो यथा ॥
उपयामगृहीतोऽसि सूर्याय त्वा भ्राजस्वत एष ते योनिः सूर्याय त्वा भ्राजस्वते ॥ ३३ ॥ Vgl. TS 1, 4, 31 (atigrahaḥ); Kâṭh. 4, 11; Kap. S. 3, 9; VS 8, 40.

इन्द्रमिद्धरी[7] वहतोऽप्रतिधृष्टशवसम्[8]।
ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणाम् ॥
उपयामगृहीतोऽसीन्द्राय त्वा हरिवत एष ते योनिरिन्द्राय त्वा हरिवते ॥ ३४ ॥ Vgl. 4, 7, 6. — TS 1, 4, 38 (shoḍaçin); Kâṭh. 4, 11; Kap. S. 3, 9; VS 8, 35; Mân. Çr. 2, 5, 1.

उपयामगृहीतोऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं
गृह्णामि रातं देवेभ्यो दक्षाय दक्षवृधमग्निर्हरेभ्यस्त्वा[10] ऋतायुभ्या[11]

---

1) P अग्ने। 2) P पवसे। 3) P तित्विषे। H u. Bb betonen तित्विष 4) So M 1 u. P; auch M 2 (ohne Accent); desgl. Kâṭh. u. Kap. S.; aber H समावर्तयत; ebenso B, nur ohne Accent; Bb समावर्तयेत 5) P अदृश्रन्। 6) P जनान्। 7) P इत्। हरी इति हरी। 8) P अप्रतिधृष्टशवसं। 9) P हरिवते 10) P अग्निर्हरेभ्य इत्यग्नि-र्हरेभ्यः। 11) P ऋतायुभ्य इत्यृतः-आयुभ्यः।

इन्द्रज्येष्ठेभ्यो वरुणराजभ्यो वातापिभ्यः[1] पर्जन्यात्मभ्यः पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वाऽऽशास्त्वौषधीभ्यो वनस्पतिभ्यस्त्वा प्राणाय त्वापानाय त्वा व्यानाय त्वा सते त्वासते त्वा भूताय त्वा भव्याय त्वा येन प्रजा अछिद्रा अजायन्त तस्मै त्वा प्रजापतये विश्वकर्मणे विश्वव्यचसे विभूदाव्ने[2] विभुं भागं जुहोमि स्वाहा ॥

तिस्रो जिह्वस्य[3] समिधः परिज्मनो[4] ऽग्नेरकृण्वन्नुशिजो अमृत्यवे।
तासामेकामदधुर्मर्त्ये[5] भुजं लोकमु[6] द्वे उप जामी ईयतुः ॥ ३५ ॥

TS 3, 5, 8 (dadhigrahamantrâḥ); Kâṭh. 30, 5 u. 6; Mân. Çr. 7, 2, 4.

अग्निः प्रातः सवनात्पात्वस्मान्वैश्वानरो[7] विश्वश्रीर्विश्वशंभूः।
स नः पावको द्रविणं दधात्वायुष्मन्तः सहभक्षाः स्याम ॥

अग्नये त्वा प्रवृहामि गायत्रेण छन्दसेन्द्राय त्वा प्रवृहामि त्रैष्टुभेन छन्दसादित्येभ्यस्त्वा प्रवृहामि जागतेन छन्दसा रेशीनां त्वा पत्मन्नाधूनोमि मान्दानां त्वा पत्मन्नाधूनोमि भन्दनानां त्वा पत्मन्नाधूनोमि पूतनानां त्वा पत्मन्नाधूनोमि पस्त्यानां त्वा पत्मन्नाधूनोमि माध्वीनां त्वा पत्मन्नाधूनोमि मदुघानां[8] त्वा पत्मन्नाधूनोमि देवयानीनां त्वा पत्मन्नाधूनोम्युपयामगृहीतो ऽसि शुक्रं त्वा शुक्र शुक्राय गृह्णाम्यहो रूपे सूर्यस्य रश्मिषु ॥

आ समुद्रा अचुच्यवुर्दिवो धारा असश्चत ॥

---

1) P वातापिभ्य इति वात. आपिभ्यः। 2) M 1 विभुदाव्ने; P विभुदाव्न इति विभु. दाव्ने। 3) So M 1, H, Bb; desgl. ohne Accent M 2 u. B; nur P यज्ञस्य।; vgl. RV III, 2, 9 u. Böhtlingk's Wörterbuch s. v. जिह्व 4) So nach Anleitung des P परिज्मन इति परि. ज्मनः। und RV III, 2, 9; M 1 परिष्मनो; ebenso M 2, nur ohne Accent; H परिष्मनो; Bb परिष्मनो; ebenso B, nur ohne Accent. 5) M 1 मर्ते 6) P उ इत्यु। 7) So die Mss.; auch P प्रातः सवनादिति प्रातः सवनात्।; dagegen Kâṭh. 30, 6 अग्निः प्रातस्सवने पात्व°; s. TS 3, 1, 9, 1. 8) So M 1; M 2 मदूघानां; H, Bb मधुघानां; ebenso B, nur ohne Accent; P मधुघानां।

ककुभꣳ रूपꣳ वृषभस्य रोचते ऽबृहद्भासूनामाधीतौ रुद्राणां कर्मन्नादित्यानां चेतसीन्द्राय[1] त्वा विभूवसे जुहोम्युशिक्कं देव सोम गायत्रेण छन्दसाग्नेर्धामोपेहि ऽवशी त्वं[2] देव सोम त्रैष्टुभेन छन्दसेन्द्रस्य धामोपेह्यस्मत्सखा देव सोम जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथा[3] उपेहि ॥ ३६ ॥ Vgl. 4, 7, 7. — TS 3, 1, 9 (savanâhutyâdimantrâḥ) u. 5 3,3,3 (adâbhyâṃçugrahârthâ mantrâḥ); Kâṭh. 30, 6; VS 8, 48—50; Mân. Çr. 7, 1, 1.

उदु[4] त्यं जातवेदसं देवꣳ वहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ॥
चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा[5] द्यावापृथिवी अन्तरिक्षꣳ सूर्य[6] आत्मा जगतस्तस्थुषश्च ॥ 10

द्यां गच्छ ऽस्वर्गच्छ ऽरूपꣳ वो रूपेणाभ्येमि[7] वयसा वयस्तुथो वो विश्ववेदा विभजतु वर्षिष्ठे अधि नाके पृथिव्याः ॥

एतत्ते अग्ने राध एति[8] सोमच्युतं ऽतन्मित्रस्य पथा नय ॥
अयं नो अग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् ।
अयꣳ शत्रून्जयतु जर्हृषाणो[9] ऽयꣳ वाजं जयतु वाजसातौ ॥ 15

ऋतस्य पथा प्रेत चन्द्रदक्षिणा[10] ऽब्राह्मणमद्य ऋध्यासं पितृमन्तं पैतृमत्यमृषिमार्षेयꣳ सुधातुदक्षिणम् ॥ वि स्वः[11] पश्य[12] ३व्यन्त-

---

1) P चेतसि । 2) So M2, nur ohne Accent; M 1 वशि त्वं oder त्त्वं; H, Bb u. B वशीत्कं; P वशीक् । त्वं । 3) P पाथः । 4) P उत् । उं द्यु । 5) P आ । आप्राः । 6) P सूर्यः । 7) P अभि । एमि । 8) M 1 eig. एतु, aber wie es scheint durch येति ersetzt; Kap. S. एतु 9) So die Form TS 1, 3, 4, 1. 4, 46, 3; VS 5, 37. 7, 44; Kap. S. 3, 7. Auch hat P richtig जर्हृषाणः । aber M 1 जरिर्हृषाणो; M 2 जरिर्षाणो; H u. B जर्हृषाणो; Bb जर्हृषाणो । 10) H,Bb u.B ऋद्र° 11) P वि । स्वरिति स्वः ।; aber H, Bb विश्वः; ebenso M2 u. B, nur ohne Accent. 12) Ich lasse पश्य gemäss M1 ohne Accent, obgleich H u.Bb पश्य schreiben, weil sonst vor स्वः die ३ stehen müsste, die sich aber in keiner Hdschr. findet.

रिक्षꣳ॑ यतस्व सदस्यैरसद्राता[1] मधुमतीर्देवत्रा गच्छत ॑ प्रदातारमा-
विशतानवहायासान्देवयानेन[2] पथा सुकृतां लोके सीदत[3v] तत्रः सꣳ-
स्कृतम् ॥ ३७ ॥ Vgl. 4, 8, 2. 3. — TS 1, 4, 43; (dakshiṇâ); Kâṭh. 4, 9; Kap. S. 3, 7; — VS 7, 41. 42. 44—46; Mân. Çr. 7, 2, 5.

धाता रातिः सवितेदं जुषन्तां प्रजापतिर्वरुणो मित्रो अग्निः ।
विष्णुस्त्वष्टा प्रजया सꣳरराणो[4] यजमानाय द्रविणं दधातु ॥
समिन्द्र नो मनसा नेषि गोभिः सꣳ सूरिभिर्हरिवः सꣳ स्वस्त्या ।
सं ब्रह्मणा देवकृतꣳ यदस्ति सं देवानाꣳ सुमतौ यज्ञियानाम्[5] ॥
सꣳ वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन ।
त्वष्टा सुदत्रो विदधातु रायो ऽनु नो मार्ष्टु[6] तꣳन्वो यद्विरिष्टम् ॥
सुगा वो देवाः सदना कृणोमि यꣳ आजग्मेदꣳ[7] सवनं जुषाणाः ।
जक्षिवाꣳसः[8] पपिवाꣳसश्च विश्वे ऽस्मे धत्त वसवो वसूनि ॥
यानावह[9] उशतो देव देवाꣳस्तान्प्रेरय[10] स्वे अग्ने सधस्थे[11] ।
वहमाना भरमाणा हवीꣳष्यसुं घर्मं[12] दिवमातिष्ठतानु ॥
यदद्य त्वा प्रयति यज्ञे अस्मिन्नग्ने होतारमवृणीमहीह ।
ऋधगयाड्ऋधगुताशमिष्ट[13.14] विद्वान्त्रजानन्नुपयाहि यज्ञम् ॥
यज्ञ यज्ञं गच्छ ॑ यज्ञपतिं गच्छ ॑ स्वꣳ योनिं गच्छ ॑ स्वाहैषं ते यज्ञो यज्ञपते सहसूक्तवाकः सुवीरस्तेन संभव ॑ भ्राजं गच्छ ॑ देवा गातुविदो गातुꣳ

---

1) P अस्मात् · राताः । 2) P अनवहाय । 3) M 2, सीदतु 4) P सꣳरराणमिति सं · रराणं । (sic.!) 5) M 1 यज्ञीयानां; desgl. M 2 ohne Accent. 6) So M 1, H, Bb; B मार्ष्टु; P मार्ष्टुः ।; M 2 undeutlich. 7) P यें । आ · जग्मं । 8) P जक्षि · वाꣳसः । 9) P यान् । आ । अवहः । 10) P देवान् । 11) P सध · स्थे । 12) Bb धर्म्म 13) P ऋधक् । अयाट् । ऋधक् ।; Kap. S. °या ऋधगु° (= VS 8, 20); TS wie MS. 14) So M 1; P उत । अशमिष्ट ।; H u. B °शमीष्ट; Bb °शमीष्ट; Kâṭh. °शमिष्ट; Kap. S. °शमिष्ट; TS u. VS 8, 20 °शमिष्ठाः

विश्वा गातुमित मनसस्पते[1] सुधान्वमँ यज्ञं दिवि देवेषु वाते धाः स्वाहा ॥ ३८ ॥ Vgl. 4, 8, 4. — TS 1, 4, 44 (samishṭayajurhomaḥ); Kâṭh. 4, 12; Kap. S. 3, 10; VS 8, 17. 15. 14. 18—22. Mân. Çr. 2, 5, 4.

उरुँ हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ[2] ।
अपदे पादा प्रतिधातवे ऽकरुतापवक्ता[3] हृदयाविधश्चित्[4] ॥
शतं ते राजन्भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु ।
आरे बाधस्व निर्ऋतिं पराचैः कृतं चिदेनः प्रमुमुग्ध्यस्मत् ॥
अग्नेरनीकमप आविवेशापां नपात्प्रतिरक्षदसुर्यान्[5] ॥
दमे दमे समिधँ यक्ष्यग्ने[6] प्रति ते जिह्वा घृतमुच्चरण्यत् ॥
समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः[7] ।
यज्ञस्य ते यज्ञपते सूक्तोक्तौ[8] नमोवाके विधेम ॥

स्वाहावभृथ निचुङ्कुण[9] निचेरुरसि निचुङ्कुणो[10] गृहं गृहो[11] ऽव नो देवैर्देवकृतमेनो यक्ष्यव[12] मर्त्यैर्मर्त्यकृतं चिकित्वानुरोरा नो[13] देव रिष-

---

1) H मनसते; so auch in Bb corrigirt. 2) P अनु. एतवै । उ इत्यु ।; M 2 °तवा ऊ 3) P अकः । 4) So in M 2, nur ohne Accent in Uebereinstimmung mit TS, Kâṭh., Kap. S., VS; so eigentlich auch in M 1, aber corrigirt in °वृधश्चित्; H, Bb, u. B °वृधश्चित्; sogar P हृदयावृधः । हृदयवृध इति हृदय. वृधः । 5) So accentuire ich mit P अपां । नपात्, weil das neutrale प्रतिरत्वद° nur auf अनीकम° sich beziehen lässt, also auch अपां नपात् nur Apposition zu diesem sein kann; dieselbe Accentuation in Kap. S. u. VS 8, 24; dagegen M 1, H u. Bb °शापान्नपात् in Uebereinstimmung mit TS 1, 4, 45, 1, wo aber das Partic. masc. gen. ist (wie übrigens auch in Kap. S. u. VS.) 6) P यक्षि । ohne Accent. 7) M 1. 2, H, Bb, B °त्वोषधीरु° so auch Kap. S.; P विशंतु । ओषधीः । उत । आपः । 8) P सूक्त. उक्तौ। 9) M 2 नीचुंकुण, weiterhin aber in Uebereinstimmung mit den andern Mss. निचुंकुणो 10) P निचुंकुणं इति नि. चुंकुणः ।; in M 1 Oxytonon; in H u. Bb Paroxytonon; Kâṭh. auch निचुंकुणा — निचुंकुणो; Kap. S. निचुंपुण — — निचुंपुणो; Mân. Çr. 2, 5, 4 निचुपुणेति 11) So M 1., desgl. M 2, nur ohne Accent; P गृहं । गृहः । अव । नः ।; dagegen H, Bb गृहावा नो; B गृहावा नौ; in den andern Saṃhitâ's fehlen die räthselhaften Worte गृहं गृहो ganz. 12) P यक्षि । अव । 13) P irrig उरोरान इत्युरो. रानः ।; statt उरोः । आ । नः ।

स्याह्यप्सु धौतस्य[1] ते देव सोम नृभिः ष्टुतस्य[2] यस्ते गोसनिर्भक्षो यो अश्वसनिस्तस्य ता[3] उपहूता[4] उपहूतस्य भक्षयामि[5] विचृतो वरुणस्य पाशः[5] प्रत्यस्तो वरुणस्य पाशो[5] नमो वरुणस्य पाशा-[6] योन्नेतवसीयो[7] ना उन्नयाभि[8] ॥

उदुत्ते[9] मधुमत्तमा गिरः स्तोमास ईरते।
सचाजितो धनसा अक्षितोतयो वाजयन्तो रथा[10] इव ॥
कक्षा इव भृगवः सूर्या इव विश्वमिद्धितमानशुः[11]।
उदेत[12] प्रजामुत वर्चो[13] दधाना[14] युष्मान्राय[15] उत यज्ञा असश्चत ॥

गायत्रं[16] छन्दो अनु संरभध्वमथा[17] स्यात सुरभयो गृहेषु।
एधो ऽस्येधिषीमहि समिदसि समेधिषीमहि ॥
अपो अद्यान्वचारिष[18] रसेन समसृक्ष्महि।
पयस्वानग्न आगमं[19] तं मा सं सृज वर्चसा[20] ॥

---

1) P अप्सुधौतस्त्वेत्यप्सु-धौतस्य। 2) M 1, H नृभि ष्टुतस्य; desgl. M 2 u. B ohne Accent; Bb नृषिभि ष्टुतस्य; P नृभिः। स्तुतस्य।; Kâṭh. नृभि स्तुतस्य; Kap. S. नृभिः सुतस्य 3) P ते 4) P उपहूतमित्युप-हूतं। (sic.); Kâṭh. u. Kap. S. उपहूत उप° 5) M 2 वरूणपाशो 6) So M 1, Bb; P वरुणस्य। पाशाय।; B वरुणपाशा°; H eig. वरुणपाशा°, aber dann corrigirt in वरुणस्य पाशा°; M 2 वरूस्य पा° 7) P उन्ने तु-रित्युत-नेतुः। 8) So M 1; P नः। उत्। नय। अभि।; M 2 u. B उन्नयाभिः; H, Bb उभयाभिः; Kap. S. वस्यो धन्नया नः।; fehlt im Kâṭh. 9) H u. Bb उदुत्ते; M 1 उदुत्ते 10) M 1 यथा 11) °द्धीतम° wie in RV VIII, 3, 16. 12) So M 1; desgl. M 2, nur ohne Accent; H, Bb B उदेतः; P ganz verstümmelt उत्। आ। इ। त्। प्र° Es wäre vielmehr उत्। आ। इत। aufzulösen; das Metrum legt die Correctur in उत nahe; aber auch Kâṭh. 4, 13 liest उदेत 13) H u. Bb °मुतर्चो 14) P दधानाः। 15) P रायः। 16) P auffällig गायत्रीं छंदः। u. Kap. S. गायत्रो च्छंदांस्यनुसंरभंताम° 17) P अथ 18) So H, Bb; desgl. M 2 ohne Accent; M 1 अद्यान्वचार्ष°; B °वारिष°; P अद्य। अनु। अचारिषं। 19) P अग्ने 20) आ। अगमं।

॥ ३९ ॥ Vgl. 4, 8, 5. — TS 1, 4, 45 (avabhṛthaḥ); Kâṭh. 4, 13; Kap. S. 3, 11; VS 8, 23—25. 27; 20, 22; Mân. Çr. 1, 7, 4; 2, 5, 4.

॥ इति प्रथमकाण्डे ग्रहो[1] नाम तृतीयः प्रपाठकः ॥

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम।
मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम ॥
अग्ने व्रतपते व्रतमालप्स्ये[2v] तन्मे प्रब्रूमस्तन्नो[3v] गोपाय तञ्शकेयम्[4] ॥
अग्निꣳ होतारमुप तꣳ हुवे देवान्यज्ञियानिह[5] यान्यजामहै।
यन्तु देवा हविषो मे[6] अस्य[7] देवा यन्तु सुमनस्यमानाः ॥ 5
युनज्मि त्वा ब्रह्मणा दैव्येन हव्यायास्मै वोढवे[8] जातवेदः।
इन्धानास्त्वा सुप्रजसः सुवीरा ज्योग्जीवेम बलिहृतो वयं ते ॥
अस्मास्विन्द्र इन्द्रियं दधात्वस्मान्नायो मघवानः सचन्ताम्।
अस्माकꣳ सन्त्वाशिषः ॥
आमाशिषो[9] दोहकामा[10] इन्द्रवन्तो हवामहे। 10
धुक्षीमहि प्रजामिषम् ॥
सा मे सत्याशीर्देवान्गम्याज्जुष्टाज्जुष्टतरा[11.12] पथ्यात्पथ्यतरा[13] ॥

---

1) H, Bb u. B ग्रह नाम; M1. 2 ग्रहस्तृतीयः प्र° 2) So ist zu schreiben, wie die Vergleichung mit 1, 4, 5 und 1, 4, 14 lehrt; auch hat Mân. Çr. 1, 4, 1 आलप्स्य इति; M1, 2 u. B आलप्से; P आ। लप्से।; Bb आलभे; so Kâṭh. 4, 14 (ohne Accent); in H undeutlich, eigentlich wohl मे, dann aber verändert in से od. प्से 3) P तत्। नः। 4) P तत्। शकेयं। 5) M2 यज्ञीयान् 6) मे fehlt in H u. Bb. 7) P अस्य। आ। 8) M1 वोढवै; M2 वोढवे; B वो ३ ढवे; H, Bb bloss ढवै 9) So M1 u. 2; desgl. B, nur ohne Accent; P आम्। आशिष इत्या-शिषः।; H u. Bb fehlerhaft अमाशिषो; s. Böhtl. Wört. s. v. आम् 10) P दोह-कामाः। 11) P सत्या आशीः। 12) Von गम्या° bis गरू in B fehlend. 13) M 2 पुण्यात्पुण्यतरा

अरेडता मनसा देवान्गच्छ यज्ञो देवान्गच्छतु यज्ञो देवान्गम्यात् ॥
वि ते मुञ्चामि रशना वि रश्मीन्वि योक्त्राणि परिचर्तनानि।
धत्तादस्मभ्यं द्रविणेह[1] भद्रं प्र मा ब्रूताङ्गागदां देवतासु ॥
इष्टो यज्ञो भृगुभिर्द्रविणोदा यतिभिराशीर्दा वसुभिः।
अङ्गिरसो मे अस्य यज्ञस्य प्रातरनुवाकैरहौषुः[2.3] ॥
तस्य मा यज्ञस्येष्टस्य वीतस्य[4] द्रविणेहागम्याङ्सुयज्ञो[5] वसुमान्यज्ञस्तस्य मा यज्ञस्य वसोर्वसुमतो वस्विहागच्छत्वंदो मागच्छत्वंदो मा[6]गम्यात् ॥ १ ॥ Vgl. 1,4,5. — TS 1, 5, 10, 3 (dârçikayâjamânamantrâḥ); 1, 6, 2—4 (âishṭikaṃ yâjamânam); Kâṭh. 4, 14; 5, 2—4; VS 1, 5 (18, 56); Mân. Çr. 1, 4, 1.

सं यज्ञपतिराशिषा सदसि सन्मे[7] भूयाः पूर्णमसि पूर्णं मे भूयाः सर्वमसि सर्वं मे भूया अक्षितमस्यक्षितं मे भूयाः प्राच्या दिशो देवा ऋत्विजो मार्जयन्तां दक्षिणया दिशो मासाः पितरो मार्जयन्तां प्रतीच्या दिशो गृहाः पशवो मार्जयन्तामुदीच्या दिशापा[8] ओषधयो वनस्पतयो मार्जयन्तामूर्ध्वया दिशो यज्ञः सं वत्सरो मार्जयतां विष्णुः पृथिव्या व्यक्रंस्त गायत्रेण छन्दसा निर्भक्तः सं यं द्विष्मो विष्णुरन्तरिक्षे व्यक्रंस्त त्रैष्टुभेन छन्दसा निर्भक्तः सं यं द्विष्मो विष्णुर्दिवि व्यक्रंस्त जागतेन छन्दसा निर्भक्तः सं यं द्विष्मोऽगन्म[9] ३स्वः सं ज्योतिषाभूमेदमहममुष्य[10] प्राणं निवेष्टयामि तेजोऽसि समहं प्रजया सं मया प्रजा समहं पशुभिः सं मया पशवोऽग्ने[11] गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयास सुगृहपतिस्त्वं

---

1) P fehlerhaft द्रविण। इहं। 2) H, Bb, M 2 प्रातर° 3) So Kâṭh. 5, 4; aber M 1, H, Bb, B °रहूषुः; P अहूषुः।; M 2 °रहुषु 4) P fehlerhaft वि। तस्य।; M 1 वितस्य 5) P द्रविण। इहं। आ। गम्यात्। 6) P मा। आ। 7) P सत्। असि। सत्। मे। 8) P आपः। 9) P अगन्म। 10) P ज्योतिषा। अभूम। 11) M 1 u. 2 पशवोऽग्ने

[I, 4, 2.]

मया गृहपतिना भूया अस्थूरि[1] णौ[2] गार्हपत्यं दीदायञ्शतꣳ[3] हिमा द्वायूꣳ[4] राधाꣳसि संपृच्चानाꣳ[5] असंपृच्चानौ तन्वोऽसा[6] अनु मा तन्वे[7] छिन्नो दिव्यस्तन्तुर्मा मानुषश्छेदि दिव्याद्वास्रो मा छित्सि मा मानुषाज्ज्योतिषे तन्तवे त्वा ॥ २ ॥ Vgl. 1, 4, 6. 7. — TS 1, 6, 5 u. 6; Kâṭh. 5, 5; VS 2, 25. 27; Mân. Çr. 1, 4, 3; 2, 3, 6; Çat. Br. 3, 7, 4, 10. 11.

येऽ देवा यज्ञहनः पृथिव्यामध्यासते[8] । 5
अग्निर्नस्तेभ्यो रक्षतु गन्छेम सुकृतो वयम् ॥
येऽ देवा यज्ञमुषः पृथिव्यामध्यासते ।
अग्निर्नस्तेभ्यो रक्षतु गन्छेम सुकृतो वयम् ॥
यास्ते[9] राचयः सवितर्देवयानीः सहस्रयज्ञमभिसंबभूवुः[10] ।

1) So M 2, H, P; desgleichen B ohne Accent; M 1 अस्थूरि; Bb अस्थूरी 2) M 1 u. 2 नौ 3) So schreibe ich mit M 1; dieselbe Form Mân. Çr. 2, 3, 6 अस्थूरि णौ गार्हपत्यं दीदायत् शतꣳ हिमा द्वायू; Kâṭh. 5, 5 अस्थूरि णौ गार्हपत्यन्दीदाय शतं हिमा द्वायू; Kap. S. 5, 2 अस्थूरि णौ गार्हपत्यं दीदाय शतं हिमा; aber M 2, H, Bb, B दिदात्; P दीदात् ।; die Form दीदायत् auch in anderem Zusammenhange AV 3, 8, 3; Çat. Br. 3, 7, 4, 10 liest दीदयꣳत; der Sinn der schwierigen Stelle etwa: Nicht einspännig strahle unsere Hausherrschaft, (d. h. wir beide wollen uns glanzvoll in die Hausherrschaft theilen wie ein Zwiegespann in das Ziehen des Wagens; vgl. das Vorhergehende.) 4) So M 1 u. 2, H, wohl auch Bb; desgl. B, nur ohne Accent; dem P hat offenbar dasselbe vorgelegen, er trennt aber irrig हिमात् । द्वायू ।; im Çat. Br. zwei Worte, (3, 7, 4, 10) तयोरस्थूरि गार्हपत्यं दीदयꣳत हिमा द्वा यू इति; Pet.W. sagt s. v. 4 यु zu dieser Stelle „etwa so v. a. Zugthier.“ Nach der Accentuirung in den Mss. der MS wäre etwa ein adjectivisches द्वायूं (für द्वायुं, wie पुरू neben पुरुं) anzunehmen, etwa: „zwiefältig, doppelt, wobei Zweie betheiligt sind“, bezogen auf गार्हपत्यं und dem Sinne nach dem अस्थूरि ähnlich. Dass das Wort jedenfalls zu diesem, nicht zum folgenden Satz gehört, zeigt nicht nur Çat. Br., sondern namentlich Kâṭh., wo das Cap. 5, 5 mit द्वायू schliesst; s. d. vor. Anm. 5) P irrig सं. पृंचानाः । statt सं. पृंचानौ । 6) Ich habe den Accent nach Bb gesetzt; dazu stimmt P तन्वः । असौ ।; तन्वः ist dabei Verbalform; dagegen M 1. 2 तन्वो सा; Mân. Çr. 2, 3, 6 संपृचाना असंपृचानौ तंन्वस्तन्म इति. Ich übersetze: „Gaben uns gegenseitig schenkend und wieder nicht schenkend, pflanzen wir beide uns fort.“ असौ ein Vocativ, der sich auch MS 2, 4, 8 findet. (S. Böhtlingk's Wörterbuch s. v. तन्) „Du dort! mache, dass ich mich fortpflanze.“ 7) P अनु । मा । तनु । अछिन्नः ।; Bb तन्वंश्छिन्नो; desgl. B ohne Accent. 8) P अधि । आसते । 9) Bb प्रास्ते 10) So M 1, H; desgl. B ohne Accent; M 2 अभिसंबभूवुः; Bb अभिसंबभूयः; P अभि सं. बभूवुः ।

गृहैश्च सर्वैः प्रजया त्वयेऽ३स्वो[2] रुहाणास्तरता[3] रजाꣳसि॥
ये देवा यज्ञहनो अन्तरिक्षे अध्यासते।
वायुर्नस्तेभ्यो रक्षतु गन्धेम सुकृतो वयम् ॥
ये देवा यज्ञमुषो अन्तरिक्षे अध्यासते।
वायुर्नस्तेभ्यो रक्षतु गन्धेम सुकृतो वयम् ॥
आगन्म[4] मित्रावरुणा वरेण[5] राचीणां[6] भागो[7] युवयोर्यो अस्ति।
नाकं गृभ्णानाः[8] सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः॥
ये देवा यज्ञहनो दिव्यध्यासते
सूर्यो नस्तेभ्यो रक्षतु गन्धेम सुकृतो वयम् ॥
ये देवा यज्ञमुषो दिव्यध्यासते।
सूर्यो नस्तेभ्यो रक्षतु गन्धेम सुकृतो वयम् ॥
येनेन्द्राय समभरत्पयाꣳस्युत्तमेन[9] हविषा जातवेदः।
तेनाग्ने[10] त्वमुत वर्धया[11] माꣳ सजातानां मध्ये श्रैष्ठ्या[12] आ धेहि[13] मा॥

वेदोऽसि[v] वेदो मा[14] आभर[v] तृ३प्तो ऽहं[v] तृप्तस्त्वम् ॥
घृतवन्तं कुलायिनꣳ रायस्पोषꣳ सहस्रिणम्।
वेदो वाजं ददातु मे॥

---

1) P irrig प्रजया। अनु अग्ने; vgl. auch TS 3,5,4,2; M 1 नृग्ने 2) P स्वः। 3) P तरत। 4) So M 1 u. 2; P आ। अगन्म।; H, B u. Bb अगन्म; auch Kâṭh. 5, 6 आगन्म 5) Kâṭh. 5, 6 वरेण्यं; TS 3, 5, 4, 1 वरेण्या 6) M 2 राचिणां 7) P भाग 8) P गृभ्णानः। 9) So das Verb in M 1 u. 2; H, Bb समभरं; P समभरन्निति सं.अभरन्। (eigentlich zuerst समभिरमिति); auch Kâṭh. 5, 6 समभरन्; B समभर; TS 3, 5, 4, 2 समभरः 10) P तेन। अग्ने। 11) P वर्द्धय। 12) P irrig श्रैष्ठ्यै। statt श्रैष्ठ्ये; Kâṭh. श्रैष्ठ्य 13) P धेहि। 14) P मे।

निर्द्विषन्तं निररातिं दह[1] रुद्रास्त्वायछन्नादित्यास्त्वास्तृणन्[2.3] ॥
गोमं[4] अग्ने ऽविमं[5] अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः ।
इडावानेषो[6] असुर[7] प्रजावान्दीघो रयिः पृथुबुध्नः[8] सभावान् ॥
सं पत्नी पत्या सुकृतेषु गछता॰ यज्ञस्य युक्तौ धुर्या[9] अभूथाम् ॥
आप्रीणानौ[10] विजहता[11] अरातिं दिवि ज्योतिरुत्तममारभेथा॰ स्वाहा ॥
पत्नि पत्न्येष[12] ते लोको नमस्ते अस्तु मा मा हि॰सीर्यो सरस्वती वेशय-
मनी तस्यै स्वाहा ॥ या सरस्वती वेशभगीना[13] तस्यास्ते भक्तिवानो[14]
भूयास्म ॥

अयाश्चाग्ने[15] ऽस्यनभिशस्तिश्च[16] सत्यमित्त्वमया असि ।
अयाः सन्मनसा कृ३त्तो[17] ऽयाः सन्हव्यमूहिषे ऽया नो धेहि
भेषज॰ स्वाहा ॥ ३ ॥ Vgl. 1, 4, 8. — TS 3, 5, 4 (atîmokshajape mantrâḥ) 1, 6, 6, 4; Kâṭh. 5, 6 u. 4; Mân. Çr. 1, 4, 3 u. 1; 1, 3, 5.

देवान्जनमगन्यज्ञस्तेतो मा यज्ञस्याशीरागछतु[18] पितॄन्जनमगन्यज्ञ-
स्तेतो मा यज्ञस्याशीरागछतु मनु३ष्यान्जनमगन्यज्ञस्तेतो मा यज्ञ-
स्याशीरागछत्वप ओषधीर्वनस्पतीन्जनमगन्यज्ञस्तेतो मा यज्ञस्याशी-
रागछतु पञ्चजनं जनमगन्यज्ञस्तेतो मा यज्ञस्याशीरागछतु पञ्चानां

1) P दहा । 2) P fehlerhaft त्वा । अयछत् ।; M 1 त्वायछन्न°; M 2, H u. Bb ohne Accent. 3) So M 2, Hu. Bb; P त्वा । अस्तृणन् ।; M 1 त्वास्तृणन् । 4) P गोमा-निति गो · मान् । 5) P अग्ने । अविमानित्यवि · मान् 6) P एषः । 7) So M 2, P; B ohne Accent; in M 1, Hu. Bb असुर; RV 4, 2, 5; TS 1, 6, 6, 4. 8) So M 1 u. 2; P पृथु · बुध्नः ।; aber H, Bb u. B पृथुबुध्नः; s. RV 4, 2, 5. 9) P धुर्यो । 10) So schreibe ich gestützt auf P आप्रीणानावित्या · प्रीणानौ ।; auch Kâṭh. 5, 4 आप्रीणानौ; dazu stimmt dem Sinne nach संजानानौ in TBr 3, 7, 5, 11; dagegen M 1 u. 2 आपृणानौ; H आपृणानौ; desgl. B ohne Accent; Bb अपृणानौ 11) P irrig विजहता इति वि · जहता। 12) P पत्नि · पत्नि।; M 2 पत्नीप° 13) M 1 वेशभगिना; Kâṭh. 5, 4 वेशभगिनो 14) So auch Kâṭh. 5, 4; P भक्ति · वानः । 15) P अया । च । 16) P अग्ने । असि । 17) So M 1, H, Bb, B,; M 2 ३कृत्तो; P कृतः ।; Kâṭh. 5, 4 अयासा मनसा कृतो 18) M 2 आशिर° und so auch weiterhin (5 Mal).

त्वा वातानां ध्रुवाय गृह्णामि पञ्चानां त्वा दिशां ध्रुवाय गृह्णामि पञ्चानां त्वा सलिलानां ध्रुवाय गृह्णामि पञ्चानां त्वा पृष्ठानां ध्रुवाय गृह्णामि पञ्चानां त्वा पञ्चजनानां ध्रुवाय गृह्णामि चरोस्त्वा पञ्चबिलस्य ध्रुवाय गृह्णामि ॥

धामासि[1] प्रियं देवानामनाधृष्टं देवयजनम् ।
देववीतये त्वा गृह्णामि ॥

भूरसाक्[3] हव्यं हवानामाशिषो यजमानस्य देवताभ्यस्त्वा देवताभिर्गृह्णामि ॥ ४ ॥ Vgl. 1, 4, 9. — TS 1, 6, 1 (âjyagrahaṇam); Kâṭh. 5, 6; Mân. Çr. 1, 4, 1.

समृतयज्ञो वा एष यदर्शपूर्णमासौ कस्य वाह[4] यक्ष्यमाणस्य देवता यज्ञमागच्छन्ति कस्य वा न बहूनाम् समानमहर्यजमानानाम् यः पूर्वेद्युरग्निं गृह्णाति[5] स श्वो भूते देवता अभियजते ममाग्ने वर्चो विहवेष्वस्त्विति पूर्वमग्निं गृह्णाति देवता वा एतत्पूर्वेद्युरग्रहीत्राः श्वो भू३ते[6] ऽभियजते बर्हिषा वै पूर्णमासे व्रतमुपयन्ति वत्सैरमावास्यायां पुरा वत्सानामपाकर्तोर्दंपती अश्नीयाताम्[7] हस्ता अवनिज्य दक्षिण३तो ऽग्निमुपतिष्ठेतामग्ने व्रतपते व्रतमालप्स्या[8] इत्यग्निर्वै देवानाम् व्रतपतिर्ब्राह्मणो व्रतभृद्व्रतपतय एव प्रोच्य व्रतमालभते ऽग्निम् होतारमुप तम् हुवा[9] इति येन हविर्निर्वप्स्यन्स्यात्तदभिमृशेद्देवतानाम् वा एष ग्रहो देवता वा एतद्ग्रहीद्युनज्मि त्वा ब्रह्मणा

---

1) Von hier bis धामासि in B fehlend. 2) P धाम । असि । 3) P भूः । fälschlich ohne Accent. 4) So M1u.2, d. h. वा । अह ।; P ist für diese Partieen nicht vorhanden; H,Bb वा ह ohne Accent. 5) Von hier bis zum folgenden गृह्णाति in Hu.Bb fehlend. 6) श्वो भू ३ते in M1u.2; aber oben mit den andern Mss. übereinstimmend. 7) So M2; M1 दंपती अश्नीयाताम्; H,Bb,B दंपत्यश्नीयाताम् 8) So M1u.2; Hu.B व्रतमालप्सा; Bb °लशा; Kâṭh. 31, 15 व्रतमालभ इति 9) M2 हुवा ।

दैव्येनेति परिधिषु परिधीयमाणेषु वदेदेतेनैवा एष योगोऽग्निमेतद्युनक्ति युक्तो ऽस्मै हव्यं वहत्यस्मास्विन्द्र इन्द्रियं दधात्वितीडायामुपहूयमानायां वदेदिडाया वा एष दोहा इडां वा एतद्दुहेऽथो इन्द्रियं वा इडेन्द्रियमेवात्मन्धत्ता आमाशिषो[1] दोहकामा इत्याशिषो वै दोहकामा यजमानमभिसर्पन्ति ता दक्षिणतो यजमानलोकमुपतिष्ठन्ते ता यथा धेनवो ऽदुग्धा अपक्रामन्त्येवमस्मादाशिषो ऽदुग्धा अपक्रामन्ति य एवं न वेदाथ य एवं वेदाशिष एव दुहे सा मे सत्याशीर्देवान्गम्यादिति प्रस्तरे प्रह्रियमाणे वदेत्सत्यां वा एतदाशिषं देवान्गमयित्वाथ वरं वृणीत एतद्ध स्म वा आहौपावृजानश्रुतेयः[2] सहस्रेणेष्ट्वा कमु ष्विदतो ऽधि वरं वरिष्यामहा इति सहस्रेण यक्ष्यीयेति ह स्म वाव ततः पुराह वि ते मुञ्चामि रशनां वि रश्मीनिति परिधिषु प्रह्रियमाणेषु वदेद्देवता वा एतत्स्वर्गं लोकं गमयित्वा प्रतिष्ठाप्य द्यूमौगिष्टो यज्ञो भृगुभिरिति यज्ञस्य वा एष दोहो यज्ञमेतद्दुहे एतद्ध स्म वा आह कपिवनो भौवायनः किमु स यज्ञेन यजेत यो गामिव यज्ञं न दुहीत सुदोहतरो हि गौरिति ॥ ५ ॥

Vgl. 1, 4, 1. — TS 1, 6, 7 (âishṭikayâjamânavidhiḥ; devatâparigrahaḥ); 1, 7, 4, 3 flg.; Kâṭh. 31, 15; 32, 2 u. 3.

स यज्ञपतिराशिषेति यजमानो यजमानभागं प्राश्नाति यजमानो वै यज्ञपतिर्यज्ञो यजमानभागो यद्यजमानो यजमानभागं प्राश्नाति यज्ञपता एव यज्ञं प्रतिष्ठापयति यदि प्रवसेत्समिष्टयजुषा सह जुहुयादग्ना एवं यज्ञं प्रतिष्ठापयति यद्यविनिर्विप्स्यन्नग्नौ निष्टपत्यग्नेरेवं यज्ञं निर्मिमीते ऽथ यद्यविनिर्विप्स्यन्यजमानाय प्राह यज्ञपतेरेवाधि यज्ञं

1) Vgl. oben S. 47 Anm. 9. 2) M1 आहौपावृजानः श्रुतेह; M2 आहौपावृज्ञानः श्रुतेह; H u. Bb आहौपावृर्ज्ञानः श्रुतेह; desgleichen B ohne Accent. Aber vgl. Pet. Wört. s. v. औपावि und जानश्रुतेय

निर्मिमीतेऽग्निर्वै भूयाꣳसं प्रदहत्येतꣳ वै लोकꣳ यजमानो न्वेतिमुच्यते यदेता आपोऽतिसृज्यन्तेऽछिन्नꣳ स्रावयितव्या[1]ऽद्भिर्वा एतद्यजमानोऽग्नेरात्मानमन्तर्धत्तेऽइया वै देवा यजमानस्य गृहमागछन्ति सोमपा अन्येऽसोमपा अन्येऽहुतादोऽन्येऽहुतादोऽन्यऽएते वै देवा अहुतादो[2] यद्ब्राह्मणा[3,4] एतद्देवत्यऽएष यः पुरानीजानऽएते वा एतस्य प्रजायाः पशूनामीशतेऽ३ते ऽस्याप्रीता[5] इषमूर्जमादायापक्रामन्तियदन्वाहार्यꣳमन्वाहरतितानेव[6] तेन प्रीणातिदक्षिणतःसद्यः परिहृतेवा आहदक्षिणावतैव यज्ञेन यजताऽआहुतिभिरेव देवान्हुतादः[7] प्रीणातिते ऽस्मै प्रीता इषमूर्जं नियछन्ति ॥ ६ ॥

Vgl. 1, 4, 2. — TS 1, 7, 5 (anvâhâryaḥ).

सदसिसन्मे भूयाऽइत्याशिषो वा एतास्ता एवावरुन्द्धेपूर्णमसिपूर्णं मे भूयाऽइति पूर्णो ह वा अमुचाङ्गैः संभवतिसर्वमसिसर्वं मे भूयाऽइति सर्वो ह वा अमुचाङ्गैः संभवत्यक्षितमस्यक्षितं मे भूयाऽइत्यक्षितो ह वा अमुचाङ्गैः संभवतिप्राच्या दिशा देवा ऋत्विजो मार्जयन्तामित्येता वै यज्ञस्य मृष्टयऽएताः शान्तयस्तो बैजवापयो[7] विदामक्रꣳस्तेषां मृष्टो यज्ञः शान्तो भूदघातुकः[8] पशुपतिः पशूꣳस्तद्य एवꣳ वेद मृष्ट एवास्य यज्ञः शान्तो भवत्यघातुकः[8] पशुपतिः पशून्विष्णुः पृथिव्याꣳ व्यक्रꣳस्त गायत्रेण छन्दसेति विष्णुमुखा वै देवा असुरानेभ्यो लोकेभ्यः प्रणुद्य स्वर्गं लोकमायꣳ-[9]

---

1) M 1 u. 2 स्रावैतव्या 2) So M 1; aber M 2, H u. Bb आहुतादो; B हुंतादो 3) H u. Bb य एत् 4) So M 1 u. 2; H, Bb u. B ब्राह्मण 5) So corrigirt; M 1 स्राप्रीता; M 2, H, Bb u. B स्राः प्रीता 6) So M 1; M 2, H, Bb u. B तामेव 7) So M 1 u. 2; H, Bb u. B देवानहुतादः 7) So M 1 u. 2, H; Bb, B वैजवापयो; der ganze Satz im Mahâbhâshya citirt nach mündlicher Mittheilung von Kielhorn. 8) in den Mss. oxytonirt, aber corrigirt nach 1, 6, 4 u. 1, 8, 5. 9) M 2 °मायꣳ

स्तांद्विष्णुमुखो वा एतद्यजमानो भ्रातृव्यमेभ्यो लोकेभ्यः प्र
स्वर्गं लोकमेत्यगन्म ३स्वरिति स्वर्गमेव लोकमेति सं
तिषाभूमेति ज्योतिर्हि स्वर्गो लोक इदमहममुष्य प्राणं निवेष्टया
ति प्राणमेवास्य निवेष्टयतीत्थं पर्यावर्तत एव हि यज्ञः पर्या
ऽथो अमुष्य वा एतदादित्यस्यावृतमनु पर्यावर्तते तेजो ऽमी
तेजो ३ह्यग्निः स वै हित्वा प्रजां
प्रजया सं

मानो भ्रातृव्यस्य पशून्वृङ्क्ते
तमाहवनीया
यजतेर्गोमं अश्वमं ऽविमं अश्वी यज्ञ इति गोमन्तमेवाविमन्तमश्विन
मकरिंडावानेषो असुर प्रजावान्दीर्घो रयिः पृथुबुध्नः सभावानित्या-
मेवाशास्ते सं पत्नी पत्या सुकृतेषु गछतामित्येष वै पत्न्या
स्यान्वारम्भः सह स्वर्गे लोके भवतो या वा एतस्य पत्नी सैत
ति पश्चादन्वास्ते यत्संप्रति पश्चादन्वासीत प्रजामस्या निर्दहेद्यदाह
न पत्न्येष ते लोक इति लोकमेवास्या अकरंनिर्दाहुको ऽस्याः प्रजां
ति या सरस्वती वेशयमनीति वेशयमन वेशनेवास्मै तेन
त्युतास्याजीवन्तः सजाता उपासते वाचमिन्वस्य ब्राह्मणस्य वा
न्यस्य वोपास्महा इति मा सं तु न पचेयुस्तस्मिन्नग्नौ यत्पचेयुः
गादं कुर्युर्न हि तस्मिन्नग्नौ मा सं पचन्ति यस्मिन्नाहुतीर्जुह्वत्यया-
ग्नें ऽस्यनभिशस्तिश्चेत्यया वै नामैषाग्नेः प्रिया तनूरया मर्याधैर्येण-

---

So die Mss.; es ist wohl Pass. vom 2. अस् c. आ; vgl. übrigens TBr. 3, 3, 9, 11
: । पत्न्या उपस्थ आस्ते । मिथुनमेव करोति । विन्दते प्रजाम् ।; Kâṭh. 32, 6
उपस्थ आस्ेन्मिथुनमेव करोति 2) in H, Bb u. B ist beide Mal das Anfangs-
ht elidirt. 3) So M 1; aber M 2, H, Bb u. B मा३स्मे 4) Alle Mss.
5) So M 2 in Uebereinstimmung mit RV 4, 2, 5; TS 1, 6, 6, 4 (vgl. oben 1,

देवेभ्यस्तिरो ऽभवत्ते देवा वेदेनाविन्द᳕न्स्तद्वेदस्य वेदत्व᳕ᳬं यद्वेदेन
मास्ते यज्ञमेवास्मै विन्दति᳕ पत्न्यै वेदं प्रयच्छति᳕ दुरनुवेदो वा
च यज्ञो᳕ यज्ञमेवास्मै विन्दति᳕ चिः प्रयच्छति᳕ चिषत्या हि देवा᳕
या आस्यते᳕ पुमा᳕ंसं जानुका भवति᳕ पशवो वै वेद᳕ ओषधयो
᳕ एष खलु वै पशूनां लोको यदन्तराग्नी᳕ स्वे वा एतल्लोके
᳕ ऽर्धमासे ऽर्धमासे[2] वै यज्ञो विच्छिद्यते᳕
[illegible]मंत्रो ऽर्धमा३से[3]
[illegible] पशू᳕श्च स्तृणोति᳕ यदाह᳕ स
[illegible]मया प्रजां समहं पशुभिः᳕ सं मया [illegible]वा᳕ इति प्रज
चैव पशुषु च प्रतितिष्ठत्यग्ने गृहपते सुगृहपतिरहं त्वया गृहपति
भूयास᳕ᳬं सुगृहपतिस्त्वं मया गृहपतिना भूया᳕ इत्यग्रहणौ संजीर्य
सर्वमायुरितो᳕ नार्तिं नीतः[2]᳕ पुचस्य नाम गृह्णाति᳕ प्रजामे
समतानीत्सं वै मानुषमेवाभ्युपावर्तते᳕ मनुष्यस्य हि नाम गृह्णा
यदाहाछिन्नो दिव्यस्तन्तुर्मा मानुषश्छेदीति दिव्यं चैव मानुषं
समतानीर्हिंव्याङ्गाम्नो मा छित्सि मा मानुषादित्युभा इमं लोकं जय
सह स्वर्गे लोके भवतः ॥ ७ ॥ Vgl. 1, 4, 2. — TS 1, 7, 5 (âpyâyanâdimantrâ
1, 7, 6 (upasthânâdimantrâḥ); Kâṭh. 32, 5.

इति य एवं देवा यज्ञहनश्च यज्ञमुषश्च पृथिव्यां ता᳕ंस्तीर्त्वा न
रिक्षमारुहद्य एवं देवा यज्ञहनश्च यज्ञमुषश्चान्तरिक्षे ता᳕ंस्तीर्त्वा दि
वमगन्यं एवं देवा यज्ञहनश्च यज्ञमुषश्च दिवि ता᳕ंस्तीर्त्वा सजात
मध्ये श्रैष्ठ्या आधादेन᳕ शिरो वा एतद्यज्ञस्य यत्पुरोडाशः᳕ वै
वेदो᳕ यद्वेदेन पुरोडाश᳕ᳬं समार्ष्टि यज्ञस्य सर्वत्वायाथो मेध्यत्वाय᳕ य

ति खलु वा आहुर्यच्चैवाच यज्ञे क्रियते यच्च नाऽयां चैवाच यज्ञस्य प्रायश्चित्तिꣳ विद्म यां च न तस्यैषोभयस्य प्रायश्चित्तिः ॥ ८ ॥

Vgl. 1, 4, 3. — TS 3, 5, 4 (atîmokshajape mantrâḥ); TBr. 3, 3, 9, 11; Kâṭh. 32, 4 u. 6.

देवान्जनमगन्यज्ञ इति स्कन्नमभिमन्त्रयेत जनꣳ वा एतद्यज्ञस्य गच्छति यत्स्कन्दति जनो ३हीयमसदधि यज्ञस्य वा एतज्जनं गतस्याशिषमवरुन्द्धे पञ्चानां त्वा वातानां धर्त्राय गृह्णामीति पाङ्क्तो यज्ञो यावानेव यज्ञस्तमालब्धायꣳ वाव यः पवत एष यज्ञस्तमेवाग्रहीत्पञ्चानां त्वा दिशां धर्त्राय गृह्णामीतीमा एव पञ्च दिशोऽग्रहीत्पञ्चानां त्वा सलिलानां धर्त्राय गृह्णामीति पशवो वै सलिलꣳ पशूनेवाग्रहीत्पञ्चानां त्वा पृष्ठानां धर्त्राय गृह्णामीति पृष्ठान्येवाग्रहीत्तेनास्य पृष्ठवन्तौ दर्शपूर्णमासौ संतता अविच्छिन्नौ भवतः पञ्चानां त्वा पञ्चजनानां धर्त्राय गृह्णामीति छन्दाꣳसि वै पञ्च पञ्चजनाश्छन्दाꣳस्येवाग्रहीच्चरोस्त्वा पञ्चबिलस्य धर्त्राय गृह्णामीतीमे वै लोकाश्चरुः पञ्चबिलइमानेव लोकानग्रहीत् ॥

धामासि प्रियं देवानामनाधृष्टं देवयजनम् ।
देववीत्यै त्वा गृह्णामि ॥

इति प्रज्ञात आज्यग्रहः पथागाड्डूरस्माकꣳ हव्यं देवानामाशिषो यजमानस्येति भूतिमेवात्मन आशास्ते हव्यं देवेभ्य आशिषो यजमानाय देवताभ्यस्त्वा देवताभिर्गृह्णामीति देवताभ्य एवैनं देवताभिरग्रहीत् ॥ ९ ॥ Vgl. 1, 4, 4. — Kâṭh. 32, 6; Mân. Çr. 3, 1.

---

1) So M 1 u. Bb; M 2 सलिलं; H सलीलं; desgl. B, nur ohne Accent; vgl. Kâṭh. 32, 6 पशवो वै सलिलम् 2) H und Bb वै पंच जनाश्छं० 3) So M 1 u. 2; H, Bb, B यजमानस्य

देवतानाꣳ वा एतदायतनꣳ यदाहवनीयो यदन्तराग्नी तत्पशूनां मनुष्याणां गार्हपत्यः पितॄणामोदनपचनः सर्वा ह वा अस्य यक्ष्यमाणस्य देवता यज्ञमागच्छन्ति य एवꣳ वेद पूर्वे चाग्निमपरे च परिस्तरीतवा आह मनुष्याणाꣳ वै नवावसानं प्रियं नवावसानमेवाकर्मेध्यत्वायाग्नेर्जिह्वासि वाचो विसर्जनमिति पुरोडाꣳश्यानावपति देवतानाꣳ वा एष यहो देवता वा एतदग्रहीदेतद्ध स्म वा आहारुणऔपवेशिरहुतासु वा अहमाहुतिषु देवता हव्यं गमयामि सꣳस्थितेन यज्ञेन सꣳस्थां गछानीति तद्य एवꣳ वेदाहुतास्वेवास्याहुतिषु देवता हव्यं गछति सꣳस्थितेन यज्ञेन सꣳस्थां गछत्यौलूखलाभ्याꣳ वै हर्षदो हविष्कृदेहि ॥ इति देवा यज्ञादक्षाꣳस्यपाघ्नत यदौलूखला उद्वादयन्ति हर्षदौ समाघ्नन्ति ॥ हविष्कृदेहि ॥ इत्याह रक्षसामपहत्या अपः प्रणीय वाचꣳ यछति मनसा वै प्रजापतिर्यज्ञमतनुतौलूखलयोरुद्वदितोरध्वर्युश्च यजमानश्च वाचꣳ यछेतां प्रजापतिरेव भूत्वा मनसा यज्ञं तन्वाते न सर्वाणि सह यज्ञायुधानि प्रहृत्यानि मानुषं तत्क्रियते नैकमेकं पितृदेवꣳत्यं तद् द्वे द्वे सह प्रहृत्ये याज्यानुवाक्ययो रूपमुपवसत्युभयाꣳस्तेन पशूनवरुन्द्धे ग्राम्याꣳश्चारण्याꣳश्च यन्ग्राम्यस्य नाश्नाति तेन ग्राम्यानवरुन्द्धे ऽथ यदारण्यस्याश्नाति तेनारण्यानथो इन्द्रियꣳ वा आरण्यमिन्द्रियमेवात्मन्धत्ते न मांषाणामश्नीयादयज्ञिया वै मांषा न तस्य सायमश्नीयाद्यस्य प्रातर्यक्ष्यमाणः स्यादप्रतिजग्धेन वै देवा हव्येन

---

1) M 1 गछामीति 2) So betonen M 1 u. 2 den Infinitiv; aber H u. Bb °रुद्वदितोर°; vgl. उदेतोस् unten 1, 6, 10. 3) So M 1; in M 2 तन्वति; H, Bb तन्वाते 4) H u. Bb अरण्य° 5) M 2 °मन्नोयादयज्ञीया 6) in Bb प्रात° ohne Accent.

वसीयोभूयमगच्छन्प्रतिजग्धेनासुराः पराभवꣳस्तदप्रतिजग्धेन वा एतद्ध्यैन यजमानो वसीयोभूयं गच्छति परास्य भ्रातृव्यो भवति यो वै श्रद्धामनालभ्य यजते पापीयान्भवत्यापो वै श्रद्धा न वाचा गृह्यन्ते न यजुषेति वा एतां वाचं नेदन्यति वर्चो मनस्तु नातिनेदन्ति यद्यपो गृह्णीयादिमां तर्हि मनसा ध्यायेदियꣳ वा एतासां पाचमनयैवैना अग्रहीज् श्रद्धामालभ्य यजते न पापीयान्भवति ॥ १० ॥

Vgl. TS 1, 6, 8 (yajñâyudhasambhṛtiḥ); Kâṭh. 32, 7.

ब्रह्मवादिनो वदन्ति प्रेध्मꣳसंस्कुर्वन्ति प्र हविरिध्मः प्रथमं आहुतीनां कस्मादन्येषाꣳ हविषाꣳ याज्यानुवाक्याः सन्ति कस्मादिध्मस्य नेति ॥ अग्नये समिध्यमानायानुब्रूहि ॥ इति पुरोनुवाक्या सामिधेनीर्याज्योपवाकौ वषट्कारो यच्च वै यज्ञस्यातिरिक्तं क्रियते तद्यजमानस्यातिरिक्तमात्मन्जायते यदनाप्नꣳ वि यज्ञश्छिद्यते क्षोधुको यजमानो भवति परिधानीयया सामिधेनीनामुत्तममिध्मस्य समर्धयत्यक्षोधुको यजमानो भवति नास्यातिरिक्तमात्मन्जायते यो वै प्रजापतिꣳ सप्तदशꣳ यज्ञे ऽन्वायत्तꣳ वेद नास्य यज्ञो व्यथते प्रजापतौ यज्ञेन प्रतितिष्ठति ॥ ओं आवय ॥ इति चतुरक्षरम् ॥ अस्तु श्रौषट् ॥ इति चतुरक्षरम् ॥ यज ॥ इति द्व्यक्षरम् ॥ ये यजामहे ॥

---

1) So M 2 in Uebereinstimmung mit TS 1, 6, 8, 1; desgl. MPaddh. III S. 12b, ohne Accent; M 1 वक्रं; H, Bb u. B वत्क्र oder वक्त्र; Kâṭh. 32, 7 वर्तं 2) So M 1; in M 2 °मन ऐवैना; H, Bb u. B °मन एवैना 3) P ऋनु। ब्रूहि। 4) So M 1; desgl. M 2, ohne Accent; H, Bb u. B वै 5) Von hier bis zum folgenden भवति in H u. Bb fehlend. 6) Ebenso unten 4, 1, 11; P ओं आवयें। त्वा आवय। 7) Bb आवया इति। 8) P ऋस्तु औषडित्यस्तु. औषट्। 9) So M 1; desgl. M 2, ohne Accent; H u. Bb यंजेति; desgl. B, ohne Accent; P यंज। 10) P यें यंजामह इति यें. यंजामहे। वौषडिति वौषट्।

इति पञ्चाक्षरं ह्यक्षरो[1] वषट्कारः एष वै प्रजापतिः सप्तदशो यज्ञे ऽन्वायत्तो यद्यनुवाक्यायाः एति यदि याज्यायाः ऋतश्चेदेव[2] नैति नास्य यज्ञो व्यथते प्रजापतौ यज्ञेन प्रतितिष्ठति न वै तद्विद्म यदि ब्राह्मणो वा स्मो ऽब्राह्मणा[3] वा यदि तस्य वा ऋषेः ३स्मो ऽन्यस्य वा यस्य ब्रूमहे यस्य[5] ह[6] ३त्वेव ब्रुवाणो यजते तं तदिष्टमागच्छति नेतरमुपनमति तत्प्रवरे प्रवर्यमाणे ब्रूयात्[10] ॥ देवाः पितरः पितरो देवा[7] यो ऽस्मि स संन्यजे[8] यो ऽस्मि स संस्करोमि शुनं म इष्टꣳ शुनꣳ शान्तꣳ[9] शुनं कृतं भूयात् ॥ इति तद्य एवं कश्च स संन्यजते तं तदिष्टमागच्छति नेतरमुपनमति ॥ यज्ञस्य त्वा प्रमयाभिमया परिमयोन्मया परिगृह्णामि ॥ इति गायत्री वै यज्ञस्य प्रमा त्रिष्टुबभिमा जगती परिमानुष्टुबुन्मैतानि वै छन्दाꣳसि यज्ञꣳ वहन्ति तैरेवैनं परिगृह्णाति ॥ ११ ॥ Vgl. TS 1, 6, 11 (âçrâvaṇâdimantrâḥ).

केशिनꣳ वै दार्भ्यं गन्धर्वाप्सरसो ऽपृच्छन्कथा यजमानो यजमानेन भ्रातृव्येण सहेड्ङ्सीत्यहꣳ वेदा[10] इत्यब्रवीत्ते ऽब्रुवन्नङ्ग[11] नो यज्ञꣳ व्याचक्ष्वा इति तेभ्यो यज्ञꣳ व्याचष्ट ते ऽब्रुवन्नुतैनेन[12] यजमानो यजमानाद्भ्रातृव्यात्पापीयान्स्यादिति ते ऽब्रुवꣳस्तथा वै ते यज्ञं विधास्यामो यथा यजमानो यजमानं भ्रातृव्यमभिभविष्यसीति तस्मा आहुतीर्यज्ञꣳ व्यूदधुस्ततः केशी षण्डिकमौद्गारिमभ्यूभवद्भि[13] भ्रातृव्यꣳ

1) H ह्यचरो; Bb ह्यचरो; in M 1 u. 2 ohne Accent. 2) So M 1; desgl. M 2, ohne Accent; H, Bb, B °देवं 3) M 1 ब्राह्मणा; Bb ब्राह्मणा; M 2, B überhaupt ohne Accent. 4) Die Mss. ऋषे। 5) M 1 तस्य; desgl. M 2, ohne Accent. 6) Das ह fehlt in B 7) So M 1; auch P देवाः। पितरः। पितरः। देवाः। H u. Bb देवाः पितरः पितरो देवा 8) P सः। सन्। 9) P शांतं 10) So M 1 u. 2; in H, Bb u. B वेदा; cf. weiter unten व्याचक्ष्वा इति und 1, 5, 4 सा ऋक्तु 11) So M 1 u. 2; H, Bb u. B °ङ्गा 12) So M 1; M 2, H u. Bb. नुतैनेन 13) M 1 षꣳडीकमꣳ

यज्ञेन भवति य एवꣳ वेद प्राणो वा आघारः पूर्वार्धे होतव्यो मुखत एवास्य प्राणं दधाति प्राणो वा आघारो मध्यतो होतव्यो मध्यत एवास्य प्राणं दधात्याघारं भूयिष्ठमाहुतीनां जुहुयात्प्राणो वा आघारः प्राणमेवास्य भूयिष्ठं करोति संततमाघारमाघारयेत्प्राणो वा आघारः प्राणस्य संतत्या ऊर्ध्वमाघारमाघारयेत्स्वर्गकामस्य यजमानो वा आघारो यजमानमेव स्वर्गं लोकं गमयति यं द्विष्यात्तस्य न्यञ्चमाघारयेत्पापीयान्भवत्यभिक्रामन्ती वा एकाहुतिरपक्रामन्येका[1] प्रतिष्ठितैका यामभिक्रामं[2] जुहोति साभिक्रामन्ती यामपक्रामं जुहोति सापक्रामन्ती या समानञ्च तिष्ठन्जुहोति सा प्रतिष्ठिता यं कामयेताभितरꣳ वसीयाञ्श्रेयान्स्यादिति तस्याभिक्रामं[2] जुहुयात्तेन सो ऽभितरꣳ वसीयाञ्श्रेयान्भवत्यथ यं कामयेतापतरं पापीयान्स्यादिति तस्यापक्रामं[2] जुहुयात्तेन सो ऽपतरं पापीयान्भवत्यथ यं कामयेत न वसीयान्स्यान्न पापीयानिति तस्य समानञ्च तिष्ठन्जुहुयात्तेन स न वसीयान्न पापीयान्भवत्यृतवो वै प्रयाजाः समानञ्च होतव्या[3] ऋतूनां प्रतिष्ठित्यै यायैराज्यभागस्य सौत्तरार्धे होत३व्या ततो योत्तरा सा रक्षोदेव३त्या या सोमस्याज्यभागस्य सा दक्षिणार्धे होत३व्या ततो या दक्षिणा सा पितृदेव३त्यैतद्वा अन्तराहुतीनां लोकः कॢप्ता अस्याहुतयो यथापूर्वꣳ हूयन्ते य एवꣳ वेद यां धूमे जुहोति तां तमसि जुहोति ततो यजमानो ऽरोचुको भवति यामं-

---

1) H, Bb एकाहुतिर° 2) Alle Mss. schreiben in diesen Formen °क्रामं und da die Bildung richtig, habe ich nicht geändert; sonst könnte man wegen des parallelen तिष्ठन् vermuthen, dass hier überall °क्रामन् zu schreiben wäre, da die Mss. auch तिष्ठं schreiben; aber das erste Mal wenigstens haben die beiden besten Handschriften, M1u.2, auch deutlich तिष्ठन्, sodass es fraglich bleibt, ob die Formen auf °क्रामं dem gleichzustellen sind. 3) B होतव्यो

ङ्गारेषु जुहोति सान्धाहुतिस्स्ततो यजमानस्य चक्षुः प्रमायुकं भवत्युभे ज्योतिष्मति होत३ये रोचुको यजमानो भवति[1] नास्य चक्षुः प्रमीयते यामब्राह्मणः प्राश्नाति सा स्कन्नाहुतिस्स्तस्या वसिष्ठ एव प्रायश्चित्तिं विदांचकार ॥ ब्रह्म पाहि ॥ इति[2] पुरोडाशमभिमृशेद्ब्रह्मजतां भागी माभागो[3] भक्त[4] ब्राह्मणानामिदं हविः सोम्यानां सोमपानां नेहाब्राह्मणस्यापस्ति[5] कुर्वतो मे मा क्षेष्ट दद्तो मे मोपदसत्[6] ॥ इति दक्षिणीयेष्वेव यज्ञं प्रतिष्ठापयत्यस्कन्नमविक्षुब्धमुत यामब्राह्मणः प्राश्नाति सास्य हुतैव भवति ॥ १२ ॥

Vgl. TS 1, 6, 3 u. 1, 7, 1 a. E.

यस्याज्यमनुत्पूतं स्कन्दति सा वै चिचा नामाहुतिस्स्ततो यजमानस्य चित्तं प्रमायुकं भवति चित्तं देयं सैव तस्य प्रायश्चित्तिरथ यस्योत्पूतं स्कन्दति सा वै स्कन्ना नामाहुतिस्स्ततो यजमानः प्रमायुको भवति वरो देयः सैव तस्य प्रायश्चित्तिरथ यस्य पुरोडाशौ दुःशृतौ भवतस्तद्धविर्यमदेवत्यं यदा तद्धविः संतिष्ठेताथ चतुःशरावमोदनं पक्त्वा ब्राह्मणेभ्यो जीवतण्डुलमिवोपहरेत्सैव तस्य प्रायश्चित्तिरथ यस्य पुरोडाशौ क्षायतस्तं यज्ञं वरुणो गृह्णाति यदा तद्धविः संतिष्ठेताथ तदेव हविर्निर्वपेद्यज्ञो हि यज्ञस्य प्रायश्चित्तिरथ यो ऽदक्षिणेन यज्ञेन यजते तं यजमानं विद्यादद्क्षिणेन हि वा अयं यज्ञेन यजतेऽथ न वसीयान्भवतीत्युर्वरा समृद्धा देया सैव तस्य प्रायश्चित्तिरथ यस्य कपालं भिद्येत तत्संदध्यान्नायज्या त्वा शताक्षरया संदधामि ॥ इति वाग्वै गायत्री शताक्षरा वाचैवैनत्संदधात्यथ यस्य

---

1) M 2 भवति 2) in H, Bb u. B पाहीति 3) M 1 u. 2 मा भागो; H, Bb मां भागो; desgl. B, ohne Accent; P मा। भागः।, wobei मा richtig, dann aber अभागः। stehen müsste. 4) auch P भक्त। 5) P नं। इहं। ब्राह्मणस्य। अपि। 6) P मा। उप। दसत्।

कपालं नश्यति तꣳ वा इꣳ स्वर्गाल्लोकादन्तर्दधाति यदा तड्विः संतिष्ठेताथाग्नये वैश्वानराय द्वादशकपालं निर्वपेदियꣳ वा अग्निर्वैश्वानरः इमामेव भागधेयेनोपासरत्स्वर्गस्य लोकस्यानन्तर्हित्या अथ यस्याहुतिर्बर्हिष्परिधिं स्कन्दति सा वै जीवनडाहुतिरग्नीधं[1.2] ब्रूयात् ॥ एताꣳ संकर्ष[3] जुहुधि ॥ इत्यग्निर्वै सर्वा देवताः सर्वाभिरेवास्य देवताभिर्हुतं भवति पूर्णपात्रमग्नीधे[4] देयꣳ सैव तस्य प्रायश्चित्तिर्यजमानो वै जुहूर्भ्रातृव्य उपभृन्न प्रक्षिणतेव होतꣳव्यꣳ यत्प्रक्षिणीयाद्यजमानं प्रक्षिणीयाद्द्विषतेव[5] होतव्यं देवेषवो वा एता यदाहुतयो यं द्विष्यात्तं तर्हि मनसा ध्यायेद्देवेषुभिरेवैनꣳ व्यृषति[6] स्तृणुत एवं पशवो वा आहुतयो रुꣳद्रो ऽग्निः स्विष्टकृन्न सह होतꣳव्यꣳ यत्सह जुहुयाद्रुद्रायास्य पशूनपिदध्यादुत्तरार्धपूर्वार्धे[7] होतꣳव्यमाहुतीनामसꣳसृष्ट्या[8] अथो एवमस्य रुद्रः पशूननभिमानुको भवति ॥ १३ ॥ Vgl. Mân. Çr. 3, 1.

आग्नावैष्णवमेकादशकपालं निर्वपेद्दर्शपूर्णमासा आलप्स्यमानो[9] ऽग्निर्वै सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं चालभ्य दर्शपूर्णमासा आलभते जयानु त्वो जुहुति देवाश्च वा असुराश्चास्पर्धन्त स प्रजापतिरेतान्जयानपश्यत्तानिन्द्राय प्रायच्छत्तैः सꣳस्तम्भꣳसꣳस्तम्भमसुरानजयत्सꣳस्तम्भꣳ सꣳस्तम्भं भ्रातृव्यं जयति यस्यैतं हूयन्ते ॥ आकूतं चाकूतिश्च ॥

---

1) So M 1 u. M 2; s. जीवनप् bei Pâ. 8, 2, 63 Sch., wo unsere Stelle citirt wird; H u. Bb जीवनडाहु°; B ebenso, ohne Accent. 2) M 2 °ग्निधं 3) So M 1 u. 2; P संकर्षेति सं. कर्ष।; aber H, Bb u. B संकृष्य und so auch Mân. Çr. 3, 1 (ohne Accent). 4) M 2 °ग्निधे 5) So corrigirt; vgl. weiter unten; M 1 °याद्विषृषतेव; desgl. M 2, ohne Accent; in H u. Bb °द्विषृषतेव; desgl. B, ohne Accent. 6) So M 1; desgl. M 2, ohne Accent; H विषृषति; desgl. B, ohne Accent; Bb विषृति 7) Die Mss. °त्तरार्धपूर्वार्धे; s. Böhtlingk's Wörterbuch. 8) B °सृष्टया 9) So M 1; in H u. Bb आलप्स्य°; ebenso B, ohne Accent; M 2 आलप्स्य°; Mân. Çr. 1, 5, 6 आरप्स्यमान

इति यज्ञो वा आकूतं दक्षिणाकूतिः ॥ चित्तं च चित्तिश्च ॥ इति मनो वै चित्तं वाक्चित्तिः ॥ आधीतं चाधीतिश्च ॥ इति प्रजा वा आधीतं पशवा आधीतिः ॥ विज्ञातं च विज्ञातिश्च ॥ इत्यृग्वै विज्ञातं साम विज्ञातिः ॥ भगश्च क्रतुश्च ॥ इति प्रजापतिर्वै भगो यज्ञः क्रतुः ॥ दर्शश्च पूर्णमासश्च ॥ इति दर्शपूर्णमासौ एवं तद्द्वादश द्वादश मासाः संवत्सरः संवत्सरमेवाप्नावरुन्द्धे प्रजापतिः प्रायच्छज्जयानिन्द्राय[1] वृष्णे[2] उग्रः पृतनासु जिष्णुः[3] ॥ तेभिर्वाजं वाजयन्तो जयेम तेभिर्विश्वाः पृतना[4] अभिष्याम ॥ इति चयोदशीमाहुतिं जुहुयादस्ति मासस्त्रयोदशस्तमेवैतयाप्नावरुन्द्धे ॥ अग्ने बलद[5] सहा ओजः क्रममाणाय मे दा अभिशस्तिकृते ऽनभिशस्तेन्याय ॥ अस्यै जनतायाः[6] श्रैष्ठ्याय स्वाहा ॥ इति जुहुयाद्यं[7] कामयेत चित्तमस्यां जनतायां स्यामिति चित्तमह तस्यां जनतायां भवति शबलं त्वस्यात्मन्जायते ॥ १४ ॥ Vgl. TS 3, 4, 4, (jayâkhyamantrataddhomâḥ) Mân. Çr. 1, 5, 6.

अग्नये भगिने ऽष्टाकपालं निर्वपेद्यः कामयेत भग्यून्नादः स्यामिति प्रजापतिर्वै भगो यज्ञः क्रतुः स इमाः प्रजा भगेनाभिरक्षति तस्मात्सर्वो मन्यते मां भगो ऽरिष्यति मां भगो ऽरिष्यतीति यदग्नये भगिने भगमेव साक्षादाप्नावरुन्द्धे भग्यून्नादो भवत्युभौ सह दर्शपूर्णमासौ आलभ्या उडा अन्यमृङ्गे[8] सितो मुच्यते दर्शो वा एतयोः

1) So M 1 u. 2; in H बिबिवाभवनतिष्ठद्°; Bb बिबिवाभवतिष्ठद्° (oder बिबि°); B बिबिवाभवनतिष्ठद्°; MPaddh. III, S. 6b बिबिवाभवंनतिष्ठद्° 2) So schreibe ich mit M 2; desgl. M 1 n. Bl., ohne Accent, u. MPaddh. III, S. 6b; B शमेनमिंधे; H, Bb शमेन समिंधे; cf, 1, 6, 7. 3) So im Anschluss an M 2 °देषो त स्याद्°; desgl. M 1 n. Bl., ohne Accent; H °देषो त स्याद्°; desgl. B, ohne Accent; Bb °देषा त स्याद्°

विराट् पशूनवा एतन्मध्यतोऽधितासृष्टो[1] वा अग्निरासीदथ[2] प्रजापतिः प्रजा असृजत ता अन्धे तमसीमाँल्लोकाननुव्यूनश्यन्सोऽशोचत्सोऽतप्यत ततोऽग्निरसृज्यत तमग्निः सृष्टमधो न्यृदधात्तं या अस्मिंल्लोक आसंस्ता अभिसमावर्तन्त तं कुल्फदग्नमुदगृह्णात्तं या उत्तरस्मिंल्लोक आसंस्ता अभिसमावर्तन्त तं जानुदग्नं तं नाभिदग्नं तमंसदग्नं तं कर्णदग्नमुदगृह्णात्तं या उत्तरस्मिंल्लोक आसंस्ता अभिसमावर्तन्त तं कर्णदग्नं नात्युन्नह्यो यत्कर्णदग्नमत्युन्नह्ल्लीयाद्यजमानो वर्षिष्ठः पशूनां यजमानमुपरिष्टादग्निरभ्यवदहेत्तदाहुः कथमद्यैतं ब्रह्मणाहितं प्रच्यावयेयुः[3] शिथिरं वावैनमेतदकः परेन वपतीति तमनिधायैवाथ जानुदग्नमुन्नह्ल्लीयादथ[4] नाभिदग्नमथांसदग्नं तद्यथैव प्रजापतिं प्रजा एभ्यो लोकेभ्योऽभिसमावर्तन्तैवमेव यजमानं पशव एभ्यो लोकेभ्योऽभिसमावर्तन्ते य एवं विद्वानग्निमाधत्तेऽग्निना वै देवतया विष्णुना यज्ञेन देवा असुरान्प्रवीय वज्रेणान्ववासृजन्यैः सपत्नवान्भ्रातृव्यवान्वा स्यात्तस्य रथचक्रं चिरनुपरिवर्तयेयुस्तद्यथैव देवा असुरानग्निना देवतया विष्णुना यज्ञेन प्रवीय वज्रेणान्ववासृजन्नेवमेव यजमानः सपत्नं भ्रातृव्यमग्निना देवतया विष्णुना यज्ञेन प्रवीय वज्रेणान्ववसृजति य एवं विद्वानग्निमाधत्ते ॥ ६ ॥ Vgl. TBr. 1, 1, 7.

एष वै प्रजापती[5] रूपेण यत्पूर्णा सुग् यत्पूर्णा स्रुचं जुहोति प्रजापतिमेवाप्नोति सप्त ते अग्ने समिधः सप्त जिह्वा इत्येतावतीवा अग्नेस्तन्वः षोढा सप्त सप्त यो वा अस्यैता अग्निमादधानो वित-

---

1) So M 2; desgl. M 1 n. Bl., ohne Accent; H, Bb धित सृष्टी; desgl. B, ohne Accent. 2) in H u. Bb ist das Verb betont. 3) M 2 प्रच्यावयेयुः 4) So M 2; in H, Bb °मुन्नह्ल्लीया; M 1 n. Bl. 5) So corrigirt; die Mss. प्रजापति

षियति वि ह तृष्यति ता एवास्य तर्पयति शमीमयीस्त्रिस्रः समिधा आदधाति घृतान्वक्ता[1] घृतस्तोम्याभिः समेनमिन्द्धे शमयत्येव स शꣳ यजमानाय भवति[3] शं पशुभ्यो ये वा एषु त्रिषु लोकेष्वग्नयस्ते समागच्छन्त्यस्य द्रविणमाददामहा अति नोऽक्रमीद्धव्यवाड् भवतीति तज्जुहुयात् ॥

ये अग्नयो दिवो ये पृथिव्याः समागच्छन्तीषमूर्जꣳ वसानाः ।
ते अस्मा अग्नये[4] द्रविणं दत्वेष्टाः प्रीता आहुतिभाजो[5] भूत्वा
यथालोकं पुनरस्तं[6] परेत ॥

स्वाहेति तदिममेव द्रविणवन्तं कृत्वेष्टाः प्रीता आहुतिभाजो[7] भूत्वा यथालोकं पुनरस्तं[8] परायन्ति तद्वाचयेद् घर्मः शिरस्तदयमग्निः संप्रियः पशुभिर्भव पुरीषमसीति तदेनꣳ संप्रियं पशुभिः पुरीषिणमकर्यन्ते शुक्र शुक्रं ज्योतिः शुक्रं धामाजस्रं तेन त्वादधा इति सतेजसमेवैनमाधत्ते ॥

इडायास्त्वा पदे वयं नाभा पृथिव्या अधि ।
जातवेदो निधीमह्यग्ने[9] हव्याय वोढवे ॥

इति हव्यवाहमेवैनमकरग्नेर्वै सृष्टस्य पशवोऽक्ष्णा[10] अवक्शाय[11] प्रापतन्नस प्रजापतिर्वारवन्तीयमसृजत तानवारयतैतर्हि खलु वा एष सृज्यते यर्ह्याधीयते तद्यथैतस्मात्सृष्टात्पशवः प्रापतन्नेवमस्मादा-

---

1) So M 1 u. 2; in H, Bb घृतान्वक्ता 2) So M 1 u. 2; in H, Bb u. B शꣳमेनमिंधे 3) So M 1 u. 2; in H u. Bb ohne Accent. 4) So M 1. 2, B; in H अग्नयो; Bb अग्नेयो 5) M 2 आहुतीभाजो 6) So M 2; in M 1, H, Bb पुनरस्तं 7) M 1. 2 आहुतीभाजो 8) So corr.; M 1, H, Bb पुनरस्तं; M 2 पुनरस्तं 9) So M 1 u. 2; H, Bb, B निंधिम° 10) So H, Bb; desgl. B, ohne Accent; M 1 कृशा; M 2 क्षा 11) So M 1; in M 2 अवक्षाय; H u. Bb अवक्ष्याय; desgl. B, ohne Accent.

हितात्पशवः प्रपतन्त्येष हि रुद्रो यदग्निस्तद्व एवꣳ विद्वान्वारवन्तीयं गायते पशूनेव वारयते वारवन्तीयꣳ वै सृष्ट्वा प्रजापतिर्यं काममकामयत तमाप्नोत्तमेव काममाप्नोति यजमानो यं कामं कामयमानो ऽग्निमाधत्ते य एवꣳ विद्वान्वारवन्तीयं गायते ऽग्निर्वै क्रव्याद्विश्वदाव्यू इमांल्लोकानदहत्तं प्रजापतिर्वारवन्तीयं गायमानो वरणं बिभ्रत्प्रत्यैत्तमशमयद्यद्देवास्य क्रव्याद्यद्विश्वदाꣳव्यं तꣳशमयति य एवꣳ विद्वान्वारवन्तीयं गायते तस्माद्वरणो यज्ञावचरः स्याद्न त्वेनेन जुहुयाद्यद्वा इदꣳ सद्यद्भूतꣳ यद्भव्यद्यद्विषद्यदिमे अन्तरा द्यावापृथिवी तद्वामदेव्यं तदेवावरुन्द्धे य एवꣳ विद्वान्वामदेव्यं गायते ब्रह्मणो वा एष रसो यद्यज्ञायज्ञियꣳ यद्यज्ञायज्ञियं गायते ब्रह्मण्येव रसं दधाति ॥ ७ ॥ Vgl. 1, 6, 2. — TBr. 1, 1, 8.

अग्निꣳ वै सृष्टं प्रजापतिः पवमानेनाया उपाधमद्यत्पवमानाय निर्वपत्युपैवैनं तद्भमति यत्पावकाय पुनात्येनꣳ यꣳश्रुचये यदेवास्यापूतं तदेतेन पुनाति यत्पवमानाय निर्वपति पशवो वै पवमानः पशूनेवावरुन्द्धे यत्पावकायान्नꣳ वै पावकमन्नमेवावरुन्द्धे यꣳश्रुचये पूत एवास्मिन्रुचं दधाति यं कामयेतापतरं पापीयान्स्यादिति तस्यैकमेक हवीꣳषि निर्वपेत्तदेनमपायहीत्तेन सो ऽपतरं पापीयान्भवत्यथ यं कामयेत न वसीयान्स्यान्न पापीयानिति तस्य सर्वाणि साकꣳ हवीꣳषि निर्वपेत्तदेनꣳ सꣳरुणद्धि तेन स न वसीयान्न पापीयान्भवत्यथ यं कामयेतोत्तरꣳ वसीयाꣳश्रेयान्स्यादिति तस्याग्नये पवमानाय निरुप्याथ पावकाय च श्रुचये चोत्तरे

---

1) M 2 यदीमें 2) M 2 °यज्ञीयं 3) So corr.; die Mss. पूतंचेवा° 4) So M 1; dagegen M 2, H, Bb betonen das Verb भव°

हविषी[1] समानबर्हिषि[2] निर्वपेत्तदेनमुदयहीत्तेन स उत्तरे वसीयाञ्श्रेयान्भवत्यथ यस्य[3] त्रिष्टुभौ वानुष्टुभौ वा जगती वा स्याज्ये स्यातामिति गायत्रं क्रामेदर्वाक्छन्दोभ्यो ऽवपद्येत तद्यस्येत्सेज्ञायत्र्या[4] एवं तस्य स्याज्ये कुर्याज्ञायत्रो ह्यग्निर्गायत्रछन्दाः स्व एवैनं योनौ स्वे छन्दसि प्रतिष्ठापयत्यैन्द्रावैष्णवमेकादशकपालं निर्वपेदग्निर्वै सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं चालभ्य विष्णवे शिपिविष्टाय त्र्युद्धौ घृते चरू निर्वपेद्यद्विष्णवे विष्णुर्वै यज्ञो यज्ञमेवालभ्य यच्छिपिविष्टं पशवो वै शिपिविष्टं पशूनेवावरुन्द्धे यत् त्र्युद्धौ त्रयो वा इमे लोका इमानेव लोकानाप्नोति यद् घृते तेजो वै घृतं तेज एवावरुन्द्धे आदित्यं घृते चरुं निर्वपेत्पशुकामो धेन्वा वै घृतं पयो ऽनड्वाहस्तण्डुलास्तन्मिथुनं पशूनां पुष्ट्यै प्रजात्या अग्नीषोमीयं पुरोडाशं द्वितीयमनुनिर्वपेत्तद्धूयो हव्यमुपागान्नो[5] अस्यान्य ईशे यर्हि वा एतं पुरा ब्राह्मणा निरवपंस्तर्ह्येषां न कश्चनेश न हि वा एतमिदानीं निर्वपन्त्यथैषा सर्व ईशे यदाग्नेयस्तेजो वा अग्निस्तेज एवावरुन्द्धे यत्सौम्यः सोमो वै शुक्रो ब्रह्मवर्चसं[6] ब्रह्मवर्चसमेवावरुन्द्धे तद्यो ऽसौ आदित्यो घृते चरुस्तं ब्रह्मणे परिहरेयुस्तं चत्वारः प्राश्नीयुस्तेभ्यः समानो वरो देयश्चतुर्वा[7]

---

1) So corr.; M 1 हवीषि; M 2 हविषि; H, Bb u. B हवींषि 2) So M 1 u. 2; in H u. Bb समानबर्हिषि; desgl. B, ohne Accent. Wahrscheinlich ist aber zu corrigiren in समानबर्हिषी; dafür spricht noch besonders Kap. S. 7, 3 wo zweimal der Satz vorkommt: समानबर्हिषी उत्तरे कार्ये 3) Bb तस्य 4) So M 2; in M 1 गायत्र्या; H, Bb गायत्रीया; desgl. B, ohne Accent. 5) So M 1 u. 2; H u. Bb °मुपागान्नो 6) H u. Bb schalten hier noch ein ब्रह्मवर्चसं ein. 7) So M 1 u. 2; desgl. B, ohne Accent; dagegen H u. Bb चरुर्वा

इदमग्ने मिथुनमौद्यतैकश्चैका च द्वौ च द्वे च त्रयश्च तिस्रश्च चत्वारश्च चतस्रश्च तन्मिथुनं पशूनां पुष्ट्यै प्रजात्यै ॥ ८ ॥

Vgl. TBr. 1, 1, 6.

फल्गुनीपूर्णमासे ब्राह्मणस्यादध्यात्फल्गुनीपूर्णमासो वा ऋतूनां मुखमग्निर्देवतानां ब्राह्मणो मनुष्याणां ग्रीष्मे राजन्यस्यादध्याद् ग्रीष्मे वा इन्द्रो वृत्रमहन्वृत्रं खलु वै राजन्यो बुभूषन्जिघाꣳसति शरदि वैश्यस्यादध्याद्दन्नꣳ वै शरद्दन्नेन वैश्यो भद्रो भवत्यन्नाद्यमस्मा अवरुन्द्धे यद्यन्यस्मिन्नृता आदधीत यदि वा अस्मै सं एक ऋतुः शिवः स्यादथास्मा इतरे ऽशिवा दुर्योणा भवेयुस्तद्यस्यैतत्फल्गुनीपूर्णमास एव तस्यादध्यात्तदस्मै सर्वे ऋतवः शिवा भवन्ति सर्वं एनमृतवो जिन्वन्ति सꣳवत्सरस्य वा एतदाऽस्यꣳ यत्फल्गुनीपूर्णमाऽस्यमहर्यत्फल्गुनीपूर्णमाऽस्यमहरादध्यात्सꣳवत्सरस्यैनमासन्नपिदध्याद् द्वये वा पुरैकाहे वाधेयस्तद्द्वितीयस्य ऋतोरभिगृह्णाति[1] नैनꣳ सꣳवत्सरस्यासन्नपिदधाति तद्द्वितीयस्य ऋतोरभिगृह्णाति द्वितीयमेव सपत्नस्य भ्रातृव्यस्येन्द्रियं पशून्क्षेचꣳ वृङ्क्ते एति कृत्तिकासु ब्राह्मणस्यादध्यादाग्नेयीः कृत्तिका आग्नेयो ब्राह्मणः स्व एवैनꣳ योनौ स्वे ऽहन्नाधत्ते प्रजापतेर्वा एतच्छिरो यत्कृत्तिका अग्निरास्यꣳ शीर्ष्णान्नमद्यते ऽन्नाद्यमस्मा अवरुन्द्धे सप्त कृत्तिकाः सप्त शीर्षण्याः प्राणानासन्दधाति रोहिण्यां पशुकामस्यादध्यात्सोमस्य वा एतन्नक्षत्रꣳ यद्रोहिणी सोमो रेतोधा रेतो ऽस्मिन्दधात्यृक्षा वा इयमग्र आसीत्तस्यां देवा रोहिण्यां वीरुधो ऽरोहयꣳस्तद्यथेमा अस्यां वीरुधो रूढा एवमस्मिन्पशवो रोहन्ति य एवꣳ विद्वान्रोहिण्यामग्निमाधत्ते रोहिण्याꣳ स्वर्गकामस्यादध्याद्रोहिण्याꣳ वै देवाः

1) H, Bb क्रतोर॰

स्वरायन्त्स्वरेवैति कालकाञ्जा वा असुरा इष्टका अचिन्वत दिवमारोक्ष्यामा इति तानिन्द्रो ब्राह्मणो ब्रुवाण उपैत्स[1] एतामिष्टकामपधुपाधत्त प्रथमा इव दिवमाक्रमन्ताथ स तामबृहत्ते ऽसुराः पापीयाꣳसो भवन्तो ऽपाभꣳशन्त या उत्तमा आस्तां तौ यमश्वा[2] अभवताꣳ[3] ये ऽधरे त ऊर्णावाभयो यां[4] तामिष्टकामबृहत्सा चिच्चाभवद्यः सपत्नवान्भ्रातृव्यवान्वा स्यात्स चित्तायामग्निमादधीत तद्यथैतस्यामावृढायामसुराः पापीयाꣳसो भवन्तो ऽपाभꣳशन्तेवमस्य सपत्नो भ्रातृव्यः पापीयान्भवन्नपभꣳशते य एवꣳ विद्वाꣳश्चित्तायामग्निमाधत्ते यः कामयेत भग्यून्नादः स्यामिति स पूर्वासु फल्गुनीष्वग्निमादधीत भगस्य वा एतदहर्यत्पूर्वाः फल्गुनीर्भग्यून्नादो भवत्यथ यः कामयेत दानकामा मे प्रजाः स्युरिति स उत्तरासु फल्गुनीष्वग्निमादधीतार्यम्णो वा एतदहर्यदुत्तराः फल्गुनीर्दानमर्यमा दानकामा अस्मै[5] प्रजा भवन्ति तासु राज३न्यस्यादध्याह्वानꣳ ३ह्येष प्रजानामुपजीवति दानमर्यमा दानकामा अस्मै[5] प्रजा भवन्ति प्रजापतेर्वा एतौ स्तनौ यत्पौर्णमासी चामावास्या च यत्पौर्णमास्याꣳ[6] वामावास्यायाꣳ वाग्निमाधत्ते प्रजापतिमेव प्रीत्वा दुहे देवानाꣳ वा एते सदोहविर्धाने यत्पौर्णमासी चामावास्या च यत्पौर्णमास्याꣳ[6] वामावास्यायाꣳ वाग्निमाधत्ते उभे पुण्याहे उभे यज्ञिये ॥ ९ ॥

Vgl. Kâṭh. 8, 1; Kap. S. 6, 6; TBr. 1, 1, 2; Mân. Çr. 1, 5, 1.

---

1) M 1 u. 2 उपैत् 2) So M 1 u. 2; in H u. Bb यमश्वा. Statt dieses Wortes ist Kâṭh. 8, 1; Kap. S. 6, 6; TBr. 1, 1, 2, 6 द्यावो श्वानौ gebraucht; dagegen findet sich यमश्व Kâṭh. 37, 14 in dem Satze एतौ वै यमश्वा अहश्च रात्री च 3) So M 1 u. 2; in H u. Bb अभवता ꣳ 4) So M 1 u. 2; in H u. Bb या 5) So M 1 u. 2; in H u. Bb अस्मै 6) So M 1, H, Bb; in M 2 °मास्याꣳ

42308

न पुरा सूर्यस्योदेतोर्मन्थितवा असु३र्यो विदेवा आधीयत उद्यत्सु रश्मिषु मध्यस्तात्सदेवः सेन्द्र उभयोर्हो रूप आधीयते चतुर्विंशत्यां प्रक्रमेष्वाधेयश्चतुर्विंशत्यक्षरा वै गायत्री गायत्रमग्नेश्छन्दः स्व एवैन योनौ स्वे छन्दस्याधत्ते तद्यस्येत्सेदपरिमित एव तत्स्यादध्यात् क्षेष्णु वै परिमितमपरिमितमेवास्मै जीवनमवरुन्द्धे ऽग्निर्वै सृष्टः प्रजापतेरध्युदक्रामत्स प्रजापतिरबिभेदेद एवासा अभूदिदमहमिति तस्मिन्ननुनिष्क्रम्याजुहोदेतर्हि खलु वा एष सृज्यते यद्याधीयते तदाहुरमुष्मिण एवानुदुत्याथाग्निहोत्र होत३व्यमिति तन्नैवं कर्तवा अयतं तत्कुण्ड्यायीयं तद्यज्ञस्य क्रियते यद्योनेः परमवरं कुर्यादप्रजनिष्णुः स्याद्वेवी३षेव पूर्वाणि निरुप्याथ सायमग्निहोत्रं जुहुयात् ॥ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा ॥ इति तत्सायं ज्योतिषा रेतो मध्यतो दधाति ॥ सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ॥ इति प्रातस्तत्सायं ज्योतिषा रेतो मध्यतो हितं ॥ प्रातः प्रजनयामकैर्देवाश्च वा असुराश्च स३यत्ता आसन्नथेन्द्रो ऽग्निमाधत्त ते देवा अबिभयुरेद एवासा अग्निं गोपायमानो ऽग्निहोत्रं गोपायमानो भविष्यति न ना उपैष्यत्यभि नो जेष्यन्तीति तेऽब्रुवन्यदेव त्वं किंच करवो यड्ढना यज्ञिना यद्विन्दासि तत्ते ऽग्निहोत्रं कुर्मो ऽथेहीति स वाऐतस्माद्राजन्यस्याग्निहोत्रमहोत३व्य३यो३द्धेवैष किंच करोति यड्ढन्ति यज्ञिनाति यद्विन्दते यदेन विश उपतिष्ठन्ते तद्राजन्यस्याग्निहोत्र हो-

---

1) So M 1 u. 2; H, Bb u. B असू३र्यो 2) So M 1, (d. h. विदेवः); M 2 वैदेवा; H, Bb वै देवा; desgl. B, ohne Accent. 3) So meine Correctur; die Mss. सदेवस्येन्द्र; vgl. 1, 9, 5 सेन्द्रेण यज्ञेन यजते 4) Bb एवमस्यादधात् 5) Bb वै परिमितमेवास्मै 6) M 2 निक्रम्या°; die andern Mss. निःक्रम्या° 7) So M 1 u. 2, H, Bb (aus अन्वस्; vgl. 1, 10, 10); B °रमा 8) M 1, H u. Bb कुंड्यायीयं; M 2 कुड्यायीयं; B सुंड्यायीयं; vgl. Böthl. Wb., Bd. II, Nachträge. 9) So M 1 u. 2; in H, Bb u. B ज्योतिषा

तबू॰[1] राजन्यस्याग्निहोत्रा३न्न[2] होतव्या३मिं[3]ति मीमा॰सन्ते यद्धु-
त्वा न जुहुयाद्वि यज्ञं छिन्द्याज्जीयेत वा प्र वा मीयेत पौर्णमा-
सीममावाम्या॰ वा प्रति होत३व्यमेथो अग्न्युपस्थान॰ वा चयित-
३व्यस्तेनास्य[4] दर्शपूर्णमासौ संतता अविछिन्नौ भवतः ॥ १० ॥

Vgl. Kâṭh. 8, 3; Kap. S. 6, 8; TBr. 1, 1, 6.

यं कामयेत पशुमान्त्स्यादिति यो बहुपुष्टस्तस्य गृहादग्निमा- 5
हरेयुर्यथा वा एत॰ सृज्यमानं पशवो ऽन्वसृज्यन्तेवमेनमाह्रियमाणं
पशवो ऽन्वायन्त्येष हि रुद्रो यदग्निरथ यं कामयेतान्नादः स्यादिति
तस्य भ्रष्ट्राद्दक्षिणाग्निमाहरेयुरेष वा अग्नीनामन्नादो ऽन्नकरणं भ-
ष्ट्रमन्नाद्यमस्मा अवरुन्द्धे तदाहुर्यथा वृषलो निजः पुक्कर्काश्च- 5
किलसेदेव॰ स इति स मध्य एव स श॰ यजमानाय भवति शं प- 10
शुभ्यो यः[6] सोमेनायक्ष्यमाणो ऽग्निमादधीत न पुरा[7] स॰वत्सरा-
द्धवी॰षि निर्वपेद्रुद्रो ऽस्य पशूनभिमानुकः स्यादेते वै पशवो
यद्व्रीहयश्च यवाश्च तेषां चतुःशरावमोदनं पक्त्वा ब्राह्मणेभ्यो
जीवतगडुलमिवोपहरेत्तद्याभ्यो देवताभ्यो ऽग्निमाधत्ते यत्ताभ्यो न
जुहुयात्ताभ्या आवृश्चेतानुध्यायी क्षोधुकः स्यात्ताभ्या आज्यस्य होत- 15
३व्यं तेन ताभ्यो नावृश्चते ऽननुध्याय्यक्षोधुको भवति स॰वत्सरे
हवी॰षि[8] निर्वपति तदस्य स॰वत्सरान्तर्हितो रुद्रः पशून्न हिनस्ति
स॰वत्सरमग्निहोत्रमहौषीत्तत्तपो ऽविदत्स सर्वेण साक॰ स्वर्गं
लोक॰ समारुक्षत चिर्वा इद॰ विराड् व्यक्रमत गार्हपत्यमाहवनीय॰

---

1) M 2 °होत्रमहोतबू॰ (doch wohl so erst corrigirt.) 2) So corrigirt; M 1 u. 2 °होत्रान्न; H, Bb °होत्रा न; B °होत्रा न; also die Plutirung in allen Mss. 3) Vgl. 1, 8, 5 u. 7; H, Bb u. B होत३व्यमिति; M 1. 2 होतव्यामिति 4) So M 1 u. 2; in H, Bb u. B चैत३व्यस् 5) So M 2; in H, Bb u. B पुंस्कर्काश्वि°; M 1 पुंत्लकः श्वि° 6) So M 1 u. 2; in H, Bb u. B यत्सो° 7) Bb पुनरा 8) H, Bb स॰वत्सरो॰षि

सभ्यं तद्विराजमापदेन्न वै विराडेन्न वावैतदापन्मध्याधिदेवने[1] राजन्यस्य जुहुयाद्वारुण्यृ ऋचा वरुणो वै देवानां राजा राज्यम्[3] स्मा अवरुन्द्धे हिरण्यं निधाय जुहोत्यग्निमत्येव जहोत्यायतनवत्यन्यो ऽध्वर्युः स्याद्यदनायतने जुहुयाञ्शतमस्मा अक्षान्न्रयच्छेत्ता-
5 न्विचिनुयाञ्शतायुर्वै पुरुषः शतवीर्या आयुरेव वीर्यमाप्नोति गामस्य तद्दहः सभायां दीव्येयुस्तस्याः[4] परू॑षि न हिꣳस्युस्ता सभासद्भ्या उपहरेत्तया यद्गृह्णीयात्तद्ब्राह्मणेभ्यो देयं तत्सभ्यमन्नमवरुन्द्धे ॥ ११ ॥ Vgl. Kâṭh. 8, 7 u. 12; Kap. S. 7, 3 u. 4.

यस्या रात्र्याः प्रातरग्निमाधास्यमानः स्यात्ता रात्रीं चतुःशरा-
10 वमोदनं पक्त्वा ब्राह्मणेभ्यो जीवतगुडुलमिवोपहरेद्दितिर्वै प्रजाकामौदनमपचत्सोऽश्निष्टमाश्नात्तस्या धाता चार्यमा चाजायेता सापरमपचत्सोऽश्निष्टमाश्नात्तस्या मित्रश्च वरुणश्चाजायेता सापरमपचत्सोऽश्निष्टमाश्नात्तस्या अꣳशश्च भगश्चाजायेता सापरमपचत्सैक्षतोऽश्निष्टं मे ऽश्नत्या द्वौ द्वौ जायेते इतो नूनं मे श्रेयः स्याद्यत्पुर-
15 स्तादश्नीयामिति सा पुरस्तादश्नित्वोपाहरत्ता अन्तरेव गर्भः[5] सन्ता अवदतामावमिदं भविष्यावो यदादित्या इति तयोरादित्या निर्हन्तारमैच्छꣳस्ता अꣳशश्च भगश्च निरहतां तस्मादेतौ यज्ञेन यजन्ते

---

1) So M 1; in M 2, H u. Bb मध्याधिदेवनं; cf. Kap. S. 7, 4, wo das Wort मध्याधिदेवन in verschiedenen Casus auftritt. 2) So M 1; in M 2, H u. Bb वारुण्य 3) So M 2; wohl auch H; Bb राज्यम°; M 1 राज्ञम° 4) So M 1 u. 2; aber H u. Bb चिद्विव्येयुस्; B चिद्विव्येयुस्; im Anschluss an die letzten drei Mss. läge es nahe विदीव्येयुस् zu vermuthen, um so mehr, als Kap. S. 7, 4 von der Kuh gesagt wird गां (cod. गो) घ्नंति तां विदीव्यंति तां सभासद्य उपहरंति; indess wird die Richtigkeit der Lesung in M 1 u. 2 glänzend dadurch bewiesen, dass der ganze Satz wörtlich so citirt wird von Patañjali im Mahâbhâshya zu Pâ. 2, 3, 60; desgl. im Schol. zu Pâ. 2, 3, 60. Interessant ist es, dass Patañjali a. a. O. unmittelbar vorher auch die vorhin angeführte Stelle der Kap. S. citirt, mit geringen Abweichungen गां घ्नन्ति गां प्रदीव्यन्ति गां सभासद्य उपहरन्ति 5) So alle Mss.

ऽंशप्रासौ ऽंशस्य[1] भागधेयं जनं भगो ऽगछत्तस्मादाहुर्जनो गन्त-
ऽव्यस्तेन भगेन संगछता इति स वा इन्द्र ऊर्ध्व एव प्राणमं[2] उद-
श्रयत मृतमितरमाणमवापद्यत[3] स वाव मार्ताण्डो यस्येमे मनुष्याः
प्रजा सा वा अदितिरादित्यानुपाधावदस्त्वेव म इदं मा म[4] इदं
मोघं[5] परापप्तदिति[6] तं ऽब्रुवन्नयै३षो ऽस्माकमेव ब्रवाते[7] नं नो 5
ऽतिमन्याता[8] इति स वाव विवस्वानादित्यो[9] यस्य मनुष्या वैवस्वतो
यमश्च मनुरेवास्मिंल्लोके य३मो ऽमुष्मिन्नेते वै देवयानान्पथो
गोपायन्ति यदादित्यास्त इयक्षमाणं प्रतिनुदन्ते यो वा एतेभ्यो[10]
ऽप्रोच्याग्निमाधत्ते तमेते स्वर्गाल्लोकात्प्रतिनुदन्ता उच्छिष्टभागा
वा आदित्या यदुच्छिष्टे विवर्तयित्वा समिध आदधाति तदादित्येभ्यो 10
ऽग्न्याधेयं प्राह नैनꣳ स्वर्गाल्लोकात्प्रतिनुदन्ते सꣳवत्सरमुत्सृजेताग्नि-
माधास्यमानो नास्याग्निं गृहाड्डरेयुर्नान्यता आहरेयुः सꣳवत्सरे
वृङ्का गर्भाः प्रजायन्ते प्रजातमेनꣳ वृङ्कमाधत्ते द्वादश रात्रीरुत्सृजेत
द्वादश वै रात्रयः सꣳवत्सरस्य प्रतिमा सꣳवत्सरे वृङ्का गर्भाः प्रजा-
यन्ते प्रजातमेनꣳ वृङ्कमाधत्ते तिस्र उत्सृजेत त्रयो वा इमे लोका 15
इमानेव लोकानाप्नोत्येकामुत्सृजेतैको वै प्रजापतिः प्रजापतिमेवाप्नो-

---

1) So M 1 u. 2; in H, Bb u. B °शश्च 2) So schreibe ich, d. h. प्राणमान् । उदश्रयत ।; die Mss. schwanken; M 2 प्राणमनूदश्रयत; desgl. M 1 n. Bl. ohne Accent; H u. Bb प्राणमनुदश्रयत; desgl. B, ohne Accent. 3) So M 1 n. Bl., ohne Accent; in M 2 म्रितं°; H, Bb मितं°; desgl. B, ohne Accent. 4) So meine Corr. In den Mss. ohne Accent.; in M 2 eigentlich माम geschrieben, aber dann corrigirt in मम; alle andern Mss. मम 5) So die Mss. 6) So M 1 n. Bl., ohne Accent; M 2 परापतप्तदिति; H u. Bb परापतदिति desgl. B, ohne Accent. 7) M 1 n. Bl ब्रुवाते 8) So M 2; die andern Mss. तिमन्यता 9) So M 2; in den andern Mss. विवस्वान° ohne Accent. 10) So M 2; in H, Bb एतेभ्यो प्रोच्या°; in M 1 n. Bl. ohne Accent.

ति पुरूरवा[1] वा ऐडं उर्वशीमविन्दत देवीं तस्या आयुरजायत स देवान्स्वर्गं लोकꣳ य३त्तो ऽनूदैत्[2] ऽब्रुवꣳस्त्रयं देवा इमꣳ ३क्रायं मनुष्यो गमिष्यतीति सो ऽब्रवीद्बहवो वै मे समानास्ते मा वक्ष्यन्ति किमयं देव्याः पुत्रो देवेभ्यो मानुभ्रात्रेभ्या[3.4] आहार्षीदस्त्वेव मे किं-
5 चिदिति तस्मा अग्नियज्ञियां त३न्वं प्रायच्छत्तामुत्सङ्गे ऽवधायाहरत्तामुखायामवादधात्सो ऽश्वत्थ आरोहो ऽभवद्योषा[5] सा शमी तस्मादेतौ यज्ञावचरौ पुण्यजन्मानौ ३ह्यग्निर्वै वरुणं ब्रह्मचर्यमागच्छत्प्रवसन्तं तस्य जायाꣳ समभवत्तं पुरस्तादायन्तं प्रतिक्शाय[6] प्रत्यङ् निरद्रवत्सो[7] ऽवेत्सर्वꣳ वा इन्द्रियं नृम्णꣳ रेतो निर्लुप्य हरतीति तदनुपरा-
10 हाय निरलुम्पद्यद्रेता आसीत्सो ऽश्वत्थ आरोहो ऽभवद्यदुल्बꣳ सा शमी तस्मादेतौ यज्ञावचरौ पुण्यजन्मानौ हि प्रजापतिः प्रजाः सृष्ट्वा रिरिचानो ऽमन्यत सो ऽश्वो भूत्वा सꣳवत्सरं ३न्यङ्[8] भूम्याꣳ शिरः प्रतिनिधायातिष्ठत्तस्याश्वत्थो[9] मूर्ध्न उदभिनत्तदश्वत्थस्याश्वत्थत्वं तस्मादेष यज्ञावचरः प्राजापत्यो हि ॥ १२ ॥

Vgl. Kâṭh. 7, 15. 8, 10; Kap. S. 6, 5. 7, 6; TBr. 1, 1, 9.

15 मनुर्वै प्रजाकामो ऽग्निमाधास्यमानो देवतायै देवताया अजुहोत्ततो मित्रावरुणयोराहुत्या पफर्व्युदतिष्ठत्तस्या घृतं पदोरक्षरत्सा मित्रावरुणा ऐक्षतां ब्रूतामाहुत्या वै त्वमावयोरजनिष्ठा मनो-

---

1) M 2, H, Bb पुरूरवा; M 1 पुरूरवा; desgl. B, ohne Accent; s. oben 1, 2, 7 a. A. Die ganze Stelle findet sich auch MPaddh. III, S. 3a und dort steht पुरूरवा 2) M 2, H, Bb य३त्तो नुदैत्; desgl. B, ohne Accent; M 1 य३तो नुदैत् 3) So corrigirt; in den Mss. मातु° ohne Accent. 4) So die Mss.; desgl. MPaddh. III, S. 3a, (ohne Accent). 5) So corr.; M 2, H u. Bb यौषा; M 1 यौषा; desgl. B, ohne Accent, u. MPaddh. III S. 3a. 6) So corrigirt; die Mss. प्रतिचाय; ebenso MPaddh. III, S. 3b (ohne Accent). 7) Bb सौ 8) So corrigirt; M 1 u. 2 ३न्यं; H, Bb, B ण्यं 9) So das Verb betont in M 1, H, Bb; in M 2 निधायातिष्ठत्

स्वै त्वर्मसि तं परेहीति सा मनुमैत्सो ऽब्रवीदसुरा वा इमे पुण्यमन्या अग्निमादधते तान्परेहीति सा परेऽत्ते ऽसुमया आदधताथेममथेम सा पुनरैत्तामपृछत् किमभ्यगन्निति साब्रवीदसुमेवाया आधिषताथेममथेममिति सो ऽब्रवीत्सकृद्वावासुराः स्त्रियो ऽन्तमगुः परा तु भविष्यन्तीति सो ऽब्रवीद्देवा वा इमे पुण्यमन्या अग्निमादधते तान्परेहीति सा परेऽत्ते इममया आदधताथामुमथेम सा पुनरैत्तामपृछत् किमभ्यगन्निति साब्रवीदिममेवाया आधिषताथामुमथेमिति सो ऽब्रवीत्सकृद्वाव देवाः सर्वेण साकꣳ स्वर्गं लोकꣳ समारुक्षन्निति[1] प्रदानात्तु यज्ञमुपजीविष्यन्तीति यः सर्ववेदसं दास्यन्स्यात्त इममया आदधीताथामुमथेमं तद्यथैव देवाः सर्वेण साकꣳ स्वर्गं लोकꣳ समारोहन्नेवमेव यजमानः सर्वेण साकꣳ स्वर्गं लोकꣳ समारोहति य एवꣳ विद्वानग्निमाधत्ते सो ऽब्रवीदृषयो वा इमे पुण्यमन्या अग्निमादधते तान्परेहीति सा परेऽत्ते इममया आदधताथेममथामुꣳ सा पुनरैत्तामपृछत् किमभ्यगन्निति साब्रवीदिममेवाया आधिषताथेममथामुमिति सो ऽब्रवीदहꣳ वावाग्न्याधेयꣳ विदांचकार सर्वेषु वा एषु लोकेष्वृषयः प्रत्यष्ठुरिति प्रति प्रजया च पशुभिश्च तिष्ठति य एवꣳ विद्वानग्निमाधत्ते यदमुमाधायेममादध्यादप तदादध्याद्वावेममाधायामुमादध्यादप तदादध्यात्तदिममेवाधायाथेममथामुं तथा समृद्धा आधीयते प्राचीनप्रवण[2] आधेयस्तथा समृद्धा आधीयते प्राचीनं मध्यमाङ्शादाधेयस्तथा

---

1) So Hu. Bb; in M 1 u. 2 प्रदाना° ohne Accent. 2) So M 1 u. 2; vgl. unten 3, 8, 3; Kâty. Çr. 5, 1, 21; in H u. Bb °प्रणम; B °प्रविण

संमृड्ढा आधीयते या वै सा प्रफर्व्यासीत्सा गौरभवत्सेडा सा मानवी घृतपदी मैचावरुणी ॥ १३ ॥

Vgl. Kâṭh. 8, 4; Kap. S. 6, 9; TBr. 1, 1, 4.

॥ इति प्रथमकाण्डे आधानं नाम षष्ठः प्रपाठकः ॥

यस्त्वा क्रुद्धः परोवप मन्युना सुमनस्तर।
सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि ॥
यत्ते मन्युपरोप्तस्य पृथिवीमनुदध्वसे[1]।
आदित्या विश्वे तद्देवा वसवः पुनराभरन् ॥
यत्ते भामेन विचकानीशानो[2] हृदस्परि।
पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुधीते[4] अग्ने[4]।
घृतेन त्वं तन्वं[3] वर्धयस्व रायस्पोषा यजमानं सचन्ताम् ॥

1) So M 1 u. 2; P अनुदध्वसं इत्यनु.दध्वसे।; dagegen H u. Bb °मनु दध्वसे wie TS 1, 5, 3, 2. 2) P अनीशानः।; H u. Bb °रानीशानो 3) So M 1; P तंत्।; aber M 2 त्वदि°; H, Bb u. B त्वादि° 4) So M 1 u. 2; H, Bb u. B वसु धीयते मे; P वसुधीत इति वसु.धीते। अग्ने।; Kap. S. वसुधीतमग्ने; VS 12, 44; TS 4, 2, 3, 4 वसुनीथ यज्ञैः

चयस्त्रि᳡ंशत्त्रिवो य᳡[1] वितन्वत इमं च यज्ञं᳡ सुधया[2] ददन्तः।
तेभिश्छित्रमपिदध्मो यदत्र स्वाहा यज्ञो अप्येतु देवान्[3] ॥
मनो ज्योतिर्जुषतामाज्यस्य[4] विच्छिद्य᳡ यज्ञं᳡ समिमं दधातु।[5]
इमं᳡ यज्ञं᳡ सप्ततन्तुं ततं[5] नो आ देवा यन्तु सुमनस्यमानाः ॥
बृहस्पतिर्नो हविषा घृतेन विच्छिद्य᳡ यज्ञं᳡ समिमं दधातु।
या इष्टा उषसो याश्च याऽज्यास्ताः संदधामि मनसा घृतेन ॥[10]
अग्ने[6] ऽभ्यावर्तिन्नभि मा वर्तस्वायुषा[7] वर्चसा प्रजया धनेन सन्या मेधया रय्या पोषेण ॥
अग्ने अङ्गिरः शतं ते सन्त्वावृतः सहस्रं त उपावृतः[8]।
अथा पोषस्य पोषेण पुनर्नो नष्टमाकृधि पुनर्नो रयिं-[15] माकृधि ॥
पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा[9]।
पुनर्नः पाह्य᳡ꣳहसः ॥

---

1) So die Mss.; P यं।; aber Kâṭh. 34, 19 यान्वितन्वत; TS 1, 5, 10, 4 ये वितत्निरे 2) So M 1, 2 u. P; Bb सुधया; H सूधया; desgl. B, ohne Accent; Kâṭh. 34, 19 इमं यज्ञ᳡ स्वधया ये ददंते; in Kap. S. fehlt der Vers. Vgl. noch 1, 8, 9. 3) P देवानां। 4) M 2 °मावस्य 5) So M 1 u. 2; B ततंत्रा; H, Bb ततन्ना (ohne Accent); P ततंत्राः। (der Accent nicht ganz sicher); müsste wohl ततं। नः। lauten; Kâṭh. 34, 19 सप्ततंतुं तन्न आ° 6) P अंग्ने। अभावर्तिन्नित्यभि-आवर्तिन्। 7) P मा। वर्तस्व।; müsste aber मा। आ। वर्तस्व lauten. 8) P उपावृत इत्युप-आवृतः। 9) P इषा। आयुषा।

सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया ।
विश्वप्स्न्या विश्वतस्परि ॥

सलिलः[1] संलिगः[2] संगरस्ते न आदित्या हविषो जुषाणा व्यन्तु स्वाहा ᵛ केतः सुकेतः संकेतस्ते[3] न आदित्या हविषो जुषाणा व्यन्तु स्वाहा ᵛ देवजूते विवस्वन्नादित्य ते नो देवाः सत्या देवहूतिं देवेष्वा-सुवध्वमादित्येभ्यः स्वाहा ॥ १ ॥

Vgl. 1, 7. 4. 5. — TS 1, 5, 3 (punarâdheyam); 1, 5, 10; 4, 2, 1, 2. 3; 4, 2, 3, 4; Kâṭh. 8, 14. 34, 19; Kap. S. 8, 2; VS 12, 44. 2, 13. 12, 7—10.

अग्नेर्वै भागः पुनराधेयमेतᳬ वै भागं प्रेप्सन्न्यूधयति ᵛ यद्यादधानो मन्येत ᵛ वि स्या[4] ऋध्यता ᵛ इत्युत्साद्य पुनरादधीत ᵛ यमेव भागं प्रेप्स-न्न्यधयति तं प्रायाधयत्येव ᵛ सर्वमेवाग्नेय क्रियते ᵛ यत्किंच सर्वमेवा-ग्नये भागं प्रदाय सर्वामृद्धिमृध्नोति ᵛ न संभाराः संभृत्या ᵛ न यजुः कर्तव्या ᵛ इत्याहुः ᵛ संभृतसंभारो ३ह्येष कृतयजुस्तदाहुः ᵛ संभृत्या एव संभाराः ᵛ का३र्यᳬ यजुरिति ᵛ पुनरुत्सूतᳬ वासो देयं पुनर्णवो[5] रथः पुनरुत्सृष्टो ऽनड्वानेतानि वै पुनराधेयस्य रूपाणि ᵛ रूपाण्येवास्यात्मा-वरुन्धे ᵛ ऽग्निर्वा उत्सीदन्नप ओषधीरभ्युत्सीदति ᵛ दर्भा वा आपा ओषधयो ᵛ यद्दर्भा उपोलपा भवन्त्यद्भ्य एवैनमोषधीभ्यो ऽध्यात्मावरुन्धे ᵛ देवा असुरैर्विजयमुपयन्तो ऽग्नौ प्रियास्तन्वः संन्यदधत ᵛ यन्नो जयेयुरिमा अभ्युपधावेम ᵛ यद्यु जयेमेमा अभ्युपावर्तेमहीति ᵛ ता

---

1) So M 1, P; desgl. B, ohne Accent; Kâṭh. 8, 14; Kap. S. 8, 2; dagegen M 2, H u. Bb सलीलः; vgl. unten 1, 7, 5. 2) So M 1; desgl. B, ohne Accent, Kâṭh. und Kap. S.; die andern Mss. संलीगः; s. 1, 7, 5. 3) M 2 सकेतस्; vgl. aber auch TS 1, 5, 3, 3. 4) So die Mss. vgl. oben 1, 5, 4 सा ऋक्तु; Kâṭh. 8, 15 वृधते स्वा इति पुनरादधीत; Kap. S. 8, 3 corrupt वियृधते ऋखेति 5) So durch Correctur in M 2; die andern Mss. पुनर्नवो; vgl. 1, 5, 6. 1, 8, 4.

देवा जित्वान्वैछन्त्सर्वेषां नः सहेति ३सो ऽग्निरब्रवीद्य एव मां महेवयू आदधाते स एताभिस्तनूभिः संभवादिति तं देवा आदधत त एताभिस्तनूभिः समभवन्पशवो वै देवानां प्रियास्तन्वः पशुभिरेव समभवꣳस्तद्य एवꣳ विद्वान्पुनराधेयमाधत्त एताभिरेवास्मै तनूभिः संभवति पशवो वै देवानां प्रियास्तन्वः पशुभिरेव संभवति मनुः पुष्टिकामा आधत्त स इमान्पोषानपुर्यत्तेन ऋद्धं त्वष्टा पशुकामा आधत्त त इमे त्वाष्ट्राः पशवः प्राजायन्त तेन ऋद्धं प्रजापतिः प्रजाकामा आधत्त तां इमाः प्रजाः प्राजापत्याः प्राजायन्त तेन ऋद्धꣳ यो वै तमग्या आधत्त[1] स तेन वसुना समभवत्तत्पुनर्वसोः पुनर्वसुत्वं तस्मात्पुनर्वसा आधेयः पुनर्हि स तेन वसुना समभवद्यो वै तमाधत्ताघ्नोत्ति[2] तस्मादनुराधास्वाधेया[3] ऋद्ध्या ऋध्नोत्येवाथो मिथुनत्वाय ॥ २ ॥

Vgl. TS 1, 5, 1 u. 2; Kâṭh. 8, 15; Kap. S. 8, 3; Mân. Çr. 1, 6, 5.

अग्निर्वा उत्सीदन्त्सꣳवत्सरमभ्युत्सीदति सप्तदश सामिधेनीः काꣳर्याः पञ्च ऋतवो द्वादश मासा एष सꣳवत्सरः सꣳवत्सरादेवैनमध्यापावरुन्धे तदाहुः पञ्चदश सामिधेनीः काꣳर्या न सप्तदशेत्येतद्वै सꣳवत्सरस्य संक्रमणतममेतेनाशिष्टमाप्यते[4] पञ्चदश सामिधेनीः पञ्चदशार्धमासस्य रात्रयस्ताभिरेव ता आप्यन्ते यावन्ति वै सामिधेनीनामक्षराणि तावन्ति सꣳवत्सरस्याहानि तैरेव[5] तान्याप्यन्ते ऽग्निर्वा उत्सीदन्त्सꣳवत्सरमभ्युत्सीदति षड्वा ऋतवः सꣳवत्सरस्त-

1) So M 1 u. 2; H u. Bb आधत्त 2) So M 2, H u. Bb; M 1 °माधत्ता° 3) So M 2, Bb und wohl auch M 1; in H, B °दनूरा° 4) M 2 संक्रामणतममे°; Kap. S. 8, 4 संक्रमणतरम° 5) So M 1 u 2; in H, Bb u. B तैस्तैरेव

स्मात्षड्विभक्तयः सꣳवत्सरो वा अग्निर्वैश्वानरो यत्षड्विभक्तयः सꣳवत्सरादेवैनमध्यात्मावरुन्द्धे ऽथ यदग्निर्बहुधा विहृयत इमान्पोषान्पुपोष तस्मादग्निरेतावतीर्विभक्तीरानशे नान्या देवताथ यद् ह्रस्वराः सतीश्चतुरक्षराः क्रियन्त आचतुरꣳ हि पशवो द्वन्द्वं मिथुना ऋतवो वै प्रयाजा अन्नमृतवो यत्प्रयाजानन्तरियादन्नमन्तरियाद्यज्ञमुखꣳ वै प्रयाजा यत्प्रयाजानन्तरियाद्यज्ञमुखमन्तरियात्तद्यस्यैत्तेत्तस्योपरिष्टात्प्रयाजानाꣳ विभक्तीः कुर्याद्वी३र्यꣳ वै प्रयाजा वी३र्यꣳ विभक्तयो वीर्यादेवाधि वषट्करोति ताजगृह्विमभिक्रामति नानाग्नेयं क्रियते ऽथ कस्मात्सह विभक्तयः प्रयाजैरिति सꣳवत्सरꣳ वै प्रयाजाः परीज्यन्ते कस्मादाग्नेयं क्रियते तस्मान्नानाग्नेयं ॥ ३ ॥

Vgl. TS 1, 5, 2; Kâṭh. 9, 1; Kap. S. 8, 4; Mân. Çr. 1, 6, 5.

पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा ।
पुननः पाह्यꣳहसः ॥

इति पुरस्तात्प्रयाजानां जुहुयात् ॥

सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया ।
विश्वप्न्या विश्वतस्परि ॥

इत्युपरिष्टादनुयाजानां जुहुयादूर्जो वा एष पशुभिरुत्तीदन्सहोत्सीदति पुनरूर्जा निवर्तस्वेति तदूर्जमेव पशून्पुनरवरुन्द्धे ऽथो तानेव भागिनः करोत्यथो उभयत एष यज्ञस्याशिष ऋध्नोति नानाग्नेयं क्रियते ऽथ कस्मादाज्यभागा इज्येते इति चक्षुषी वा एते

1) So corrigirt; M 1, H u. Bb विहीयत; M 2 विहीयत; B विदीयत; cf. Kap. S. 8, 4 यद्वा इदमग्निं बहुधा विहरंति 2) So M 2 (desgl. Kâṭh., Kap. S.); H, Bb u. B विभक्तीर°; M 1 विभक्तिर°; vgl. weiter unten. 3) Die Mss. क्रीयंत 4) Die Mss. °नंतरीयादन्नमंतरीयाद° (Kâṭh. hat die correcte Form.) 5) Die Mss. das erste Mal °नंतरीयाद°; das zweite Mal Bb correct. 6) So M 1 (= Kâṭh.); H, Bb; B विभक्तीः (Kap. S. विभक्तयः); M 2 विभक्तिः

यज्ञस्य यदाज्यभागौ यदाज्यभागा अन्तरियाच्चक्षुषी यज्ञस्यान्तरियादेगा आयूंषि पवसा इति सोमस्य लोके कुर्याद्यदाग्नेयी तेनाग्नेयी यत्पावमानी तेन सौमी नानाग्नेयं क्रियते न सोममन्तर्येत्यग्निर्मूर्धा दिवः ककुदिति प्रजाकामो वा पशुकामो वा सोमस्य लोके कुर्याद्यन्मिथुना तेन प्रजननवती यदेतस्वती तेन सौमी यज्ञेन वा एष व्यृध्यते ३यो ऽग्निमुत्सादयते पाङ्क्तो यज्ञो यत्पञ्चकपालो यज्ञमेव पुनरालभते ऽष्टाकपालः कार्यो गायत्रो ३ह्यग्निर्गायत्रछन्दा आग्नेयं वा एतत्क्रियते यत्पुनराधेयं तस्मादष्टाकपालस्तन्न सूर्ष्ये पञ्चकपाल एव कार्यः पञ्चमाद्या अधृतोः[2] षष्ठ ऋतुरभवत्समानमेतद्यत्पञ्चमश्च ऋतुः षष्ठश्च यत्पञ्चकपालः सं वत्सरादेवैनमध्यावरुन्द्धे प्रजनन वा ऋतवो ऽग्निः प्रजनयिता यत्पञ्चकपालः प्रजननादेवैनं प्रजनयिता प्रजनयति ॥ ४ ॥

Vgl. 1, 7, 1. — TS 1, 5, 2; Kâṭh. 9, 1—3; Kap. S. 8, 4 u. 5.

वीरहा वा एष देवानां ३यो ऽग्निमुत्सादयते शतदायो वीरो यदेताः शताक्षराः पङ्क्त्यो भवन्ति वीरं वावैतद्देवानामवदयते ऽन्यस्मै वै कमाधेयमन्यस्मै पुनराधेयं न वै तदाधेयेन स्मृणोति यस्मै कं पुनराधेयं पुनराधेयेन वाव तत्स्मृणोति जरां वै देवहितमायुरेतावतीर्हि समा एति यदेताः शताक्षराः पङ्क्त्यो भवन्ति यावदेवायुर्वी३र्यं तदाप्नोति तत्स्मृणोति तदवरुन्द्धे आयुषा वा एष वीर्येण व्यृध्यते ३यो ऽग्निमुत्सादयता आयुर्वी३र्यं हिरण्यं यद्धिरण्यं ददात्यायुषैवैनं वीर्येण समर्धयति शतमानं भवति शतायुः

1) So corrigirt; M 1 प्रजननवति; M 2 प्रजनन्वती; H u. Bb प्रजानवती; B प्रजानभवती; Kap. S. 8, 5 hat das Richtige. 2) So corrigirt; M 1 u. 2 अधृतोः; H u. Bb अपृतो; B अपृतोः; Kâṭh. 9, 3 अधृतो

युवैं पुरुषः शतवीर्या ऽआयुरेव वीर्यमाप्नोत्यादित्या वा इतं उत्तमाः स्वर्गं लोकमाय॰स्ते व्यतृष्यन्नितःप्रदानाद्वि[1] देवा यज्ञमुपजीवन्ति ते वा एतं पुनरादधत॰ त ऽआर्ध्नुवन्नादित्या वा अस्मिंल्लोकं ऋद्धा ऽआदित्या ऽअमुष्मिन्पशवो ऽस्मिन्नृतवो ऽमुष्मि॰स्तद्य एव॰ विद्वान्पुनराधेयमाधत्ते उभयोरेव लोकयोर्ऋध्नोत्यस्मि॰श्चामुष्मि॰श्च॰ सलिलः[2] सलिंगः[3] सगरस्ते न ऽआदित्या हविषो जुषाणा व्यन्तु स्वाहा॰ केतः सुकेतः सकेतस्ते[4] न ऽआदित्या हविषो जुषाणा व्यन्तु स्वाहा॰ देवजूते विवस्वन्नादित्य ते नो देवाः सत्या देवहूतिं[5] देवेष्वासुवध्वमादित्येभ्यः स्वाहेत्येतैवै[6] ते तं पुनरादधत॰ त ऽआर्ध्नुव॰स्तद्यदेतैः पुनराधत्ते ऽथ ऋध्नोत्यादित्या हि पुनराधेयम् ॥ ५ ॥

Vgl. TS 1, 5, 2; 4, 4; Kâṭh. 9, 2 u. 3; Kap. S. 8, 5 u. 6.

॥ इति प्रथमकाण्डे पुनराधानं नाम सप्तमः प्रपाठकः ॥

प्रजापतिः प्रजा असृजत॰ स वा अग्निमेवाग्रे मूर्धतो ऽसृजत॰ स[6] यतो ऽग्निमसृजत तत्पर्यमार्ट्[7]व॰ ततो लोहितमवाहरत्तन्न्यमार्ट्[8]व॰ तत उदुम्बरः समभवत्तस्मादुदुम्बरः प्राजापत्यस्तस्माल्लोहितं फलं प-

1) So M 2; H u. Bb प्रदानात्तहि; desgl. B, ohne Accent; M 1 °नितः प्रदानाद्वि। vgl. TS 3, 2, 9, 7. 2) H u. Bb सलीलः; s. oben 1, 7, 1. — Kâṭh. u. Kap. S. सलिलः 3) So M 1; M 2 सलिगः; H, Bb u. B सलीगः; Kap. S. 8, 6 सलीगः; Kâṭh. 9, 3 सलिग 4) H u. Bb सकेतस्; vgl. oben 1, 7, 1. 5) H u. Bb देवाहूतिं 6) fehlt in H, Bb. 7) H u. Bb पर्यमाट् 8) H u. Bb तन्यमाट्

च्यते[1] सो ऽस्मात्सृष्टः पराङ्प्रागधेयमिच्छमानः स तदेव नाविन्दत्प्रजापतिर्यदहोष्यत्स्व चक्षुरादायाजुहोत्॥ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा ॥ इति तद्वा अदश्चक्षुर्मन्यन्ते यदसा आदि३त्यो ऽमुं वा एतदस्मिन्जुह्वतो मन्यन्ते सत्यं वै चक्षुः सत्येनाग्निहोत्रं जुहोति य एवं विद्वान्जुहोति भविष्णुः सत्यं भवति य एवं वेद कस्मै कमग्निहोत्रं हूयता इति ब्रह्मवादिनो वदन्त्यग्नये वा एतद्धृत्यै गुप्त्यै हूयते यत्सायं जुहोति रात्र्यै तेन दाधार यत्प्रातरहे तेनाग्नौ सर्वान्यज्ञान्त्स्थापयन्त्यथ कस्मादेतदेवाग्निहोत्रमुच्यता इति ब्रह्मवादिनो वदन्ति होत्रा वै देवेभ्यो ऽपाक्रामन्नग्निहोत्रे भागधेयमिच्छमाना यत् ॥ अग्निहोत्रम् ॥ इत्याह तेन होत्रा आभजति तेनैना भागिनीः करोत्येषा वा अग्ने ऽग्ना आहुतिरहूयत तदग्निहोत्रस्याग्निहोत्रत्वं सो ऽस्मात्सृष्टः पराङ्प्रागधेयमिच्छमानः स तदेव नाविन्दत्प्रजापतिर्यदहोष्यत्त्वं स्वा वागभ्यवदज्जुहुधीति स इत एवोन्मृज्याजुहोत् ॥ स्वाहा ॥ इति स्वा ह्येन[3] वागभ्यवदत्तत्स्वाहाकारस्य जन्म तस्मादग्निहोत्रे स्वाहाकारस्तस्मात्ललाटे च पाणौ च लोम नास्त्यतो हि स तदादायाजुहोत्तस्माद्यस्य दक्षिणतः केशा उन्मृष्टास्तमाहुर्ज्येष्ठलक्ष्मीति प्रजापति३र्ह्येतदग्ने ज्येष्ठ उदमृष्टानेन समिता सुक्का३र्यानेन वा अग्ने ऽग्ना आहुतिरहूयत तस्या आहुत्याः पुरुषो ऽसृज्यत द्वितीयामजुहोत्ततो ऽश्वो ऽसृज्यत तस्मादश्व उभयाद्-[5]

---

1) S. m. Abhdlg. Ztschr. DMG. XXXIII S. 199; Patañjali, Mahâbh. zu Pâ. 3, 1, 87. — Kâṭh. 6, 1; s. Monatsber. d. Kgl. Akad. d. Wiss. zu Berlin, Juli 1879, S. 693 flg.
2) M 2 रात्रिये 3) Die Mss. ह्येन° 4) S. TBr. 2, 1, 2, 2. 5) So M 1 u. 2; in H, Bb u. B उभयदन्न°; diese Form als ved. Adj. angeführt Kâç. zu Pâ. 5, 4, 142; bisher unbelegt.

वनन्तर्हितो हि पुरुषादसृज्यत तस्मादेनं प्रत्यञ्चं तिष्ठन्तं मन्यन्ते ऽग्नो नू[1] पुरुषा[2] इति तृतीयामजुहोत्ततो गौरसृज्यत चतुर्थीमजुहोत्ततो ऽविरसृज्यत पञ्चमीमजुहोत्ततो ऽजासृज्यत षष्ठीमजुहोत्ततो यवो ऽसृज्यत सप्तमीमजुहोत्ततो व्रीहिरसृज्यते ते सप्त ग्राम्याः पशवो ऽसृज्यन्त तानेवावरुन्धे य एवं विद्वानग्निहोत्रं जुहोति ॥ १ ॥

Vgl. Kâṭh. 6, 1. 2; Kap. S. 4, 1; TBr. 2, 1, 2.

अष्टमीमजुहोत्ततो वसन्तो ऽसृज्यत नवमीमजुहोत्ततो ग्रीष्मो ऽसृज्यत दशमीमजुहोत्ततो वर्षा असृज्यन्तैकादशीमजुहोत्ततः शरदसृज्यत द्वादशीमजुहोत्ततो हेमन्तो ऽसृज्यतोद्यता चयोदश्याहुतिरासीदथ शिशिरमसृज्यत तस्मादेतदृतूनामशान्तं क्रूरमहुताद्धि समभवदहुतादसृज्यत[3] तदाहुर्ब्रह्मवादिन ऋतवः पूर्वे ऽसृज्यन्ता३[4] पशवा३[5] इत्युत ऋतव उत पशवा इति ब्रूयादुभये ३ह्येते सहासृज्यन्त स वा एनमित एव पुनः प्राविशदेतद्वा अग्निधानं हस्तस्य यत्पाणिस्तस्मादेतौ[6] हस्तस्याग्निनेतमा[7] विदहति[8] यद्वन्यमानौ[9] हस्तौ प्रतिप्रसारयत्यग्नी वा एतद्व्यञ्चनमिच्छते[10] ऽग्निं वै पशवः

---

1) So M 1 u. 2; in H, Bb u. B नु 2) Vgl. Kâṭh. 6, 2 तस्मात्पुरुषश्चाश्वश्च नक्तं प्रत्यंचौ न सु विज्ञायेते इव 3) So M 2; in H u. Bb °दसृ° ohne Accent (M 1 n. Bl.) 4) So M 1; in H, Bb u. B ohne die ३; M 2 सृज्यंताः 5) So M 2; M 1 n. Bl. पशवा३; H u. Bb पशवा; vgl. 1, 6, 10 a. E. 6) So M 2, d. h. आ । इतः ।; cf. das vorhergehende प्राविशत्; in M 1 n. Bl. ohne Accent तस्मादतो; H u. Bb तस्मादेतो; desgl. B, ohne Accent. — Kâṭh. 6, 2; Kap. S. 4, 1 steht statt dieses Passus तस्माद्वस्ताभ्यामग्निर्मथ्यमानो जायते 7) So meine Correctur; die Mss. न तमा°; vgl. aber नतराम् 8) So M 1 u. 2; in H, Bb u. B व्यदहत 9) So meine Correctur im Anschluss an Kap. S. 4, 1 तस्माद्वन्यमानौ हस्तौ प्रतप्य गृह्णात्यथैव तत्राग्निमिच्छते; die Mss. schwanken; M 1 °मानै; M 2 °माने; H, Bb u. B °मानौ; auch Kâṭh. 6, 2 °मानौ हस्तौ प्रगृह्णाति 10) Kâṭh. चाग्निमिच्छते

प्रविशन्त्यग्निः पशून् प्र ह वा एनं पशवो विशन्ति प्र स पशून्य एवꣳ वेदैतद्ध स्म वा आह नारदो यच्च गाꣳ शयानां निर्जानाति मृतामेनामविद्वान्मन्यते ऽत्यग्निꣳ ३ह्येवैते प्रविशन्त्यग्निरेतास्तस्मात्सर्वानृतून्पशवो ऽग्निमभिसर्पन्ति नꣳ ३ह्येत ऋ३ते ऽग्नेर्यज्जातः पशूनविन्दत तज्जातवेदसो जातवेदस्त्वं तामप्सु प्रासिञ्चत्सापो ऽन्वदहत्ता अग्नये वज्रो ऽभवꣳस्तस्माद्वीषि प्रोक्षताग्निरभि न प्रोक्ष्यो यदभिप्रोक्षेद्धतेन यज्ञेन यजेत ताꣳ वै प्रजापतिरन्वैच्छत्तामप्स्वन्वविन्दत्तामोषधीषु न्यमार्ट् तस्मादोषधयो ऽनभ्यक्ता रेभन्ता ओषधीभ्यः पशवः पशुभ्यो मनु३ष्या अनभ्यक्तो ह रेभते य एवꣳ वेद तद्यो वसन्ताशिशिरे कक्षः स उपाधेय एतद्वै तदग्नेः प्रियं धामैषा वाव साहुतिः प्रायत्यग्नेरेवैतया प्रियं धामोपैत्यथो पशुमान्भवत्यथो आत्मानमेवैतया यजमानः पुनीते सह वा एता आस्तामग्निश्च सूर्यश्च समाने योना अयसि लोहिते स आदित्य ऊर्ध्व उदद्रवत्तस्य रेतः परापतत्तदग्नेर्योनिनोपागृह्णात्तदेनꣳ व्यदहत्तस्मादयो ऽचपुः प्रतिधुक्क्षीरꣳ विदहति तस्मादेतज्जुह्वति पशूनाꣳ वा एतत्पयो यद्व्रीहियवौ तस्मादेतज्जुह्वति नातिप्रीतं का३र्यꣳ रेतः शोषयेद्यद्वि ष्यन्देतोन्मादुको ऽस्य प्रजायामाजायेतामुष्य वा एतदादित्यस्य रेतो हूयते ऽमेध्यमप्रीतꣳ समुदन्तꣳ होत३व्यं तद्वै प्रीतं मेध्यं मिथुनं प्रजनिष्णु ॥ २ ॥

Vgl. Kâṭh. 6, 2. 3; Kap. S. 4, 1. 2.

---

1) So meine Correctur; M 2 प्रोचो; M 1 प्रोक्शो; B प्रोचे; H u. Bb प्रोचेत् 2) So M 1 u. 2; in H, Bb u. B यजते 3) H न्यमार्ट्; Bb न्यमार्ट् 4) So M 1 u. 2; in H, Bb u. B वसंतः शिशिरे 5) So M 2; desgl. M 1 n. Bl., ohne Accent; H चपुः; so B, ohne Accent; Bb चयुः; vgl. Kap. S. 4, 2 तस्माद्चप्वयस्याचं प्रतिधुक्कूडयति (cod. °चपय°); fast ebenso Kâṭh. 6, 3 अचप्वयःपाचं (cod. चः) प्रतिधुक्कूडायति

स्थाल्या दुहत्यनया वा एतदुपसीदन्ति नहीमामितो नेतः स्कन्दत्यस्कन्नत्वायायैकृती[1.2] भवत्यूर्ध्वकपाला सदेवत्वाय सा हि सदेवासु३र्य[3] वा एतत्पात्र यत्कुलालकृतं चक्रवृत्त यच्च स्कन्देत्तदपो निनयेदापो वै शान्तिरापो निष्कृतिरापो भेषजा यच्च वा एता अस्या उपयन्ति तत्प्रशस्ततरा ओषधयो जायन्ते व हीयसीर्यदि दुह्यमानावभिन्द्यादन्यया स्थाल्या निर्णिज्य दोह्या यज्ञो हि यज्ञस्य प्रायश्चित्तिर्यद्यधिश्रित स्कन्देद्यद्युद्वास्यमान यद्युद्वासित यद्युन्नीयमान यद्युन्नीत यदि पुरः पराहृत[4] होमाय पुनरवनीयान्याभिदुह्या यज्ञो हि यज्ञस्य प्रायश्चित्तिर्वारुणीमृचमनूच्य वारुण्या होत३व्य वरुणो वा एतद्यज्ञस्य गृह्णाति यदाछन्ति निष्कृतिरेवैषा प्रायश्चित्तिरप्रतिषेक्य स्यात्तेजस्कामस्य ब्रह्मवर्चसकामस्यार्थो तुस्तूर्षमाणस्यार्थो यः कामयेत वीरो मा आजायेतेत्यप्रतिषिक्तो वै घर्मस्तेजो ब्रह्मवर्चस तेजस्वी ब्रह्मवर्चसी भवति स्तृणुते यं तुस्तूर्षता आ हास्य वीरो जायता आज्येन होत३व्य यस्याप्रतिषेक्य स्यादेतद्वा अप्रतिषिक्त न तु स्कन्नस्य प्रायश्चित्तिरस्त्यर्थो न पशुमानिव भवति पशूना वा एतत्क्षयः प्रवृज्यते शुचं पशुषु दधाति तेजो ऽशान्तं पशून्निर्दहति तस्मात्प्रतिषेक्तृमेव स्याद्यदग्निः प्रतिषिञ्चेद्वरो विनयेद् गोदोहसंनेजनेन प्रतिषिच्य तद्धि नापो न पयस्तदाहुः स्क-

---

1) So M 2 u. 1 (n. Bl.); in H, Bb u. B °त्वस्कंदत्वाय° 2) S. m. Abhdlg. Ztschr. DMG. XXXIII, S. 198; Pâ. 4, 1, 30. Auch Mân. Çr 1,6, 1 आर्यकृत्या दोहति; im Kâṭh. 6, 3, Kap. S. 4, 2 ist das Wort vermieden, durch अचक्रवृत्त ersetzt: यच्चक्रवृत्तं तदसुर्यं यदचक्रवृत्तं तद्देवपात्रं (so Kap. S. und mit einigen unwesentlichen Fehlern auch Kâṭh.) 3) So M 1 u. 2; in H, Bb u. B °सू३र्य°; vgl. oben 1, 6, 10, a. A. Aber s. Pâ. 4, 4, 123; beim Schol. der ganze Satz citirt. 4) B पराकृत° 5) So M 1; die andern Mss. प्रतिषिच्य°स्तद्धि

न्दति वा एतर्ह्यहिं वा एतद्धोहनात्पर्याक्रियते तर्हि स्कन्नमन्तर्हिता ३ह्यस्या वनस्पतया इति तदङ्गिरेव प्रतिषिच्य स्तोकेनैकेन न हरो विनयति शुचं पशूना शमयति पशवो वै तेजो ब्रह्मवर्चसं मिथुन वा आपश्च पयश्च मिथुनात्खलु वै प्रजाः पशवः प्रजायन्ते तन्मिथुनं तस्मादेव मिथुनाद्यजमानः प्रजया च पशुभिश्च प्रजायत स्रोदनेन होत३य यस्य प्रतिषे३क्य स्यादेष हि प्रतिषिक्तः शान्तो मेध्यो मिथुनः प्रजनिष्णुः ॥ ३ ॥

Vgl. Kâṭh. 6, 3; Kap. S. 4, 2; (TBr. 2, 1, 3); Mân. Çr. 1, 6, 1; 3, 2.

प्रजापतिः प्रजा असृजत ता वै तपसैवासृजत स वै स वाचमेवायछत्तपो वा एष उपैति यो वाच यछति सृष्टिः प्रजानामग्निहोत्रमुभयत एव प्रजाः सृजत इतश्चामुतश्च निमुक्ते सूर्ये वाग्यन्तव्यायो दुह्यमानायामथो अधिश्रित उद्वीयमान एव यन्त३व्यास्तदवकॢप्तमम् ॥ उद्भवः स्य ॥ इत्यवेक्षेत ॥ उदहं प्रजया पशुभिर्भूयासम् ॥ इति प्रजायाः पशूना सृष्ट्या अथो अ३भ्येवैनद्धारयति मेध्यत्वायाग्निहोत्रे वै दंपती व्यभिचरेते पूर्वो यजमानस्य लोको ऽपरः पत्न्या यत्प्राचीनमुद्वासयेद्यजमानः प्रमीयेत यत्प्रतीचीनं पत्नी कं घर्ममभ्युदवीवसा इति ब्रह्मवादिनो वदन्त्युदीचीनमेवोद्वास्यमग्रहणौ संजीर्यतः सर्वमायुरितो नार्ति नीतश्चतुरुन्नयति चतुष्पदस्तेन पशूनवरुन्द्धे द्विर्जुहोति द्विपदस्तेन यं कामयेतानुज्येष्ठं प्रजया ऋध्नुयादिति तस्य पूर्णमया उन्नयेदथ कनीयो ऽथ कनीयो ऽनुज्येष्ठं प्रजया ऋध्नोति तदाहुः कनीया स वा एष यज्ञक्रतुमुपैति कनीयसीं पजां कनीयसः पशून्कनीयो ऽन्नाद्य

1) Kap. S. 4, 3 जायापती; Kâṭh. 6, 4 जायम्पती

पापीयान्भवति संमितमिवाया उन्नयेदथ भूयोऽथ भूयः पूर्णमुत्तमं यज्ञस्याभिक्रान्त्यै तदाहुर्ज्यायाꣳस वा एष यज्ञक्रतुमुपैति भूयसीं प्रजां भूयसः पशून्भूयोऽन्नाद्यं वसीयान्भवत्यर्धको ऽस्य पुत्रः कनिष्ठो भवतीति यदि कामयेत सर्वे सदृशाः स्युरिति सर्वान्समावदुन्नयेत्सर्वे ह सदृशा भवन्ति न पश्चादुपसादयेदपक्रान्तिः सा यज्ञस्य यच्चैवोन्नयेत्तत्सादयेत्प्रतरं वा यज्ञस्याभिक्रान्त्या अनुध्यायिनꣳ वा एतदपरं करोति यदपरस्मिꣳस्तपन्ति पूर्वस्मिन्जुह्वति समयाग्निꣳ हरन्ति[1] तेनैवैनं प्रीणात्यथो अग्निहोत्रस्य वा एतत्पविचमपुपोदेवैनदपरस्माद्वै पूर्वꣳ सृष्टं तमेतावत्यरमयꣳस्तस्मात्पुरो ऽनुदूत्य जुहोति ॥ आयुर्मे यछ ॥ इति सादयत्यायुरेवास्मिन्यछति ॥ वर्चो मे यछ ॥ इति सादयति वर्च एवास्मिन्यछत्योषधीर्वा इमा रुद्रा विषेणाजꣳस्ताः पशवो नालिशन्त ते देवाः प्रजापतिमेवोपाधावन्त्स प्रजापतिरब्रवीद्वार्यꣳ वृणै भागो मे ऽस्त्विति वृणीष्वेत्यब्रुवन्सो ऽब्रवीन्मह्येव३त्यैव समिदसदिति तस्मात्प्राजापत्या सम्मह्येषु ह्यस्यैषा वार्यवृता द्वे समिधौ का३र्ये द्वे ह्याहुती एकैव कार्यैको हि प्रजापतिरेकधा खलु वै समिद्ध उत बह्वीराहुतयो हूयन्ते ता अग्निनान्ववाकरोत्ता अस्तदयत्ताः पुनर्णवा[2] अजायन्तैतर्हि खलु वा अग्निहोत्रिणे दर्शपूर्णमासिने सर्वा ओषधयः स्वदन्ते यत्समिधमादधाति सर्वा एवास्मा ओषधीः स्वधयामकः[3] ॥ ४ ॥

Vgl. Kâṭh. 6, 4. 5; Kap. S. 4, 3. 4; TBr. 2, 1, 3 u. 4; Mân. Çr. 1, 6, 1.

भूर्भुवः स्वः ॥ इति पुरस्ताज्जोतोर्वेदेतद्वै ब्रह्मैतत्सत्यमेतद्वै न

1) M 2 हरति; vgl. aber das Vorhergehende. 2) So M 1; die andern Mss. पुनर्नवा 3) So alle Mss.

वा एतस्माद्दर्ते यज्ञोऽस्ति तस्मादेव वदितव्यम्॥अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा॥इतिगर्भिण्या वाचा गर्भं दधाति मिथुनया वाचा मिथुनं प्रजनयति यद्वाचा च जुहोति यजुषा च तन्मिथुनं यत्रूष्णी च जुहोति मनसा च तन्मिथुनं स्थाणुर्वै पूर्वाहुतिरतिहाय पूर्वामाहुतिमुत्तरा होतव्या स्थाणुमेव छम्बट्करोत्युत्तराहुतिर्भूयो होतव्या यज्ञस्याभिक्रान्त्यै पश्नूनेव पूर्वयाहुत्या स्पृणोति ब्रह्मवर्चसमुत्तरयाग्नेयी सायमाहुतिस्तया रेतः सिञ्चति तद्रेतः सिक्तं रात्र्यै गर्भं दधाति तत्सौर्यो प्रातः प्रजनयामकरियं होतव्याथ परार्ध्य पुनरवस्तात्प्रातरवस्तात्ताडि प्रजानां प्रजातिः प्रजननं हि सौरी तन्न सूर्ष्ये परापरैव होतव्या यज्ञस्याभिक्रान्त्या उदङ्डुहिश्रति ॥ अनाभो मृड धूर्ते नमस्ते अस्तु रुद्र मृड ॥ इत्येता वै रुद्रस्य तन्वः क्रूरा एतानि नामान्येतानिवा एष पश्नूञ्शमायते ता एवास्य भागधेयेन शमयत्यवाचीनं सायमवमार्ष्टि तस्मात्सायमवाची प्रुष्वैत्यूर्ध्वं दिवोन्मार्ष्टि तस्मादूर्ध्वा दिवैति पराचीनमिव वा एतद्यदग्निहोत्रं यत्पुरस्ताद्याजुषं वदति धृत्या अनिर्मार्गाय यो वा अग्निहोत्रस्य वैश्वदेवं वेदाघातुक एनं पशुपतिर्भवत्यघातुको ऽस्य पशुपतिः पश्नूनाडासीनो जुहोति देवांस्तेन प्रीणाति हुत्वोञ्छति पश्नूनेव यजमानायोञ्छत्युदङ्डुहिश्रति रुद्रं तेन निरवदयते दक्षिणतो निर्मार्ष्योषधीश्च तेन पितॄंश्च प्रीणाति प्राश्नाति मनुष्यांस्तेन प्रीणात्यङ्गुल्या प्राश्नाति यदन्वाय न दतो गमयेद्दन्तो गमये-

1) M 2 राचियै, so eigentlich auch M 1, aber corrigirt. 2) So M 1. 2 u. P; (ebenso Kap. S. 4, 6); die andern Mss. धूर्त 3) So M 1 u. 2; in H, Bb, B शमयते; s. 1, 8, 6. 4) H, Bb अनिर्भागाय 5) Von hier bis ऽस्य in H, Bb, B fehlend.

त्सर्पो एनं घातुकाः स्युः सर्पानेव शमयत्यहिꣳसायै ॥ पूषासि ॥ इति यजुर्वेदेत्पशवो वै पूषा पशूनेवावरुन्द्धे ऽशान्तो वा एषो ऽप्रीतः पुरुषमेधꣳ वा एष प्रतीक्षते यजमानमेव हव्यꣳ यदग्निहोत्रहवणीं निष्टपत्यशान्तस्तेनाग्निहोत्रहवणीं प्रतप्य हस्तो ऽवधेयो[1] हस्तो वा प्रतप्याग्निहोत्रहवण्यामवधेयस्तेनैवैनꣳ[2] शमयति तेन प्रीणाति शान्त एनं प्रीतो न हिनस्तीत्थं पर्यावर्तत एवꣳ हि यज्ञः पर्यावर्तते ऽथो अमुष्य वा एतदादित्यस्यावृतमनु पर्यावर्तते होत३व्यं गार्हपत्या३न्न[3] होतव्या३मिति[4] मीमाꣳसन्ते ऽनुध्यायी वा एष रूक्षो होतव्यूमेव ॥ अग्ने गृहपते परिषद्य[5] जुषस्व स्वाहा ॥ इति जुहुयात्तेनैवैनꣳ शमयति तेन प्रीणात्यथो तेनैवैनमननुध्यायिनमरूक्षं करोत्यथ यत्पूर्वामाहुतिꣳ हुत्वोत्तराꣳ होष्यन्प्रतीक्षते तेनैवैनꣳ शमयति तेन प्रीणात्यथो तेनैवैनमननुध्यायिनमरूक्षं करोत्यथ यत्पूर्वामाहुतिꣳ हुत्वोत्तराꣳ होष्यन्प्रतीक्षते तेनैवैनꣳ शमयति तेन प्रीणात्यथो तेनैवैनमननुध्यायिनमरूक्षं करोत्यथ यदेवास्य गृहꣳ उपहियते यदेनमग्निमभिता आसीना याचन्ति तेनैवैनꣳ शमयति तेन प्रीणात्यथो तेनैवैनमननुध्यायिनमरूक्षं करोति ॥ ५ ॥

Vgl. Kâṭh. 6, 5; Kap. S. 4, 4. 6; TBr. 2, 1, 4; Mân. Çr. 1, 6, 1.

द्वे दुहन्त्यग्निहोत्राय ज्यायान्वा एकस्या दुग्धादग्निहोत्रिणो लोको यद्वै दुहन्ति ज्यायाꣳस वा एत[6] लोकꣳ यजमानो ऽभिजयति मनुश्च वा इदं मनायी[7] च मिथुनेन प्राजनयताꣳ[8] यत्स्थाल्या च दो-

1) So M 1; die andern Mss. वाधेयो 2) So M 1; desgl. M 2, ohne Accent; die andern Mss. °मवाधेयस् 3) So schreibe ich; M 1 गार्हपत्या नं; H, Bb गार्हपत्यान्न; M 2, B, ohne Accent °पत्यान्न; vgl. oben 1, 6, 10; unten 1, 8, 7. 4) M 1 होतव्यामीति; H, Bb होत३व्यामिति; M 2, B होतव्यामिति; aber vgl. 1, 6, 10. 1, 8, 7. 5) M 1 पर्षद्य 6) So M 2; M 1 एतꣳ; H, Bb, B एतल्लो° 7) S. m. Abhdlg. ZDMG. XXXIII, S. 197; Pâ. 4, 1, 38. 8) So M 1; M 2 प्रजनयतां; B प्रजनयताꣳ; H, Bb प्रजनयाताꣳ

हनेन च दुहन्ति मिथुनादेव प्रजायते ॥ सजूर्जातवेदो दिवा पृथिव्या जुषाणो अस्य[1] हविषो वीहि स्वाहा ॥ इति जुहुयादेषा वा अस्य जातवेदस्या तनूः क्रूरतया वा एष पशून्शमायते तामेवास्य भागधेयेन शमयति यदि तदति शमायेत ॥ अग्ने दुःशीतितनो[2] जुषस्व स्वाहा ॥ इति जुहुयादेषा वा अस्य शृणती[3] तनूः क्रूरतया वा एष पशून्शमायते तामेवास्य भागधेयेन शमयति यदि तदति शमायेत ॥ द्वादश रात्रीः सायं सायं जुहुयाद्द्वादश वै रात्रयः सम्वत्सरस्य प्रतिमा सम्वत्सरो वा अग्निर्वैश्वानरस्तमाहिताग्नयो दर्शपूर्णमासिन इन्धते[4] तेषां वा ऋतव एव दारूणि ये स्थविष्ठा अङ्गारास्ते मासा ये क्षोदिष्ठास्तेऽर्धमासा अहोरात्राणि मुर्मुरा यत्सधूमं ज्योतिस्तद्वैश्वदेवं यल्लोहितं तद्वारुणं यत्सुवर्णं तद्बार्हस्पत्यं यन्न लोहितं न सुवर्णं तन्मैत्रं यदङ्गारेषु व्यवशान्तेषु लेलाय वीव[5] भाति तद्देवानामास्यमथो अमुष्य च वा एतदादित्यस्य तेजो मन्यन्ते ऽग्नेश्च तस्मात्तर्हि होतव्यं यद्धवासन्नपिदधाति तद्विनोत्याविर्वै नामैषाहुतिराविर्भूयं देवमनुष्येषु गच्छति य एवं वेद न समिदभिहोतवा अप्रतिष्ठिता साहुतिर्नो यथा वीवावस्रवेदयता[6.7] सा तत्तथैव होतव्यं यथाग्निं व्यवेयात्सा हि यता[8] सा प्रतिष्ठिता तस्मान्महानग्निहोत्रस्येध्मः कार्यो यो वै बहु ददिवान्बह्वीजानो ऽग्निमुत्सादयते ऽक्षित्तद्वै तस्य तदीजाना वै सुकृतो ऽमुं लोकं नक्षन्ति तं वा

1) So P u. H; in M 1, Bb ohne Accent; (in M 2 das ganze Blatt ohne Accent.) 2) P fehlerhaft दुःशीर्त्ततम इति दुःशीर्त्ततमः। 3) So M 1 u. 2 (ohne Accent); in B श्रीणती; H u. Bb श्रीणति 4) in H, Bb betont इंधते 5) So M 1 u. H; Bb लेलाय वोव; so B, ohne Accent; M 2 लेलाय विव; Kâṭh. 6, 7 लेलायेव; Kap. S. 4, 6 लेलाएव (wie im Kâṭh. zu corrigiren); s. unten 2, 2, 3. 6) So M 1 (der Anfang corrigirt; eigentlich विवा°); desgl. M 2, ohne Accent; H, Bb u. B वीवावस्रवे° 7) So M 1u.2, Bb; in H °दयत्ता; desgl. B, ohne Accent. 8) H यत्ता; desgl. B, ohne Accent.

एते यन्नक्षत्राणि यदाहुर्ज्योतिरवापादि तारकावापादीति ते वा एते ऽवपद्यन्त आत्मा स्थिते त इदꣳ यथालोकꣳ सचन्ते यदामुतः प्रच्यवन्ते ऽथ यो बहु ददिवान्बह्वीजानो ऽग्निहोत्रं जुहोति दर्शपूर्णमासौ यजते चातुर्मास्यैर्यजते बहूनि सत्राण्युपैति[1] तस्य वा एतदक्षय्यमपरिमितं तिरो वा ईजानाद्यज्ञो भवति तदाभ्यामेवाग्निभ्यां दग्ध३व्यः स्वꣳ वा एतदिष्टमन्वारोहत्यपरेण दग्ध३व्या३:[2] पूर्वेण३[3] इति मीमाꣳसन्त उभौ समाहृत्यान्तरा दग्ध३व्यस्तदवकॢप्तमं गृह्णीयान्नक्तमग्निमसु३र्या[4] वै रात्रिर्ज्योतिषैव तमस्तरति दिवा ह वा अस्मा अस्मिंल्लोके भवति प्रास्मा असौ लोको भाति य एवꣳ वेद ॥ भूर्भुवः स्वः ॥ इति पुरस्ताद्धोतोर्वेदेभ्यो वा एतल्लोकेभ्या इष्टका उपदधाति स्वर्गस्य लोकस्य समष्ट्यै यत्सायं जुहोति सहस्रं तेन कामदुघा अवरुन्द्धे यत्प्रातः सहस्रं तेन यदस्याग्निराधीयते सहस्रं तेन यमराज्यꣳ वा अग्निष्टोमेनाभिजयति सोमराज्यमुक्थ्येन सूर्यराज्यꣳ षोडशिना स्वाराज्यमतिरात्रेणैतानि वै सर्वाणीन्द्रो ऽभवदेतानि सर्वाणि भवति य एतैर्यजते सर्वमेतद्भवति य एवꣳ वेद हविष्मान्वा एको देवयाज्येकः सहस्रयाज्येको यो ऽग्निहोत्रं जुहोति स हविष्मान्यो दर्शपूर्णमासौ यजते स देवयाजी यश्चातुर्मास्यैर्यजते स सहस्रयाज्यग्निहोत्रं वै सर्वे यज्ञक्रतवः सर्वान्यज्ञक्रतूनवरुन्द्धे य एवꣳ विद्वानग्निहोत्रं जुहोति ॥ ६ ॥

Vgl. Kâṭh. 6, 7; Kap. S. 4, 6.

---

1) M 1 उपैतितस्व; desgl. M 2, ohne Accent. 2) So M 1 (nur ohne die ३); desgl. M 2, ohne Accent (das ganze Blatt ohne Accent); aber H, Bb u. B दर्व्या: 3) M 1 पूर्वेण; H u. Bb पूर्वेणा; desgl. M 2 u. B, ohne Accent; die ३ fehlt in den Mss. 4) So M 1; die andern Mss. °मसू३र्या; cf. 1, 6, 10 a. A.

प्रैयमेधा वै सर्वे सह ब्रह्माविदुस्ते ऽग्निहोत्रेण समराधय᳕न्तेषां चिरेकोऽजुहोद्द्विरेकः सकृदेकस्तेषा᳕ यस्त्रिरजुहोत्तमपृछन्कस्मै त्वमहौषीरिति᳕ सो ऽब्रवीत्त्रेधा वा इदमग्नये प्रजापतये सूर्यायेत्यथ यो द्विरजुहोत्तमपृछन्कस्मै त्वमहौषीरिति᳕ सो ऽब्रवीद्द्वेधा वा इदमग्नये च प्रजापतये च सायं᳕ सूर्याय च प्रजापतये च प्रातरित्यथ यः सकृदजुहोत्तमपृछन्कस्मै त्वमहौषीरिति᳕ सो ऽब्रवीदेकधा वा इदं᳕ प्रजापतय एवेति᳕ तेषा᳕ यो द्विरजुहोत्स आर्भवस्तस्येतरे साजात्यमुपायन्नृभ्नोति य एव᳕ विद्वानग्निहोत्रं जुहोत्युपास्य समानाः साजात्य᳕ यन्ति᳕ प्रदोषमग्निहोत्र᳕ होत३व्य᳕ᳫ व्युष्टायां प्रातर्वृङ्क्ते गर्भान्प्रजनयति᳕ तदाहुः᳕ परा वा एतस्याग्निहोत्रं पतति यस्य प्रदोषं न जुह्वतीति᳕ यदि मन्येत᳕ ऋतुमत्यनैषमिति ॥ भूर्भुवः स्वः ॥ इति पुरस्ताद्धोतो-र्वेदेत्तेनैव सर्वं नान्तरेति ॥ दोषा वस्तोर्नमः स्वाहा ॥ इति जुहुया-᳕दृतुमेव नात्यनैद्धोतव्या३न्न[1] होतव्या३मिति[2] मीमा᳕सन्ते᳕ यस्या-हुतमग्निहोत्र᳕ सूर्यो ऽभ्युदियाद्धोतव्यमेवाग्नये वा एतद्धृत्यै गुप्त्यै हूयते᳕ प्रजननं तु छम्बट्करोति᳕ यदि मन्येत᳕ ऋतुमत्यनैषमिति ॥ भूर्भुवः स्वः ॥ इति पुरस्ताद्धोतोर्वेदेत्तेनैव सर्वं नान्तरेति ॥ प्रातर्व-स्तोर्नमः स्वाहा ॥ इति जुहुयाद्दृतुमेव नात्यनैत्तद्यथा कारुद्वेषिणो जुह्वत्येवमस्य हुतं भवति᳕ यस्याग्निमनुद्धृत᳕ सूर्यो ऽभिनिम्रोचेद्यो ब्राह्मणो बहुवित्स उद्धरेत्सर्वेणैवैनं ब्रह्मणोद्धरत्यग्निहोत्रेणानुद्रवेद्भा-गधेयेनैवैनं प्रणयत्यथो भागधेयेनैवैन᳕ समर्धयति᳕ वरो दक्षिणा᳕ सर्वत एवैनं दिग्भ्यो वरेण च्यावयति᳕ यस्योभा अनुगता अभि-

1) So H; desgl. B, ohne Accent; M 1 °तव्यान्न; desgl. M 2, ohne Accent; in Bb fehlend. S. 1, 6, 10. 1, 8, 5. 2) So H u. Bb; desgl. B, ohne Accent; M 1 होतव्यामितिः desgl. M 2, ohne Accent.

निम्रोचेद्यस्य वाभ्युदियात्पुनराधेयमेव तस्य प्रायश्चित्तिर्यथा वै पथो वर्तनी एवं दर्शपूर्णमासौ यथान्तरैवमग्निहोत्रमेव वा अग्निहोत्रिणे दर्शपूर्णमासिने स्वर्गो लोको ऽनुभात्युपान्यानि हवीꣳषि वसन्त्यथ कस्माद्ग्निहोत्रं नोपवसन्तीति ब्रह्मवादिनो वदन्ति प्रतत वा एतदपरिमितमꣳस्थितमश्नाति माꣳसमुप स्त्रियमेति तस्मान्नोपवसन्ति पशुव्रतेन भवितव्यं तूष्णीमिव पशवः सꣳभवन्ति ते मेध्या यत्तूष्णीꣳ स्त्रियमुपैति मेध्यतरस्तेन भवति हिंकृत्योपेयादेवमिव हि पशव उपयन्ति मेध्यत्वाय सꣳस्थाप्या३न्न[2] सꣳस्थाप्या३मि[3]ति मीमाꣳसन्ते ऽग्निहोत्रꣳ यत्सꣳस्थापयेत्तृणमक्कानुप्रहरेत्सा ह्यग्निहोत्रस्य सꣳस्थितिस्तदाहुर्यदा वै जीयते यदा प्रमीयते यदार्तिमार्छत्यथाग्निहोत्रꣳ संतिष्ठता इति तन्न सꣳस्थाप्यं मनसा वा इमां प्रजापतिः पर्यगृह्णादियꣳ वा अग्निहोत्रस्य वेदिरियमुपयामं ओषधयो बर्हिः प्लुष्वा[4] पोक्षणी दिशः परिधयो यत्किंचाभ्याधीयते[5] स इध्मो यजमानो यूप उन्नीयमाने स्थेयमेवमिव हि यूपः समृद्धे मध्यतो वा एष यज्ञः प्रततो यदग्निहोत्रं तस्मादग्निहोत्री दर्शपूर्णमासी सर्वं बर्हिर्धूं ददाति मध्यतो ३ह्येतद्यज्ञस्य दीयते यदग्निहोत्रं होतव्यꣳ राजन्यस्याग्निहोत्रा३न्न[6] होतव्या३मि[7]ति मीमाꣳसन्त आमादिव वा एष यद्राजन्यो बहु वा एषो ऽयज्ञियममेध्यं चरत्यत्यन्नं जिनाति ब्राह्मणं तस्माद्राजन्यस्याग्निहोत्रमहो-

---

1) So M 1 u. 2; in H, Bb, B fehlt ते
2) So M 1; desgl. M 2 u. B, ohne Accent; H, Bb स꣣स्थाप्या३न्न
3) So M 1; desgl. M 2, B, ohne Accent; H, Bb स꣣स्थाप्या३मिति
4) M 1 प्लुष्वाः
5) So M 1; eigentlich auch M 2 so, aber dann corrigirt wie H, Bb u. B दीयते
6) So H u. Bb; desgl. B, ohne Accent; M 1 °होत्रान्न; desgl. M 2, ohne Accent.
7) In den Mss. fehlt die ३

तव्यमृतꣳ वै सत्यमग्निहोत्रं ब्राह्मण ऋतꣳ सत्यं तस्माद्ब्राह्मणस्यैव होतव्यमथो ब्राह्मणायैवास्यायतो[1] गृहं[2] आहरेयुस्तद्भुतमेवास्याग्निहोत्रं भवत्यथो यं ऋतमिव सत्यमिव चरेत्तस्य होतव्यमनुसंतत्यै ॥ ७ ॥

Vgl. Kâṭh. 6, 6. 8; Kap. S. 4, 5. 7.

यामग्निहोत्रायोपमृष्टा निषीदेद्यस्यान्नं नाद्यात्तस्मै[4] तां दद्यादवतिꣳ[5] वा एषा यजमानस्यानुत्सद्य निषीदति तयैवैना सह निरवदयते गृहे तु तस्य ततः परो नाश्नीयाद्यदश्नीयादार्तिमार्छेद्यस्याहुते ऽग्निहोत्रं पूर्वो ऽग्निरनुगच्छेदग्निना च सहाग्निहोत्रेण चोद्ग्वेड्भागधेयेनैवैनं प्रणयत्यथो भागधेयेनैवैनꣳ समर्धयत्यथाभिमन्त्रयेत[5] ॥

इत एवं प्रथमं जज्ञे[6] अग्निरेभ्यो योनिभ्यो अधि जातवेदाः ।
स गायत्र्या त्रिष्टुभा जगत्यानुष्टुभा च देवेभ्यो हव्या वहतु प्रजानन् ॥

इत्येते वा एतस्य योनयः स्वेभ्य एवैनꣳ योनिभ्यो ऽधि प्रजनयति ॥ इषे रायै रमस्व सहसे द्युम्नायोर्जे ऽपत्याय[7] ॥ इत्येतान्येवावरुन्द्धे ऽथो रमयत्येवैनम् ॥ सम्राडसि स्वराडसि सुषदा[8] सीद ॥ इति सुषदैवैनꣳ सादयति ॥ सारस्वतौ त्वोत्सौ प्रावताम् ॥ इत्यृक्सामे वै सारस्वतावुत्सौ ताभ्यामेवैनं प्रावति ताभ्यां समर्धयत्यग्नये ज्योतिष्मते ऽष्टाकपालं निर्वपेद्धारुणꣳ यवमयं चरुꣳ यस्याहुते ऽग्निहोत्रं पूर्वो

---

1) M 2 ब्राह्मणस्यैवास्याꣳ 2) H, Bb, B गृहा 3) M 1 तद्भुतमꣳ; H, Bb तत् हुतमꣳ; M 2 ohne Accent. 4) Die Mss. schwanken; M 1 यस्यान्नन्नाद्यात्तꣳ; desgl. M 2, ohne Accent; H, B यस्यान्नन्नाद्यत्तꣳ; Bb यस्यान्नं न्नाद्यष्टत्तꣳ 5) M 2 ॰त्यथो भिमꣳ 6) So M 1 u. 2; in H, Bb, B प्रथमꣳ यज्ञे; P प्रथमः यज्ञे। 7) P ऋपत्याय। 8) So M 2 (ohne Accent); P सुषदा। सुसंदेति सु॰संदा।; M 1, H, Bb u. B सुखदा 9) So M 2 (ohne Accent); M 1, H, Bb u. B सुखदैवैनꣳ

ऽग्निरनुगच्छेत्तमो वा एतस्य यज्ञं युवते यस्याहुते ऽग्निहोत्रे पूर्वो ऽग्निरनुगच्छति यदग्नये ज्योतिष्मते ज्योतिषैवास्य यज्ञं समर्धयति वारुणी रात्रिर्यद्वारुणो वरुणादेवास्याधि यज्ञं स्पृणोति यस्याहुते ऽग्निहोत्रे ऽपरो ऽग्निरनुगच्छेत्तत एवं प्राञ्चमुद्धृत्यान्ववसायाग्निहोत्रं जुहुयादेथाभिमन्त्रयेत ॥ भवतं नः समनसौ समोकसौ सचेतसा अरेपसा इति समनसा एवैनौ करोति यजमानस्याहिंसाया एतौ वै तौ या आहुर्ब्रह्मवादिनो नैकः कुब्जिद्वौ[2] व्याघ्रौ विध्याचेत्यग्नये ऽग्निमते ऽष्टाकपालं निर्वपेद्यस्याग्नावग्निमभ्युद्धरेयुर्देवताभ्यो वा एष समदं करोति यस्याग्नावग्निमभ्युद्धरन्ति यदग्नये ऽग्निमते देवता एवास्मै भूयसीर्जनयति वसीयान्भवति ॥ ८ ॥

Vgl. TS 2, 2, 4, 6—8; 4, 2, 5, 1; VS 12, 60; Mân. Çr. 3, 3.

अन्वग्निरुषसामग्रमक्शदन्वहानि[3] प्रथमो जातवेदाः ।
अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततन्थ ॥

1) H, Bb गंधर्वात् 2) So M 1 u. P (= TS 1, 7, 7, 2); in H u. Bb अस्मिन् 3) So M 1, (vgl. Bildungen wie मनस्वन्।); H u. Bb ककुत् भवान्; desgl. B, ohne Accent; P ककुभवानिति ककुभ-वान्।; TS 1, 7, 7, 2 ककुद्मान्; Kâṭh. ककुद्मन्; VS 9, 6 ककुद्मान् 4) So auch Kâṭh. 13, 14, dagegen TS u. VS सेत् 5) P अयत। अध्वानं। 6) P स्वर्का इति सु-अर्काः। 7) P अहिं। 8) B °द्यूयवन्न° 9) So M 1; P विप्राः। अमृताः। ऋतज्ञाः इत्यृतज्ञाः।; aber H u. Bb विप्रा अमृता ऋतज्ञाः॥ 10) P सहस्र-साः। 11) P धनानि 12) P समिथेष्विति सं-इथेषु

एष स्य[1] वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्षे[2] आसनि ।
क्रतुं दधिक्रामनु सꣳसनिष्यदत्पथामङ्कास्यन्वापनीफणत् ॥
उत स्मास्य[3] द्रवतस्तुरण्यतः[4] पर्णं न वेरनु वाति प्रगर्धिनः ।
श्येनस्येव द्रवतो अङ्कसं परि दधिक्रावणः सहोजो तरित्रतः ॥ 5

॥ २ ॥ Vgl. TS 1, 7, 8 (rathadhâvanamantrâḥ); Kâṭh. 13, 14; VS 9, 13—18; Mân. Çr. 7, 1, 2 a. E.

आ मा वाजस्य प्रसवो जगम्यादा मा द्यावापृथिवी विश्वशंभू ।
आ मा गन्त पितरो विश्वरूपा आ मा सोमो अमृतत्वेन गम्यात् ॥

इन्द्राय वाचꣳ वदतेन्द्राय वाचꣳ सꣳवदतेन्द्रꣳ वाजं जापयतेन्द्र[5] वाजं जयेयꣳ[6] वः सा सत्या सꣳवागभूद्यामिन्द्रेण[7] समदध्वमजीजपत 10
वनस्पतया[8] इन्द्राय वाचꣳ विमुच्यध्वꣳ वाजिनौ वाजजितौ वाजं जित्वा बृहस्पतेर्भागमवजिघ्रतꣳ वाजिनौ वाजजितौ वाजं जित्वा बृहस्पतेर्भागं निमृज्येथा[9] स्वो रोहावेहि[10] स्वो रोहावेहि स्वो रोहावा-युर्यज्ञेन कल्पते प्राणो यज्ञेन कल्पते चक्षुर्यज्ञेन कल्पते श्रोत्रꣳ यज्ञेन कल्पते मनो यज्ञेन कल्पते वाग्यज्ञेन कल्पते ब्रह्मा यज्ञेन 15
कल्पते पृष्ठꣳ यज्ञेन कल्पते सूर्यज्ञेन कल्पते यज्ञो यज्ञेन कल्पते वाजाय स्वाहा प्रसवाय स्वाहापिजाय[11] स्वाहा क्रतवे स्वाहा-

---

1) P एषः । स्वः । 2) P अपिपक्ष इत्यपिपक्षः ।; Kâṭh. (wie TS u. VS 9, 14) अपिकक्ष आसनि 3) P स्व । अस्व ।; M 1 स्वास्यु; H u. Bb स्वा अस्यं; desgl. B, ohne Accent (s. TS 1, 7, 8, 3). 4) M 1 तरण्यतः 5) So M 1; die andern Mss. °तेंद्रꣳ; P इंद्रं; s. VS 9, 11. 6) P जय । इयं । (cod. इयं) 7) So M 1; P संवागिति सं.वाक् ।; H, Bb सꣳ वाग° (s. VS 9, 12). 8) P वनस्पतयः । 9) aber P निः । मृज्येथां । 10) P स्वरिति स्वः । रोहाव । आ । इहि । 11) P अपिजायेत्यपि.जाय ।

बृहस्पतये[1] स्वाहा ऽ वाक्पतये[2] स्वाहा ऽ वसवे स्वाहा ऽ स्वमूर्धा वैय-श्वनो[3] व्यश्वान्यो[4.5] ऽन्यो भौवनो[6] ऽ भुवनस्य पतये ऽधिपतये स्वा-हान्नाय त्वा ऽ वाजाय त्वा ऽ वाजजित्यायै त्वेषे त्वो ऽर्जे त्वा ऽ रय्यै त्वा ऽ पोषाय त्वा ऽ स्वदेवा अगामामृता[7] अभूम ऽ प्रजापतेः प्रजा अभूम ॥ ३ ॥

Vgl. 1, 11, 7. 8. — TS 1, 7, 8 a. E. 9 (yûpârohaṇam); Kâṭh. 14, 1; VS 9, 11. 12. 19—21; Mân. Çr. 7, 1, 3.

अग्ने अछा[8] वदेह[9] नः प्रत्यङ् नः सुमना भव ।
प्र नो यछ विशस्पते धनदा असि नस्त्वम् ॥
प्र नो यछत्वर्यमा प्र भगः प्र बृहस्पतिः ।
प्र देवाः प्रोत सूनृता[10] प्र वाग्देवी ददातु नः ॥
अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय ।
वाचꣳ विष्णुꣳ सरस्वतीꣳ सवितारं च वाजिनम् ॥
सोमꣳ राजानꣳ वरुणमग्निमन्वारभामहे ।
आदित्यान्विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिम् ॥
इन्द्रवायू सुसंदृशा सुहवेह[11] हवामहे ।
यथा नः सर्वा[12] इज्जनः[13] संगमे सुमना[14] असत् ॥
वाजस्येमं प्रसवः सुषुवे ऽग्ने सोमꣳ राजानमोषधीष्वप्सु ।

---

1) So die Mss.; nur P अहर्पतये । अहः पतय इत्यहः पतये । 2) Nur P वाक्पतय इति वाक् पतये । s. Ztschr. DMG. XXXIII S. 198, Pâ. 6, 2, 19; vgl. चित्पति oben 1, 2, 1. 3) Die Mss. schwanken; M 1 वैयश्नो; H u. Bb वैयश्नो; B वैयत्सीनो; P लैधश्निः ।; Kâṭh. 14, 1 स्वाहा मूर्ध्ने वैयश्नाय; s. TS 1, 7, 9, 1; VS 9, 20. 4) So H, Bb u. B; P व्यश्नन्निति वि अश्नन् ।; M 1 व्यश्नं°; Kâṭh. स्वाहा व्यश्वन आंत्राय 5) P आंत्यः । अंत्यः । 6) So M 1; P भौवनः ।; in H, Bb u. B भौवनो 7) P अगाम । अमृताः । 8) P अंछ । 9) P वद । इह । 10) So M 1 u. P; die andern Mss. सूनृताः 11) P सुहवेति सु हवा । इह ।; B सहवेह 12) P सर्वः । 13) P इत् । जनः । 14) P सु मनाः ।

स विराजं पर्येतु प्रजानन्प्रजां पुष्टिं वर्धयमानो अस्मै ॥
वाजस्येमां प्रसवः शिश्रियें दिवं स ओषधीः समनक्तु घृतेन।
ता अस्मभ्यं मधुमतीर्भवन्तु वयं राष्ट्रे जागृयामा[1] पुरोहिताः ॥

वाजस्येदं प्रसव[2] आबभूवेमा च विश्वा भुवनानि सर्वतः ॥
अदित्सन्तं दापयतु प्रजाननयिं च नः सर्ववीरं नियच्छतु[3] ॥

देवस्य त्वा सवितुः प्रस३वे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां सरस्वत्या[4] वाचा यन्तुर्यन्त्रेण बृहस्पतेः साम्राज्यायाभिषिञ्चामीन्द्रं साम्राज्यायाभिषिञ्चाम्युपयामगृहीतो ऽसि दृषदं त्वा नृषदमायुषदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वोपयामगृहीतो ऽसि पृथिवीषदं त्वान्तरिक्षसदं नाकसदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वोपयामगृहीतो ऽस्यप्सुषदं त्वा घृतसदं भूतसदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वोपयामगृहीतो ऽसि यह विश्वजनीन नियन्तर्विप्रायाम[5.6] ते ॥

यास्तिस्रः प्रथमजा दिव्यः कोशः समुक्षितः ।
तासां विशिश्रियानामिषमूर्जं[7] समग्रभम् ॥

इन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वोपयामगृहीतो ऽसि ॥

अपां रसमुद्वयसं सूर्यान्शुक्रं[8] समाभृतम् ।

---

1) So die Mss. जागृयामा; P जाग्रियाम (vgl. TS 1, 7, 10, 1; VS 9, 23.) 2) P प्र। सवः। 3) H u. Bb नियच्छत 4) P संरस्वत्याः। 5) So M 1; P नियंतरिति नि-यंतः।; in H, Bb u. B नीयंत° 6) So H, Bb; in M 1 u. B desgl., ohne Accent; P विप्राय। मते।; Kâṭh. 14, 1 विप्र आमती 7) So H u. Bb; desgl. B, ohne Accent; in M 1 विशिश्नाना°; P विश्रस्नानामिति विश्र-स्नानां; Kâṭh. 14, 1 विशिश्न्यानामिष° 8) P सूर्यात्।

अपा᳚ रसस्य यो रसस्ते गृह्णाम्युत्तमम् ॥
इन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा ॥
कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्व᳚ वियूय ।
इहेहैषां कृणुत[1] भोजनानि ये बर्हिषा नमउक्तिं न जग्मुः ॥
उपयामगृहीतो ऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिः प्रजापतये त्वा ॥ अया विष्ठा प्रजापतये त्वा ॥ ४ ॥

Vgl. TS 1, 7, 10 (annahomâḥ); 12 (atigrâhyamantrâḥ); Kâṭh. 14, 2. 3; VS 9, 23—30. 2. 3; 33, 86; 10, 32; Mân. Çr. 7, 1, 1. 3; 7, 2, 5. 6.

देवा वै नाना यज्ञानपश्यन्नथ वा एत᳚ सर्वे ऽपश्य᳚न्तस्मिन्वा अयतन्त[2] तस्मिन्वाजिमयुस्ते[3] बृहस्पतिरुदजयद्बृहस्पतिर्वै देवानां पुरोहितो यद्वै पुरोहितो ब्राह्मण᳚ मृणोति तद्राज्ञे तेनेन्द्रमयाजयत्स स्वाराज्यमगच्छत्स एष स्वाराज्यो यज्ञः स्वाराज्यं गच्छति य एतेन यजते यद्बृहस्पतिरुदजयत्तस्माद्ब्राह्मणो यजेत यदिन्द्रमयाजय᳚त्तस्माद्राजन्यो देवा वै नाना यज्ञानाहरन्निममहमिमं त्वमित्यथ[4] वा एतं प्रजापतिराहरत्तस्मिन्वा अपित्वमिच्छन्त[5] तेभ्यश्छन्दा᳚स्युज्जिती: प्रायच्छदथ वा एतेन प्रजापतिरयजत[6] स स्वाराज्यमगच्छत्स एष स्वाराज्यो यज्ञः स्वाराज्यं गच्छति य एतेन यजते ऽन्न᳚ वै वाजस्तद्य एव᳚ विद्वानन्नमत्ति वाजयति ह वा एनमन्नमद्यमान᳚ सोमो वै वाजपेयस्तद्य एव᳚ विद्वान्सोमं पिबति वाज᳚ ह गच्छति यावन्तो हि देवाः सोममपिब᳚न्ते वाजमगच्छ᳚न्तस्मात्सर्वः[7] सोमं पिपासति

---

1) P कृणुहि । 2) in M 1 scheint das Verb unbetont. 3) So M 1; in H, Bb तस्मिन्वाजिम°; desgl. B, ohne Accent; Kâṭh. 14, 5 wie M 1. 4) M 1 °मित्वथवा 5) So M 1; (desgl. Kâṭh. 14, 5); in H u. Bb अपि त्वमि°; desgl. B, ohne Accent. 6) So M 1; die andern Mss. °रयाजयत् 7) So M 1; in H u. Bb das Verb ohne Accent.

वाजꣳ ह गच्छति वाग्घि वाजस्य प्रसवः सा वै वाक्सृष्टा चतुर्धा व्यभवदेषु लोकेषु चीणि तुरीयाणि पशुषु तुरीयꣳ या पृथिव्याꣳ साग्नौ सा रथन्तरे यान्तरिक्षे सा वाते सा वामदेव्ये या दिवि सा बृहति सा स्तनयित्नाव अथ पशुषु ततो या वागत्यरिच्यत तां ब्राह्मणे न्यदधुस्तस्माद्ब्राह्मण उभयीꣳ वाचꣳ वदति यश्च वेद यश्च न या बृहद्रथन्तरयोर्यज्ञादेनं तयागच्छति या पशुषु तय ऋतेयज्ञं तद्व एवꣳ वेदाह वा एनमप्रतिक्ष्यातं गच्छति यावती वाक्ꣳ हि वेद वाचा हि दीयते वाचा प्रदीयते यो गाथानाराशꣳसीभ्याꣳ सनोति न तस्य प्रतिगृह्यमनृतेन हि स तत्सनोति न मत्तस्य यदा हि तस्य मदो व्येत्यथ तं तत्तपति ॥ ५ ॥

Vgl. Kâṭh. 14, 5.

सप्तदश वा एते द्वया ग्रहाः प्राजापत्याः सप्तदशः पुरुषः प्राजापत्यश्चत्वार्यङ्गानि शिरोग्रीवमात्मा वाक्सप्तमी दश प्राणा अङ्गेऽङ्गे वै पुरुषस्य पाप्मोपश्लिष्टो यद्यतिषजन्यहान्गृह्णात्यङ्गादङ्गादेवैनं पाप्मनो मुञ्चति श्रीर्वै सोमः पाप्मा सुरोपयामा आगते काले प्राञ्चः सोमैरुत्क्रामन्ति प्रत्यञ्चः सुरोपयामैः पाप्मनैवैनꣳ विपुनन्ति तस्मादाहुर्वाजपेययाऽज्येव पूत इति पाप्मना ह्येनꣳ विपुनन्ति देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगायेति परुषि परुषि जुहोत्युत्सन्नयज्ञो वा एषः को ह तद्वेद यदेतस्य क्रियते यन्न

---

1) M 1 बृहती 2) So die Mss.; Kâṭh. दैवीं च मानुषीं च 3) So M 1; in H u. Bb तया 4) So corrigirt, cf. Vorr.; in den Mss. °ख्यातं; Kâth. यज्ञमाह वा एनमप्रतिख्याताङ्गक्ति य एवं वेद; vgl. TBr. 2, 7, 18, 3; 2, 2, 3, 7. 5) So M 1; in H u. Bb ohne Accent. 6) Dies auch Kâṭh. 14, 6. 7) So M 1; die andern Mss. अंगे; s. TBr. 3, 8, 17, 4. 8) So H u. Bb (vgl. TBr. 3, 8, 17, 4; Kâṭh. 14, 6); M 1 पाप्मोपश्लिष्टꣳ; B पाप्मोपश्लिष्टो 9) So M 1; in H, Bb तन्न; B वत्सरं; Kâṭh. 14, 6 को ह तद्वेद यावदेतस्याधि यंति यावन्न सर्वत्वायैव cet.

सवैत्वायैव प्रसवाय वाजस्य नु प्रसवे मातरं महीमिति रथमुपावहरतीयꣳ वा अदितिरेनयैवैनं प्रसूतꣳ सविता चोपावहरति वाजस्योज्जित्या अ३प्स्वन्तरमृतमप्सु भेषजमित्यश्वानत्स्रपयन्यप्सुजा वा अश्वा स्वादेवैनान्योनिर्जनयन्ति वायुर्वा त्वा मनुर्वा त्वेति युनक्ति न वा एतन्मनु३ष्या योक्तुमर्हन्ति देवताभिरेवैनान्युनक्त्यपां नपादाशुहेमन्निति ललाटानि प्रतिमार्ष्टि पूर्वमेव यजुरुदितमनु वदति दुन्दुभीन्बिहादयन्ति वाग्वा एषैकारण्यं प्राविशत्तामेवोज्जयत्यथो या वनस्पतिषु वाक्तामेवावरुन्द्धे सप्तदशः सर्वो भवति प्रजापतिर्वै सप्तदशः प्रजापतिमेवाप्नोत्युत्सन्नयज्ञो वा एष सꣳवत्सरादा अध्युत्सन्नयज्ञो ऽवरुध्यते सꣳवत्सरादेवैनमध्याप्नावरुन्द्धे ॥ ६ ॥

Vgl. 1, 11, 1. — Kâṭh. 14, 6. 7.

देवस्य सवितुः प्रसवे सत्यसवसो वर्षिष्ठं नाकꣳ रुहेयमिति ब्रह्मा रथचक्रꣳ सर्पति सवितृप्रसूत एव वज्रꣳ सर्पति वाजस्योज्जित्या अथो प्रजापतिर्वै ब्रह्मा यज्ञस्य प्रजापतिरेवैनꣳ वज्रादधि प्रसुवति वाजस्योज्जित्यै साम गायते सत्यꣳ वै साम सत्येनैवोज्जयत्युज्जितिर्वाजयत्यन्नꣳ वै वाजो ऽन्नाद्यस्योज्जित्यै देवस्य वयꣳ सवितुः प्रसवे सत्यसवनस्य बृहस्पतेर्वाजिनो वाजजितो वाजं जेषमेति रथमभ्यातिष्ठति सवितृप्रसूत एव रथमभ्यातिष्ठति वाजस्योज्जित्यै वाजिनामृचो ऽन्वाह वाजस्योज्जित्या आजिं धावन्ति वाजस्योज्जित्या अनुदिष्टे रथैर्धावन्ति दक्षिणयैव स्वर्गं लोकमेति यदनुदिष्टे रथैर्धावन्ति दक्षिणया वा एतद्यजमानः सह स्वर्गं लोकमेत्येषैव नैवारः सप्तदशशरावो देवा ओषधीषु पक्वास्वाजिमयुस्ता बृहस्प-

1) So M 1; in H u. Bb das Verb ohne Accent.

तिरुदजयत्स एतान्निवारान् न्यवृणीत तन्निवाराणां निवारत्वं बृहस्पतिर्वै ता उदजयत्तमेव भागिनं करोत्यहि॰सायै तमधश्चात्वाल॰ हरन्तीह वा असा आदित्य आसीत्तमितो ऽध्यमुं लोकमहर॰स्तद्यतो ऽध्यमुं लोकमहरन्यच्चात्वाले ऽवदधति यजमानमेव स्वर्गं लोक॰ हरन्त्यो मा वाजस्य प्रसवो जगम्यादिति रथेषु पुनरासृतेषु[1] जुहोति यमेव वाजमुदजैषुस्तमात्मन्धत्ते ऽजीजपत वनस्पतया इन्द्राय[2] वाच॰ विमुच्यध्वमिति रथविमोचनीय जुहोति यजुषैव युज्यन्ते यजुषा विमुच्यन्ते वाजिनौ वाजजितौ वाजं जित्वा बृहस्पतेर्भागमवजिघ्रतमिति भागिना एवैना अकर्वाजिनौ वाजजितौ वाजं जित्वा बृहस्पतेर्भागे निमृज्येथामिति सर्वानेवैनान्प्रीणात्यर्धवशां च सुरोपयामा॰श्च हरन्ति य आजिं धावन्ति तेभ्यो यमेव वाजमुदजैषुस्तं परिक्रीणीते मधुष्ठालं ब्रह्मणे ब्रह्मण एव तेन परिक्रीणीते ककुभो राजपुत्रः प्राश्नाति वी३र्य॰ वै ककुब्वीर्यमेवात्मन्धत्ते[3] ॥ ७ ॥

Vgl. 1, 11, 1. 3. — Kâṭh. 14, 7. 8.

स्वो रोहावेहि स्वो रोहावेहि स्वो रोहावेति ३स्वर्वा एतद्रोक्ष्यन्पत्न्या स॰वदते ऽथो अन्वारम्भो वा एष यज्ञस्य पत्न्या सह स्वर्गं लोकं भवता आयुर्यज्ञेन कल्पते प्राणो यज्ञेन कल्पता इत्येतावान्वै पुरुषो यावानेव पुरुषस्तमाप्नोति स सर्वो भूत्वा स्वर्गं लोकमेति दर्भमय॰ वासो भवति पवित्रत्वाय गौधूमं चषालं प्राजापत्या वै गोधूमा अर्धं प्रत्यासामोषधीना॰[4] सहैवान्नाद्येनामुं लोकमेति वाजाय स्वाहा प्रसवाय स्वाहेति त्रयोदश[5] वा एता आ-

1) So M 1; (od. पुनरा॰); Bb पुनरासृजेषु; H पुनरासृजेषु; desgl. B, ohne Accent; Kâṭh. 14, 7 पुनरागतेषु 2) B इन्द्रस्य 3) Die Mss. schwanken; M 1 ककुप्व॰; H, Bb ककुभ्व॰; B undeutl., wohl ककुप्व॰; Kâṭh. 14, 7 ककुब्वीर्यं 4) in den Mss. प्रत्य॰ ohne Accent. 5) So M 1; in H, Bb त्रयोदश

हुतयस्त्रयोदश मासाः स᳚म्वत्सरः ᳚ स᳚म्वत्सर᳚ वावासा एतदुपदधाति स्वर्गे लोके ᳚ तस्मिन्नेव प्रतितिष्ठत्यन्नाय त्वा ᳚ वाजाय त्वा ᳚ वाजजित्यायै त्वेत्यूषपुटैरुपयन्ति ᳚ प्राजापत्या वा ऊषाः ᳚ श्वः श्वो भूया᳚सो भवन्त्यन्नाद्येनैवैनमर्पयन्त्येति वा ए३षो ऽस्माल्लोका३द्यो ऽमुं लोकमेति ᳚ यदूषपुटैरुपयन्ति[1] तेनास्माल्लोकान्नैति ᳚ तेनास्मिंल्लोके धृतो हिरण्यमभ्यवरोहति ᳚ तेजो वै हिरण्यं ᳚ तेजस्येव प्रतितिष्ठति ᳚ बस्ताजिनमभ्यवरोहति ᳚ पशवो वै बस्ताजिनं ᳚ पशुष्वेव प्रतितिष्ठत्यन्नस्यान्नस्य जुहोति वाजप्रसव्याभिरन्न᳚ वै वाजो ᳚ ऽन्नाद्यस्यावरुद्ध्या ᳚ उभयं ग्राम्यं चारण्यं च जुहोत्युभयस्यान्नाद्यस्यावरुद्ध्या ᳚ औदुम्बरेण स्रुवेण जुहोत्यूर्ग्वा उदुम्बर ᳚ ऊर्जो ऽवरुद्ध्यै ᳚ सप्तभिर्जुहोति ᳚ सप्त वै छन्दा᳚सि ᳚ छन्दोभिरेवासा अन्नाद्यमवरुन्द्धे ᳚ ऽथ[2] वाग्वै छन्दा᳚सि ᳚ वाचैवासा अन्नाद्यं प्रयच्छति ॥ ८ ॥

Vgl. 1, 11, 3. — Kâṭh. 14, 8.

अथैते ऽतिया३द्या ᳚ यदेवादः परमन्नाद्यमनवरुद्धं तस्यैते ऽवरुद्ध्यै गृह्यन्ते ᳚ ऽथैते पशवा आलभ्यन्ते यज्ञक्रतूनामवरुद्ध्यै ᳚ यदाग्नेयो ऽग्निष्टोमं तेनावरुन्द्धे ᳚ यदैन्द्राग्न उ३क्थ्यं तेन ᳚ यदैन्द्रो वृष्णिः षोडशिनं तेन ᳚ यत्सारस्वती मेषी यदेवादः सप्तदश᳚ स्तोचमनाप्तमनवरुद्धं तदेवैतयाप्नोति ᳚ तदवरुन्द्धे ᳚ ऽथैषा वशा ᳚ देवाश्च वा असुराश्चास्पर्धन्त ᳚ नेमे देवा आसन्नेमे ऽसुरास्ते देवा एता᳚ वशामपश्य᳚न्तया लोकं द्वितीयमवृञ्जतासुरलोक᳚ ᳚ यस्यावद्यति स देवलोको ᳚ यस्य नावद्यति सो ऽसुरलोकस्तं लोकमेवैतया द्वितीय᳚ यजमानो वृङ्क्ते भ्रातृव्यलोकमेव ᳚ सारस्व३त्यन्येषामुत्तमा भवति ᳚ सारस्व३त्यन्येषां[3] प्रथमा ᳚ वाग्वै

1) M 1 °पूटैर° 2) So M 1; die andern Mss. थो 3) So H, Bb; desgl. B, ohne Accent; in M 1 सारस्व३त्वन्येषा°

सरस्वती वाचा यज्ञः सततो वाचैव यज्ञꣳ सन्तनोति यद्वै यज्ञस्य विद्वान्न करोति यच्चाविद्वानन्तरेति तच्छिद्रं[1] तद्वाचैव सरस्वत्या कल्पयत्यनिरुक्तः प्रातःसवः प्रजापतिमेव तेनाप्नोति वियोनिर्वै वाजपेयः प्राजापत्यः स निरुक्तसामा[2] यदनिरुक्तः प्रातःसवस्तेन सयोनि रथन्तरꣳ साम भवत्याशीया उज्जित्या अथो इयꣳ वै रथन्तरमस्यामेव सूयते वाजवतीर्माध्यंदिने पवमाने भवन्नयन्नꣳ वै वाजोऽन्नाद्यस्यावरुद्ध्यै चित्रवतीरार्भवे पवमाने भवन्ति स्वर्गस्य लोकस्य समष्ट्यै शिपिविष्टवतीषु स्तुवत एषा वै प्रजापतेः पशुष्टास्तनूर्यज्ञशिपिविष्टं तस्माज्ज्ञिपिविष्टवतीषु स्तुवत आष्टाद्ष्ट्रमु[3]त्तममुक्थानां भवत्युत्तर एव स्तोत्रे अभिसन्तनोति यद्वै यज्ञस्यातिरिच्यते ऽमुं तं लोकमभ्यतिरिच्यते बृहꣳस्त्वेवामुं लोकमाप्नुमर्हतीन्द्रियꣳ वै वीर्यं बृहद्बृहता स्तुवते इन्द्रिये वा एतद्वीर्यं ततो यज्ञस्य यजमानः प्रतितिष्ठति ॥ ९ ॥

Vgl. 1, 3, 31. — Kâṭh. 14, 9. 10; Mân. Çr. 7, 2, 5. 6.

अग्निरेकाक्षरामुदजयदश्विनौ द्व्यक्षराꣳ विष्णुस्त्र्यक्षराꣳ सोमश्चतुरक्षराꣳ सविता पञ्चाक्षरां पूषा षडक्षरां मरुतः सप्ताक्षरां बृहस्पतिरष्टाक्षरां मित्रो नवाक्षराꣳ वरुणो दशाक्षरामिन्द्रा[5] एकादशाक्षराꣳ विश्वे देवा द्वादशाक्षराꣳ वसवस्त्रयोदशाक्षराꣳ रुद्राश्चतुर्दशाक्षरामादित्याः पञ्चदशाक्षरामदितिः षोडशाक्षरां प्रजापतिः सप्तदꣳशोऽग्निरेकाक्षरया वाचमुदजयदश्विनौ द्व्यक्षरया प्राणापानाव उदजयतां विष्णुस्त्र्यक्षरया त्रीणिमाँल्लोकानुदजयत्सोमश्चतुरक्षरया

1) M 1 तच्छिद्रं; desgl. B, ohne Accent; H u. Bb तत् छिद्रं 2) So M 1; in H u. Bb निरुक्तः साया 3) So M 1;in H, Bb u. B आष्ट्रा° 4) So H u. Bb; in M 1 fehlt वै; B liest वै ह 5) P इद्रः।

चतुष्पदः[1] पशूनुदजयत्सविता पञ्चाक्षरया पञ्च दिशः[2] उदजयत्पूषा षडक्षरया षड्ऋतूनुदजयन्मरुतः सप्ताक्षरया सप्तपदा शक्करीमुदजयन्बृहस्पतिरष्टाक्षरयाष्टौ दिशा उदजयच्चतस्रो दिशश्चतस्रो ऽकुशलीः[3] मिचो नवाक्षरया नव प्राणानुदजयद्वरुणो दशाक्षरया विराजमुदजयदिन्द्रा एकादशाक्षरया चिष्टुभमुदजयद्विश्वे देवा द्वादशाक्षरया जगतीमुदजयन्वसवस्त्रयोदशाक्षरया चयोदशं मासमुदजयन्रुद्राश्चतुर्दशाक्षरया चतुर्दशं मासमुदजयन्नादित्याः पञ्चदशाक्षरया पञ्चदशं मासमुदजयन्नदितिः षोडशाक्षरया षोडशं मासमुदजयत्प्रजापतिः सप्तदश ऽग्निरेकाक्षरयोदजयन्मामिमां पृथिवीमश्विनौ द्व्यक्षरया प्रमामन्तरिक्षं विष्णुस्त्र्यक्षरया प्रतिमां स्वर्गं लोकं सोमश्चतुरक्षरया श्रीवीर्नक्षचाणि[4] सविता पञ्चाक्षरयाक्षरपङ्क्तिमुदजयद्या ३ह्यक्षरपङ्क्तिः सा पङ्क्तिश्चतुर्धा ३ह्येतस्याः पञ्च पञ्चाक्षराणि पूषा षडक्षरया गायत्रीमुदजयच्चतुर्धा ३ह्येतस्याः षट् षडक्षराणि मरुतः सप्ताक्षरयोष्णिहमुदजयंश्चतुर्धा ३ह्येतस्याः सप्त सप्ताक्षराणि बृहस्पतिरष्टाक्षरयानुष्टुभमुदजयच्चतुर्धा ३ह्येतस्या अष्टा अष्टा अक्षराणि मिचो नवाक्षरया बृहतीमुदजयच्चतुर्धा ३ह्येतस्या नव नवाक्षराणि वरुणो दशाक्षरया विराजमुदजयच्चतुर्धा ३ह्येतस्या दश दशाक्षराणीन्द्रा एकादशाक्षरया चिष्टुभमुदजयच्चतुर्धा ३ह्येतस्या एकादशैकादशाक्षराणि विश्वे देवा द्वादशाक्षरया जगतीमुदजयंश्चतुर्धा ३ह्येतस्या द्वादश द्वादशाक्षराणि वसवस्त्रयोदशाक्षरया चयोदशं मासमुदजयन्रुद्राश्चतुर्दशाक्षरया चतुर्दशं मासमुदजयन्नादित्याः पञ्चदशाक्षरया पञ्चदशं

---

1) M 1 चतुःपदः; H u. Bb चतुष्पादः; P चतुष्पद इति चतुः-पदः। 2) P दिशः। 3) P चतस्रः। अकुशलीः।; H u. Bb कुशली॰ 4) So M 1, H u. Bb (desgl. Kâṭh. 14, 4 ohne Accent); Bb ॰याश्रावीर्न; P corrupt चतु-स्त्रीवीः।

मांसमुदजयन्नदितिः षोडशाक्षरया षोडशं मांसमुदजयत्प्रजापतिः सप्तदꣳशो ऽग्नया[1] एकाक्षरया छन्दसे स्वाहाऽश्विभ्यां द्व्यक्षराय छन्दसे स्वाहा विष्णवे त्र्यक्षराय छन्दसे स्वाहा सोमाय चतुरक्षराय छन्दसे स्वाहा सवित्रे पञ्चाक्षराय छन्दसे स्वाहा पूष्णे षडक्षराय छन्दसे स्वाहा मरुद्भ्यः सप्ताक्षराय छन्दसे स्वाहा बृहस्पतये ऽष्टाक्षराय छन्दसे स्वाहा मित्राय नवाक्षराय छन्दसे स्वाहा वरुणाय दशाक्षराय छन्दसे स्वाहेन्द्रायैकादशाक्षराय छन्दसे स्वाहा विश्वेभ्यो देवेभ्यो द्वादशाक्षराय छन्दसे स्वाहा वसुभ्यस्त्रयोदशाक्षराय छन्दसे स्वाहा रुद्रेभ्यश्चतुर्दशाक्षराय छन्दसे स्वाहादित्येभ्यः पञ्चदशाक्षराय छन्दसे स्वाहादित्यै षोडशाक्षराय छन्दसे स्वाहा प्रजापतिः सप्तदशः ॥ १० ॥

Vgl. TS 1, 7, 11 (ujjitimantrâḥ); Kâṭh. 14, 4; VS 9, 31—34.

1) P अग्नये।

॥ इति प्रथमकाण्डे वाजपेयाभिधान एकादशमः प्रपाठकः ॥

॥ इति प्रथमकाण्डं समाप्तम् ॥

Druck von Gebr. Unger (Th. Grimm) in Berlin, Schönebergerstrasse 17a.

Corrigenda.

p. ७९ Zeile 3 und 10 lies एवंवादिद्व statt एवंवादिन्द्व

p. ८१ Anm. 11 lies अकस्यविद् statt अकस्यविद

p. १०५ Zeile 2 lies प्राणंमानुद्- statt प्राणंमं उद्-

p. १०७ Zeile 9 lies mit M 1 u. 2 °न्नितःप्रदानात्तु statt °न्नितः प्रदानात्तु

p. १५२ Anm. 1 lies B यतीभूत्स° statt B यतोभूत्स°

॥ मैत्रायणी संहिता ॥

MÂITRÂYAṆÎ SAṂHITÂ

HERAUSGEGEBEN

VON

DR. LEOPOLD VON SCHROEDER.

ZWEITES BUCH.

GEDRUCKT AUF KOSTEN DER DEUTSCHEN MORGENLÄNDISCHEN GESELLSCHAFT.

LEIPZIG

IN COMMISSION BEI F. A. BROCKHAUS.

1883.

Vorwort.

Dem hier vorliegenden zweiten Buche der Mâitrâyaṇî Sâṃhitâ ist es nothwendig, einige orientirende Bemerkungen über die Handschriften u. A. vorauszuschicken.

I.

Die Handschriften und die Kritik.

Wenn ich von dem Padapâṭha zunächst absehe, so beruht der Text des zweiten Buches, mit Ausnahme einer einzigen Handschrift, der nichtaccentuirten Bühlerschen (durch B bezeichnet), durchweg auf anderen Mss., wie der Text des von mir im Jahre 1881 herausgegebenen ersten Buches.

Ich verzeichne folgende Mss.:

1) Ein vortreffliches altes Ms., aus Ahmedabad stammend, früher M. Haug gehörig, gegenwärtig im Besitze der Münchener Hof- und Staatsbibliothek. Ueber dieses werthvolle Ms., welches nur das zweite Buch enthält, hatte zuerst Haug im Jahre 1871 in seiner Schrift „Brahma und die Brahmanen“ p. 32 berichtet. Weitere Mittheilung darüber habe ich in meinem Aufsatze „Ueber die Mâitrâyaṇî Saṃhitâ“ u. s. w., Ztschr. DMG. XXXIII p. 179 gegeben.

Es stammt dies Ms. aus Ahmedabad in Gujerat und ist am Schluss datirt saṃvat 1646, varshe çâke 1512, ist also im Jahre 1590 n. Chr. geschrieben.

Die Schlussworte lauten:

स्वस्ति संवत् १६४६ वर्षे शाके १५१२ प्रवर्त्तमाने चैत्रशुदि १ गुरुवासरे अद्येह

कठचारा (oder चामा) वास्तव्यमोढज्ञातीययाज्ञिकषोषासुतविश्रामेन चात्म-पठनार्थं लिखितम् ॥

Es ist dies Alles deutlich mit derselben Hand geschrieben, wie das ganze Buch.

Dieses Ms. ist in der von mir bereits Ztschr. DMG. XXXIII p. 186 und sodann Einleitung zum ersten Buche der Mâitr. S. p. XXIX beschriebenen, speciell der Mâitrâyaṇîya-Çâkhâ angehörigen Art accentuirt, und habe ich dieses eigenartige Accentuationssystem gerade aus diesem Ms. zuerst deutlich kennen gelernt.

Das in Rede stehende Ms. darf sowohl durch sein Alter als auch insonderheit durch die Vortrefflichkeit seiner Lesarten die meiste Autorität für sich in Anspruch nehmen.

Auf der Münchener Hof- und Staatsbibliothek ist dies Ms. bezeichnet als „Sanscrit 63 a (Haug, Sanscr. 68 a).“ Ich bezeichne es mit Hg (altes Haug'sches Ms.) im Gegensatz zu dem modernen Haug'schen Ms., das wir in der Einleitung zum ersten Buche der Mâitr. S. p. XXXV flg. kennen gelernt haben und in welchem das zweite Kâṇḍa nicht enthalten war (nur I, III und IV nebst der Upanishad).

2) Ein ziemlich altes, aus Morbî in Kâthiâwâḍ stammendes, nur das zweite Buch umfassendes Ms. Es ist mir dieses Ms. zugleich mit den in der Einleitung zum ersten Buche der Mâitr. S. p. XXXV genannten M 1 u. 2 durch die zuvorkommende Güte Herrn Prof. Bühler's, dem wir die Entdeckung der Morbî-Handschriften verdanken, übermittelt worden.

Dieses Ms. ist leider in Bezug auf Correctheit mit den erwähnten M 1 u. 2 nicht zu vergleichen. Es scheint ungefähr ebenso alt zu sein (d. h. einige Jahrhunderte; die Morbî-Mss. sind alle undatirt), ist aber von einer ganz anderen Hand und vielfach nachlässig geschrieben. Insbesondere sind die Accente, bei denen sich ebenfalls das der Mâitr. Çâkhâ speciell gehörige System beobachtet findet, sehr fehlerhaft. Namentlich ist die mehrfache Accentuirung ein und desselben Wortes sehr beliebt.

Ich bezeichne dieses Ms. mit M 3 (d. h. dritte Handschrift von Morbî).

Der englischen Regierung bin ich für die grosse Liberalität, mit der sie mir auch dieses Ms. zur Disposition gestellt, zu aufrichtigem Danke verpflichtet.

3) Eine, Herrn Prof. A. Weber in Berlin gehörige Handschrift des zweiten Kâṇḍa der Mâitr. S. Es ist dies eine moderne Copie, die zu Anfang des Jahres

1880 Herrn Prof. Weber durch Whitley Stokes aus Calcutta zugesandt worden. Dies Ms. ist ebenfalls nach der alten Weise der Mâitrâyaṇîya accentuirt, zeigt aber leider sehr viel Schreibfehler und kann daher nicht maassgebend sein. Uebrigens aber bekundet es entschieden Selbständigkeit der Lesarten und musste daher durchaus berücksichtigt werden. Ich bezeichne diese Handschrift mit W (d. h. Weber).

Für die freundliche Ueberlassung dieses Ms. während der Dauer meiner Arbeit an dem zweiten Buche sage ich Herrn Prof. Weber meinen besten Dank.

4) Die bereits mehrfach von mir besprochene, unaccentuirte, aus Nasik im Dekhan stammende Handschrift, die Herrn Prof. Bühler gehörig, von mir seit Beginn meiner auf die Mâitr. S. gerichteten Studien benutzt worden ist. Vgl. Ztschr. DMG. XXXIII p. 179; Einleitung zum ersten Buche der Mâitr. S. p. XXXVI. Sie ist mit B bezeichnet.

5) Ein modernes, der Univ. Bombay gehöriges Ms. des zweiten Kâṇḍa der Mâitr. S., welches sich mir deutlich als eine mangelhafte Abschrift des sub. Nr. 1 erwähnten, alten Haug'schen Ms. erwiesen hat und darum gar nicht weiter berücksichtigt worden ist.

6) Ein modernes, aus Ahmedabad stammendes, ziemlich gut geschriebenes Ms., das einem Priester Namens Bhagvandas Kevaldas (in Shagram Pura, Surat) gehört. Die genaue Uebereinstimmung der Lesarten, auch der Fehler, mit Hg macht es mir so gut wie gewiss, dass auch dieses Ms. von Hg copirt worden ist, um so mehr, als ja auch Hg nach Haug's eigener Angabe aus Ahmedabad stammt. Ich habe daher die Lesarten dieses Ms. (A) stets nur in Klammern beigefügt, gewissermassen nur als Bestätigung dessen, dass ich Hg richtig gelesen.

Ein amüsantes Specimen dafür, wie ein Abschreiber sich unter Umständen die Arbeit erleichtert, bietet der Accent dieser Handschrift. Derselbe ist in den ersten Partieen offenbar sorgfältig dem Originale nachcopirt und bietet uns das bekannte, den Mâitrâyaṇîya's eigenthümliche System. Das Durchstreichen der Silben, die drei Strichelchen für den sekundären Svarita, die Curve unter der Linie für den primären Svarita — Alles ist genau nachgemalt. Aber im Laufe der Arbeit scheint dem Abschreiber dies System, dessen Sinn er wahrscheinlich gar nicht begriff, zu mühsam gewesen zu sein. Die Accentsetzung wird allmählich immer nachlässiger und lückenhafter, immer mehr und mehr werden die eigenthümlichen Zeichen der Mâitrâyaṇîya verdrängt und durch die Anudâttastriche unter der Linie, die senk-

rechten Striche über der Linie ersetzt, und endlich werden mit vollständiger Regelmässigkeit Sylbe um Sylbe abwechselnd nur noch diese beiden letzteren Zeichen gesetzt, so dass eine derartig accentuirte Seite etwa folgendermassen aussieht:

(p. 84 des Ahmedabad-Ms. vom zweiten Kâṇḍa der Mâitr. S.)

प्रजा॰ रायस्पोषं गौपत्य॰ सुवीर्य॰ संजातानस्मै यजमानायादित्यास्त्वा कृण्वंतु जागतेन छंदसांगिरस्वदुखे ध्रुवासि धारया मयि प्रजा॰ रायस्पोषं गौपत्य॰ सुवीर्य॰

u. so fort.

Man sieht, dass dieser Unsinn Methode hat und zwar eine sehr einfache.

In dieser Weise ist nun das ganze Ms. gewissenhaft bis zu Ende accentuirt. Die sauberen, den Text schmückenden rothen Striche der Accente fehlen nirgends und erwecken bei dem Unkundigen den Schein, als wäre Alles sorgsam accentuirt, wenn auch nach einem besonderen System.

Bei eventuellen Anführungen aus diesem Ms. ist für die Accente stets zu berücksichtigen, dass nur die ersten Partieen desselben correct accentuirt sind, während später das eben beschriebene System sich Bahn bricht und endlich ganz vorherrscht.

Ich bezeichne dieses Ms. mit A (d. h. Ahmedabad).

7. Der Padapâṭha, über den ich schon in der Einleitung zum ersten Buche p. XXXVI flg. berichtet habe.

Er ist mit P bezeichnet.

Ueber das Verhältniss dieser Mss. zu einander lässt sich nur sagen, dass Hg, M 3, W und B jedes eine selbständige Stellung für sich in Anspruch nehmen und dass nur A direct aus Hg geflossen ist. Unter diesen Mss. ist Hg zweifelsohne das beste und darum auch meist das maassgebende geblieben. Doch liess es sich auch wiederum in einer nicht unbedeutenden Zahl von Fällen nicht verkennen, dass Hg gegenüber den anderen, resp. einer der anderen Handschriften im Irrthum war.

Dazu kommt endlich, dass in einigen Partieen dieses Buches — mehr gegen das Ende — auch der Padapâṭha als kritischer Factor mit eintritt und eine ganz selbständige Recension vertritt, die in einer Reihe von Fällen, wie mir hat scheinen wollen, sogar allein das Richtige bewahrt. Ich habe mich bemüht, mit der Annahme einer Padap.-Lesart möglichst vorsichtig zu verfahren, habe aber doch in einigen Fällen ihr entschieden den Vorzug vor allen anderen Lesarten geben müssen.

Bei dieser Selbständigkeit der einzelnen Mss., bei denen aber hinsichtlich der Recensio natürlich keine Verschiedenheit obwaltet, muss ich das von mir beobachtete Verfahren bei der Wahl der Lesarten als ein bedingungsweise eklektisches bezeichnen.

Die Wahl einer Lesart wird dabei noch schwieriger durch den Umstand, dass gelegentlich eine oder mehrere der andern Yajus-Saṃhitâ's mit der einen Handschrift, die anderen mit der oder den anderen Handschriften der Mâitr. S. übereinstimmen. Die verschiedenen kritischen Momente — Werth und Anzahl der für eine Lesart sprechenden Mâitr.-Handschriften, Uebereinstimmung oder Abweichung vom Padapâṭha, Uebereinstimmung mit diesen, jenen oder allen verwandten Saṃhitâ's, Werth und Wahrscheinlichkeit der Lesart an sich — alle diese verschiedenen Momente, in mannigfachen Combinationen auftretend, machen die Wahl einer Lesart oft nicht leicht, und es ist kaum möglich, Irrungen im Einzelnen zu vermeiden, die aber als solche sich auch meist sehr schwer werden nachweisen lassen.

Um die verschiedenartigen hier möglichen und wirklich vorkommenden Combinationen etwas zu veranschaulichen, greife ich ein Paar Beispiele heraus.

Auf p. 87 finden wir den Vers:

उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः । cet.

Hier musste offenbar mit Hg, der besten Handschrift, in Uebereinstimmung mit TS 4, 2, 3, 1; Kap. S. 25, 1; VS 12, 31 die Lesung भरन्तु gegeben werden, obschon M 3 u. P भरंत lesen, B ebenso, nur ohne Accent; W भरत und Kâṭh. 16, 10 भरंतो

Desgleichen müssen wir auf derselben Seite die Lesart von Hg u. M 3 in Uebereinstimmung mit RV 7, 8, 4; TS 4, 2, 3, 2; Kap. S. 25, 1 halten, in dem Verse:

वि यत्सूर्यो न रोचते बृहद्भाः ।

wenngleich W in Uebereinstimmung mit VS 12, 34 बृहद्भाः । liest, und auch P बृहद्भा इति बृहत्-भाः ।

Auf p. 88 halte ich in dem Verse:

अभि यः पूरुं पृतनासु तस्थौ cet.

allein die Lesart पूरुं für möglich, wenn dieselbe auch bloss vom Padap. vertreten ist, mit dem aber allerdings RV 7, 8, 4; Kâṭh. 16, 10; TS 4, 2, 3, 2 und VS 12, 34 übereinstimmen. Die Saṃh.-Mss. weichen alle ab, und zwar lesen Hg, M 3 (u. A)

पूरं und auffälligerweise ebenso Kap. S. 25, 1; B पुरं und W, dem Richtigen am nächsten kommend, पूर्.

Dagegen habe ich auf der folgenden Seite den Vers:

गर्भः संजायसे पुनः ।

in dieser Form gehalten, weil nicht nur alle Saṃh.-Mss., sondern auch Kâṭh. 16, 1 und Kap. S. 25, 1 so lesen und diese Lesung immerhin möglich ist, wenn man auc sonst lieber dem Padap. sich anschliessen möchte, der सन् । जायसे । bietet und d rin mit RV 8, 43, 9; TS 4, 2, 3, 3; VS 12, 36 übereinstimmt.

Hier kann keine allgemein gültige Regel, sondern nur vorsichtige Abwägung aller einzelnen Momente pro und contra die Wahl in jedem einzelnen Falle bestimmen.

Für die Kritik des vorliegenden Kâṇḍa muss endlich noch bemerkt werden, dass 2, 9, 1 mit seinen zahlreichen, einer viel späteren Zeit angehörigen Namen offenbar als eine Interpolation anzusehen ist. Man vgl. dazu auch Kâṭh. 17, 11; in der Tâitt.-Schule Âr. 10, 1, 5 flg. Man beachte auch, dass im Mân. Çr. der Rudrajapa ein Pariçishṭa bildet (11, 5).

II.

Bemerkenswerthe Wörter und Formen.

Zu den früher von mir, in der Einleitung zum ersten Buche der Mâitr. S. p. XIV flg., aufgeführten bemerkenswerthen Wörtern und Formen habe ich hier einen kleinen Nachtrag zu liefern.

Dem Worte *kshullakavâiçvadeva* ist das Sûtra Pâ. 6, 2, 39 gewidmet. Bisher unbelegt, findet es sich Mâitr. S. 2, 11, 5 in folgendem Zusammenhang: आयाग्यश्च मे वैश्वदेवश्च म[v] ऐन्द्राग्नश्च मे क्षुल्लकवैश्वदेवश्च मे[v] ध्रुवश्च मे वैश्वानरश्च मे u. s. w. Eine v. l. bietet W: सुल्लकवैश्वदेवश्च

Es findet sich dieses Wort auch Kap. S. 28, 11 in demselben Zusammenhange.[1])

---

1) Uebrigens ist das Wort bei Pâ. ein neutr. Das Sûtra Pâ. 6, 2, 39 lautet क्षुल्लकश्च वैश्वदेवे ॥ und der Schol. erklärt: क्षुल्लक । महत् । इत्येते पूर्वपदे वैश्वदेव । इत्येतस्मिन्नुत्तरपदे परतः प्रकृत्या भवतः ॥ क्षुल्लकवैश्वदेवं । महावैश्वदेवं ॥ क्षुधं लातीति क्षुल्लः । इवार्थे कः । क्षुल्लकः । अन्तोदात्तो ऽयं ॥

çvovasîyasa n. Pâ. 5, 4, 80 (Vop. 6, 80. H 86), sonst unbelegt. In Mâitr. S. 3, 4, 9 finden wir die Stelle एतां वै तपःपरार्धा व्युष्टयः श्वोवसीयस्यस्यै व्युच्छति य एवं विद्वान् व्युष्टीरुपधत्ते

In TBr 2, 2, 9, 10 steht çvovasyasá.

hâitanâmaná patron. von hitanâman, nur Pâ. 6, 4, 170 Vârtt. Es findet sich Mâitr. S. 3, 4, 6 in der Stelle आहुतो वै हैतनामनः सर्वतेरापाष्टरमेश्चित्यस्य हीतासीत्

âçokeyá metron. von açokâ, nur gaṇa çubhrâdi zu Pâ. 4, 1, 123. Es findet sich Mâitr. S. 3, 5, 4 in der Stelle वि वा एष यज्ञस्रिक्षयते यदंसꣳस्थितं पशुमुत्सृजन्तिꣳसꣳ ह स्म वा एतमाशोकेयः स्रापयति cet. (die Mss. accentuiren °माशोकेय).

yávana, nom. ag. von yu, nur gaṇa nandyâdi zu Pâ. 3, 1, 134. Dies findet sich wohl in dem Compositum *dveshoyávana* Mâitr. S. 1, 2, 10 in dem Verse:

संमृश इमानायुषे वर्चसे च देवानां निधिरसि द्वेषोयवनः।
युयोऽध्यस्मद्द्वेषाꣳसि यानि कानि च चकृम॥

thurv, *thûrvati* verletzen, beschädigen Dhâtup. 15, 62; cf. turv, tûrvati Dhâtup. 15, 61 (हिंसार्थौ). Diese merkwürdig gestaltete Wurzel stammt vielleicht aus Mâitr. S. 2, 10, 1:

आ यो गृणे न ततृषाणो अजरस्थूर्वन्न यामन्नेतशस्य नू रणे।
नमस्ते हरसे शोचिषे चाथो ते अर्चिषे नमः॥

Die beste Handschrift Hg liest hier अजरस्थूर्वन्न; desgl. B, nur ohne Accent. Dagegen liest M 3 तूर्वन् und ebenso der Padap.

Wenn man nun auch hier die Lesart der schlechteren Mss. तूर्वन् als die richtigere annimmt, so ist es doch sehr wohl denkbar, dass der Verfasser des Dhâtupâṭha seine Wurzel thurv, thûrvati aus guten Mss. unserer Stelle entnahm. Die Bedeutung „schädigen, verletzen, zerstören" passt vortrefflich. Ueberhaupt scheint es mir nicht unwahrscheinlich, dass manche eigenthümlich oder unregelmässig gestaltete Wurzel bei den indischen Grammatikern, speciell auch im Dhâtupâṭha, aus einer varia lectio stammt, die uns nicht immer — wie in diesem Falle — erhalten zu sein braucht.

Herrn Prof. Kielhorn verdanke ich die Mittheilung, dass er auch im ersten Buche der Mâitr. S. noch eine Reihe weiterer Formen gefunden hat, die im Mahâbhâshya erwähnt werden.

Von Interesse ist es endlich, dass eine Reihe der bemerkenswerthen Wörter und Formen der Mâitr. S. von P. v. Bradke im Mânavagṛhyasûtra (auch Mân.

Çrâutasûtra) Ztschr. DMG. XXXVI p. 469 flg. nachgewiesen sind; andere wiederum von R. Garbe im Âpastamba-Çrâutasûtra (s. Gött. gel. Anz. 1882, Stück 3. 4. p. 114 flg.).

Zum Schluss sei mir nur noch die Mittheilung gestattet, dass das dritte Buch der Mâitr. S. auch schon fast ganz druckfertig ist und dass die Ausarbeitung des vierten und letzten Buches (khilakâṇḍa) sich dem unverzüglich anschliessen soll.

Dorpat, den 25. April 1883. L. S.

मैत्रायणी संहिता

जनविक्रमिणा श्रोत्रा लीवोणयदेशोद्भवेन शोधिता

प्रुश्यनाम्नि राष्ट्रे बेलीणाख्यायां राजधान्यां मुद्रिता

संवत्सरे १८८३

ओम् ॥ ऐन्द्राग्नमेकादशकपालं निर्वपेद्यस्य सजाता वीया-
युरोजो वै वीर्यमिन्द्राग्नी ओजसैवैनान्वीर्येण पुनरुपास्यत ऐन्द्रा-
ग्नमेकादशकपालं निर्वपेन्नातृव्यवानोजो वै वीर्यमिन्द्राग्नी ओजसै-
वैनान्वीर्येणाभिभवत्यैन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामो यो ऽलं
प्रजायै सन्प्रजां न विन्देत प्रजापतेर्वा इन्द्राग्नी प्रजामपागूहतां तौ
एतेन भागधेयेनोपाधावत्तौ अस्मै प्रजां पुनरदत्तामिन्द्राग्नी खलु वा
एतस्य प्रजामपगूहतो यो ऽलं प्रजायै सन्प्रजां न विन्दते तौ एव भा-
गधेयेनोपासरत्तौ अस्मै प्रजां पुनर्दत्तो विन्दतीति याज्यानुवाक्ये
भवतो वित्त्या एवैन्द्राग्नमेकादशकपालं निर्वपेत्संग्राममभिप्रयानोजो
वै वीर्यमिन्द्राग्नी ओजसैवैनं वीर्येणाभिप्रयात्यैन्द्राग्नमेकादशकपालं
निर्वपेत्संग्रामं सं यत्योजो वै वीर्यमिन्द्राग्नी ओजसैवैनं वी-
र्येण जयति स यदा संग्रामं जयेदथैन्द्राग्नमेकादशकपालं निर्वपेदो-
जसा वा एष वीर्येण व्यृध्यते यः संग्रामं जयत्योजो वीर्यमिन्द्राग्नी
ओजसैवैनं वीर्येण समर्धयत ऐन्द्राग्नमेकादशकपालं निर्वपेत्पौष्णं
चरुं जनतामभिप्रयानोजो वै वीर्यमिन्द्राग्नी ओजसैवैना वीर्येणा-
भिप्रयाति पूषा वीर्यस्यानुप्रदाता सो ऽस्मै वीर्यमनुप्रयच्छत्यैन्द्राग्नमे-

---

1) So Hg, (A) u. W; M 3 वीया आयुर°; B वियायुर°; es passt hier nur die Bedeutung von इ c. वि, nicht या c. वि; वीयुर° wäre die zu erwartende correcte Form. Kâṭh. 9, 17 सजातकाम(:) 2) Kâṭh. 9, 17 वीर्येणाधस्तादुपास्यते. 3) M 3 विवृध्यते; cf. 2, 1, 3 a. E.

कादशकपालं निर्वपेत्पौष्णं चरुं क्षैत्रस्य पतये चरुं क्षैत्रमध्वस्यन्नो-
जो वै वीर्यमिन्द्राग्नी ओजसैवास्मै वीर्येण लोकꣳ विन्दतः पूषा
वीर्यस्यानुप्रदाता सो ऽस्मै वीर्यमनुप्रयच्छतीयं क्षैत्रस्य पत्न्यस्यामेव
प्रतितिष्ठति ॥ १ ॥

Vgl. TS 2, 2, 1 (prajâkâmâdînâm ishṭayaḥ); Kâṭh. 9, 17.

अग्नये वैश्वानराय द्वादशकपालं निर्वपेत्कामायꣳ संवत्सरो वा
अग्निर्वैश्वानरः संवत्सरे काम आप्यते संवत्सरमेवापत्सो ऽस्मै का-
ममाप्नोति यत्कामो भवत्यग्नये वैश्वानराय द्वादशकपालं निर्वपेत्समा-
नमभिप्रोक्ष्यन्त्संवत्सरो वा अग्निर्वैश्वानरः संवत्सराय समम्यते सं-
वत्सरमेवाप्त्वावरुणं काममभिदुह्यत्यग्नये वैश्वानराय द्वादशकपालं नि-
र्वपेत्सनिं प्रेष्यन्त्संवत्सरो वा अग्निर्वैश्वानरः संवत्सराय प्रतिगृह्यते
संवत्सरमेवाप्त्वा साताꣳ[1] सनिꣳ वनुते स यदा वन्वीताथाग्नये वैश्वा-
नराय द्वादशकपालं निर्वपेत्संवत्सरो वा अग्निर्वैश्वानरः संवत्सरमेष
प्रयुङ्क्ते संवत्सरं एतस्मै वनुते तमेव भागिनमकस्तꣳ[2] श्यूमौग्र्यं द्वि-
थात्तस्मै दक्षिणां दद्यात्पाशेन वा एष चरति तमेवास्मिन्प्रतिमुञ्च-
त्येकहायनो गौर्दक्षिणा स हि संवत्सरस्य प्रतिमाग्नये वैश्वानराय
द्वादशकपालं निर्वपेदनन्नमत्स्यन्त्संवत्सरो वा अग्निर्वैश्वानरः संव-
त्सरायैवैनदप्यधात्स यदानन्नमद्यादथाग्नये वैश्वानराय द्वादशकपालं
निर्वपेद्यदेवादो ऽनन्नमत्ति तदस्मै संवत्सरः स्वदयति स्वदितमेवा-
त्ति सीसं दक्षिणा कृष्णꣳ वा वासो ऽनन्नꣳ वै सीसमनन्नं कृष्णमन-
न्नेनैवानन्नमपहत्यान्नाद्यमात्मन्धत्ते ऽग्नये वैश्वानराय द्वादशकपालं
निर्वपेत्संग्राममभिप्रयान्त्संवत्सरो वा अग्निर्वैश्वानरः संवत्सरेणैवै-

1) Hg (u. A) सताꣳ 2) In den Mss. ist das Verb ohne Accent, ausser in M 3, wo es Paroxytonon.

नमभिप्रयात्यग्नये वैश्वानराय द्वादशकपालं निर्वपेत्संग्राम॰ स॰यत्य॰ यतरो वै संगृभाणयोरायतनवत्तरो भवति स जयतीय॰ वा अग्निर्वै॰ श्वानर॰ इमामेवायतनमकृतास्यां पराक्॰स्त॰ जयति संग्राम॰॰ स यदा संग्रामं जयेदथाग्नये वैश्वानराय द्वादशकपालं निर्वपेत्स॰वत्सरो वा अग्निर्वैश्वानरः॰ स॰वत्सरमेष प्रयुङ्क्ते॰ स॰वत्सर एतस्मै जयति॰ तमेव भागिनमकस्त॰॰ व्यूमौगग्नये वैश्वानराय द्वादशकपालं निर्वपेद्यः काम॰ येतानेन[1] राज्ञेमान्यवान्व्रीहीन्वादधीयेति[2]॰ स॰वत्सरो वा अग्निर्वैश्वानरः॰ स॰वत्स३रो ऽन्नाद्यस्य प्रदाता॰ तमेव भागधेयेनोपासरत्सो ऽस्मा अ॰ न्नाद्यं प्रयछत्यग्नये वैश्वानराय द्वादशकपालं निर्वपेद्वारुण॰ यवमयं चरुमामयाविन॰ याजयेद्वरुणगृहीतो वा एष यं आमयावी॰ वरुणा॰ देवैनं तेन मुञ्चत्यसौ वा आदि३त्यो ऽग्निर्वैश्वान३रो॰ ऽमुना वा एन॰ मेतं निगृहीत॰ वरुणो गृह्णाति॰ तत एनं मुक्त्वा यावानेवास्यात्मा त॰ वरुणान्मुञ्चति॰ वारुणं चरुं निर्वपेद्यवमयमीयन्तमग्नये वैश्वान॰ राय द्वादशकपालं भूतिकाम॰ याजयेद्वरुणगृहीतो वा एष यो भूति॰ कामो॰ वरुणादेवैनं तेन मुञ्चतीया॰श्वरुर्भवत्येतावान्वा आत्मा॰ या॰ वानेवास्यात्मा त॰ वरुणान्मुक्तासौ वा आदि३त्यो ऽग्निर्वैश्वान३रो॰ ऽमुमेनमन्वारम्भयत्यमुष्यैनमादित्यस्य सायुज्यं गमयति ॥ २ ॥

Vgl. TS. 2, 2, 6 (âdityacarvâdyâ ishṭayaḥ); Kâṭh. 10, 3 u. 4.

अग्नये जातवेदसे ऽष्टाकपालं निर्वपेद्दधिक्राव्णा एकादशकपाल॰ मग्नये वैश्वानराय द्वादशकपाल॰ यः सर्ववेदसी प्रथमामिष्टिमालभेता॰ ग्निर्वा एतस्य तद्वेद यच्चास्येष्ट॰ यच्च सुकृतमग्निरेवास्मै[3] तद्विन्दत्यमेध्यो वा एष यः सर्वं ददाति॰ तद्दधिक्रावैवैनं मेध्यं करोति॰ स॰वत्सरो वा

1) M 3 °तान्नेन. 2) A राजिमान्. 3) M 3 सूकृतम°

अग्निर्वैश्वानरः सँवत्सरो वा एतस्य तद्वेद यत्रास्येष्टꣳ यत्र सुकृतꣳ सँवत्सर एवास्मै तद्विन्दत्यग्नये सुरभिमते ऽष्टाकपालं निर्वपेदभिश्स्यमानꣳ याजयेद्ग्रथप्रोतꣳ वै दार्भ्यमभ्यूशꣳसꣳस्तं कौलकावती अब्रूतां तथा त्वा याजयिष्यावो यथा ते ऽन्नमत्स्यन्ति यत्र यास्यस्य पशोर्नोपशृणवस्तन्नछ यस्त्वा कश्चोपायतूष्णीमेवास्वेति तꣳ ह स्म वै व्याघ्रा उपघ्नायं तूष्णीमेवापक्रामन्ति तौ वै तत्रैव श्वो भूते यज्ञायुधैरन्वेत्याग्निं मथित्वाग्नये सुरभिमते ऽष्टाकपालं निरवपतां ततो वा एनं न पर्यवृञ्जन्यमभिशꣳसेयुस्तमेतया याजयेदुरभि वा एतमारद्यमभिशꣳसन्त्येषा वा अग्नेर्भेषजा तनूर्यत्सुरभिर्भेषजमेवास्मा अकः सुरभिमेनमकः शमयत्येवाग्नये पवमानायाष्टाकपालं निर्वपेद्दधिक्रावण्णा एकादशकपालमग्नये वैश्वानराय द्वादशकपालं पुनरेत्य गृहेषु पवमान एवैनं पुनात्यग्निर्निष्टपत्यपूतो वा एष यमभिशꣳसन्ति नैनं दधिक्रावा चन पावयाक्रियादिति[2] खलु वा आहुस्तद्दधिक्रावैवैनं पावयति सँवत्सरो वा अग्निर्वैश्वानरः सँवत्सर एवैनꣳ स्वदयत्यैन्द्राग्नेयमष्टाकपालं निर्वपेदग्नीषोमीयमेकादशकपालं द्यावापृथिवीयं द्विकपालꣳ यः संग्रामं जिगीषेन्नृज्यायꣳ वा जिज्यासेद्ध्रुवा एवाग्नेयो ऽग्नीषोमाभ्याꣳ वै वीर्येणेन्द्रो वृत्रमहन्वृत्रं खलु वा एष हन्ति यः संग्रामं जयति नृज्यायꣳ वा जिनाति तद्वार्त्रघ्नमेवैतदिन्द्रो वै वृत्राय वज्रमुदयच्छꣳस द्यावापृथिवी नान्वमन्येतां तमेतेन भागधेयेनान्वमन्येताꣳ यद् द्यावापृथिवीयो वज्रस्यानुमत्याꣳ अथो अनुमतवज्रो ऽसदिति स यदा संग्रामं जयेन्नृज्यायꣳ वा जिनीयादथाग्नेयमष्टाकपालं निर्वपेदैन्द्राग्नमेकादशकपालं द्यावापृथिवीयं द्विकपालमृद्ध्या

1) M 3 सुरभीमते 2) cf. Pâ. 3, 1, 42. Einleitung zum 1. Buche der Mâitr. S. p. XIV Ztschr. DMG. XXXIII p. 196.

एवाग्मेऽयो ऽग्नीषोमाभ्याꣳ वै वीऽर्येणेन्द्रो वृत्रमहन्त्स ओजसा वीर्येण व्यार्ध्यत स एतमैन्द्राग्नमपश्यत्तेनौजो वीर्यमात्मन्नधत्तौजसा वा एष वीर्येण व्यृध्यते[1] यः संग्रामं जयति नृज्यायꣳ वा जिनात्योजो वीर्यमिन्द्राग्नी ओजसैवैनꣳ वीर्येण समर्धयतोऽथ यद् द्यावापृथिवीयो ये एवास्मै वज्रमन्वमꣳसातां ताभ्यामेष भागः क्रियते ॥ ३ ॥ 5

Vgl. TS. 2, 2, 3—5.

अग्नीषोमीयमेकादशकपालं निर्वपेद्ब्राह्मणः कामायाग्नीषोमीयो वै ब्राह्मणो देवतया स्वामेव देवतां कामाय भागधेयेनोपासरत्तां अस्मै कामꣳ समर्धयतो यत्कामो भवत्यग्नीषोमीयमेकादशकपालं निर्वपेद्ब्राह्मणं भूतिकामꣳ याजयेद्देवा वै सत्रमासत कुरुक्षेऽत्रे ऽग्निः सोमा इन्द्रस्ते ऽब्रुवन्यतमं नः प्रथमꣳ यज्ञ ऋच्छात्तं नः सहेति तेषाꣳ 10 वै सोमꣳ यज्ञ आर्छत्तमभिसमगच्छन्त तस्मात्सोममभिसंगच्छन्ते स हि यशस्वितमस्तद्वै[2] सोमो न्यकामयत स गिरिमगच्छत्तमग्निरन्वगच्छत्तौ गिरा अग्नीषोमौ समभवतां तस्मात्सदृङ् गिरा अग्निर्दहति गिरौ सोमः स वा इन्द्रः शिथिर इवामन्यत ऽसो ऽग्नीषोमा अन्वगच्छत्तां अब्रवीद्याजयतं मेति तꣳ वा एतयाग्नीषोमा अयाजयतां तस्मिꣳ- 15 स्तेजो ऽग्निरदधादिन्द्रियꣳ[3] सोमस्तेता इन्द्रो ऽभवद्यो भूतिकामः स्यात्तमेतया याजयेत्तेज एवास्मिन्नग्निर्दधातीन्द्रियꣳ सोमो भवत्येवाग्नीषोमीयमेकादशकपालं निर्वपेच्श्यामाकꣳ वसन्ता ब्रह्मवर्चसकामो ऽग्नीषोमौ वै ब्रह्मवर्चसस्य प्रदातारौ तां एव भागधेयेनोपासरत्तां अस्मै ब्रह्मवर्चसं प्रयच्छतो वसन्ता यजेत वसन्तो वै ब्राह्मणस्य ऋतुः 20

---

1) M 3 विवृध्यते 2) M 3 u. W यशस्वीतमꣳ; desgl. B, ohne Accent. 3) W °रादधाꣳ; desgl. B, ohne Accent.

स्व एवास्मा ऋतौ ब्रह्मवर्चसं प्रयच्छतो यत्पुरोडाशस्तेनाग्नेयो यज्ञ्या-
माकस्तेन सौम्यः सर्वमेवाग्नीषोमाभ्या ह्व्यं संप्रादात्ता अस्मै सर्वं
ब्रह्मवर्चसं प्रयच्छतः सौमाग्री[1] स्याज्ये स्यातां तेजो वा अग्निरि-
न्द्रियं सोमस्तेजसा च वावास्मा एतदिन्द्रियेण चोभयतो ब्रह्मवर्चसं
परिगृह्णाति सौमापौष्णं चरुं निर्वपेन्नेमपिष्टं पशुकामः सोमो वै
रेतोधाः पूषा पशूनां प्रजनयिता सोम एवास्मै रेतो दधाति पूषा
पशून्प्रजनयति सौमेन्द्रं चरुं निर्वपेत्पुरोधाकामः सौम्यो वै ब्राह्मणो
देवतयेन्द्रो राजन्यो ऽनपदोघ्यं खलु वै सोमः प्रयच्छति तमेव भाग-
धेयेनोपासरत्सो ऽस्मा अनपदोघ्यं राष्ट्रं प्रयच्छत्याग्निवारुणं चरुं नि-
र्वपेत्समान्तमभिद्रुह्यामयावी वानृतं वा एष[2] करोति यः समान्तम-
भिद्रुह्यति देवता वा एष आरद्धो ऽनृतं करोत्यग्निर्वै सर्वा देवता अथ
वै सापि देवता यामारत्तत एनं मुञ्चति यद्वारुणो वरुणादेवैनं तेन
मुञ्चति तत्काजवं[3] वा एतत्क्रियते सर्वस्यावेष्टिः सर्वस्य प्राय-
श्चित्तिः ॥ ४ ॥

Vgl. TS 2, 3, 3 (yajñavibhrashṭâdînâm ishṭayaḥ); 2, 4, 4, 3; Kâṭh. 10, 2.

सौमारौद्रं घृते चरुं निर्वपेच्छुक्लाना व्रीहीणां ब्रह्मवर्चसकामः
स्वृभानुर्वा आसुरः सूर्यं तमसाविध्यत्तं सोमारुद्रा अभिषज्यतां तस्य
वा एतेनैव शमलमपाहतामेतेनास्मिंस्तेजो ऽधत्ता यो ब्रह्मवर्चस-
कामः स्यात्तमेतया याजयेच्छमलमेवास्यापहन्ति[4] तेजो ऽस्मिन्दधा-
तीयाश्वरुर्भवत्येतावान्वा आत्मा यावानेवास्यात्मा तावदस्मिंस्तेजो
दधाति शुक्ला व्रीहयो भवन्ति श्वेता गा आज्याय दुहन्ति तेज एवै-

1) So die Mss.; Kâṭh. सोमाग्री, doch scheint ursprünglich auch सौमाग्री geschrieben. 2) So corrigirt; die Mss. एषा 3) So die Mss.; Hg (u. A) entweder auch so oder तत्काजवं 4) Hg °स्यापहंति 5) W स्मै

तत्संभियते घृतं प्रोक्षणं भवति घृतेन मार्जयन्ते घृते भवति भूय एवास्मिꣳस्तेजो दधाति यस्या राच्याः प्रातर्यक्ष्यमाणः स्यान्नास्य तार्ꣳराचीमपो गृहान्प्रहरेयुरापो वै शान्तिः शमयेयुरेव परिश्रिते[1] याजयन्ति तेजसः परिगृहीत्यै साकꣳ रश्मिभिः प्रचरन्ति साकमेवास्य रश्मिभिः शमलमपघ्नन्ति तिष्यापूर्णमासे याजयेत्सोमो वै चन्द्रमा रुद्रस्तिष्यः[2] संप्रꣳत्येवैना उपासरत्प्राचीनꣳ वै सौमीरोषधयः प्रतीचीनꣳ रौद्रीर्न हि प्राचीनꣳ शुष्यन्ति शुष्यन्ति प्रतीचीनं मनोर्ऋचो भवन्ति मनुर्वै यत्किंचावदत्तद्भेषजमेवावदत्तद्भेषजत्वायैवैनाः शक्वरीर्भवन्ति शक्त्यै नाराशꣳसीर्भवन्ति शान्त्यै किलासत्वाद्वा एतस्य भयमति ह्यूपहन्ति सौमापौष्णं चरुं निर्वपेन्नेमपिष्टं पशुकामः सौम्यो वै ब्राह्मणो देवतया पशवः पूषा स्वाꣳ वा एतद्देवतां पशुभिर्बꣳहयते[3] त्वचमेवाकृत ॥ ५ ॥

Vgl. TS 2, 2, 10 (sâumârâudrâdyâ ishṭayaḥ); Kâṭh. 11, 5.

सौमारौद्रं चरुं निर्वपेत्कृष्णानाꣳ व्रीहीणामभिचरन्सौमीर्वा ओषधयस्तत एनं निर्याच्य रुद्रायास्य पशूनपिदधाति कृष्णा व्रीहयो भवन्ति तमो वै कृष्णं मृत्युस्तमो मृत्युनैवैनं ग्राहयति शरमयं बर्हिर्भवति वैभीदक इध्मः शृणादिति शरमयं बर्हिर्भवति विभित्त्यै वैभीदक इध्मः सौमारौद्रं चरुं निर्वपेदुदश्वित्यविचितानाꣳ व्रीहीणाꣳ यः कामयेत द्वितीयमस्य लोके जनयमिति सौमीर्वा इमाः प्रजा द्वितीयमेवास्य लोके जनयति नेमꣳ शरमयं बर्हिर्भवति नेममशरमयं[4] नेमो वैभीदक इध्मो नेमो ऽवैभीदको द्वितीयमेवास्य लोके जनयति सौमारौद्रीमामिक्षां निर्वपेदामयाविनꣳ याजयेदाग्नेयो वै प्रमीतः सौ-

1) M 3 परिस्मृते; Kâṭh. परिश्रिते 2) M 3 तिष्या 3) B बृꣳहयते 4) M 3 °मꣳशरमयं

म्यो जीवन्नुभयत एवैनं निःक्रीणाति पयो वै पुरुषः पय एतस्या-
मयति पयसैवास्य पयो निःक्रीणात्यपिनद्धाक्षो होता स्यात्तमरण्यं
पराणीय विक्शापयेत्तस्मा अनड्वाहं दद्यात्तं प्रीत तस्याश्नीयाद्यत्तस्य
नाश्नीयात्प्रमीयेत ॥ ६ ॥

Vgl. TS 2, 2, 10 (sâumârâudrâdyâ ishṭayaḥ); Kâṭh. 11, 5.

आग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन्नभिचर्यमाणो वा सा-
रस्वतीमपाज्यस्य यजेदग्निर्वै सर्वा देवता देवताभिरेवास्य देवताः प्र-
तिचरति विष्णुर्यज्ञो यज्ञेन यज्ञꣳ वाक्सरस्वती वाचा वाचं तद्-
भिचर्याभिप्रायुक्ताथो प्रतिचर्यात्येव प्रायुक्ताग्नावैष्णवं घृते चरुं निर्व-
पेच्चक्षुष्कामो ऽग्निर्वै मनुष्याणां चक्षुषः प्रदाता विष्णुर्देवानामेतौ वै
चक्षुषः प्रदातारौ तौ एव भागधेयेनोपासरत्तौ अस्मै चक्षुः प्रयच्छतो
धेन्वा वै घृतं पयो ऽनड्वहस्तण्डुलास्तन्मिथुनं मिथुनं चक्षुर्मिथुनेनैवा-
स्मै मिथुनं चक्षुर्जनयतः पयो वै घृतं पयश्चक्षुः पयसैवास्मै पयश्च-
क्षुर्जनयतस्तेजो वै घृतं तेजश्चक्षुस्तेजसैवास्मै तेजश्चक्षुर्जनयतो हिरण्यं
ददात्यायुर्वै हिरण्यमायुश्चक्षुरायुषैवास्मा आयुश्चक्षुर्दधाति शतमानं
भवति शतायुर्वै पुरुषः शतवीर्य आयुरेव वीर्यमाप्नोत्यग्नावैष्णवमे-
कादशकपालं निर्वपेदभिचर्यमाणो ऽग्निर्वै सर्वा देवता विष्णुर्यज्ञो
देवताश्चैव यज्ञं चास्तृत्यै मध्यतः प्रविशत्यग्नावैष्णवमेकादशकपालं
निर्वपेत्संग्रामे सरस्वतीमपाज्यस्य यजेदग्निर्वै सर्वा देवता देवता-
भिरेवास्य देवताः प्रणुदते विष्णुर्यज्ञो यज्ञेन यज्ञꣳ वाक्सरस्वती
वाचा वाचꣳ यदि मन्येत प्रति पुरस्ताच्चरन्तीति द्वे पुरोनुवाक्ये
कुर्यादेका याज्याꣳ सममेव[2] द्वाभ्यां क्रियते ऽत्येकया प्रयुङ्क्त आग्ना-

1) Hg, M 3 (u. A) परस्ता° 1) Hg (u. A) सममेत°

वैष्णवं प्रातरष्टाकपालं निर्वपेत्सारस्वतं चरुं बार्हस्पत्यं चरुमाग्नावैष्णवमेकादशकपालं मध्यंदिने सारस्वतं चरुं बार्हस्पत्यं चरुमाग्नावैष्णवं द्वादशकपालमपराह्णे सारस्वतं चरुं बार्हस्पत्यं चरुं यस्य भ्रातृव्यः सोमेन यजेताग्निर्वै सर्वा देवता देवताभिरेवास्य देवता आप्नोति विष्णुर्यज्ञो यज्ञेन यज्ञं वाक्सरस्वती वाचा वाचं ब्रह्म बृहस्पतिर्ब्रह्मणैवास्य ब्रह्माप्नोति कपालैश्छन्दा॑सि पुरोडाशैः सवनानि मैत्रावरुणमेककपालं निर्वपेत्पयस्या वा॑नूबन्ध्यामेवैतेनाप्नोति[1] सैषाध्वरकल्पेष्टिर्यज्ञमेवैतयाप्नोति[2] ॥ ७ ॥

Vgl. TS 2, 2, 9 (abhicârâdyâ ishṭayaḥ); Kâṭh. 10, 1.

आग्निमारुतं चरुं निर्वपेद्वृष्टिकामः समान्या[3] मृदश्चरुं च कुर्युः कुम्भं च यस्मिन्नेवाग्नौ चरुं पचेयुस्तस्मिन्कुम्भं धूपयेयुर्धूमो वा अस्यामूं गच्छति[4] नार्चिस्तस्मादेतं धूपयन्ति न पचन्ति यदा हवीꣳष्यासादयेयुरथ दक्षिणाया श्रोणयां कुम्भमासाद्योदकेन पूरयेयुर्यदि पुरा संस्थानाद्वीर्यतात्र वर्षिष्यतीति ब्रूयाद्यदि संस्थिते श्वो वर्षिष्यतीति[5] ब्रूयाद्यदि चिरमिव वीर्यति नाडा विद्योतीति ब्रूयादग्निर्वा इतो वृष्टिमीट्टे मरुतोऽमुतश्चावयन्त्येते[6] वै वृष्ट्याः प्रदातारस्तानेव भागधेयेनोपासरत्ते ऽस्मै वृष्टिं[7] प्रयच्छन्ति मारुतं चरुं निर्वपेत्पयसि प्रियङ्गवं यामकामो वा पशुकामो वा पृश्नीनां गवां दुग्धे पृश्नीनां गवामाज्यꣳस्यात्तेचापि गोमूत्रस्याश्नीयुः पृश्निर्वै यदुदुहत्स प्रियङ्गुरभवद्यꣳ वै पृश्निर्वोग्वा तस्या वा एतत्पयो यत्प्रियङ्गवः स्वेनैवैनां[8] पयसाछैति प्रियवती याज्यानुवाक्ये भवतः प्रियमेनꣳ सजातानां करोति द्विपदा

1) So M 3; die andern Mss. वानुबंध्याम° 2) M 3 सैषाध्वरः कल्पेष्टि° 3) Hg समान्या. 4) In W गछति ohne Accent. 5) M 3 वृष्टेति. 6) So M 3; B चावयंत्येते; Hg (u. A) चावयत्येते; W चावयंते 7) M 3 वृष्टिं 8) M 3 °वैनान्; desgl. B, ohne Accent.

च चतुष्पदा च भवतो द्विपदश्चैवास्मै चतुष्पदश्च पशूनवरुन्द्धे यथा वत्सं ऊधरभ्यायछति वत्सं वा गौरेवमेनं सजाता अभ्यायछन्ति मारुतं चयोदशकपालं निर्वपेद्यस्य यमौ पुत्रौ गावौ वा जायेयातां निर्वीरिता वै पुरुषो यमौ जातं आशास्ते ऽपशुतां गौर्यच्चयोदशं प्रजापतिर्वै चयोदशः[2] प्रजापतिमेवाप्नोति यद्द्वादशं सं वत्सरात्तेन यन्नायच्यूनुवाक्या सं वत्सरात्तेन यज्जगती याज्या पशुभ्यस्तेन यन्मारुतीष्टिः पशुभ्यस्तेन मारुतं सप्तकपालं निर्वपेद्यं च विद्वाजानं जिज्यासेदगस्त्यस्य कयाशुभीयं सामिधेनीश्च स्युर्याज्यानुवाक्याश्चांगस्त्यो वै मरुद्भ्य उक्षणः प्रौक्षत्तानिन्द्रायालभत ते वज्रमादायाभ्यपतंस्तान्वा एतेनाशमयन्नज्शमयत्येवैतेन सप्तकपालो भवति सप्त हि मरुतो विशमरुतः स्वेनैवैनान्भागधेयेन शमयति ॥ ८ ॥

Vgl. TS 2, 2, 11.

ऐन्द्रमेकादशकपालं निर्वपेन्मारुतं सप्तकपालं राजन्यं भूतिकामं याजयेदैन्द्रो वै राजन्यो देवतया मारुती विडिन्द्रियेणैवास्मै विशमुपयुनक्त्यनुकामस्मै विशमविवादिनीं करोत्यैन्द्रमेकादशकपालं निर्वपेन्मारुतं सप्तकपालं यः कामयेत विशे च क्षत्राय च समदं कुर्यामित्यैन्द्रस्यैन्द्रीमनूच्य मारुत्या यजेन्मारुतस्य मारुतीमनूच्यैन्द्र्या यजेत्स्व एवैभ्यो भागधेये समदं करोति यदि कामयेतानुमुह्यं स्यादिति पूर्वार्धे ऽन्यां जनताया गां निदध्याज्जघनार्धे ऽन्यामपि ते संगछेते तावदनुमुह्यं भवति यदि कामयेत कल्पेतेत्येत एव हविषी निरुप्य यथायथं यजेत्कल्पते[3] ऽहैन्द्रमेकादशकपालं निर्वपेन्मारुतं सप्तकपालमभिचरन्स्रुवपरिष्टादैन्द्र-

1) B उधर० 2) W °दश 3) So M 3; die andern Mss. कल्पते

स्यावद्येद्धस्तान्मारुतस्योभयत एवैनानादीपयति ज्येष्ठतश्च कनिष्ठतश्चैन्द्रमेकादशकपालं निर्वपेन्मारुतीमामिक्षाꣳ राज३न्यं ग्रामकामꣳ याजयेन्मध्य आमिक्षायाः पुरोडाशं निधायोभयस्यावद्येत्क्षꣳ वा इन्द्रो विꣳमरुतो विशꣳ वा एतन्मध्यतः प्रविशति पर्यूहमवद्यति विशैवैनं पर्यूहति मारुतमेकविꣳशतिकपालं निर्वपेदभिचरन्देवविशा वै मरुतो न वै विशा प्रत्तं घ्नन्ति देवविश एवैनं निर्याच्य स्तृणुते तं बर्हिषदं कृत्वा समया स्फ्येन विहन्यात् ॥ इदमहममुष्यामुष्यायणस्येन्द्रवज्रेण शिरश्छिनद्मि ॥ इतीन्द्रवज्रेणैवास्य शिरश्छिनत्त्यथ यत्स्फ्यो वज्रो वै स्फ्यो वज्रेणैवैनꣳ स्तृणुते ॥

एना व्याघ्रं परिषस्वजानाः सिꣳहं मृजन्ति महते धनाय ।
महिषं नः सुभ्वं तस्थिवाꣳसं मर्मृज्यन्ते द्वीपिनमꣳप्स्वन्तः ॥

इति वज्रो वा आपो यदेतदप्सुमद्यजुर्भवति वज्रेणैवैनꣳ स्तृणुते ॥ ९॥

Vgl. TS 2, 2, 11 (âindrâdyâ ishṭayaḥ).

अग्नये पथिकृते ऽष्टाकपालं निर्वपेद्यस्य प्रज्ञातेष्टिरतिपद्येत बहिष्पथꣳ वा एष एति यस्य प्रज्ञातेष्टिरतिपद्यतेऽग्निर्वै देवानां पथिकृत्तमेव भागधेयेनोपासरत्स एनं पन्थामपिनयत्यनड्वान्दक्षिणा सं हि पन्थामपिवहत्यग्नये व्रतपतये ऽष्टाकपालं निर्वपेद्य आहिताग्निः सन्प्रवसेद्बहु वा एष व्रतमतिपादयति य आहिताग्निः सन्प्रवसति व्रत्ये ह्यहनि स्त्रियꣳ वोपैति माꣳसꣳ वाश्नात्यग्निर्वै देवानाꣳ व्रतपतिस्तमेव भागधेयेनोपासरत्स्त एनꣳ व्रतमालम्भयत्यग्नये व्रतभृते ऽष्टाकपालं निर्वपेद्य आहिताग्निः सन्नश्रु कुर्यादानीतो वा एष देवानाꣳ य आहिताग्निस्तस्मादेतेनाश्रु न कर्तवै न हि देवा अश्रु कुर्वन्त्यग्निर्वै

1) P अमुष्य । अमुष्यायणस्य । इन्द्रवज्रेणेतीन्द्रं. वज्रेण । 2) So B, ohne Accent; Hg (u. A) यः स्फ्यो; M 3 u. W स्फ्यो 3) P एनाः । 4) Hg (u. A) °मपिपादयति.

देवानाꣳ व्रतभृदग्निमेतस्य व्रतमगꣳस्लस्मादेवाधिव्रतमालभतेऽग्नये यविष्ठायाष्टाकपालं निर्वपेदभिचर्यमाणोऽयाभिरेवैनमितरः प्रयुक्तिभिरभिप्रयुङ्क्ते ता अस्माद्यविष्ठो योयावाग्नये वाजसृते ऽष्टाकपालं निर्वपेत्संग्रामेऽवाजꣳ वा एष सिसीर्षति यः संग्रामं जिगीषत्यग्निर्वै देवानाꣳ वाजसृत्तमेव भागधेयेनोपासरत्सो ऽस्मै वाजं धावत्यग्नये ऽनीकवते ऽष्टाकपालं निर्वपेत्संग्रामेऽयद्यग्वा अग्रेरनीकमेति न तत्प्रतिधृषेऽग्निरेवास्मा अनीकानि जयतिऽविष्णुमथाज्यस्य यजेद्यतो वै विष्णुरिमाल्लोकानुदजयद्विष्णोरेवोज्जितिमन्विमाल्लोकानुज्जयतिऽप्रैभ्यो लोकेभ्यो भ्रातृव्यं नुदतेऽग्नये रुद्रवते ऽष्टाकपालं निर्वपेद्यः कामयेतऽरुद्रायास्य पशूनपिदध्यामित्यग्निर्वै रुद्रोऽरुद्रायैवास्य पशूनपिदधातिऽयदि कामयेतऽशाम्येदित्यग्नये सुरभिमते ऽष्टाकपालं निर्वपेदेषा वा अग्नेर्भेषजा तनूर्यत्सुरभिर्भेषजमेवास्मा अकःऽसुरभिमेनमकःऽशमयत्येवाग्नये ऽन्नवते ऽन्नादायान्नपतये ऽष्टाकपालं निर्वपेद्यः कामयेतान्नवानन्नादो ऽन्नपतिः स्यामित्यग्निर्वै देवानामन्नवानन्नादो ऽन्नपतिस्तमेव भागधेयेनोपासरत्स एनमन्नवन्तमन्नादमन्नपतिं करोति ॥ १० ॥

Vgl. TS 2, 2, 2 (pâthikṛtâdyâ ishṭayaḥ); Kâṭh. 10, 5—7.

अग्नये रक्षोऽग्ने ऽष्टाकपालं निर्वपेद्यो रक्षोभ्यो बिभीयादिन्द्रꣳ वै रक्षाꣳस्यसचन्तऽसोऽग्निं प्राविशत्तानि वा एनमभिसममृशन्त्स एतां विप्रुषो ऽजनयत या इमाः स्कूयमानस्य विप्रवन्तेऽतानि वा अग्निनैवापाहतात्मिर्वै देवानाꣳ रक्षोहाऽतेनैव रक्षाꣳस्यपहतेऽनक्तꣳ

1) M 3 ऋक्षा यविष्यो यौ°; B यविष्ठो योवाग्नये 2) W प्रैभ्यो 3) B विप्रवंत्येतानि; W विप्रवत्येतानि

याजयेन्नक्तꣳ वै रक्षाꣳसि प्रेरते यर्ह्येव प्रेरते तर्ह्येनान्यपहते वामदेवस्य पञ्चदश सामिधेनीश्च स्युर्याज्यानुवाक्याश्च वामदेवश्च वै कुसितायी[1] चाजीमयातामात्मनोः[2] सा कुसितायी वामदेवरथस्य कूबरमछिनत्सापरं[3] न्याप्लवत युगꣳ वा छेत्स्यामीषाꣳ वेति ३सो ऽग्निमुख्यमवेक्षत स एतं मन्त्रमपश्यत्तामर्चिरुदौषत्सार्चिषा दह्यमाना हृदं प्राविशत्स वाव कौसितो हृदो रक्षाꣳसि वै सं[4] तेनापाहत तद्रक्षाꣳस्येवैतेनापहत आग्नेयमष्टाकपालं निर्वपेद्यो राष्ट्रे स्पर्धेत यो वा कामयेतान्नादः स्यादिति[5] देवाश्च वा असुराश्चास्पर्धन्त तान्गायत्री सर्वमन्नं परिगृह्यान्तरातिष्ठत्ते ऽविदुर्येतरान्वा इयमुपावर्त्स्यति त इदं भविष्यन्तीति तस्याꣳ वा उभय ऐछन्त तां नान्नोपैप्सन् ॥ दाभि ॥ इत्यसुरा आह्वयन् ॥ विश्वकर्मन् ॥ इति देवाः सा नान्यतराꣳश्चनोपावर्तत तां देवा एतेन यजुषावृञ्जत ॥ ओजो ऽसि सहो ऽसि बलमसि भ्राजो ऽसि देवानां धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूः ॥ इति सꣳवत्सरो वै गायत्री सꣳवत्सरो वै तदतिष्ठत्सꣳवत्सरꣳ वा एषां तदन्नाद्यमवृञ्जत तत्सꣳवत्सरमेवैतदन्नाद्यꣳ यजमानो भ्रातृव्यस्य वृङ्क्ते सैषा गायत्रीष्टिरृषयो आहू राष्ट्रस्य सꣳवर्ग इति ॥ ११ ॥

Vgl. TS 2, 2, 2; Kâṭh. 10, 5 u. 7 a. E.

ऐन्द्राबार्हस्पत्यꣳ हविर्निर्वपेद्यो राष्ट्रीयो[6] नेव प्रस्तिङ्ग्यादिति[7] वै

---

1) S. Einleitung z. 1. Buch, p. XIV; Kâṭh. 10, 5 कुसिदायी 2) Kâṭh. चात्मनोराजिमयांतां. 3) So M 3; die andern Mss. सापर; Kâṭh. सा द्वितीयमुपपर्यावर्ततेषां वचं (!) वा छेत्स्यामीति 4) सं fehlt in B; in Hg ohne Accent. 5) Es ist wohl स्यामिति zu lesen. 6) So Hg, M 3 (u. A); in W राष्ट्रियो; desgl. B, ohne Accent. 7) So das Verb in Hg (u. A); in B प्रस्तिङ्ग्याद्°; M 3 प्रस्त्यꣳनुयाद्°; W प्रस्तिपुयाद्°; cf. meine Abhandlung ZDMG. XXXIII, S. 194 u. 195; Dhâtup. 27, 18; Maitr. S. 1, 6, 3 a. A.

प्रजाकामोदनमपचत्सोऽशिष्टमाश्नात्ँ वा इन्द्रमन्तरेव गर्भꣳ सन्नमयस्मयेन दाम्नापौभत्सो ऽपोब्धो ऽजायतं तꣳ वा एतेन बृहस्पतिरयाजयदैन्द्राबार्हस्पत्येनं तस्य तद्दाम स्वयमेव व्यपद्यतं स इमा दिशो वज्रेणाभिपर्यावर्ततं यो राष्ट्रीयो[1] नेव प्रस्तिङ्क्ष्यात्तमेतेन[2] याजयेदैन्द्राबार्हस्पत्येनं परिततो हि वा एष पाप्मनाथैष न प्रस्तिङ्क्ते[3]ति बृहस्पतये निरुप्यतां इन्द्राय क्रियतेंसर्वत एवैनं मुञ्चतिं वज्रेणेमा दिशो ऽभिपर्यावर्तते ॥ १२ ॥

Vgl. TS 2, 4, 13 (âindrâbârhaspatyaç caruḥ); Kâṭh. 11, 4; Mân. Çr. 5, 1, 7 a. E.

॥ इति द्वितीयकाण्डे प्रथमः प्रपाठकः ॥

आदित्या भागꣳ वः करिष्याम्यमुमामुष्यायणमवगमयत॥ इति ब्रूयाद्विनिर्वेप्स्यन्सꣳ एतमादित्यं घृते चरुं निर्वपेदादित्या वा इमाः प्रजास्तां एवोपासरत्तां एनमवगमयन्तिं सप्तास्वत्था मयूखा अन्तर्वेदि शयीरꣳस्तान्सꣳस्थिते रथवाहनस्य मध्यमेषायामतिहन्यात् ॥ इदमहमादित्यान्बध्नाम्यामुष्यावगमः[4] ॥ इत्यादित्यान्वा एतद्बध्नातिं तं एनं मोक्षमाणा अवगमयन्तिं विशो वीꣳयमपाक्रामत्तदश्वत्थं प्राविशत्सꣳ तेन वीर्येण भर्भराभवत्तद्विश एवैतेन वीꣳयमवरुन्द्धें यदि सप्तसु नावगच्छेदिध्मे तानपि कृत्वैतदेव हविर्निर्वपेदादित्या वा इमाः

---

1) B राष्ट्रियो. 2) Das Verb in W प्रस्तिमुयात्; M 3 प्रस्त्यꣳनुयात्. 3) W प्रस्तिग्नोति; M 3 प्रस्तिꣳग्नोति. 4) So W, d. h. आ अमुंष्य अवगमः, vgl. TS 2, 3, 1, 5; M 3 ०म्याममुंष्यावगमः; Hg (u. A) ०म्यामुंष्यावगमः (in Hg ursprünglich auch wie in W accentuirt, dann corrigirt); P आमुंष्य । अवगमः ।; B ०म्यामुंष्यावगमा; in Kâṭh. 11, 6 बध्नाम्यमुंष्यामुंष्यायणस्यावगमायेति.

प्रजास्ता एवोपासरत्ता एनमवगमयन्ति यद्येव सप्तसु चिवै सप्त सप्तादित्यास्तानेवोपासरत्ता एनमवगमयन्ति यद्येकतयीषु द्वयीषु वावगच्छेदपरोधुका एनꣳ स्युरथ यत्सर्वास्ववगच्छति तथा हानपरोध्यो ऽवगच्छति स यदावगच्छेदथादित्येभ्यो धारयद्वज्रो घृते चरुं निर्वपेदादित्या वा अपरोद्वार आदित्या अवगमयितारस्त एनं दाध्रति ॥ 5

अदितेऽनुमन्यस्व सत्याशीरिह मनः ॥

इति निरुद्धस्य राज्ञः पदमादद्यीत तद्यः पुरस्ताद्ग्राम्यवादीव स्यात्तस्य सभाया अभिवातं परीत्य विध्वꣳसयेयुः ॥

प्रेत मरुतः स्वतवस एना विश्पत्यामुꣳ राजानमभि ॥

इति तस्य गृहाद्व्रीहीनाहरेयुस्ताꣳस्त्रेधा विचिनुयाद्ये कृष्णास्तान्कृष्णाजिन उपनह्य निदध्याद्ये शुक्लास्तमादित्यं घृते चरुं निर्वपेदादित्या वा इमाः प्रजास्ता एवोपासरत्ता एनमवगमयन्त्यथ येभ्यो ऽधि विचिनुयात्तानुदङ् परेत्य वल्मीकवपामुद्वृज्य जुहुयात् ॥ 10

यद्व ते घोरं आसन्जुहोम्येषां बन्धानां प्रमोचनाय ।
यां त्वा जनो भूमिरिति प्रमन्दते निर्ऋतिं त्वाहं परिवेद विश्वतः॥ 15

इति निर्ऋतिगृहीतो वा एष यो निरुद्धो निर्ऋत्या एवैनं तेन मुञ्चत्येतद्वै विशमवागन्नथ वा अस्य राज्यमनवगतं तद्यद्ये ऽमी कृष्णा व्रीहयस्तꣳ वारुणं घृते चरुं निर्वपेद्वरुणो वै देवानाꣳ राजा स राज्यस्यावगमयिता तमेव भागधेयेनोपासरत्स एनꣳ राज्यमवगमयत्येतद्वै नानाविश्यमुभयीमेवैतेन विशमवगच्छति दैवीं च मानुषीं च ॥ १ ॥ 20

Vgl. TS 2, 3, 1 (bhûtikâmâdînâṃ caravaḥ); Kâṭh. 11, 6.

---

1) M3 °नपरोध्यो 2) P सत्या। आशीः। 3) So M3; die andern Mss. °वादिव 4) P घोरें। 5) P त्वा। अमुं। च। अहं। अमुं। च। अहं। (!) 6) So W; desgl. B, ohne Accent (cf. TS 2, 3, 1, 4); aber in Hg, (A) u. M3 अनवक्तं. 7) W °विश्यमु°

सौर्यं घृते चरुं निर्वपेञ्शुक्लानाꣳ व्रीहीणां ब्रह्मवर्चसकामः शतमानो रुक्मो रज३तो ऽधस्तात्स्याञ्शतमानो रुक्मो हरित उपरिष्टादिह वा असा आदित्य आसीत्तमाभ्यां परिगृह्योपरिष्टादासां प्रजानां न्यृदधुरुपरिष्टाद्वा असा आदित्य इमाः प्रजा अधिषद्यात्तीयꣳ वै रजतासौ हरिण्याभ्यामेवैनं परिगृह्योपरिष्टादासां प्रजानां निदधात्युपरिष्टादिमाः प्रजा अधिषद्यात्ति पञ्च कृष्णलान्यपि प्रयाजेषु जुहुयादेतैर्वा असा आदित्य इमान्पञ्च ऋतूननु तेजस्वीमा एवैनं पञ्च दिशो ऽनु तेजस्विनं करोति प्राजापत्यं घृते चरुं निर्वपेञ्शतकृष्णलमायुष्कामो देवा असुरान्हत्वा मृत्योरबिभयुस्ते देवाः प्रजापतिमेवोपाधावꣳस्तान्वा एतया प्रजापतिरयाजयत्ततो देवा अमृतत्वमगच्छन्नमृतꣳ वै हिरण्यममृतमायुरमृतेनैवैष्वमृतमायुराद्यादधाद्य आयुष्कामः स्यात्तमेतया याजयेदेतद्वै मनुष्यस्यामृतत्वꣳ यत्सर्वमायुरेत्यमृतꣳ वै हिरण्यममृतमायुरमृतेनैवास्मिन्नमृतमायुराद्या दधाति तेन स सर्वमायुरेति न पुरायुषः प्रमीयते शतकृष्णलो भवति शतायुर्वै पुरुषः शतवीर्य आयुरेव वीर्यमाप्नोति चत्वारि चत्वारि कृष्णलान्यवद्यति समृद्ध्यै सर्वं ब्रह्मणे परिहर्तवा आह सर्वं ब्रह्मणि यज्ञं प्रतिष्ठापयति सर्वमस्मिन्ब्रह्म वीर्यं दधात्यथो ब्रह्म वै ब्रह्म ब्रह्मणैवास्मिन्ब्रह्मायुर्दधाति ॥ २ ॥

Vgl. TS 2, 3, 2 (mṛtyubhîtâdînâm ishṭayaḥ); Kâṭh. 11, 4.

बार्हस्पत्यं चरुं निर्वपेत्पुरोधाकामस्तस्य बार्हस्पत्ये ज्योतिष्मती याज्यानुवाक्ये स्यातां ब्रह्म वै बृहस्पतिर्बार्हस्पत्यो ब्राह्मणो देवतया स्वामेव देवतां पुरोधाया उपासꣳस्त्वैनं देवता पुरोधां गमयति यद्वै लेलाय

---

1) So Hg (u. A); in W °षद्यातीयꣳ; M 3 षद्यातीꣳ; B °षद्यतीयꣳ; cf. Kâṭh. 11, 4 सर्वा इमाः प्रजा अधिषादमद्यात्° 2) So Hg (A) u. W; in M 3 अधिषद्यति; B अधिषद्यति 3) M 3 यः सर्वम° 4) W आह 5) Hg ब्रह्मणि 6) M 3 दधा°

वीव[1] भाति तज्ज्योतिस्तस्माज्ज्योतिष्मती यदि नेव पुरोधां गच्छेदैन्द्रा-
बार्हस्पत्यꣳ हविर्निर्वपेद्ब्रह्म चैव क्षत्रं च सयुजा अकस्तोजसेनं पुरोदधते
बार्हस्पत्यं चरुं निर्वपेत्पयसि ग्रामकामो वा पशुकामो वा तस्य बा-
र्हस्पत्ये गणवती याज्यानुवाक्ये स्याताꣳ यो बहुपुष्टस्तस्य गृहान्क्षीर-
माहरेयुः स्यात्स्वासां गवां दुग्धꣳ स्यादुदकं पुष्टिरेवैषा सम्भ्रियते ब्रह्म 5
वै बृहस्पतिर्बृहस्पतिश्छन्दाꣳसि छन्दोभिर्बृहस्पतिर्गणी स्वाꣳ वा
एतद्देवतां भूयिष्ठेनापैयति सजातैरेनं गणिनं करोति ब्राह्मणस्पत्यं
चरुं निर्वपेत्संग्रामे तस्य ब्राह्मणस्पत्ये वीरवती वयस्वती याज्यानु-
वाक्ये स्यातां छदिर्देशे याजयेदुद्धिः प्रस्तरः स्याद्ब्राह्मणवन्तः परिधयो
वयाꣳसि परं ग्राममाविशन्ति[2] तथा विज्ञेयं जेष्यामा इति ब्रह्म वै 10
ब्रह्मणस्पतिर्ब्रह्मैवोपासरद्ब्राह्मणस्पत्यं[3] चरुं निर्वपेद्यꣳ कामयेत ब्रह्म-
बलꣳ स्यादिति तस्य ब्राह्मणस्पत्ये मरुत्वती याज्यानुवाक्ये स्यातां[4]
ब्रह्म वै ब्रह्मणस्पतिर्विशो मरुतो ब्रह्मणि वा एतद्विशमधि विनाशयति
दृढिम्ने ऽशिथिरत्वाय ॥ ३ ॥

Vgl. TS 2, 3, 3; (cf. oben 2, 1, 4).

बार्हस्पत्यं चरुं निर्वपेद्रामुतं पशुकामः प्रजापतिः पशूनसृजत 15
तेऽस्मात्सृष्टाः पराञ्चꣳ आयꣳस्तान्बृहस्पतिश्चान्वैतां ते यचावसꣳस्ततः
शक्रो गर्मुदजायत तꣳ वा अब्रवीदनेन मा याजयेति तेन वा एन-
मयाजयत्तं पशव उपावर्तन्त यः पशुकामः स्यात्तमेतेन[5] याजयेदुप
हैनं पशवा आवर्तन्ते यदा हि स तमेतेनायाजयदथ तं पशव उपा-

1) So M 3 u. W; in Hg ursprünglich wohl वीव; dann ist ohne weitere Correctur noch der Circumflex hinzugesetzt; also वीव; vgl. übrigens oben 1, 8, 6. 2) Hg परंग्राम॰ 3) W °सरन् 4) M 3 u. W स्यातां 5) So M 3 u. W; desgl. B, ohne Accent; in Hg (u. A) तमेव तेन.

वर्तन्त[1] सौमापौष्णं चरुं निर्वपेन्नार्मुतं पशुकामः प्रजापतिः पशून-सृजत ते ऽस्मान्सृष्टाः पराञ्च आय[2]न्तेषां पूषणमधिपामकरोत्ते[3] य-चावस[4]न्ततः शक्रो गर्मुदजायत तं वा आहरदनेन मे प्रतिष्ठेति स सोमो ऽब्रवीन्मम वा अकृष्टपच्यमिति तं सौमापौष्णं निरवपत्त पशव उपावर्तन्त यः पशुकामः स्यात्तमेतेन याजयेदुप हैनं पशवा आवर्तन्ते यदा हि स तमेतेनायाजयदथ तं पशव उपावर्तन्त सोमो वै रेतोधाः पूषा पशूनां प्रजनयिता सोम एवास्मै रेतो दधाति पूषा पशून्प्रजनयति प्राजापत्यं चरुं निर्वपेन्नार्मुतं पशुकामः पृश्नीनां गवां दुग्धे पृश्नीनां गवामाज्य स्यात्तचापि[5] गोमूत्रस्याश्नीतयेयुः पृश्निर्वै यदुदुहत्स गर्मुदभवदिय वै पृश्निर्वाग्वा तस्या वा एतज्ज्यो-रो यन्नर्मुतस्तस्मादेतदाण्डमिव पीयूष इव तं प्राजापत्यं चरुं निर्वपे-त्पशुकामः प्राजापत्या वै पशवः प्रजापतिः पशूनां प्रजनयिता तमेव भागधेयेनोपासरत्सो ऽस्मै पशून्प्रजनयति वास्त्वमय रौद्रं चरुं नि-र्वपेद्यच रुद्रः प्रजाः शमायेत वास्तोर्वै वास्त्व[4] जात वास्त्वमयं खलु वै रुद्रस्य स्वेनैवैनं भागधेयेन शमयति तया निषादस्थपतिं याजयेत्सा हि तस्येष्टिः कूटं दक्षिणा कर्णौ वा गर्दभः ॥ ४ ॥

Vgl. TS 2, 2, 4 (gârmutaç caruḥ prajâpaçvarthinoḥ); Kâṭh. 10, 11.

परमेष्ठिने द्वादशकपालं निर्वपेद्यः कामयेत परमेष्ठी स्यामिति परमेष्ठी वा एष देवाना यः परमेष्ठी परमेष्ठी राजन्यो मनुष्याणां तमेव भागधेयेनोपासरत्स एनं परमेष्ठिनं करोति तस्मै धनुश्च तिस्रश्च प्रयच्छेत् ॥ अभिष्टे[5] तेजः प्रयच्छत्विन्द्र[6] इन्द्रियं पित्र्यां बन्धुताम् ॥ इत्य-भिरेवास्मै तेजः प्रयच्छतीन्द्र इन्द्रियं पित्र्यां बन्धुता वैश्वदेवं द्वादश-

1) W °वर्तन्ते. 2) B °मधिपम° 3) Hg स्या° 4) S. ZDMG. XXXIII, S. 196; Pâ. 6, 4, 175; Hg वास्तूं 5) P अभिः । ते । 6) P इन्द्रः ।

कपालं निर्वपेद्ब्रातृव्यवाꣳस्तं बर्हिषदं कृत्वा समया स्फ्येन व्यूहेत् ॥ इदमहं मां चामुं च व्यूहामि ॥ इति यं द्विष्यात्तꣳ यदधो ऽवमृद्येत् यत्र स्फ्यं आप्नुयेत्तद्विष्णव उरुक्रमायावद्येद्विष्णुरेवैना अन्तरा विक्रमते तं पुनः समूहेत् ॥ इदमहं मां चामुं च समूहामि ॥ इति यो ऽस्य प्रियः स्यात्तꣳ वैश्वदेवीर्वा इमाः प्रजास्ताभिरेवेतरꣳ व्यूहति ताभिरात्मानꣳ समूहतीन्द्राण्यै चरुं निर्वपेत्सेनायामुत्तिष्ठन्याꣳ सेना वा इन्द्राणी ब्रह्मणैवैनां पुरस्तान्मुखतो जित्यै संꣳश्यति बल्बजा अपीध्मे स्युः शक्रो वा एतं ऽध्युत्थिता न्यायेनैवैनामभिनयति यत्तस्या सेनायाꣳ विन्देत सा दक्षिणा वाचस्पतये चरुं निर्वपेच्छ्रीकामो यो वै वाचो ऽध्यक्षः स वाचस्पतिस्तꣳश्रीकरणमेवैतत् ॥ ५ ॥

Vgl. Kâṭh. 10, 10.

अग्नये वसुमते सतीनानामष्टाकपालं निर्वपेत्सोमाय रुद्रवते श्यामाकं चरुमिन्द्राय मरुत्वते नैवारमेकादशकपालꣳ वरुणायादित्यवते यवमयं चरुं देवा अ३न्योन्यस्य श्रीष्टे तिष्ठमानाश्चतुर्धा व्युदक्रामन्नग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैस्तान्वा एतया बृहस्पतिरयाजयत्संज्ञान्यांत इन्द्रमेवाभिसमावर्तन्तेन्द्रमभिसमजानत तद्य एतया यजते तमेवाभिसमावर्तन्ते तमभिसंजानते तदाहुरैन्द्र एकादशकपालः का३र्यं इतीन्द्रꣳ हि ते ऽभिसमावर्तन्तेन्द्रमभिसमजानत ॥

---

1) So schreibe ich im Anschluss an P इदं । अहं । मां । च । अमुं । च ।; vgl. auch weiter unten. Aber W इदमहमामुं चामुं च; desgl. B, ohne Accent; M 3 °हमामुं च मुं च; Hg (u. A) °हममुं चामुं च 2) M 3 °मृज्यात 3) Kâṭh. बल्वजा इध्मे च बर्हिषि चापिभवंति 4) So das Pron. in M 3 u. W; in Hg (u. A) °वैनानभि°; B °वैनानमभि°

संज्ञानं नो दिवा पशोः संज्ञानं नक्तमेवतः ।
संज्ञानं नः स्वेभ्यः संज्ञानमरणेभ्यः संज्ञानमश्विना युवमिहास्मभ्यं नियच्छतम् ॥
संमिन्द्र राया संमिषा रभेमहि सं वाजैः पुरुश्चन्द्रैरभिद्युभिः[1] ।
सं देव्या[2] प्रमत्या वीरशुष्मया गोअग्रयाश्वत्या रभेमहि ॥
इन्द्रवायू सुसंदृशा[3] सुहवेह हवामहे ।
यथा नः सर्वा इज्जनः संगमे सुमना असत् ॥
सं वो मनाꣳसि सं व्रता समाकूतीरनꣳसत[4] ।
अमी ये विव्रताः स्थ तान्वः सन्नमयामसि ॥
समाना वा[5] आकूतानि समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति[6] ॥
समानो मन्त्रः समितिः समानी समानं व्रतꣳ सह चित्तमेषाम् ।
समानं क्रतुमभिमन्त्रयध्वꣳ समानेन वो हविषा जुहोमि ॥
संगच्छध्वꣳ संजानीध्वꣳ सं वो मनाꣳसि जानताम् ।
देवा[7] भागꣳ यथा पूर्वे संजानाना[8] उपासते ॥ ६ ॥

Vgl. TBr. 2, 4, 4 flg.; Kâṭh. 10, 12.

आग्नेयमष्टाकपालं निर्वपेत्साविचं चरुꣳ वायव्या यवागूं प्रतिधुग्वा भौममेककपालꣳ यस्य हिरण्यं नश्येद्यो वा हिरण्यꣳ विन्देदग्निर्वा अग्ने हिरण्यमविन्दत्स सविचामन्वयत[9] न खलु वै किं चन

1) P पुरुचन्द्रैरिति पुरुचन्द्रैः । 2) So B (ohne Accent); desgl. Kâṭh. 10, 12; die andern Mss. देव्याः 3) M 3 सूसंदृशा 4) P अमꣳसत । W u. B ºनꣳसता 5) P वः । 6) P irrig वसु । सह । आसति ।; vgl. RV 10, 191, 4. 7) P देवाः । 8) P संजानाना इति सं जानानाः ।

वायुनानभिगतमस्त्येस्या॰ वै स तंदविन्देद्वित्त्या एवाग्नेयः प्रसवाय सावि३त्रो ऽभिनीत्यै वायव्यांथ यद्वी३मो ऽस्या॰ हि स तंदविन्देत्तै वै प्रदातारस्तानेव भागधेयेनोपासरत्ते ऽस्मै प्रयछन्ति स यदा विन्देदथैतेभ्य एव निर्वपेद्यैरेवाविन्दत्तान्भागिनः करोत्यहि॰सायै प्रजापतिर्वै सोमाय राज्ञे दुहितॄरददान्नक्षत्राणि स रोहिण्यामेवावसन्नेतरासु ता अनुपेयमानाः पुनरगछ॰स्त॰[1] राजयक्ष्मेणाग्राहयत्स निरस्रवत्तस्माद्राजयक्ष्मगृहीतो निःस्रवति[2] स वै प्रजापतिमेवोपाधावत्तं प्रजापतिरब्रवीदेतं ब्रूहीति स ऋतमब्रवीद्यथा सर्वास्वेव समावद्वसानीति[3] तस्मादेष सर्वास्वेव समावद्वसति तस्मै वै प्रजापतिः प्रायश्चित्तिमैछत्तस्मा अमावास्याया॰ वैश्वदेवं चरुं निरवपत्तेनास्मै प्रायश्चित्तिमविन्द३त्सो ऽमुमाप्यायमानमन्वाप्यायत[4] वसीयानभवद्यो राजयक्ष्मगृहीतः स्यात्तस्मा अमावास्याया॰ वैश्वदेवं चरुं निर्वपेदेतेन वै स तस्मै प्रायश्चित्तिमविन्दत्तेनैवास्मै प्रायश्चित्ति॰ विन्दत्यमुमेवाप्यायमानमन्वाप्यायते[5] वसीयान्भवति ॥ ७ ॥

Vgl. TS 2, 3, 5 (râjayakshmagṛhîtasyeshṭiḥ); Kâṭh. 11, 2.

प्रजापतिर्वै देवेभ्यो भागधेयानि व्यकल्पयत्स इन्द्रो ऽब्रवीद्यदतिरिच्यते तन्ममेति तद्वा इन्द्रियमेवात्यरिच्यत[6] तदिमाँल्लोकानूर्ध्वमनूदश्रयत[7] तन्नैकेनाप्नोन्नै द्वाभ्यां तत्तृतीयेनाप्नावारुन्ध[8] यत्त्रयः पुरोडाशा भवन्त्येभ्यो वा एतं लोकेभ्य इन्द्रिय॰ वीर्यमाप्नावरुन्धा उत्तर उत्तरः पुरोडाशो ज्यायान्भवत्युत्तर उत्तरो हि लोको ज्यायानिन्द्राय

---

1) B पुनराग॰ 2) M 3 निस्रवति; desgl. B, ohne Accent. 3) In Hg (u. A) das Verb ohne Accent. 4) M 3 °मन्वाप्यायत. 5) M 3 °मन्वाप्यायते। 6) So betonen M 3 u. W; in Hg (u. A) °मेवात्यरिच्यत 7) So betonen M 3 u. W; in Hg (u. A) °मनूदश्रयत 8) So betonen M 3 u. W; in Hg (u. A) das Verb ohne Accent.

राज्ञे प्रथमं इन्द्राय स्वराज्ञे मध्यमं इन्द्रायाधिराजायोत्तमं एतानि वै सर्वाणीन्द्रो ऽभवद्राज्यꣳ स्वाराज्यमाधिराज्यमेतानि सर्वाणि भवति य एतैर्यजते सर्वमेतद्भवति[1] य एवꣳ वेद प्रथमामनूच्य मध्यमया यजेन्मध्यमामनूच्योत्तमया यजेदुत्तमामनूच्य प्रथमया यजेदेवमस्य सर्वा अनुवाक्या भवन्ति सर्वा याज्या एषां लोकानां प्रतिप्रज्ञात्या[2] अथो अनुसंतत्या इन्द्राय घर्मवते सूर्यवता एकादशकपालं निर्वपेत्तेजस्कामस्तेजो वै घर्मस्तेजः सूर्यस्तेज एवावरुन्द्धे इन्द्रायेन्द्रियवता एकादशकपालं निर्वपेत्पशुकाम इन्द्रियꣳ वै पशवः इन्द्र इन्द्रियस्य प्रदाता तमेव भागधेयेनोपासरꣳसृो ऽस्मा इन्द्रियं पशून्प्रयच्छति ॥ ८ ॥

Vgl. TS 2, 3, 6 (annâdanaçaktikâmasya tridhâtur yâgaḥ); Kâṭh. 10, 10. 8.

इन्द्रायार्कवते ऽश्वमेधवता एकादशकपालं निर्वपेन्निरुद्धꣳ याजयेदन्नꣳ वा एष गतो यो निरुद्धो ऽन्तो ऽर्को ऽन्तो ऽश्वमेधो ऽन्तेनैवास्मा अन्ने कल्पयति वशा दक्षिणा वशं मा नयादितीन्द्रायार्कवते ऽश्वमेधवता एकादशकपालं निर्वपेद्यः कामयेत जने म ऋध्येतेत्यन्तो वा एषा[3] ऋद्धीनाꣳ यज्ञानो ऽन्तो ऽर्को ऽन्तो ऽश्वमेधो ऽन्तेनैवास्मा अन्ने कल्पयति वशा दक्षिणा वशं मा नयादितीन्द्रायार्कवते ऽश्वमेधवता एकादशकपालं निर्वपेन्नतश्रीर्यदा वै स्त्रियो ऽन्तं गच्छत्यथ पापीयान्भवत्यन्तो ऽर्को ऽन्तो ऽश्वमेधो ऽन्तमेवालब्ध्व न पापीयान्भवतीन्द्रायार्कवते ऽश्वमेधवता एकादशकपालं निर्वपेद्यः कामयेत महायज्ञो मोपनमेदित्येतं वा इन्द्रस्य यज्ञिये तꣳवो यदर्कश्चाश्वमेधश्च तं एवालब्ध्व ताभ्यां महायज्ञमालभता इन्द्राय घर्मवते सूर्यवता

1) M 3 भवति 2) M 3 u. W प्रतिप्रꣳज्ञ° 3) So mit Dehnung des Vokals vor anlautendem ऋ in Hg, M 3 u. A; dagegen W एषः; desgl. B, ohne Accent; vgl. oben 1, 5, 4 सा ऋच्छतु; 1, 7, 2 वि स्रा ऋधते u. dgl.

एकादशकपालं निर्वपेदिन्द्राय मन्युमते मनस्वता एकादशकपालमिन्द्रायेन्द्रियवता एकादशकपालमिन्द्रायार्कवते ऽश्वमेधवता एकादशकपालं भूतिकामᳬ याजयेदिदᳬ वा इन्द्रस्य[1] घर्मश्च सूर्यश्चेदमस्य मन्युश्च मनश्चेदमस्येन्द्रश्चेन्द्रियं चेदमस्यार्कश्चाश्वमेधश्चैतानि वै सर्वाणीन्द्रो ऽभवदेतानि सर्वाणि भवति य एतैर्यजते संवमेतद्भवति य एवᳬ वेद ॥ ९ ॥

Vgl. TS 2, 2, 7 (âindracarvâdyâ ishṭayaḥ) u. 8; Kâṭh. 10, 8.

इन्द्राया᳚होमुचा एकादशकपालं निर्वपेदामयाविनᳬ याजयेदेषा वा इन्द्रस्य भेषजा तनूर्यदᳬहोमुक्तमेव भागधेयेनोपासरꣳस एनमᳬहसो मुञ्चतीन्द्राय चाच एकादशकपालं निर्वपेद्यो ज्यान्या मारणादपरोधाद्वा बिभीयादिन्द्रो वै चातेन्द्रो ऽपरोद्धा तमेव भागधेयेनोपासरꣳस एनं चायता इन्द्रायान्वृजवा एकादशकपालं निर्वपेज्ज्येष्ठबन्धुरिन्द्रियᳬ वै ज्येष्ठबन्धुरिन्द्रियेणैवैनानन्वृजून्कुरुता इन्द्राय प्रवभ्रायैकादशकपालं[2] निर्वपेत्संग्रामे प्रवभ्रो वा इन्द्रो वृत्राय वज्रं प्राहरत्प्रवभ्र एवैभ्यो वज्रं प्रहरतीन्द्राय वै मृधायैकादशकपालं[3] निर्वपेत्संग्रामे मृधो वा एष विहन्ति यः संग्रामं जयति मृध एव विहता इन्द्रायाभिमातिघ्न एकादशकपालं निर्वपेत्संग्राᳬमे ऽभिमातीर्वा एष हन्ति[4] यः संग्रामं जयत्यभिमातीरेव हता इन्द्रायाभिमातिषाहा एकादशकपालं निर्वपेद्यः कामयेत विषहेयाभयं मे स्यादितीन्द्रो वै वृत्राय वज्रमुदयच्छत्तं दानवा नान्वमन्यन्त तमेतेन भागधेयेनान्वमन्यन्त ततो वै ᳬसो

1) W इंद्रश्च 2) Kâṭh. 10, 9 प्रवभ्राये° und auch weiterhin प्रवभ्रः प्रवभ्रेण. 3) Kâṭh. विमृधाये° u. weiter unten विमृधा तनूः 4) W वि हन्ति 5) So die Mss.; cf. Kâṭh. तया मृधो ऽपहते हंति वृत्रं जयति संग्रामम् . . तया मृधो ऽपहत आत्मनो ऽधि.

ऽभिमातीरहन्वृचमहन्वृचं खलु वा एष हन्ति यः संग्रामं जयति तद्वा-
र्चघ्नमेवैतत् ॥ १० ॥

Vgl. TS 2, 2, 7 u. 8; Kâṭh. 10, 9.

ऐन्द्रमेककपालं निर्वपेन्निरुद्ध्यै याजयेदा प्रेहि परमस्याः परावतो
इति याज्यानुवाक्ये स्यातां परावतं वा एष गतो यो निरुद्धः
परावत एवैनमध्यावगमयत्यैन्द्रं चयोदशकपालं निर्वपेन्निरुद्ध्यै या-
जयेदतिरिक्तं वै चयोदशमतिरिक्तो निरुद्धोऽतिरिक्तादेवैनमतिरिक्त-
माप्त्वावगमयतीन्द्राय वज्रिणा एकादशकपालं निर्वपेदिन्द्राय वृचघ्न
एकादशकपालमिन्द्राय वृचतूरा एकादशकपालं यस्य भ्रातृव्यः सो-
मेन यजेत वज्रं वा एष भ्रातृव्यायोद्यच्छति यः सोमेन यजते यद्व-
ज्रिणे वज्रेणैवास्य वज्रं स्तृणुते यद्वृचघ्ने भ्रातृव्यो वै वृचो हन्ये-
वैनं यद्वृचतूरे भ्रातृव्यो वै वृचस्तरत्येवैनमिन्द्राय क्षेचंजयायैकादश-
कपालं निर्वपेद्यः क्षेचे पशुषु वा विवदेतेन्द्रो वै देवानां क्षेचंजयस्ते-
मेव भागधेयेनोपासरत्सो ऽस्मै क्षेचं पशून्जयतीन्द्रायाधिराजायैका-
दशकपालं निर्वपेद्यश्च राजानः सदृशा इव स्युरिन्द्रो वै देवानाम-
धिराजस्तमेव भागधेयेनोपासरत्स एनमाधिराज्यं गमयति ॥ ११ ॥

इन्द्राय मन्युमते मनस्वता एकादशकपालं निर्वपेत्संग्रामे मन्युना
वै वीर्यं क्रियत इन्द्रियेण जयति वीर्यं चैवैष्विन्द्रियं च जित्यै दधा-
ति मन्यवे चरुं निर्वपेत्संग्रामे मन्युना वै वीर्यं क्रियते वीर्यमेवैषु
जित्यै दधाति यं जीवयाहं गृह्णीयुस्तं विकृन्तेयुर्मन्योः स्विदेव स-
त्यमकरिन्द्राय मनस्वता एकादशकपालं निर्वपेद्यः कामयेत पुण्यः
स्यामनाधृष्य इति मनो वै श्रीस्त्विषिः श्रियमेवास्मिंस्त्विषिं दधा-

1) W °द्राप्रेहि 2) W क्रियते

ति संवत्सरं नु[1] पुरा मनसो न कीर्तयेत्संवत्सरेण वा अना-प्तमाप्यते संवत्सरेणैवास्मा आप्त्वा[2] श्रियं त्विषिं दधाति ॥ १२ ॥

Vgl. TS 2, 2, 8, 2; Kâṭh. 10, 8.

यस्य सान्नाय्यं चन्द्रमा अभ्युदियाद्वे पुरोडाꣳश्याः स्युस्ताꣳस्त्रेधा कुर्याद्वे मध्यमास्तमग्नये दाꣳचेऽष्टाकपालं निर्वपेद्वे स्थविष्ठास्त-मिन्द्राय प्रदात्रे दधꣳश्वरुं ये क्षोदिष्ठास्तꣳ विष्णवे शिपिविष्टाय घृते चरुमग्निर्वै मध्यमस्य दातेन्द्रो ज्येष्ठस्य प्रदाताथ यत्क्षोदिष्ठं त-च्छिपिविष्टं तदाप्नोति पशूनेव सोमो वा एतस्यातिरिच्यते यस्य सान्नाय्यं चन्द्रमा अभ्युदेति स वै पशूनेवाभ्यतिरिच्यते यः पशुकामः स्यात्सौ ऽमावास्यामिष्ट्वा वत्सानपाकुर्याद्वे पुरोडाꣳश्याः स्युस्ताꣳ-स्त्रेधा कुर्याद्वे क्षोदिष्ठास्तमग्नये सनिमते ऽष्टाकपालं निर्वपेद्वे मध्य-मास्तꣳ विष्णवे शिपिविष्टाय घृते चरुꣳ ये स्थविष्ठास्तमिन्द्राय प्रदा-त्रे दधꣳश्वरुमग्निरेवास्मै तद्विन्दति यदीहꣳ विष्णुस्तद्यदन्तरिक्षा इन्द्र-स्तद्यद्दिवि सत्वानो गा इच्छन्ति यदेते तण्डुला विभाज्यन्ते सत्वानो वा एत एष्टारो ऽभिरोड्डार एवाग्नेयमष्टाकपालं निर्वपेन्नतश्रीस्तस्य गौर्धेनुर्दक्षिणा स प्राङ्[3] प्रयाय वैष्णवं चिकपालं तस्य वडबा धे-नुर्दक्षिणा स प्राङ्[4] प्रयाय गिरिं गत्वापो वा प्राजापत्यं घृते चरुं तस्य पुरुषी धेनुर्दक्षिणा यदाग्नेय इमां तेनाक्रमते यद्वैष्णवो ऽन्त-रिक्षं तेन यत्प्राजापत्यो ऽमुं तेन लोकꣳ यत्प्राङ्[5] प्रयात्यभि स्विदे-वाक्रमीद्यद्गिरिं गच्छत्यपो वान्तꣳ स्विदेवागन्यन्निस्रो धेनवो दक्षिणा त्रयो वा इमे लोका इमानस्मै लोकान्धेनुरकरिमानस्मै लोकान्प्रदा-

1) M 3 नु oder तु; Hg vielleicht तु 2) B fügt hier noch तेज ein. 3) Dies Wort in Hg, (A) u. W ohne Accent; M3 liest प्राचां; vgl. unten. 4) In Hg, (A) u. W ohne Accent; M 3 प्राचा 5) In Hg, (A), W ohne Accent; M 3 प्राꣳ

पयति प्रत्तान्ह वा अस्मा इमांल्लोकान्दुहे य एवꣳ वेद सौमेन्द्रं चरुं निर्वपेञ्श्यामाकꣳ सोमवामिना इन्द्रो वै त्वष्टुः सोममपिबदनुपहूयमानस्तस्योर्ध्वः सोमपीथो ऽपत तꣳ श्यामाका अभवन्सोमपीथेन वा एष व्यृध्यते यः सोमꣳ वमिति[1] यत्सौम्यः सोमपीथेनैवैनꣳ समर्धयती न्द्रियेण वा एष वीर्येण व्यृध्यते यः सोमꣳ वमिमं[2] यदैन्द्र इन्द्रियेणैवैनꣳ वीर्येण समर्धयति शिथिर इव हि वा एतस्य सोमपीथो ऽथैष सोमꣳ वमिति[3] यञ्श्यामाकतण्डुलैः श्रीणाति[4] सोमपीथस्य धृत्यै ॥ १३ ॥ Vgl. TS 2, 3, 2, 6. 7; Kâṭh. 11, 1.

॥ इति मध्यमकाण्डे द्वितीयः प्रपाठकः ॥

आग्नेयमष्टाकपालं निर्वपेन्मैचावरुणीं पयस्यामामयाविनꣳ याजयेद्वा एवाग्नेयो ऽथो अस्यन्वन्तमेवैनं कृत्वा प्रतिष्ठापयतीश्वरा वै पयस्या[5] ऋतेः पशोरशान्ता निर्मृजः पशुरण्यालभ्यः शान्त्या अनिर्मार्गायैतं वै पशवो यन्नीहयश्च यवाश्च यन्नीहयः पुरोडाशो भवति तेनैव पशुरालभ्यते शान्त्या अनिर्मार्गाय मैचावरुणी ब्राह्मणस्य स्यान्मैचावरुणो हि ब्राह्मणो देवतयैन्द्रवारुणी राजन्यस्य स्यादैन्द्रवारुणो हि राजन्यो देवतयाग्निवारुणी वैश्यस्य स्यादग्निर्वै सर्वा देवता अनु च वैश्यस्यापि देवतामयाविनꣳ याजयेत्स्वामेव देवतां प्रा-

1) So W; ebenso TS 2, 3, 2, 6; Kâṭh. 11, 1; cf. Pâ. 7, 2, 34, wo diese Präsensbildung als vedisch angeführt und beim Schol. der Satz यः सोमं वमिति citirt wird. M 3 liest वमीति; in Hg (A) वमति; desgl. B, ohne Accent. 2) So W; vgl. die vorige Anmerk.; M 3 वमीति; Hg (A) वमति; desgl. B, ohne Accent. 3) So W; M 3 वमीति; Hg, (A) u. B वमति; vgl. oben die Anm. 4) B शृणाति. 5) So W; desgl. B, ohne Accent; M 3 पयस्या ऋतेः; Hg (u. A) पयस्यृते

यश्चित्या उपासरद्वरुणगृहीतो वा एष यं ग्रामयावी वरुणादेवैनं तेन मुञ्चति पयो वै पुरुषः पय एतस्यामयति[1] पयसैवास्य पयो निष्क्रीणाति यद्जूहति[2] विकृत्य हि शल्यं मध्यतो निर्हरन्ति तद्यक्ष्म वावास्यैतन्मध्यतो निर्हरन्त्यथ यत्पुनः समुह्याग्नये समवद्यति यथा शल्यं निर्हत्योष्णीषेण वेष्टयन्त्येवं तद्भूतिकाम[3] याजयेत्स्वामेव देवतां प्रायश्चित्या उपासरद्वरुणगृहीतो वा एष यो भूतिकामो वरुणादेवैनं तेन मुञ्चति पयो वै पुरुषः पय एष इच्छति यो भूतिमिच्छति पयसैवास्मै पयोऽवरुन्द्धे यद्जूहति[4] यज्ञस्य गोपीथायाथ यत्पुनः समूहति भूत्यैवैनꣳ समूहति ग्रामकामꣳ याजयेत्स्वामेव देवतां प्रायश्चित्या उपासरद्वरुणगृहीतो वा एष यो ग्रामकामो वरुणादेवैनं तेन मुञ्चति पयो वै पुरुषः पय एष इच्छति यो ग्राममिच्छति पयसैवास्मै पयोऽवरुन्द्धे यद्जूहति[5] यज्ञस्य गोपीथायाथ यत्पुनः समूहति ग्रामेणैवैनꣳ समूहत्येककपालान्जुहोत्यैचाच[6] वै वरुणस्य पाशास्तत एनं मुञ्चति यन्नाना जुहुयाद्विकर्षेः स यज्ञस्याग्नौ सर्वे होतॄव्याः समृद्ध्यै ॥ या वां मित्रावरुणा ओजस्या तनूस्तया वाꣳ विधेम तयेममꣳमुं मुञ्चतमꣳहसो या वां मित्रावरुणौ सहस्या तनूस्तया वाꣳ विधेम तयेममꣳमुं[7] मुञ्चतमꣳहसो या वां मित्रावरुणौ यातव्या तनूस्तया वाꣳ विधेम तयेममꣳमुं[7] मुञ्चतमꣳहसो या वां मित्रावरुणौ रक्षस्या तनूस्तया वाꣳ विधेम तयेममꣳमुं[7] मुञ्चतमꣳहसो या वां मि-

1) B एवास्यामयति 2) So corrigirt aus der offenbar corrupten Lesart der Mss.; Hg, M 3 u. W यद्विदूहति (!); in A यद्विदुहति; B यद्विकृदुहति; vgl. oben 2, 2, 5 u. TS 2, 3, 13, 3; auch Kâṭh. 12, 1 व्यूहति 3) So M 3 u. W; in Hg (u. A) तद्भू° 4) Alle Mss. यद्विदूहति; vgl. aber oben die Anm.; auch Kâṭh. व्यूहति 5) So corrigirt; Hg, M 3, W (u. A) यद्विदूहति; nur B यद्विदुहति; s. oben die Anm.; auch Kâṭh. व्यूहति 6) B °कपालान्; die andern Mss. °कपालां 7) P तया। इमं। अमुं।; Hg, M 3 (u. A) त इममुं

चावरुणा ओजस्या सहस्या यातव्या रक्षस्या तनूस्तया वामविधाम तयेममुममीक्षमꣳहसो यस्ते राजन्वरुण देवेषु पाशस्तं त एतेनावयजे तस्मै ते स्वाहा यस्ते राजन्वरुणान्ने पाशस्तं त एतेनावयजे तस्मै ते स्वाहा यस्ते राजन्वरुण द्विपात्सु चतुष्पात्सु पशुषु पाशस्तं त एतेनावयजे तस्मै ते स्वाहा यस्ते राजन्वरुणौषधीषु वनस्पतिष्वप्सु पृथिव्यां दिक्षु पाशस्तं त एतेनावयजे तस्मै ते स्वाहा ॥ एते वै वरुणस्य पाशास्तेत एनं मुञ्चति ॥ १ ॥

Vgl. TS 2, 3, 13 (pâpmanâ gṛhîtasyeshṭiḥ) Kâṭh. 12, 1; 11, 11.

वैश्वदेवं चरुं निर्वपेद्भ्रातृव्यवान्देवाश्च वा असुराश्चास्पर्धन्त ते देवाः संग्रहणेनायजन्त ते यत्किंचासुराणꣳ स्वमासीत्तत्समगृह्णन्मनाꣳसि वावैषां तत्समगृह्णꣳस्ते ऽमनसः पराभवन्भ्रातृव्यवान्यजेत मनोग्रहणꣳ वा एतन्मनाꣳसि वा एतद्भ्रातृव्याणꣳ संगृह्णाति ते ऽमनसः पराभवन्ति ग्रामकामो यजेत मनोग्रहणꣳ वा एतन्मनाꣳसि वा एतत्सजातानाꣳ संगृह्णाति ते ऽस्मान्मनोगृहीता नापयन्ति सर्वेषाꣳ सजातानां गृहादाज्यमाहरेयुर्यावतामेव कियतां च गृहादाज्यमाहरन्ति तेषाꣳ सर्वेषां मनाꣳसि संगृह्णाति ते ऽस्मान्मनोगृहीता नापयन्त्यो-मनेन जुहोत्यामनस एवैनान्करोति ॥ आमनस्य देव ये सजाताः समनसस्तानहं कामये हृदा ते मां कामयन्ताꣳ हृदा तान्मा आमनसस्कृधि स्वाहामनस्य देव ये पुचाः समनसस्तानहं कामये हृदा ते मां कामयन्ताꣳ हृदा तान्मा आमनसस्कृधि स्वाहामनस्य देव याः स्त्रियः समनसस्ता अहं कामये हृदा ता मां कामयन्ताꣳ हृदा ता मा आमनसस्कृधि स्वाहामनस्य देव ये पशवः समनसस्तानहं कामये हृदा ते मां कामयन्ताꣳ हृदा तान्मा आम-

नसस्कृधि स्वाहा ॥ एते वै सजाताः सजाता इव पुत्रा इव स्त्रिय इव पशव इव तैरात्मानमभिसꣳयुङ्क्ते तैर्भवति पूषती गौर्धेनुर्दक्षिणा सा हि वैश्वदेव्यथ यद्वैश्वदेवीष्टिर्वैश्वदेवीर्वा इमाः प्रजास्ता एवावारुन्द्ध ता आद्या अकृतं बहिरात्मꣳ वै प्रयाजानुयाजा[1] आत्मा देवता यत्प्रयाजानुयाजानां[2] पुरस्ताद्धोपरिष्टाद्वा जुहुयाद्बहिरात्मꣳ सजातान्दधीताथ यन्मध्यतो जुहोति मध्यत एव सजातानात्मन्धत्ते यदि कामयेत ताजगेयुस्ताजक्परेयुरिति दारुमयेण जुहुयाच्चराचरा हि वनस्पतयो यदि कामयेत ध्रुवाः स्युः कृच्छ्रादेयुरिति मृन्मयेन जुहुयात् ॥ ध्रुवा ३हीयं[3] ध्रुवो ऽसि ध्रुवस्त्वं देवेष्वेधि ध्रुव३वो ऽहꣳ सजातेषु भूयासं प्रियः सजातानामुय्यश्चेत्ता वसुवित्तुय्यो ऽस्युय्यस्त्वं देवेष्वेध्युँ३य्यो ऽहꣳ सजातेषु भूयासं प्रियः सजातानामुय्यश्चेत्ता वसुवित्तभिभूरस्यभिभूस्त्वं देवेष्वेध्यभिभूरहꣳ सजातेषु भूयासं प्रियः सजातानामुय्यश्चेत्ता वसुवित्परिभूरसि परिभूस्त्वं देवेष्वेधि परिभूरहꣳ सजातेषु भूयासं प्रियः सजातानामुय्यश्चेत्ता वसुवित्सूरिरसि सूरिस्त्वं देवेष्वेधि सूरिरहꣳ सजातेषु भूयासं प्रियः सजातानामुय्यश्चेत्ता वसुवित् ॥ एते वै सजातास्तानस्मिन्दधाति तानस्मादनपक्रमिणः करोति ॥ २ ॥

Vgl. TS 2, 3, 9 (grâmakâminaḥ sâṃgrahaṇîshṭiḥ); Kâṭh. 12, 2.

अथैषो ऽश्वः प्रतिगृह्यते सं वा उभयतोदन्प्रतिगृहीतो निर्वेभस्त्यस्येन्द्रियं च पशूꣳश्च वरुणो वा अश्वो वरुणदेव३त्यो यो वा अश्वं प्रतिगृह्णाति वरुणꣳ स प्रसीदति तदश्वहविषा यष्टव्यं निर्वरुणत्वाय चतुष्कपाला भवन्ति चतुष्पाद्वा अश्वः कपालैरेवैनमाप्नोति यावन्तो

1) So Hg, M 3, W (u. A); in B °नूयाजा; Kâṭh. hat auch Kürze des Vocals.
2) So Hg, M 3, W (u. A); in B °नूयाजानां 3) P हिं। इयं

ऽश्वास्तावन्तः पुरोडाशा भवन्ति सर्वत एवैनं मुञ्चत्येको ऽधिभवति यन्नोपस्मरति तस्मा एव सं यः पुनः प्रतिग्रहीष्यन्त्स्यान्न स यजेत यद्धि पुनः प्रतिगृह्णीयात्पुनर्वरुणं प्रसीदेदथ यः पुनः प्रतिग्रहीष्यन्त्स्यात्तस्य वारुणा नेमाः स्युः सौर्यवारुणा नेमा यद्वारुणो वरुणादेवैनं तेन मुञ्चत्यथ यत्सौर्यः स्वामेव देवतामुपप्रतिगृह्णात्यात्मनो ऽहिंसाया एकविंशतिः सामिधेनीर्भवन्त्यसौ आदित्य एकविंशः प्रजापतिरसौ आदित्यः प्राजापत्यो ऽश्वो यावानेवाश्वस्तमाप्नोति सर्वे वा अन्ये पशवो योनिमन्तः पुरुषयोनयो ऽयोनिरश्वो ऽसुजा यदेषो ऽपोनप्त्रीयश्वरूर्भवति योनिमन्तमेवैनमकः स्व एवैनꣳ योनौ प्रतिष्ठापयति ॥ यस्ते राजन्वरुण गायत्रछन्दाः पाशो ब्रह्मन्प्रतिष्ठितस्तं त एतेनावयजे तस्मै ते स्वाहा यस्ते राजन्वरुण त्रिष्टुप्छन्दाः पाशः क्षत्रे प्रतिष्ठितस्तं त एतेनावयजे तस्मै ते स्वाहा यस्ते राजन्वरुण जगच्छन्दाः पाशो विशि प्रतिष्ठितस्तं त एतेनावयजे तस्मै ते स्वाहा यस्ते राजन्वरुणानुष्टुप्छन्दाः पाशो दिक्षु प्रतिष्ठितस्तं त एतेनावयजे तस्मै ते स्वाहा ॥ छन्दाꣳसि वै वरुणस्य पाशास्तैरेनं गृह्णाति तैरेनं गृह्णाति तैरेनं मुञ्चत्यपोनप्त्रीयाभ्यां द्वाभ्यां जुहोति य एवाप्सव्यो वरुणस्तत एनं मुञ्चति ॥ ३ ॥

Vgl. TS 2, 3, 12 (açvadânina ishṭiç catushkapâlâ); Kâṭh. 12, 6.

अग्नेरायुरसि तेनासावमुष्मा आयुर्देहीन्द्रस्य प्राणो ऽसि प्राणं देह्यमुष्मै यस्य ते प्राणः स्वाहा पितॄणां प्राणो ऽसि प्राणं दत्तामुष्मै येषाꣳ वः प्राणः स्वाहा विश्वेषां देवानां प्राणो ऽसि प्राणं दत्तामुष्मै येषाꣳ वः प्राणः स्वाहा बृहस्पतेः प्राणो ऽसि प्राणं देह्यमुष्मै यस्य ते प्राणः स्वाहा प्रजापतेः प्राणो ऽसि प्राणं देह्यमुष्मै यस्य ते प्राणः स्वाहा ॥

यन्नवमैत्तन्नवनीतमभवद्यदसर्पत्तत्सर्पिः[1] ।
यदघ्रियत तद्घृतम् ॥
घृतस्य पन्थाममृतस्य नाभिमिन्द्रेण दत्तं प्रयतं मरुद्भिः।
तं त्वा विष्णुरन्वपश्यत्तं त्वेडा गव्यैरयत्[2] ॥
पावमानस्य त्वा स्तोमेन गायत्रस्य वर्तन्योपाꣳशोस्त्वा[3] वी३र्येणो- 5
त्सृजे वृहता त्वा रथंतरेण चैष्टुभ्या वर्तन्या शुक्रस्य त्वा वी३र्येणोद्धरे
ऽग्नेष्ट्वा मात्रया जागत्या वर्तन्या देवस्त्वा सवितोन्नयतु जीवात्वे जी-
वनस्यायै ॥
इदꣳ वर्चो अग्निना दत्तमागान्महि[4] रायः सह ओजो बलꣳ यत् ।
दीर्घायुत्वाय शतशारदाय प्रतिगृभ्णामि महते[5] इन्द्रियाय ॥ 10
इममग्न आयुषे वर्चसे कृधि तिग्ममोजो वरुण सोम राजन् ।
मातेवास्मा[6] अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासत्[7] ॥
अग्निरायुस्तस्य मनुष्या आयुष्कृतस्तेनायुषायुष्मानेधि ब्रह्मायुस्तस्य
ब्राह्मणा आयुष्कृतस्तेनायुषायुष्मानेधि यज्ञ आयुस्तस्य दक्षिणा आयु-
ष्कृतस्तेनायुषायुष्मानेध्यमृतमायुस्तस्य देवा आयुष्कृतस्तेनायुषायुष्मा- 15
नेध्यश्विनोः प्राणो ऽसि तौ ते प्राणं दत्तां तेन जीव मित्रावरुणयोः
प्राणो ऽसि तौ ते प्राणं दत्तां तेन जीव बृहस्पतेः प्राणो ऽसि स ते
प्राणं ददातु तेन जीव प्रजापतेः परमेष्ठिनः प्राणो ऽसि स ते प्राणं
ददातु तेन जीव ॥ ४ ॥

Vgl. TS 2, 3, 10 (âyushkâmeshṭimantrâḥ); Kâṭh. 11, 7.

---

1) P यत् । नवं । ऐत् । तत् । नवनीतमिति नव नीतम् । 2) P तत् । त्वा । इडा । गव्यैः । अयत् । 3) P वर्तन्या । उपाꣳशोरित्युप अꣳशोः । 4) P आ । अगात् । 5) P महते । 6) P मातेवेति माता इव । अस्मै । 7) P यथा । असत् ।

आग्नावैष्णवमेकादशकपालं निर्वपेत्सारस्वतं चरुं बार्हस्पत्यं चरुं पूर्वेद्युरामयाविन॰ याजयेदग्निर्वै सर्वा देवता विष्णुर्यज्ञो देवताभिश्चैवास्मिन्यज्ञेन चायुर्दधाति वाक्सरस्वती ब्रह्म बृहस्पतिर्वाचा चैवास्मिन्ब्रह्मणा चायुर्दधात्येथो प्राणा वै देवताः प्राणान्वा एतत्पूर्वेद्युर्गृहीत्वोपवसति स श्वो भूत आग्नेयमष्टाकपालं निर्वपेत्सौम्यं पयसि चरुमादित्यं घृते चरु॰ वारुणं चरु॰ यवमयमियन्तमग्नये वैश्वानराय द्वादशकपालमामयाविन॰ याजयेद्यो वै प्रमीयते ऽग्निं तस्य शरीरं गच्छति सोम॰ रसो यदाग्नेयः शरीरमेवास्य तेन निष्क्रीणाति यत्सौम्यो रसं तेन यावानेव तं निष्क्रीयेय॰ वा अदितिरस्यामधि प्रजाः प्रजायन्ते ऽस्यामेवैनमधि प्रजनयतीया॰श्वरुर्भवत्येतावान्वा आत्मा यावानेवास्यात्मा त॰ वरुणान्मुञ्चा स॰वत्सरो वा अग्निर्वैश्वानरः स॰वत्सर एवैनं प्रतिष्ठापयति स॰वत्सरायुषमेनं करोत्यग्नेरायुरसि तेनास्मा अमुष्मा आयुर्देहीत्यग्निर्वै मनुष्याणामायुषः प्रदाता सो ऽस्मा आयुः प्रयच्छति पञ्चभिर्जुहोति पाङ्क्तः पुरुषो यावानेव पुरुषस्त॰ समीरयति यावानेव पुरुषस्त॰ समीरयित्वाय॰ वाव यः पवत एष प्राण आभ्यो वा एष दिग्भ्यो ऽधिपवत एतद्देव३त्या वा इमा दिशो यथादेवत॰ वावैनमेतदाभ्यो दिग्भ्यो ऽधि समीरयित्वा प्राणानस्मिन्दधाति ॥

यन्नवमैत्तन्नवनीतमभवद्यदसर्पत्तत्सर्पिः[1] ।
यदम्रियत तद्धृतम् ॥

इति घृतस्य वा एतन्महिमानमुदाचष्टे ऽथो महयत्येवैनत्पावमानस्य त्वा स्तोमेन गायत्रस्य वर्तन्योपा॰शोस्त्वा वी३र्येणोत्सृजा इति यथा

1) Die Mss. यन्नव॰

वा इदꣳ वध्यमुत्सृजत्युद्धरत्युन्नयत्येवं तदेतावद्वा अस्ति स्तोमा यद्गा-
य्छन्दाꣳसि यावदेवास्ति तेनास्मा आयुर्दधाति यज्ञेनास्मा आयुर्दे-
धाति सर्वे ऋत्विजः पर्याहुः सर्वे वा एत एतस्मै चिकित्सन्ति सर्व
एवास्मा आयुर्दधाति ब्रह्मणो हस्तमालभ्य पर्याहुर्ब्रह्म वै ब्रह्मा ब्र-
ह्मणैवास्मिन्ब्रह्मायुर्दधाति हिरण्यादधि घृतं निष्पाययन्त्यमृतꣳ वै
हिरण्यमायुर्घृतममृतादेवैनमध्यायुर्निष्पाययन्ति निरिव धयत्यायुरे-
वात्मन्धत्ते तदस्मा आबध्नात्यायुषैनꣳ समर्धयत्याग्नेय्याबध्नात्यग्निर्वै
सर्वा देवता सर्वाभिरेवास्मिन्देवताभिरायुर्दधात्यग्निरायुस्तस्य मनुष्या
आयुष्कृतस्तेनायुषायुष्मानेधीति यो वै देवानायुष्मतश्चायुष्कृतश्च
वेद सर्वमायुरेति न पुरायुषः प्रमीयत एते वै देवा आयुष्मन्तश्चायु-
ष्कृतश्च यदिमे प्राणास्ते ऽस्मिन्नायुर्दधत्यस्मिनोः प्राणो ऽसि तौ ते
प्राणं दत्तां तेन जीवेतीमे वा एते प्राणास्तानस्मिन्दधाति तानस्मा-
दनपक्रमिणः करोति दश देया दश ३ह्यात्मन्प्राणाः प्राणानस्मिन्दधा-
त्यश्वो देयो वासो देयꣳ हिरण्यं देयं गौर्देयो वरो देयो बहु
देयम् ॥ ५ ॥

Vgl. TS 2, 3, 11 (dîrgharogyâyurarthinor ishṭiḥ); Kâṭh. 11, 8.

आग्नेयमष्टाकपालं निर्वपेदैन्द्रं पञ्चकपालं दधि मधु घृतं धाना
उदकं तत्सꣳसृष्टं भवत्यग्नेयꣳ हविरैन्द्रः पशुरैन्द्र्या एवाग्नेय ऐन्द्रः पञ्चक-
पालः पाङ्क्तो यज्ञः पङ्क्ती याज्यानुवा३क्ये पाङ्क्ताः पशवः पाङ्क्तः
पुरुषो यावानेव पुरुषस्तमाप्नोति स सर्वो भूत्वा पशूनाप्नोति पशव
इव ३ह्येतत्सꣳसृष्टमथो यावन्त एव पशवस्तानस्मै सꣳसृजति तदा-
हुरैन्द्र एकादशकपालः का३र्यो इत्यैन्द्रा हि पशवोऽथो आहुः प्रा-
जापत्यं का३र्यमिति प्राजापत्या हि पशवः प्रजापतिः पशूनां प्रजन-

यिता तमेव भागधेयेनोपासरत्सो ऽस्मै पशून्प्रजनयत्यथैषो ऽयमग्नेश्चरुर्यो ददाति सो ऽयमा दानमयमा दानकामा अस्मै प्रजा भवन्त्यग्नये भ्राजस्वते ऽष्टाकपालं निर्वपेत्सौर्यं चरुमग्नये भ्राजस्वते ऽष्टाकपालं चक्षुष्काम याजयेदग्नेर्वै मनु३ष्या नक्तं चक्षुषा पश्यन्ति सूर्यस्य दिवैतौ वै चक्षुषः प्रदातारौ तावेव भागधेयेनोपासरत्तावस्मै चक्षुः प्रयच्छतः समानं वै चक्षुर्दधातु यत्समानी देवता चरुमभितो भवति नानानमेवास्मै चक्षुषी प्रतिदधाति यावदन्यतरेणाक्ष्णा पश्यति तावदुभाभ्यां पश्येद्यच्चरुरन्तरा न स्यादेष यच्चरुरन्तरा भवति तस्मादिदमन्तरा चक्षुषोर्विधृत्यै शुक्ला व्रीहयो भवन्ति श्वेता गा आज्याय दुहन्त्येवमिव ३ह्यसा आदित्यः समृद्ध्यै पयसि भवति पयो वै घृतं पयश्चक्षुः पयसैवास्मै पयश्चक्षुर्दधाति सौरीभिरादधाति चक्षुरस्मिन्दधाति ॥ ६ ॥

Vgl. TS. 2, 3, 8 (cakshushkâmasya trihavishkeshṭiḥ); (Kâṭh. 11, 4 u. 5.)

देवा असुराणां वेशत्वमुपायन्निन्द्रस्तु नाप्नुपैत्तेषां वा इन्द्रियाणि वीर्याण्यपाक्रामन्नग्नेः रथंतरमिन्द्रस्य बृहद्विश्वेषां देवानां वैरूपं सवितुर्वैराजं त्वष्टू रेवती मरुतां शक्करी तानि वा इन्द्रो ऽन्वपाक्रामत्तैरात्मानमभिसमयुङ्क्त तैरभवद्यो भूतिकामः स्यात्तमेतया याजयेत्तैरेवेन्द्रियैर्वीर्यैरात्मानमभिसंयुङ्क्ते तैर्भवति द्वादशकपालो भवति वैश्वदेवत्वायोत्तानानि कपालान्युपदधाति तस्त्विच्चरुमकरनिर्दाहायाभिशस्यमानं याजयेद्यस्य वै देवा अन्नमदन्त्यदन्ति तस्य मनु३ष्या अन्नं सर्वा वा एता देवताः सर्वा वावास्यैतद्देवता अन्नमजीघसदेदन्ति हास्य मनु३ष्या अन्नम् ॥ इन्द्राय रथंतरायानुब्रूहि ॥

इति रथंतरस्या[1] ऋचमनूच्य बृहत ऋचा यजेत् ॥ इन्द्राय बार्हता-यानुब्रूहि ॥ इति बृहत ऋचमनूच्य रथंतरस्य ऋचा यजेत् ॥ इन्द्राय वैरूपायानुब्रूहि ॥ इति वैरूपस्या[2] ऋचमनूच्य वैराजस्य ऋचा य-जेत् ॥ इन्द्राय वैराजायानुब्रूहि ॥ इति वैराजस्या[3] ऋचमनूच्य वै-रूपस्य ऋचा यजेत् ॥ इन्द्राय रैवतायानुब्रूहि ॥ इति रेवतीमनूच्य शक्वर्या यजेत् ॥ इन्द्राय शाक्वरायानुब्रूहि ॥ इति शक्वरीमनूच्य रेवत्या यजेदे॒तैरे॒वैनमिन्द्रि॒येरे॒ताभिर्दे॒वताभिर्व्य॑तिषजति॒ पर्यू॑हमवद्यत्ये॒तैरे॒वैन-मिन्द्रि॒येरे॒ताभिर्दे॒वताभिः॒ पर्यू॑हति॒ पशवो॒ वै बृह३त्य॒ग्नी रु॒द्रो॒ य॒द्बृह-त्या॑ वषट्कु॒र्या॒द्रु॒द्रायास्य॑ पशू॒नपि॑दध्या॒द्यो बृह॒ती॒ ह्ये॑यातया॒मा॒नीं पशवो ऽनुप्रजायन्ते॒ ऽनुवाक्या॑याश्चत्वा॒रि॒ꣳ॒शद॑क्षराणि याज्या॒मभ्य॑त्यूहत्य॒नु॒ष्टुभं च संपादयति पङ्क्तिं च॒ वाग्वा अनु॒ष्टुप् प्रजा॑पतिः॒ पङ्क्ति॒र्वाचि वा एत॒त्प्रजा॑पतिमयस्ताट् प्रजननाय॒ तन्मि॑थु॒न॒ं तस्मादे॒व मिथु॒नाद्य-जमानः प्रजया च पशु॒भिश्च॒ प्रजायते ॥ ७ ॥

Vgl. TS 2, 3, 7 (sarvaprshṭhâ vîryakâmâbhiçastayoḥ); Kâṭh. 12, 5.

स्वा॒दवीं॑ त्वा स्वादु॒ना ती॒व्रां॑ ती॒व्रेण॒ शुक्रा॑ꣳ॒ शु॒क्रेण॑ ।
देवीं॑ दे॒वेना॑मृता॒ममृ॑तेन॒ सृजा॑मि सꣳ॒ सोमे॑न ॥
सोमो॒ ऽस्यश्वि॑भ्यां पच्यस्व॒ सर॑स्वत्यै पच्यस्वे॒न्द्राय॑ सु॒त्राम्णे॑ पच्यस्व ॥
पुना॑तु ते परि॒स्रुत॒ꣳ॒ सोम॒ꣳ॒ सूर्य॑स्य दुहि॒ता ।
वा॒रेण॒ शश्व॒ता त॒ना ॥

---

1) So gemäss Hg, M 3 (u. A); in W रथंतरस्य; desgl. B, ohne Accent; Kâṭh. 12, 5 रथंतरस्यर्चम् 2) So Hg, M 3 (u. A); in W वैरूपस्य; desgl. B, ohne Accent; Kâṭh. वैरूपस्यर्चम् 3) So Hg, M 3, (u. A); in W वैराजस्य; desgl. B, ohne Accent; Kâṭh. वैराजस्यर्चम् 4) P तीव्रं। 5) P शुक्रं। 6) P अमृतां। अमृतेन।; Kâṭh. 12, 9 शुक्रां शुक्रेणामृतममृतेन

वायोः पूतः पवित्रेण प्रत्यङ्[1] सोमो अतिस्रुतः ।
इन्द्रस्य युज्यः सखा ॥
कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुत भोजनानि ये बर्हिषा नमउक्तिं न जग्मुः ॥
उपयामगृहीतोऽस्यंहिष्ट्रां त्वाहिष्ट्रेणाश्विभ्यां जुष्टं गृह्णाम्येष ते योनिरश्विभ्यां त्वोपयामगृहीतोऽस्यंहिष्ट्रां त्वाहिष्ट्रेण सरस्वत्यै जुष्टं गृह्णाम्येष ते योनिः सरस्वत्यै त्वोपयामगृहीतोऽस्यंहिष्ट्रां त्वाहिष्ट्रेणेन्द्राय सुत्राम्णे जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा सुत्राम्णे ॥
यदद्य शिष्टं रसिनः सुतस्य यमस्येन्द्रो अपिबच्छचीभिः[2] ।
अहं तमस्य मनसा घृतेन सोमं राजानमिह भक्षयामि ॥
नाना हि वां देवहितं सदस्कृतं मा संसृक्षाथां परमे व्योमन् ।
सुरा त्वमसि शुष्मिणी सोम एष मा मा हिंसिष्टं स्वं योनिमाविशन्तौ ॥
द्वे सुती[3] अशृणवं पितृणामहं देवानामुत मर्त्यानाम् ।
याभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च ॥
ये भक्षयन्तो न वसून्यानशुर्यानमयो अन्वतप्यन्त धिष्ण्याः ।
या तेषामवया[4] दुरिष्टिः स्विष्टिं नस्तां विश्वकर्मा कृणोतु ॥
अयज्ञियान्यज्ञियान्मन्यमानः प्राणस्य विद्वान्त्समरे न धीरः ।
एनो महच्चकृवान्बद्ध[5] एष तं विश्वकर्मन्प्रमुञ्चा[6] स्वस्तये ॥
यजमानमृषया[7] एनसाहुर्विहाय[8] प्रजामनुतप्यमानाः ।

---

1) M 3 प्रत्यक्; desgl. B, ohne Accent; ebenso Kâṭh. 12, 9; s. TBr. 2, 6, 1, 2.
2) P यं । अस्य । इंद्रः । अपिबत् । 3) P सूती इति सूती । 4) P अवया इत्यवया ।
5) P बद्धः । 6) P प्र । मुञ्च । 7) P ऋषयः । 8) P एनसा । आहुः ।

मधव्यौ[1] स्तोका अप तौ रराध सं नस्ताभ्या॰ सृजतु विश्व-
कर्मा ॥ ८ ॥

Vgl. TS. 1, 8, 21 (sâutrâmaṇyâ mantrâḥ paçavo havîṃshi ca); 3, 2, 8, 3; TBr. 1, 4, 3; 2, 6, 1 u. 3; Kâṭh. 12, 9.

कुवलसक्तुभिराश्विने॰ श्रीणाति बदरसक्तुभिरैन्द्रे कर्कन्धुसक्तुभिः सा-
रस्वते॰ वाग्वै सरस्वती वाचैवास्मिन्स्वादुमानं दधात्यथ यैनमसा
अश्लीले॰ वागभिवदत्येत्यपविष्ट व्याधिष्टेति सैनं पुनः कल्याण॰ 5
वदति सिꣳहा अध्वर्युर्ध्यायति व्याघ्रौ प्रतिप्रस्थाता वृकौ यजमान
एषा सुरा भवति स यैरेव तदिन्द्रियैर्वीर्यैर्व्यृध्यते तान्यस्मिन्नात्मन्धत्ते
ब्राह्मणस्य मूर्धन्त्साद्या मेध्यत्वायान्न॰ वै सुरा मेध्य॰ वा अन्नं तेन
मेध्यैका पुरोरुगेका याज्यैकधास्मिन्वीर्यं दधाति ब्राह्मणः पाययित- 10
३व्यस्तेन हविः क्रियत आत्मनापेयायात्मन्नेव वीर्यं धत्तेऽमौ सर्वा होत-
३व्याः समृद्ध्यै मध्यतो वा एष पाप्मना गृहीतो यत्समया व्येति मध्यत
एवैनं पाप्मनो मुञ्चति यदाहवनीये जुहुयान्न पाप्मना व्यावर्तेत क्रियेत
भेषजमथ यद्दक्षिणे जुहोति वि पाप्मना वर्तते क्रियते भेषजमथ यद्विक्षारयत्येवमिव ३ह्येष विक्षरति शतक्षरो भवति शता- 15
युर्वै पुरुषः शतवीर्य आयुरेव वीर्यमाप्नोति यद्वा एतस्य व्याधिं य-
त्रामायि पितृन्वा एतस्य तदगन्यत्पितृमतीभिरनुमन्त्रयन्ते पितृभ्य
एवैनं तेन समीरयन्ति यत्त्रिस्तृतीये हि लोके पितरोऽथ यच्च-
त्वारो दिग्भ्य एवैनं तेन समीरयन्ति ॥ ९ ॥

Vgl. Kâṭh. 12, 10 a. E. u. 11.

॥ इति मध्यमकाण्डे तृतीयः प्रपाठकः ॥

1) P मधव्यौ।

विश्वरूपो वै त्वाष्ट्र आसीत्त्रिशीर्षासुराणा॰ स्वस्रीयः॑ स सोममे॑केन शीर्ष्णापिबत्सुरामे॑केनान्नमे॑केनावयत्स इन्द्रो ऽमन्यताय॰ वावेद॑ भविष्यती॑ति तेन समलभत॑ तेन युगश॑रमपतत्स तक्षाणं तिष्ठन्तम॑ब्रवीदाधावे॑मान्यस्य शीर्षाणि छिन्दी॑ति तस्य तक्षोपस्कद्य परशुना 5 शीर्षाण्यछिनत्तस्मात्तक्षणे शिरो धृतं॑ तस्मादस्यान्नमन्नाद्यं॑ तस्य यत्सोमप॑॰ शिरा आसीत्स कपिञ्जलो ऽभवद्यत्सुराप॑॰ स कलविङ्को॑ येनान्नमा॑वयत्स तित्ति॑रिः॑ स वै त्वष्टा पुत्रे हते सोममाहरहत इन्द्रं॑ तमधः शतशले ऽसुनोदथो आहुः सहस्रशला॑ इति तस्मिन्वा इन्द्र उपहव॑मैच्छत॑ तन्नोपाह्वयत॑ तं प्रासहादाय नाड्या निरपिबत्स सोमपीथेन 10 व्यार्ध्यत॑ तस्मात्सोमो नानुपहूतेन पेय॑ः सोमपीथेन ह व्यर्धुको भवति॑ यदितो ऽमुच्यत तौ सि॰हा अभवता॰॑ यदितस्तौ व्याघ्रौ॑ यदितस्तौ वृकौ॑ यत्प्रथमं निरष्ठीवत्तत्कुवलमभवद्द्वितीयं तद्बदर॰॑ यत्तृतीयं तत्कर्कन्धुर्यदधस्तात्सा सुरा॑ त॰ वा एतयाश्विना अयाजयता॰॑ सौचाम॑णया॑ स यैरेव तदिन्द्रियै॑र्वी३र्यै॑र्व्यार्ध्यत तान्यस्मिन्नाभ्रा॑धत्ता॰॑ सोमेना॑ 15 तिपुपुवान॰ याजयेदिन्द्रियेण वा एष वीर्येण व्यृध्यते य॰ सोमो ऽतिपवते॑ यावदेवेन्द्रिय॰ वी३र्यं तदस्मिन्नाभ्रा॑ दधाति॑ राजसूयेना॑भिषिषिचान॰ याजयेदिन्द्रियेण वा एष वीर्येण व्यृध्यते यो राज॑सूयेनाभिषिञ्चते॑ यावदेवेन्द्रिय॰ वी३र्यं तदस्मिन्नाभ्रा॑ दधाति॑ भूति॑काम॰ याजयेदिन्द्रियेण वा एष वीर्येण व्यृध्यते यो ऽलं भूत्यै सन्न 20 भवति॑ यावदेवेन्द्रिय॰ वी३र्यं तदस्मिन्नाभ्रा॑ दधाति॑ ज्योगामयाविन॰ याजयेदिन्द्रियेण वा एष वीर्येण व्यृध्यते यस्य ज्योगामयति॑ यावदेवे॑न्द्रिय॰ वी३र्यं तदस्मिन्नाभ्रा॑ दधाति॑ नानार्तेन यष्ट३व्यमित्याहुरार्तियज्ञ॑ इव ३ह्येष॑ तदाहुर्यष्टव्यमेव॑ सर्वो हि पुरुषा आर्ति॑ः सर्वो बुभूषति॑

यदाश्वि३न्यश्विनौ ह्यभिषज्यता॰ यत्सारस्वती वाग्वै सरस्वती वाचा ह्यभिषज्यता॰ यदैन्द्रीन्द्रे हि तौ तानीन्द्रियाणि वीर्याण्यात्मन्धत्ताम् ॥ १ ॥

Vgl. (TS 2, 5, 1); Kâṭh. 12, 10.

सीसेन क्लीबात्कार्यानृत॰ वै सीसमनृतं क्लीबोऽनृत॰ सुरानृतेनैवानृतादनृतं क्रीणाति तदाहुः का३र्या वडबा दक्षिणेति सृत्वरीव ३ह्येषा सृत्वरी वडबाश्विनं प्रथममालभन्तेऽथ सारस्वतीमथैन्द्रमेवमेव वपाभिश्चरतीन्द्र एवैषु तदधिभवत्यैन्द्रः पुनः प्रचरता प्रथमो भवतीन्द्र॰ वा एतत्पुनरालभन्ते सेन्द्रियत्वायैन्द्री वपानामुत्तमा भवत्यैन्द्रः पुरोडाशानां प्रथमो वी३र्य॰ वा इन्द्रो वीर्य एवैनमभिसंधत्तः प्रसवाय सावित्रो निर्वरुणत्वाय वारुणो मध्यतो ३ह्येष वरुणगृहीतः पश्वाङ्गा एषा सृष्टा प्रतीचीनशीर्षी यदुपरिष्टात्पुरोडाशो भवत्यपिहित्या अच्छिद्रत्वाय सह समवत्तं भवति सहेडामुपह्वयन्ते स॰हित्या अथो इडाया अविदोहाय यद्वै सौचामण्यावृद्धं तदस्याः समृद्ध॰ यदन्यदेवत्यात्पुरोडाशा भवन्त्यन्यदेवत्यात्पशवस्तदस्या व्यृद्ध॰ सत्समृद्धमर्ध॰ वै प्रजापतेरात्मनो धैर्यमासीदर्धं माल्य॰ यद्वैर्यं तत्पुरस्तादकुरुत यन्माल्यं तत्पश्चात्पर्यौहत यद्वैर्य॰ सोमो वै स ततो ब्राह्मणमसृजत तस्माद्ब्राह्मणः सर्व एव ब्रह्माभि धीरो यन्माल्य॰ सुरा वै सा ततो राजन्यमसृजत तस्माज्ज्यायाꣳश्च कनीयाꣳश्च स्नुषा च श्वशुरश्च सुरां पीत्वा विलालपत[1] आसते माल्य॰ हि तत्पाप्मा वै माल्यं तस्माद्ब्राह्मणः सुरां न पिबेत्पाप्मनात्मानं नेत्स॰सृजा इति

1) Hg, (A), W विलालप्त; Kâṭh. 12, 12 सह लालपत आसते

तदुतैतद्राष्ट्रीयाय[1] ब्राह्मणं ब्रूयात्तद्य एवꣳ विद्वान्त्सुरां पिबति न हैनं दूणात्येषा[2] वै प्रजापतेर्वीर्यवती तनूर्वीर्यं प्रजापतिर्वीर्यमस्मिन्द्धाति ॥ २ ॥

Vgl. Kâṭh. 12, 11 a. E. u. 12.

ततो यः सोमो ऽत्यरिच्यत तमग्ना उपप्रावर्तयत ।
स्वाहेन्द्रशत्रुर्वर्धस्व ॥

इतीन्द्रस्याहिनꣳ शत्रुमचिकीर्षदिन्द्रमस्य शत्रुमकरोत्तथा वाक्स्वयमेव ३ वैत्सं यꣳ सोमं प्रावर्तयद्यस्मिꣳश्चाग्ना उपप्रावर्तयत्ता अग्नीषोमौ देवते प्राणापाना अभिसमभवताꣳ स यावदूर्ध्वबाहुः परांविध्यत्तावति व्यूरमत यदि वा प्रवणं तावदासीद्यदि वाग्नेरधि तावदासीत्स[3] वा इषुमात्रमेवाहा तिर्यङ्वर्धतेषुमात्रमन्वङ्क्थो आहुरहोरात्रे एवेषुमात्रं तिर्यङ्वर्धतेषुमात्रमन्वङ्क्त्यथो आहुरर्धमासमथो मासमथो सꣳवत्सरमिति स वा इमाः सर्वाः स्रोत्याः. पर्यशयत्तस्माद्वा इन्द्रो ऽबिभेत्तस्मादु त्वष्टाबिभेत्तस्येन्द्रः प्रत्तमैच्छत्तमस्मै प्रायच्छत्तस्मै त्वष्टा वज्रमसिञ्चत्तपो वै स वज्र आसीत्तमुद्यमं नाशक्नोदथ वै तर्हि विष्णुरन्या देवतासीत्सो ऽब्रवीद्विष्णा एहीदमाहरिष्यावो येनायमिदमिति स त्रेधात्मानꣳ विन्यधत्ताभिपर्यावर्तादबिभेदस्यां तृतीयमन्तरिक्षे तृतीयं दिवि तृतीयꣳ स यदस्यां तृतीयमासीत्तेन वज्रमुदयच्छद्विष्णवनुष्टितः स वज्रमुद्यतं दृष्ट्वाबिभेत्सो ऽब्रवीदस्ति वा इदं त्वयिन्नन्वी ३ यं तत्ते प्रदास्यामि मा मा वधीरिति तद्वा असै प्रायच्छत्तत्प्रत्यगृह्णात् ॥ अधा मा ॥ इति तद्विष्णवे ऽतिप्रायच्छत्तद्विष्णुः प्रत्यगृह्णात् ॥

1) W राष्ट्रियाय; desgl. B, ohne Accent. 2) W u. B दूणा° 3) Hg (u. A) तावदासीत्तत्स 4) Die Mss. प्रति°

अस्मास्विन्द्र इन्द्रियं दधात्वस्मान्रायो मघवानः सचन्ताम् ।
अस्माक॰ सन्त्वाशिषः ॥

इति सो ऽवेदस्ति वावास्मिन्नन्तर्वी३र्यमिति स यदन्तरिक्षे तृतीयमासीत्तेन वज्रमुदयछद्विष्णवनुष्ठितः स वज्रमुद्यतं दृष्ट्वाबिभेत्सो ऽब्रवीदस्ति वा इदं त्यस्मिन्नन्तर्वी३र्यं तत्ते प्रदास्यामि मा मा वधीरिति तद्वा अस्मै प्रायछत्तत्प्रत्यगृह्णात् ॥ त्रिर्माधाः ॥ इति तद्विष्णवे ऽतिप्रायछत्तद्विष्णुः प्रत्यगृह्णात् ॥

अस्मास्विन्द्र इन्द्रियं दधात्वस्मान्रायो मघवानः सचन्ताम् ।
अस्माक॰ सन्त्वाशिषः ॥

इति सो ऽवेदस्ति वावास्मिन्नन्तर्वी३र्यमिति स यद्दिवि तृतीयमासीत्तेन वज्रमुदयछद्विष्णवनुष्ठितः स वज्रमुद्यतं दृष्ट्वाबिभेत्सो ऽब्रवीदस्ति वा इदं त्यस्मिन्नन्तर्वी३र्यं तत्ते प्रदास्यामि मा मा वधीः ॥ संधां नु संदधावहै यथा त्वामेव प्रविशानीति सो ऽब्रवीद्यन्मां प्रविशेः किं मे ततः स्यादिति सो ऽब्रवीत्त्वामेवेन्धीय तव भोगाय त्वां प्रविशेयमिति तद्वा अस्मै प्रायछत्तत्प्रत्यगृह्णात् ॥ त्रिर्माधाः ॥ इति तद्वावं त्रैधातव्या सहस्र॰ वा अस्मै तत्प्रायछदृचः सामानि यजू॰षि यद्वा इदं किं च तत्त्रैधात३व्या तदाप्नोति पशूनेव ॥ ३ ॥

Vgl. TS 2, 4, 12 (trâidhâtavîyasya devatâ); Kâṭh. 12, 3.

उदर॰ वै वृचः पाप्मा क्षुद्भ्रातृव्यः पुरुषस्य यत्तप उपैति पाप्मान॰ वा एतत्स्तृणुते भ्रातृव्यं क्षुधमेव तस्मिन्वा अवदेता॰[2] सेयमस्या अध्यूर्ध्वा वागवदत् ॥

उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः[3] ।

1) M 3 प्रविशामिति; W प्रविशानिति 2) W अवदेता॰ 3) P चन । एनोः ।

इन्द्रश्च[1] विष्णो यदपस्पृधेथां त्रेधा सहस्रꣳ वि तदैरयेथाम् ॥ इति सत्यमाहेत्यब्रवीद्[2] द्वे एव तृतीये आहुतेरकं प्रतिग्रहीतुरिति तौ वै तत्रैवातिष्ठेतां तस्मादिन्द्राविष्णवं चिराचस्य वा उपेप्सायै त्रैधातव्याह्रियते यावद्वै चिराचेणोपाप्नोति तावत्त्रैधातꣳव्ययावरुन्द्धे तस्मादाहुः सहस्रदक्षिणेत्युष्णिहाककुभा अन्वाह गायत्री[3] वा उष्णिहाथ यान्येतानि चत्वार्यक्षराण्यृच्यधि चतुष्पादो वा एते पशवो यथा वा इदं पुरोडाशे पुरोडाशꣳ[4] ऽध्येवꣳ वा एतद्यदृच्यध्यक्षराणि प्राणो वै गायत्री प्राणेन पशवो यतां यदुष्णिहाककुभा अन्वाह पशूनाꣳ यत्यै[5] ॥

अग्ने त्री ते वाजिना त्री षधस्था[6] तिस्रस्ते जिह्वा ऋतजात पूर्वीः । तिस्र उ ते तन्वो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन् ॥ इति परिदधाति वीरताया अथो रूपताया एवं यज्ञगत्या परिदध्यादन्तं गच्छेदथ यत्त्रिष्टुभा परिदधाति नान्तं गच्छत्योजो वै वीर्यं त्रिष्टुबोजस्येव वीꣳर्यं प्रतितिष्ठति ॥ ४ ॥

Vgl. TS 2, 4, 12, 6. 7 u. 2, 4, 11 (trâidhâtavîyeshṭiḥ); 3, 2, 11 (kâmyeshṭiyâjyâḥ); Kâṭh. 12, 3 u. 4.

सर्वाभ्यो देवताभ्यो यज्ञ आहृत्या इत्याहुः सर्वो वा एष यज्ञः सर्वाभ्यो हि देवताभ्यो यज्ञ आहियते सर्वाणि छन्दाꣳस्यन्वाह सर्वाणि हि छन्दाꣳसि यज्ञं प्रयुज्यन्ते ऽभिचरन्नाहरेत्सर्वो वा एष यज्ञः सर्वेणैवैनꣳ यज्ञेनाभिचरत्यदक्षिणस्तु स्यात्तस्मिन्मेनिमकर्मेनिर्ह्यदक्षिणो ऽथ यो यक्ष्य[8] इत्युक्त्वा न यजेत तमेतेन याजयेत्सर्वो वा

1) M 3 u. W इंद्रश्च; desgl. B, ohne Accent. 2) M 3 इत्यसत्यमꣳ 3) W गायत्र्या; desgl. B, ohne Accent. 4) Die Mss. पुरोडाशो; s. TS 2, 4, 11, 1. 5) M 3 जित्यै 6) P त्री। संधत्थेति सं. धत्था। 7) W तस्मिन्मनी° 8) So corrigirt; die Mss. schwanken; M 3 यक्ष्; desgl. B, ohne Accent; W यक्ष्; Hg यक्ष्यं; A etwa यक्ष्या; s. TS 2, 4, 11, 4,

एष यज्ञः सर्वेणैवास्मै यज्ञेन प्रायश्चित्तिं विन्दत्युत्तर[1] उत्तरः पुरोडाशो ज्यायान्भवत्युत्तर उत्तरो हि लोको ज्यायान्यथा वा इयमेवमसावथ वा अन्तरिक्षं नास्या रूपं नामुष्यास्तस्माद्यवमयो मध्यतोऽथो एवमिव ३ह्यन्तरिक्षस्य रूपं द्वादशकपालो भवति यद्वै चित्स्वित्त्वैधातव्यायाः[2] समृङ्क्तं सर्वेषामतिघातमवद्यत्यछम्बट्काराय यावता हि नः प्राप्नुयात्तावता छम्बट्कार्यादेतद्वै तद्यदाहुःछम्बणासा[3] इति वास इव वै यज्ञ ऊयते[4] यत्तार्ष्णि विषीव्यन्ति यजुषां तद्रूपं यज्ञेनवो दीयन्त उक्थामदानां तद्यद्धिरण्यं दीयते चन्द्रं गीयता इति वै सामाहुः साम्नां तद्रूपमेतेन वै सृञ्जया अयजन्त ते श्रियोऽन्तमगछंस्तस्मान्नातिबहु यष्टव्यमीश्वरो हि पराङतिपत्तोर्यो[5] वा एतेन यजते वि स छिनत्ति पुचो याजयितव्यो[6] ऽनुसंतत्यै ॥ ५ ॥

Vgl. TS 2, 4, 11 (traidhâtavîyeshṭiḥ); Kâṭh. 12, 3 a. E. u. 4.

आग्नेयमष्टाकपालं निर्वपेदैन्द्रमेकादशकपालं बार्हस्पत्यं चरुं भूतिकाम याजयेदिन्द्रो वै शिथिर इवामन्यत ३सोऽग्निं च बृहस्पतिं चाब्रवीद्याजयतं मेति तं वा एतयाग्निश्च बृहस्पतिश्चायाजयतां तस्मिंस्तेजोऽग्निरदधादिन्द्रियमिन्द्रो ब्रह्म बृहस्पतिस्तेता इन्द्रोऽभवद्यो भूतिकामः स्यात्तमेतया याजयेत्तेज एवास्मिन्नग्निर्दधातीन्द्रियमिन्द्रो ब्रह्म बृहस्पतिर्भवत्येव यदस्मिंस्त्रीणि वी३र्याण्यधत्तां तस्मात्त्रिधातुरिन्द्र इतरानभिसंश्लेषयन्ति सेन्द्रियत्वाय ॥ ६ ॥

---

1) M 3 विंद्° 2) W °व्याया° 3) Zu zerlegen in छम्बट् । न । असौ । „Nicht ist sie verfehlt“, (nämlich die त्रैधातव्या); Hg छम्बणासा; W छंबणणासा; M 3 छंबखासा; W छंबणणासा oder छंबणणासा (indem nämlich die Silbe णा sowohl Anudâtta als Udâtta hat); B छंबणासा; cf. Kâṭh. 12, 4 सर्वेषामभिघातमवद्यत्यश्छम्बंकारं यस्य नावदति श्छंम्बंकरोति श्छम्बणास्य चरति 4) So Hg u. M 3; in B u. A उयते; W कुयते 5) W परां अतिपत्तो° 6) Hg, M 3 u. A याजैतव्यो

पुरोवात[1] जिन्व रावट्[2] स्वाहा वातवान्वर्षन्भीम[3] रावट् स्वाहा स्तनयन्वर्षन्नुय रावट् स्वाहातिराच्च ववष्वान्पूत रावट् स्वाहा बहु ह वा अयमवर्षीदिति श्रुत रावट् स्वाहा तपति वर्षन्विराड् रावट् स्वाहा ऽवस्फूर्जन्विद्युद्वर्षन्त्स्वेष[4] रावट् स्वाहा नशन्यूवस्फूर्जन्वर्षन्भूत[5] रावट् स्वाहा ॥

मान्दा वंश ज्योतिष्मतीरमस्वरीः शुन्धो अजा उन्दतीः सुफेनाः ।

मिचभृतः क्षचभृतः सुराष्ट्रा इह नो ऽवत[6] ॥

वृष्णो[7] अश्वस्य संदानमसि वृष्ट्यै त्वोपनह्यामि ॥

देवा वसव्या अग्ने सोम सूर्यापो[8] दत्तोदधिं भिन्त ।
दिवः पर्जन्यादन्तरिक्षात्पृथिव्यास्ततो नो वृष्ट्यावत[9] ॥
देवाः शमेण्या[10] मित्र वरुणार्यमन्नपो दत्तोदधिं भिन्त ।
दिवः पर्जन्यादन्तरिक्षात्पृथिव्यास्ततो नो वृष्ट्यावत ॥
देवाः सपीतयो ऽपां नपान्नराश्सापो[11] दत्तोदधिं भिन्त ।
दिवः पर्जन्यादन्तरिक्षात्पृथिव्यास्ततो नो वृष्ट्यावत ॥
दिवा चित्तमः कृण्वन्ति पर्जन्येनोदवाहेन ।
यत्पृथिवीं व्युन्दन्ति ॥
आयन्वरः सुदानवो ददाश्षे दिवः कोशमचुच्यवुः ।
प्र पर्जन्यः सृजता रोदसी अनु धन्वना यन्तु वृष्टयः ॥

---

1) P पुरोवातेति पुरः . वात ।; M 3 पुरो वात 2) P जिन्व । रावट् ।; zur Sicherstellung der Form रावट् cf. namentlich weiter unten विराड् रावट्; anders TS. 3) M 3 वरिषन् für वर्षन् und so auch weiterhin. 4) P वर्षन् । त्वेष । 5) P नशनि । अवस्फ° 6) P नः । अवत । 7) P वृष्णः । 8) P वसव्याः । अग्ने । सोम । सूर्य । आपः । 9) P वृष्ट्या । अवत । 10) P शमंण्याः । 11) Hg (u. A) पान्नपान्नरा°; P अपां । नपात् । नराश्सं ।

उदीरयता[1] मरुतः समुद्रतो दिवो वृष्टिं वर्षयता[2] पुरीषिणः ।
न वो दस्रा[3] उपदस्यन्ति धेनवः शुभे कमनु रथा अवृत्सत ॥
सृजा[4] वृष्टिं दिव आज्मिः समुद्रं पृण ये देवा दिविभागाः स्थ ये अन्तरिक्षभागा ये पृथिवीभागास्त[5] इदं क्षेत्रमाविशत त इदं क्षेत्रमनुविविशत ॥ ७ ॥ 5

Vgl. TS 2, 4, 7 u. 8 (kârîrîshṭiḥ); Kâṭh. 11, 9.

वृष्टिर्वै देवेभ्योऽन्नाद्यमपाक्रामत्तत इदꣳ सर्वमशुष्यत्ते देवाः प्रजापतिमेवोपाधावꣳस्तान्वा एतया प्रजापतिरयाजयत्कारीर्या तेभ्यो वृष्टिमन्नाद्यमवरुन्द्धे यत्र पर्जन्यो न वर्षेत्तदेतया ज्येष्ठꣳ वा पुरोहितꣳ वा याजयेद्वृष्टिर्वा एतेभ्योऽन्नाद्यमपक्रामति यत्र पर्जन्यो न वर्षति यत्कारीर्या याजयन्ति वृष्ट्या अन्नाद्यस्यावरुद्ध्या अष्टौ वातहोमा अष्टौ दिशः इति दिग्भ्य एवैतद्वृष्टिमावर्तयन्ति मान्दा वशा ज्योतिष्मतीरमस्वरीरित्येतानि वा अपां नामधेयानि यथा वा इदं नामयाहमसा असा[6] इति ह्वयत्येवꣳ[7] वा एतदपो नामधेयैश्चावयति[8] वृष्णो अश्वस्य संदानमसीति वृषा ह्यश्वो वृषा पर्जन्यः समृद्ध्यै त्वोपनह्यामीति वृष्ट्यै ह्युपनह्यति देवा वसव्या[9] अग्ने सोम सूर्येति देवताभिरेवान्वहꣳ वृष्टिमछैति यदि न वर्षेत्तथैव वसेयुरहोरात्राभ्यामेव वृष्टिं च्यावयन्ति करीराणि भवन्ति वृष्ट्या अन्नाद्यस्यावरुद्ध्यै मधूद्युतानि[10] भवन्त्यपाꣳ वा एष ओषधीनाꣳ रसोऽपामेवैना ओषधीनाꣳ रसेनाछैति रसेनैनाꣳश्चावयत्यग्नये[11] धामछदे ऽष्टाकपालं 10 15

---

1) P auffällig उत् । ईरयंतां । 2) P वर्षयत । 3) M 3 दस्रा 4) P सृज । 5) P ते । 6) Diesen Vocativ s. auch oben 1, 4, 2; desgl. TS 2, 4, 9, 3. 7) M 3 इत्यङ्ह्वयत्य° 8) Hg (u. A) चावयति; W u. M 3 चावयंति 9) M 3 वसव्या 10) W मधूद्युतानि; M 3 मधूतयूतानि 11) Hg, (A) u. M 3 चावयत्य°

निर्वपेन्मारुतꣳ सप्तकपालꣳ सौर्यमेककपालꣳ वृष्टिकामꣳ याजयेद्-
द्यौर्वा इतो वृष्टिमीट्टे मरुतोऽमुतश्चावयन्ति[1]ताꣳ सूर्यो रश्मि-
भिर्वर्षत्येते वै वृष्ट्याः प्रदातारस्तानेव भागधेयेनोपासरत्तेऽसै वृष्टिं
प्रयच्छन्ति सृजा वृष्टिं दिव आङ्गिरः समुद्रं पृणेतीमाश्चैवामूꣳश्च[2] सम-
स्राडाभिरमूरडेति ये देवा दिविभागाः स्थ ये अन्तरिक्षभागा ये पृ-
थिवीभागास्त इदं क्षेत्रमाविशत त इदं क्षेत्रमनुविविशतेतीमानेव
लोकान्वृष्ट्यै संमृशति ॥ ८ ॥

Vgl. TS 2, 4, 9 u. 10 (kârîrîshṭiḥ); Kâṭh. 11, 10.

॥ इति मध्यमकाण्डे चतुर्थः प्रपाठकः ॥

सौम्यं बभ्रुं लोमशं पिङ्गलमालभेत पशुकामः सौमीर्वा ओ-
षधया ओषधयः पशवो यत्सौम्यः प्रत्यक्षमेवास्मै पशुमालभते लो-
मशो भवत्येतद्वै पुष्ट्या रूपं पुष्टिमेवावरुन्द्धे बभ्रुः पिङ्गलो भवति
सोमस्य रूपꣳ समृद्ध्यै यस्त्वैतानामुत्तमो जायेत[3] तꣳ सौमापौष्णमा-
लभेत पशुकामः सोमो वै रेतोधाः पूषा पशूनां प्रजनयिता सोम
एवास्मै रेतो दधाति पूषा पशून्प्रजनयति स्तनꣳ[4] वा एतेषां द्वा
अभिजायेते ऊर्जै तृतीया ऊग्वै पशव ऊर्जैवास्मा ऊर्जं पशूनाप्नो-
वरुन्द्धे चिर्वा एषा सꣳवत्सरस्यान्याꣳपशून्परिविजायत एतद्वै पुष्ट्या

1) Hg, M 3 (u. A) चावयंति 2) B °तीमाꣳश्चैवामूꣳश्च 3) W जायत
4) W स्तेनꣳ

रूपं पुष्टिमेवावरुन्द्धे भागिनीर्वा अन्याः प्रजा अभागा अन्या यदौदुम्बरो यूपो भवत्युभयीरेवैना भागिनीः करोति मासि मासि वा एषोऽवान्तरमन्येभ्यो वनस्पतिभ्यः पच्यत एतद्वै पुष्ट्या रूपं पुष्टिमेवावरुन्द्धे प्राजापत्यं तूपरमालभेत पशुकामः प्राजापत्या वै पशवः प्रजापतिः पशूनां प्रजनयिता तमेव भागधेयेनोपासरत्सोऽस्मै पशून्प्रजनयति योनिर्वै प्रजापतिर्योनिरेव प्रजायते सर्वेषा वा एष पशूनां रूपाणि प्रति पुरुषस्येव श्मश्रूण्यश्वस्येव शिरो गर्दभस्येव कर्णौ शुन इव लोमानि गोरिव पूर्वौ पादावेरिवापरावजः खलु सर्वाण्येव पशूनां रूपाण्यावरुन्द्धे सर्वाण्येनं पशूनां रूपाण्युपतिष्ठन्ते हिरण्यगर्भवत्याधारौ या प्रजापतेः सामिधेनीस्ताः सामिधेनीर्याः प्रजापतेराप्रियस्ता आप्रियो हिरण्यं देयꣳ सप्तुक्त्वाय तार्ण्यं देयꣳ सयोनित्वायाधीवासो देयो यज्ञस्य तेन रूपाण्यावरुन्द्धे एतेन वा उपकेरू रराध ऋध्नोति य एतेन यजते द्वादशधा ह वै स प्राशिचं परिजहार तच द्वादश द्वादश वरान्ददौ यद्द्वादश दीयन्ते तस्यैषा प्रतिमा श्वेतꣳ वायवा आलभेत भूतिकामꣳ याजयेद्वायुर्वै देवानामोजिष्ठः क्षेपिष्ठः स एनं भूत्यै निनयति तदाहुरधृता देवतेश्वरा निर्मृज ईश्वरैनमार्तिं निनेतोरिति तदति सैवैनं भूत्यै निनयति श्वेतꣳ वायवे नियुत्वता आलभेत ग्रामकामꣳ याजयेद्वायुर्वा इमाः प्रजा नस्योता इत्थं चेत्थं च नेनीयते यद्वायवे वायुरे-

---

1) Hier schiebt B ein वै, M 3 वा ein. 2) So Hg, M 3 (u. A); in W °धारौ; desgl. B, ohne Accent. 3) So Hg, M 3; (in A °याधीवासो); (auch Kâṭh. 13, 1 हिरण्यमधोवासः); W °याधिवासो; desgl. B, ohne Accent. 4) So B, ohne Accent; in Hg u. M 3 ऊपकेरू; W ऊपकेरू; Kâṭh. 13, 1 उपकेतू रराध 5) M 3 सैवैनं; W सैवैन; B सवैनं

वासै नस्योता॰ विशं निनयति नियुत्वती याज्यानुवाक्ये भवतो[1] यामसस्मिन्दाधार श्वेतो भवति ब्रह्मणो रूप॰ संमृद्ध्यै श्वेत॰ वायवे नियुत्वता आलभेतामयाविन॰ याजयेत्प्राणो वै वायुः प्राणो हि वा एतस्यापक्रान्तो ऽथैतस्यामयति[2] यद्वायवे वायुरेवासै प्राणं निनयति नियुत्वती याज्यानुवाक्ये भवतः[3] प्राणमस्मिन्दाधार श्वेतो भवति ब्रह्मणो रूप॰ संमृद्ध्यै श्वेत॰ वायवे नियुत्वता आलभेत पशुकाम॰ याजयेत्प्राणो वै वायुः प्राण॰ वा एतत्पशवः प्रतिधावन्ति यद्वर्षेषु वातं प्रतिजिघ्रति यद्वायवे वायुरेवासै पशून्निनयति नियुत्वती याज्यानुवाक्ये भवतः पशूनस्मिन्दाधार श्वेतो भवति ब्रह्मणो रूप॰ संमृद्ध्यै ॥ १ ॥

Vgl. TS 2, 1, 1 (bhûtikâmâdînâṃ çvetâdyâḥ paçavaḥ); Kâṭh. 12, 13 u. 13, 1 a. E.

स्वर्भानुर्वा[4] आसुरः सूर्यं तमसाविध्यत्तस्य देवास्तमो ऽपाघ्नन्यत्प्रथमं तमो ऽपाघ्नन्सावि॰ कृष्णमभवद्द्वितीय॰ सा लोहिनी तृतीय॰ सा बलक्षी यदध्यस्तादपाकृन्तत्सावि॰वेशमभवत्ते ऽब्रुवन्देवपशुमिमं कामायालभामहा इत्यथ वा इयं तर्ह्यृक्षासीद्लोमिका[5] ते ऽब्रुव॰स्तस्मै कामायालभामहै[6] यथास्यामोषधयश्च वनस्पतयश्च जायन्ता इति ता॰ वै तस्मै कामायालभन्त ततो ऽस्यामोषधयश्च वनस्पतयश्चाजायन्त यः प्रजाकामो वा पशुकामो वा स्यात्स एतामवि॰ वशामालभेत प्र प्रजया च पशुभिश्च जायते ऽथो आहुर्यः प्रथमस्तमस्यपहते सूर्यस्य रश्मिर्यूपस्य चषाले वातनोत्सावि॰वेशा भवदिति तदुभयेनैव देवपशुरालभ्यते यद्यस्यास्तज्जन्म[8] यदि वेतरं

1) M 3 भवतो 2) B °श्वैतरस्या° 3) M 3 भवतः 4) So M 3 u. W; Hg (u. A) स्वर्भानु° 5) W लोमीका 6) B °लभामहे 7) M 3 यथास्याम° 8) M 3 u. W यद्यस्या°

तत्कामाय कामायैवाविवेशालभ्यते ऽआग्नेयमजमालभेत वारुणं पेत्वं भूतिकाम॰ याजयेदाग्नेयानि वै पुरुषस्यास्थानि वारुणं मा॰समाग्नेयेनैवास्याग्नेयं निष्क्रीणाति वारुणेन वारुणं भवत्येव सारस्वतीं मेषीमालभेत यो वाचो गृहीत वाग्वै सरस्वती वाचैवास्य वाचं भिषज्यत्यपनद्ती[1] भवति सवैत्वायानधिस्कन्ना[2] समृद्ध्यै श्वेता मल्हा[3] आलभेत ब्रह्मवर्चसकाम आग्नेयीं बार्हस्पत्या॰ सौरी॰ वसन्ताग्नेयी[4] प्रावृषि बार्हस्पत्या॰ शिशिरे सौरी॰ यदाग्नेयी[5] तेजस्त्वयावरुन्द्धे यद्बार्हस्पत्या ब्रह्मवर्चसं तया यत्सौरी रुचं तया चिवृद्वावासा एतत्समृद्धं ब्रह्मवर्चसं दधाति स॰वत्सरं पर्यालभ्यन्ते स॰वत्सरेण वा अन्नाद्यमाप्यते स॰वत्सरेणैवासा आत्मा तेजो ब्रह्मवर्चसं दधाति श्वेता भवति[6] ब्रह्मणो रूप॰ समृद्ध्यै वायव्यामजामालभेत सारस्वतीं मेषीमदित्या अजामभिशस्यमान॰ याजयेद्वायुर्वा एतस्याष्ठीलं गन्धं जनता अनुविहरति यमभिश॰सन्त्येष ३हीद॰ सर्वमुपगच्छति यद्वायवे वायुरेवास्य तं गन्ध॰ सुरभिमकः सूो[8] ऽस्य सुरभिर्गन्धो जनता अनुतिष्ठते वाचा वा एतमभिश॰सन्ति यमभिश॰सन्ति वाक्सरस्वती यत्सारस्वती वाचैवैषा॰[9] वाच॰ शमयत्यप्रतिष्ठितो वा एष यमभिश॰सन्त्यै॰ वा अदितिरियं प्रतिष्ठा यदादित्यास्यामेव[10] प्रतितिष्ठतीन्द्रियेण वा एष वीर्येण व्यृध्यते यमभिश॰सन्तीन्द्रिय॰ वी३र्यं गर्भो यन्नभिणीभवन्तीन्द्रियेणैवैन॰ वीर्येण समर्धयन्ति ॥ २ ॥

Vgl. TS 2, 1, 2; Kâṭh, 12, 13 u. 13, 1.

---

1) So Hg (u. A); s. TS 2, 1, 2, 7; auch Kâṭh. 12, 13 ऽपन्नद्ती; in M 3 u. W °पंनद्ती; B °पनदति 2) M 3 °यानधिस्कन्ना 3) M 3 u. W मलिहा; desgl. B, ohne Accent. 4) B वसंता आग्नेयी 5) W °ग्नेयी 6) Hg, M 3 (u. A) भवंति 7) M 3 अनुवीहरति 8) M 3 स्थो 9) M 3 वाचैवैषा॰ 10) W यदादित्यो स्याम॰; desgl. B, ohne Accent.

देवाश्च वा असुराश्चास्पर्धन्त ते वै समावदेव यज्ञे कुर्वाणा आयन्यदेव देवा अकुर्वत तदसुरा अकुर्वत ते न[1] व्यावृतमगच्छन्ते देवा एतं वामनं पशुमपश्यन्त्ते वैष्णवमालभन्त ततो[2] विष्णुरिमांल्लोकानुदजयत्ततो देवा असुरानेभ्यो लोकेभ्यः प्राणुदन्त ततो देवा अभवन्परासुरा यः सपत्नवान्भ्रातृव्यवान्वा स्यात्स एतं वामनं वैष्णवमालभेतातो वै विष्णुरिमांल्लोकानुदजयद्विष्णोरेवोज्जितिमन्विमांल्लोकानुज्जयति प्रैभ्यो लोकेभ्यो भ्रातृव्यं नुदते विषम इवालभेत विषमानिव ३हीमांल्लोकान्देवा उदजयन्निमानेव लोकानुज्जयतीन्द्रो वै वृत्रमहन्त्स प्राङ्पद्यत स पद्यमाना इन्द्रं सप्तभिर्भोगैः पर्यगृह्णात्तस्माद्विष्वञ्चः पशवो व्युदायन्मूर्धतो वैदेहीरुदायंस्तस्मात्तासां पुरो जन्म पुर ओकस्तासां जघनतः[3] ऋषभो वैदे३हो ऽनूदैत्तमचायदेयं[4] वाव मास्मादंहसो मुञ्चेदिति तमैन्द्रमालभेतामेयं तु पूर्वमजमालभत स वा अग्निनेव वृत्रस्य भोगानपिदध्यादिन्द्रेणेन्द्रियं वीर्यमात्मन्नधत्त यः पाप्मना तमसा गृहीतो मन्येत स एतमैन्द्रमृषभमालभेतामेयं तु पूर्वमजमालभेतामिनेव पाप्मनो भोगानपिदध्यादिन्द्रेणेन्द्रियं वीर्यमात्मन्धत्ता इन्द्रो वै वलमपावृणोत्ततः[5] सहस्रमुदैत्तस्य सहस्रस्यायतः कुभ्र उदैत्तस्मादेतं साहस्री लक्ष्मीरित्याहुर्यश्च वेद यश्च नाथो आहुरिमं वा एष लोकं पश्यन्नभ्युदैत्स समैषत्स एष समीषितः कुभ्र इति तमैन्द्रमालभेत पशुकाम ऐन्द्रा वै पशवा इन्द्रः पशूनां प्रजनयिता तमेव भागधेयेनोपासरत्सो ऽस्मै पशून्प्रजनयति स यदा सहस्रं पशून्गछेद-

---

1) Das न fehlt in W. 2) Hier fügen W u. B ein वै ein. 3) B जघनतरा 4) So corrigirt; Hg, M 3, W नुदैत्त°; (A नुदैत्त°); desgl. B, ohne Accent; Kâṭh. 13, 3 तं सहस्रमनूदैत्; 13, 4 ऋषभं वैदेहमनूद्यंतममन्यत 5) W बलम°; desgl. B, ohne Accent.

यैतꣳ वामनꣳ वैष्णवमालभेतैतस्मिन्वै तत्सहस्रं प्रत्यतिष्ठत्तꣳ तिर्यङ्ङ्व्यैषत्तस्मादेष[1] तिर्यङ्ङिव वीषित[2] एतेन वै स तत्सहस्रं पर्यगृह्णात्तत्सहस्रस्य वा एष परिगृहीत्या अविक्षोभाय देवाश्च वै पितरश्चास्मिꣳल्लोक आसꣳस्तद्यत्किंच देवानाꣳ स्वमासीत्तद्यमो ऽयुवत ते देवाः प्रजापतिमेवोपाधावन्तꣳ प्रजापतिरेतौ[3] मिथुनौ पशू अपश्यदृषभं च वशां च ता आलभत वैष्णववारुणीं तु पूर्वाꣳ वशामालभत तान्वै वरुणेनैव ग्राहयित्वा विष्णुना यज्ञेन प्राणुदतेन्द्रं देवेष्वालभत तेनैष्विन्द्रियाणि वीर्याण्यात्मन्नधत्त यः सपत्नवान्भ्रातृव्यवान्वा स्यात्स एतौ मिथुनौ पशू आलभेत ऋषभं च वशां च वैष्णववारुणीं तु पूर्वाꣳ वशामालभेत वरुणेनैवैनान्ग्राहयित्वा[4] विष्णुना यज्ञेन प्रणुदते ऽथैन्द्रेणेन्द्रियꣳ वीर्यमात्मन्धत्ते ॥ ३ ॥

Vgl. TS 2, 1, 3 (jayakâmâdînâm paçavaḥ) —5; Kâṭh. 13, 3 u. 4.

सावित्रं पुनरुत्सृष्टमालभेत यः पुरा पुण्यः सन्पश्चा[5] पापत्वं गछेत्सविता वै श्रियः प्रसविता तमेव भागधेयेनोपासरत्स एनꣳ श्रियै प्रसुवति पापो वा एष पुरा सन्पश्चा[5] श्रियमश्नुते यः पुरानड्वान्सन्पश्चोक्षत्वं गछति यथैष श्रियमश्नुत एवमेवैनꣳ श्रियं गमयत्योषधीभ्यो वेहतमालभेत प्रजाकामा ओषधीनाꣳ वा एषा प्रियैता[6] वा एताꣳ सूतोः परिबाधन्ता ओषधयः खलु वा एतस्य प्रजामपगूहन्ति यो ऽलं प्रजायै सन्प्रजां न विन्दते ता एव भागधेयेनोपासरत्ता अस्मै प्रजां पुनर्ददत्यापो वा ओषधया आपो ह ३त्येवासत्खनन्ति[7] ता

1) Das Verbum in den Mss. ohne Accent; (nur in A Paroxytonon.) 2) So W; in M 3 वीषित; desgl. B, ohne Accent; Hg विषित; (A विषित). 3) Hg प्रजापतिरेवं तौ; (ebenso A, nur mit ganz corruptem Accent.) 4) W वरुणेनैवं ग्रा॰ 5) B पश्चात् 6) W एषा श्रियै ॥ ता; M 3 प्रीयैता 7) cf. Kâṭh. 13, 4 आपो ऽसत्खनंति

अस्मै प्रजां खनन्ति द्यावापृथिवीये धेनू संमातरा आलभेतान्नकामो यꣳद्यसौ वर्षति तदस्यां प्रतितिष्ठति द्यावापृथिवी वा अन्नस्येशाते ते एव भागधेयेनोपासरत्ते अस्मा अन्नाद्यं प्रयच्छतः स वत्स[1] वायवा आलभेत वायुर्वा अनयोर्वत्सो वायुरिमे प्रदापयति प्रत्ते ह वा इमे दुहे य एवꣳ वेदैन्द्रीꣳ सूतवशामालभेत राजꣳन्यं भूतिकामꣳ याजयेदैतस्या वा अधीन्द्रो ऽजायत स जायमान एतꣳ योनिं निरवर्तयत्सा सूतवशाभवद्यो आहुरेतदेव सकृदिन्द्रियꣳ वीꣳर्यं तेजो जनयित्वा नापरꣳ सूता आशꣳसत सा सूतवशाभवदिन्द्रियेण वा एष वीर्येण व्यृध्यते यो ऽलं भूत्यै सन्न भवत्यैन्द्रो भवतीन्द्रियमस्मिन्दधात्यथ यस्तꣳ विन्देद्यꣳ सूत्वा सूतवशा भवति तमैन्द्रमालभेत तेजस्कामस्तदेवेन्द्रियꣳ वीꣳर्यं तेज आप्नोति सारस्वतीं धेनुष्टरीमालभेत यः क्षेत्रे पशुषु वा विवदेत वाग्वै सरस्वती वाचैवैषाꣳ वाचꣳ वृङ्क्तेꣳ धेनुर्वा एषा सती न दुहे तर्यमेवैषाꣳ[2] वाचं करोति द्यावापृथिवीयां धेनुं[3] पर्योरिणीमालभेत यो राजन्यो ऽभ्यर्धो विशश्चरेद्द्यावापृथिवीभ्यां हि वा एष निर्भक्तो ऽथैषो ऽभ्यर्धो विशश्चरति द्यावापृथिवी एवैनꣳ विशि प्रतिष्ठापयतः पर्योरिणी भवति पर्योरूईव ꣳह्येतद्राष्ट्रꣳ यदभ्यर्धो विशश्चरति द्यावापृथिवी एवैनꣳ विशि प्रतिष्ठाप्य स श्वो भूते वत्सꣳ वायवा आलभेत वायुर्वा अनयोर्वत्सो वा-

---

1) So M 3 (eig. सं वत्सꣳ; dann corrigirt); Hg सवत्सꣳ; desgl. B, ohne Accent; W सं वत्सꣳ; Kâṭh. 13, 5 द्यावापृथिव्यां धेनुम्पर्योरिणीमालभेत — — — एतस्या एवं वायव्यं वत्सं च आलभेत; 13, 7 द्यावापृथिव्यौ धेनू सम्मातरा आलभेत — — एतयोरेव वायव्यं (cod. °व्य) वत्सꣳ च आलभेत 2) So Hg u. M 3; (in A तर्यमꣳ); in W तिर्यमꣳ; desgl. B, ohne Accent; Kâṭh. 13, 6 धेनुर्वा एषा सती न दुहे तस्माद्धेनुष्टर्युच्यते यद्धेनुष्टरी वाचमेवैषां स्तरी करोति 3) So corrigirt; M 3 u. W धेनुं; desgl. B, ohne Accent; Hg धेनूं; (A धेनू).

युरिमौ क्षयौ विशं च प्रदापयति प्रत्तौ ह वा इमौ क्षयौ विशं च दुहे य एवꣳ वेद ॥ ४ ॥

Vgl. TS 2, 1, 5; Kâṭh. 13, 4—7.

आग्नेयमजमालभेत सौम्यं बभ्रुमृषभं पिङ्गलं भूतिकामꣳ याजयेद्बह्वा एवाग्नेय इन्द्रियेण वा एष वीर्येण व्यृध्यते यो ऽलं भूत्यै सन्न भवति यत्सौम्यः स्वयैवास्मै देवतयेन्द्रियꣳ वीर्यमात्मावरुन्द्धे भवत्येव बभ्रुः पिङ्गलो भवति सोमस्य रूपꣳ समृद्ध्यै गोमृगꣳ वाय्वा आलभेताभिशस्यमानꣳ याजयेदपूतो वा एष यमभिशꣳसन्ति वायुर्वै देवानां पवित्रꣳ वायुनवैनं पवित्रेण पुनाति नेव वा एष ग्रामे नारण्ये यमभिशꣳसन्ति नेव खलु वा एष ग्राम्यः पशुर्नेवारण्यस्तस्मादस्यैष देवतया पशूनाꣳ समृद्ध ऐन्द्राग्नमनुसृष्टमालभेत यस्य पिता पितामहः सोमं न पिबेदिन्द्रियेण वा एष वीर्येण व्यृध्यते यस्य पिता पितामहः सोमं न पिबति यदैन्द्र इन्द्रियेणैवैनꣳ वीर्येण समर्धयति देवताभिर्वा एष व्यृध्यते यस्य पिता पितामहः सोमं न पिबति यदाग्नेयो ऽग्निर्वै सर्वा देवता देवताभिरेवैनꣳ समर्धयत्यनुसृष्टो भवत्यनुसृष्ट इव ह्येतस्य सोमपीथो यस्य पिता पितामहः सोमं न पिबति तस्मादस्यैष देवतया पशूनाꣳ समृद्ध्यै त्वाष्ट्रमवलिप्तमालभेत पशुकामस्त्वाष्ट्रा वै पशवस्त्वष्टा पशूनां प्रजनयिता तमेव भागधेयेनोपासरत्सो ऽस्मै पशून्प्रजनयति सौमापौष्णं नपुꣳसकमालभेत पण्डकꣳ याजयेद्यꣳ तूꣳ भ्रूणमजायेत तत्प्रजिज्ञासेतेति वा एतस्य जायमानस्येन्द्रियꣳ वीऽयमपाक्रामत्तदेवास्मा इन्द्रियꣳ वी-

1) So alle Mss. 2) W पंडगꣳ 3) So Hg, M 3 (u. A); in W तुं; desgl. B, ohne Accent.

यैमाम्ब्वा दधाति सोमश्च वा एतस्य पूषा च जायमानस्येन्द्रियꣳ वीर्यमयुवेतामियꣳ वै पूषौषधयः सोमो यत्सौमापौष्णः स्वयैवास्मै देवतयेन्द्रियꣳ वीर्यमाम्ब्वावरुन्द्धे भवत्येव यान्यनवदानीयानि तैर्नैर्ऋतैः पूर्वैः प्रचरन्ति निर्ऋतिगृहीता वा एषा स्त्री या पुꣳरूपा निर्ऋतिगृहीत एष पुमान्यः स्त्रीरूपो निर्ऋत्या एवैनं तेन मुञ्चति न वै नैर्ऋत्याहुतिरग्निमानशे यदङ्गारेषु जुहोति तस्मिन्वदग्नौ जुहोति तदु नꣳ यच्च वा अदः इन्द्रो वृषण्वस्य मेनासीत्तदेनं निर्ऋतिः पाप्मागृह्णात्स यं पाप्मानमपाहत स नपुꣳसको ऽभवद्यः पाप्मना तमसा गृहीतो मन्येत स एतमैन्द्रं नपुꣳसकमालभेत येनैवेन्द्रः पाप्मानमपाहत तेन पाप्मानमपहते ऽथैन्द्रेणेन्द्रियꣳ वीर्यमात्मन्धत्ते प्रजापतिः पशूनसृजत स वा एतमेवाग्ने नपुꣳसकमसृजत तं पशवो ऽन्वसृज्यन्तोथो आहुरेतमेवाग्ने सृष्टं त्वष्ट्रे च पत्नीभ्यश्च नपुꣳसकमालभत तेन प्रजा असृजतेति यः प्रजाकामो वा पशुकामो वा स्यात्स एतं त्वष्ट्रे च पत्नीभ्यश्च नपुꣳसकमालभेत मिथुनꣳ वै त्वष्टा च पत्नीश्च त्वष्टारꣳ वा एतन्मिथुनेऽध्यस्राट् प्रजननाय तन्मिथुनं तस्मादेव मिथुनाद्यजमानः प्रजया च पशुभिश्च प्रजायते ॥ ५ ॥

Vgl. TS 2, 1, 5; Kâṭh. 13, 5.

प्रजापतिः प्रजा असृजत ता एनꣳ सृष्टा अत्यमन्यन्त ता अतिमन्यमाना वरुणेनाग्राहयत्ता वरुणगृहीताः कृष्णः पेत्वो ऽध्यस्कन्दत्तस्यानुहाय पादमगृह्णात्तस्य शफः प्रावृह्यत स एकशितिपाद्भवत्तमचायदेयꣳ वावासां प्रजानामवरुणगृहीतो ऽनेनेमाः प्रजा वरुणा-

---

1) M 3 °दानीयानि 2) M 3 fügt hier ein ही ein. 3) M 3 पुंरूपा 4) B °मपाहते 5) B यासां

न्मुञ्चानीति तꣳ वारुणमालभत तत इमाः प्रजा वरुणात्प्रामुच्यन्त तद्वरुणप्रमोचनीय एवैष यो ज्योगामयावी स्यात्तमेतेन याजयेद्वरुणेन हि[1] वा एष पाप्मना गृहीतो ऽथैतस्य ज्योगामयति यद्वारुणो वरुणादेवैनं तेन मुञ्चत्येकशितिपाद्भवत्येवमिव हि तस्य रूपमासीत्समृद्धै द्वीपे याजयेदेता वै प्रत्यक्षꣳ वारुणीर्यदापः स्वे वा एतद्योनौ प्रत्यक्षꣳ वरुणमवयजति समन्तमापः परिवहन्ति रक्षसामनन्ववायाय वारुणं कृष्णं पेत्वमालभेताभिचरन्यद्वारुणो वरुणेनैवैनं याहयित्वा स्तृणुते कृष्णो भवति तमो वै कृष्णं मृत्युस्तमो मृत्युनैवैनं याहयत्येतद्वै पाप्मनो रूपꣳ यत्कृष्णं कृष्ण इव हि पाप्मा पाप्मनैवैनमभिष्ठुवति तं नियुञ्ज्यात्[2] ॥

पशुं बध्नामि वरुणाय राज्ञा[3] इन्द्राय भागमृषभं केवलो हि।
गावाणि देवा अभिसꣳविशन्तु यमो गृह्णातु निर्ऋतिः सपत्नान् ॥

इत्येताभ्य एवैनं देवताभ्यो निर्याच्य मृत्युवै यमो मृत्युनैवैनं याहयत्यग्नये वैश्वानराय कृष्णं पेत्वमालभेत संमान्तमभिप्रोक्ष्यन्त्सꣳवत्सरो वा अग्निर्वैश्वानरः सꣳवत्सराय समम्यते सꣳवत्सरमेवाप्त्वावरुणं काममभिदुह्यत्याश्विनं कृष्णललाममालभेतानुजावरꣳ याजयेदश्विनौ वै देवानामानुजावरा अश्विना एतस्य देवते य आनुजावरस्ता एव भागधेयेनोपासरत्ता एनमग्रं परिणयतः कृष्णो भवति पाप्मानमेवापहते ललामो भवति मुखतो ऽस्मिꣳस्तेजो दधात्याश्विनं कृष्णललाममालभेतामयाविनꣳ याजयेदश्विनौ वै देवानां भिषजा अश्विना

1) Statt °न हि steht in B वारुणीर्यदाप स्वे वा एतद्योनौ षत्वचꣳ न गृहीतो
2) Hg तन्नि°; (A तन्नि°) 3) P राज्ञे।

एतस्य देवते य आमयावी तां एव भागधेयेनोपासरत्तां एनं भिषज्यतः कृष्णो भवति पाप्मानमेवापहते ललामो भवति मुखतो ऽस्मिꣳस्तेजो दधाति ॥ ६ ॥

Vgl. TS 2, 1, 2 (varuṇagṛhîtâdînâm paçavaḥ); Kâṭh. 13, 2. 7.

छन्दाꣳसि वै यज्ञाय नातिष्ठन्त सं वषट्कारो ऽभिहृत्य गायत्र्याः शिरो ऽछिनत्त्साऽग्नीषोमौ छिन्नाद्यो रसो ऽक्षरत्तां वशा अभवꣳस्तद्देवानाꣳ वशात्वमथो आहुर्वशꣳ वै तां अक्षरꣳस्तां वशा अभवꣳस्तद्देवानाꣳ वशात्वमित्यथो आहुर्वसा वै सासीत्तद्वसा वा एतां इति ततो यः प्रथमो रसः प्राक्षरत्तं बृहस्पतिरुपागृह्णात्सा रोहिणी बार्हस्पत्या ततो ३यो ऽत्यक्षरत्तं मित्रावरुणौ सा द्विरूपा मैत्रावरुणी ततो ३यो ऽत्यक्षरत्तꣳ विश्वे देवाः सा बहुरूपा वैश्वदेवी ततो ३यो ऽत्यक्षरत्तमग्निश्च मरुतश्च सा पृश्निराग्निमारुत्यथो आहुः कृष्णशबलीत्यथ या विप्रुषा आसꣳस्तानीमान्यन्यानि रूपाणि ततो यः प्रथमो द्रप्सः परापतत्तं बृहस्पतिरभिहायाभ्यगृह्णात्स उक्षाभवत्तदुक्षण उक्षत्वमथो आहुर्यद्देवता अनुव्यौक्षत स उक्षाभवत्तदुक्षण उक्षत्वमिति तं ब्राह्मणस्पत्यमालभेत ब्राह्मणं भूतिकामꣳ याजयेद्ब्रह्म वै ब्रह्मणस्पतिर्ब्राह्मणस्पत्यो ब्राह्मणो देवतया स्वयैवास्मै देवतयेन्द्रियꣳ वीर्यमाप्त्वावरुन्द्धे भवत्येवं रोहिणीं बार्हस्पत्यामालभेत ब्रह्मवर्चसकामो ब्रह्म वै बृहस्पतिर्बार्हस्पत्यो ब्राह्मणो देवतया स्वयैवास्मै देवतयाप्त्वा तेजो ब्रह्मवर्चसं दधाति रोहिणी भवति ब्रह्मणो रूपꣳ समृद्ध्यै मैत्रावरुणीं द्विरूपामालभेत पशुकामो ऽहोरात्रे वै मित्रावरुणा अहोरात्रे अनु पशवः प्रजायन्ते तां एव भागधेयेनोपासरत्तां अस्मै पशून्प्रजनयतꣳछन्दसाꣳ वा एष रसꣳछन्दसामेवास्मै रसेन

पशून्धत्ते[1] द्विरूपा भवति समृद्ध्यै वैश्वदेवीं बहुरूपामालभेत यस्मै कामाय कामयेत सर्वा वा एता देवताः सर्वा वा एतद्देवताः[2] काम-माय भागधेयेनोपासरत्ता अस्मै काम॰ समर्धयन्ति यत्कामो भवति छन्दसा॰ वा एष रसश्छन्दसामेवास्मै रसेन दधति बहुरूपा भवति समृद्ध्या आग्निमारुतीं पृश्निमालभेत वृष्टिकामो ऽग्निर्वा इतो वृ- 5 ष्टिमीहे मरुतो ऽमुतश्चावयन्त्येते[3] वै वृष्ट्याः प्रदातारस्तानेव भाग-धेयेनोपासरत्ते ऽस्मै वृष्टिं प्रयच्छन्ति छन्दसा॰ वा एष रसो रसो[4] वृ-ष्टिश्छन्दसामेवास्मै रसेन रस॰ वृष्टिं निनयन्ति पृश्निर्भवति पृश्निमा-तरो हि मरुतो भौमीं कृष्णशबलीमालभेतान्नकाम इय॰ वा अन्नस्य प्रदात्रिका तामेव भागधेयेनोपासरत्सास्मा अन्नाद्यं प्रयच्छति न 10 चर्मोपाहरेयुरनन्न॰ वै चर्मानन्नं कृष्णमनन्नेनैवानन्नमपहत्यान्नाद्यमा-त्मन्धत्ते यद्वै तऊशीर्ष्णश्छिन्नात्तेज इन्द्रिय॰ वीर्यं परापतत्सा बभ्रुर्वशा-भवत्तदेषा वशान्नमेवेतरास्तां ब्राह्मणस्त्यामालभेताभिचरन्ब्रह्म वै ब्रह्मणस्पतिर्ब्राह्मणस्त्यो ब्राह्मणो देवतया यावदेव ब्रह्म तेनैन॰ सर्वेणाभिचरति तेजसैनं प्रच्छिनत्ति स्तृणुत एव बभ्रुर्भवति ब्रह्मणो 15 रूप॰ समृद्ध्यै सौरे॰ श्वेतामालभेत ब्रह्मवर्चसकामो ऽसौ वा आ-दित्यो ब्रह्मवर्चसस्य प्रदाता तमेव भागधेयेनोपासरत्सो ऽस्मै ब्रह्मव-र्चसं प्रयच्छति श्वेता भवति ब्रह्मणो रूप॰ समृद्ध्यै मैचावरुणीं कृष्ण-कर्णीमालभेत[5] वृष्टिकामो ऽहोरात्रे वै मित्रावरुणा अहोरात्रे अनु-

---

1) So Hg, M 3, W (u. A); in B रसे पशून्धत्ते 2) So M 3, in Hg u. W सर्वा वावास्तेतद्देवताः; (A सर्वा वावास्तेतद्देवताः); B सर्वा वास्तै तद्देवताः 3) Hg (u. A) चावयत्य॰ 4) M 3 रसो रसो; in W nur einmal रसो 5) So ist das Adj. betont in Hg und wohl auch W; in M 3 कृष्णकर्णीम॰; (A कृष्णकर्णिम॰)

वर्षत्येतद्वा अहो रूपꣳ यज्ञमुक्ꣳ यत्कृष्णं तद्राचैवैष्टिरूपा भवति समृद्ध्यै ॥ ७ ॥

Vgl. TS 2, 1, 7 u. 8 (brahmavarcasakâmâdînâm paçvantarâṇi); Kâṭh. 13, 8.

इन्द्राय मन्युमते मनस्वते ललाममालभेत संग्रामे मन्युना वै वीर्यं क्रियते इन्द्रियेण जयति वीर्यं चैवैष्विन्द्रियं च जित्यै दधाति ललामो भवति पुरस्ता३द्धयं मन्युरथो ब्रह्मणैवैनान्पुरस्तान्मुखतो जित्यै सꣳश्यतीन्द्रायाभिमातिघ्न ऋषभमालभेत भ्रातृव्यवानभिमातिर्वै पाप्मा भ्रातृव्य इन्द्रियेणैवाभिमातिं पाप्मानं भ्रातृव्यमपहते स इन्द्राय वृचतुरा३ आलभेताभिमातिर्वै पाप्मा भ्रातृव्य इन्द्रियेणैवाभिमातिं पाप्मानं भ्रातृव्यमपहत्य वृचतूरेवाभूत्स्वाराज्यमेव गच्छति वृचतूरिति ३ह्येतमाहुर्यः स्वाराज्यं गच्छत्यैन्द्रामारुतं पृश्निसक्थमालभेत राज३न्यं यामकामꣳ याजयेदैन्द्रो वै राजन्यो देवतया मारुती विडिन्द्रियेणैवास्मै विशमुपयुनक्ति पृश्निसक्थो भवति पश्चादेवास्मै विशमुपदधात्यनुकामस्मै विशमविवादिनीं करोतीन्द्राय वज्रिण ऋषभमालभेत राज३न्यं भूतिकामꣳ याजयेद्यदा वै राजन्यो वज्री भवत्यथ भूतिं गच्छति यद्वज्रिणे वज्रमेवास्मा आधायात्मन विजितिं भूतिं गच्छति स एनं भूत्यै श्रेष्ठ्य इन्द्रे यद्वज्रिणा इति तदस्याभिचरणीयꣳ यं द्विष्यात्तं तर्हि मनसा ध्यायेद्वज्रमेवास्मै प्रहरति स्तृणुत एवं सौम्यं बभ्रुमृषभं पिङ्गलमालभेत यो ऽलꣳ राज्याय सन्नाज्यं न प्राप्नुयात्सोमो वै राजैतस्य देवता सोमो हि राजा स्वामेव

---

1) B वाजयति 2) M 3 वैनां; W वैना 3) So Hg, W (u. A); die andern Mss. °तूरा 4) W पृश्निसं°

देवता॰ राज्यायोपासरत्स्वैनं देवता राज्यं गमयति बभ्रुः पिङ्गलो भवति सोमस्य रूप॰ समृद्ध्यै ॥ ८ ॥

Vgl. TS 2, 1, 3 (cf. oben 2, 5, 3); Kâṭh. 13, 4. 3.

यः प्रथम एकाष्टकायां जायेत यस्तमालप्स्यमानः स्यात्स आग्नेयमष्टाकपालं निर्वपेदग्निर्वै पशूना॰ योनिः स्वादेवैनान्योनेर्निष्क्रीणात्या मेध्याङ्गवितोरग्नये[1] वैश्वानराय द्वादशकपालं मासि मासि निर्वपेत्स॰वत्सरो वा अग्निर्वैश्वानरः स॰वत्सरादेवैनं निष्क्रीणाति स यदा मेधं गच्छेदथेन्द्रायाभिमातिघ्न आलभेताभिमातिर्वै पाप्मा भ्रातृव्य इन्द्रियेणैवाभिमातिं पाप्मानं भ्रातृव्यमपहते ऽश्वो ऽसि यवयुन्नवहो दक्षिणेष वै व्यावृत्तः पाप्मना पाप्मनैवैन॰ व्यावर्तयत्यथ यो ऽपरस्यामेकाष्टकायां जायेत तमेवमेवोत्सृज्याथेन्द्राय वृचतुरा[2] आलभेताभिमातिर्वै पाप्मा भ्रातृव्य इन्द्रियेणैवाभिमातिं पाप्मानं भ्रातृव्यमपहत्य वृचतूरेवाभूत्स्वाराज्यमेव गच्छति[3] वृचतूरिति ३ह्येतमाहुर्यः स्वाराज्यं[4] गच्छति शतमव्युन्नवहा दक्षिणेते वै व्यावृत्ताः पाप्मना पाप्मनैवैन॰ व्यावर्तयन्ति शतं भवन्ति शतायुर्वै पुरुषः शतवीर्या आयुरेव वीर्यमाप्नोति देवाश्च वा असुराश्चास्पर्धन्त ते ऽब्रुवन्ब्रह्मणि[5] नो ऽस्मिन्विजयेथामित्यरुणस्तूपरश्चैचेयो[6] देवानामासीज्ज्येतो[7] ऽयःशृङ्गः शैनेयो[8] ऽसुराणां ते ऽसुरा उत्क्रोदिनो ऽचरन्नराडो ऽस्माकं तूप३रो

---

1) So W; in Hg °त्वामेधाङ्गवितोर°; A °त्वामेधाङ्ग°; M 3 °त्वंमेधाङ्गवितोर°; desgl. B, ohne Accent; Kâṭh 13, 3 संवत्सरादेवैना अधिनिष्क्रीणाभ्यां मेध्याभ्यां भवितोः 2) So Hg, W (u. A); die andern Mss. °तूरा 3) W °मेवागच्छति 4) W यत्स्वा° 5) So M 3; in Hg u. W ब्रह्मणी; desgl. B, ohne Accent; (A ब्रह्मणी); Kâṭh 13, 4 ब्राह्मणा नो मेनी विजयेतामिति 6) So das Verb in Hg u. M 3; (in A विजयेथा°); W °जयेता°; B °जेयेयाता° 7) M 3 श्नेतो 8) M 3 u. W श्नैनेयो; desgl. B, ohne Accent; Hg श्नैनेयो; (A श्नैनेयो).

ऽमीषामिति तौ वै समलभेतां तस्य देवाः क्षुरपवि शिरो ऽकुर्वँस्तस्यान्तरा मृङ्गे शिरो व्यवधाय[1] विष्वञ्च व्यूरुजद्यासुरी वाग्वदँस्तेमां प्राविशद्योदजयत्सा[2] वनस्पतीँस्तस्माद्ब्राह्मणो मृन्मयेन न पिबेदसुर्या वाचात्मानं नेत्सँमृजा इति तद्य एवँ विद्वानमृत्पात्रेपो[3] भवत्युज्जितमेव वाचं उपैति तं ब्राह्मणस्पत्यमालभेताभिचरन्ब्रह्म वै ब्रह्मणस्पतिर्ब्रह्मणस्पत्यो ब्राह्मणो देवतया यावदेव ब्रह्म तेनैनँ सर्वेणाभिचरति तेजसैनं प्रछिनत्ति स्तृणुत एवारुणस्तूपरो भवत्येवमिव हि तस्य रूपमासीत्समृद्ध्यै देवा असुरान्हत्वैभ्यो[5] लोकेभ्यः प्राणुदन्त ते राचीं प्राविशँस्तानश्विना अनुप्राविशतां[6] तौ तमः पर्यगृह्णात्तां एतमाश्विनमज्झिमालभेतां[7] तेन तमो ऽपाघ्नातामँसा एना आदित्यः पुरस्ताज्ज्योतिषा प्रत्यागछत्सँ आभ्यां तमो ऽध्यपाहन्यः[8] पाप्मना तमसा गृहीतो मन्येत सं एतमाश्विनमज्झिमालभेत[9] येनैवाश्विनौ तमो ऽपाघ्नातां तेन पाप्मानमपहते ऽसा एनमादित्यः पुरस्ताज्ज्योतिषा प्रत्यागछति सो ऽस्मात्तमो ऽध्यपहन्ति ॥ ९ ॥

Vgl. TS 2, 1, 3 u. 5 (cf. oben 2, 5, 3); Kâṭh. 13, 3. 4.

असौ वा आदित्यस्तेजोभिर्व्यार्ध्यत तत इदँ सर्वं तमो ऽभवत्स प्रजापतिरेतान्दँश ऋषभानपश्यदेथो आहुरिन्द्रो ऽपश्यदिति तानैन्द्रानालभत[10] तैरस्मिन्निन्द्रियाणि[11] वीर्याण्यात्मन्नधत्तालललामा आलभ्यन्त[12] मुखतो ऽस्मिँस्तैस्तेजो ऽदधाद्यज्ञिशतिककुद उपरिष्टात्तैर्य-

1) So Hg; desgl. B, ohne Accent; (A व्यवधाय); W वावधाय; M 3 विवधाय 2) W योदाजयत; desgl. B, ohne Accent. 3) M 3 °नमृतपात्रेपो 4) B वाचमुपैति 5) W हत्वैभ्यो 6) M 3 अनुप्रा° 7) Hg, M 3 (u. A) °मंजीम° 8) So Hg, M 3; in W तमो ऽध्यप°; s. den Schluss des Cap. 9) Hg u. M 3 °मंजीम°; (A °मंजीम°) 10) W °लभेत 11) Hg °द्रीयाणि 12) So Hg, M 3; (A आलंभ्यंत); W आलभ्यंते; desgl. B, ohne Accent.

ऽश्वेतानूकाशाः[1] पश्चात्तैस्ततो वा अभा आदित्यः सर्वतस्तेजस्व्यभवद्यस्तेजस्कामः स्यात्स एतानैन्द्रानृषभानालभेत यल्ललामा आलभ्यन्ते मुखतो ऽस्मिꣳस्तैस्तेजो दधाति यच्छितिककुद् उपरिष्टात्तैर्यऽश्वेताऽनूकाशाः[3] पश्चात्तैः सर्वत एवैनं तेजस्विनं करोत्यमुष्यैनमादित्यस्य मात्रां गमयति प्राजापत्यं दशमं द्वादशं मासा आलभेत द्वादश मासाः सꣳवत्सरः सꣳवत्सरमेवाप्त्वावरुन्द्धे नवालभ्यन्ते नव वै प्राणाः प्राणाः खलु वै पुरुषे वीर्यं प्राणानस्मिन्वीर्यं दधाति दशालभ्यन्ते दशाक्षरा विराड् विराडिताान्येवेन्द्रियाणि वीर्याण्यात्मन्धित्वेयꣳ विराडꣳस्यामेव प्रतितिष्ठति ॥

नमो महिम्ने चक्षुषे[4] मरुतां पितस्तदहं गृणे ते ।
हुतो याहि पथिभिर्देवयानैरोषधीषु प्रतितिष्ठा शरीरैः ॥
देवानामेष उपनाह[5] आसीदपां पतिर्वृषभ ओषधीनाम् ।
सोमस्य द्रप्समवृणीत पूषा बृहन्नद्रिरभवद्यत्तदासीत् ॥
द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः ।
समानꣳ योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ।
पिता वत्सानां[6] पतिरघ्न्यानामुतायं पिता महतां गर्गराणाम् ।
वत्सो जरायु[7] प्रतिधुक्पीयूष[8] आमिक्षा मस्तु घृतमस्य योनिः ॥
त्वां गावो ऽवृणत राज्याय त्वाꣳ वर्धन्ति[9] मरुतः स्वर्काः ।

---

1) Hg °नुकाशाः; (A °नुकांशाः) 2) B दधात; W दधाद् 3) M 3 °नुकाशाः 4) B चचुषा 5) P उपनाहं इत्युप. नाहः । 6) B वशानां; M 3 वत्सानां 7) B जरायुः 8) P पीयूषः । 9) P वर्धयंति ।

वर्षमन्नचस्य ककुब्भिः[1] शिश्रियाणस्तनो न उर्यो विभजा[2] वसूनि ॥

॥ १० ॥ Vgl. TS 2, 1, 4 (brahmavarcasakâmâdînâm paçavaḥ); 3, 3, 9 (jîrṇavṛshabhâlambhaḥ); Kâṭh. 13, 7. 9.

वायव्यमजमालभेतेन्द्रं वृष्णं वृषभं वा वारुणं पेत्वं भूतिकाम याजयेद्यद्वायवे वायुरेवैनं भूत्यै निनयतीन्द्रियेण वा एष वीर्येण व्यृध्यते यो ऽलं भूत्यै सन्न भवति यदैन्द्रं इन्द्रियेणैवैनं वीर्येण समर्धयति वरुणगृहीतो वा एष यो ऽलं भूत्यै सन्न भवति यद्वारुणो वरुणादेवैनं तेन मुञ्चत्येतानेवाभिचरन्नालभेत यद्वायवे वायुरेवास्मै वज्रं संश्यत्यैन्द्रो वै वज्रं इन्द्रियेण खलु वै वज्रः प्रहियते यदैन्द्रो वज्रमेवास्मै प्रहरति यद्वारुणो वरुणेनैवैनं ग्राहयित्वा स्तृणुते सौर्यं बलक्षं पेत्वमालभेत ब्रह्मवर्चसकामो ऽसौ वा आदित्यो ब्रह्मवर्चसस्य प्रदाता तमेव भागधेयेनोपासरत्सो ऽस्मै ब्रह्मवर्चसं प्रयच्छति यद्बलक्षः समृड्क्तेन यदलूनः समृड्क्तेन यत्पीवा समृड्क्तेन चिवृद्धावास्मा एतत्समृद्धं ब्रह्मवर्चसं दधात्यादित्यं बहुरूपमालभेत यस्याग्निने शस्यमाने सूर्यो नोदियात्पराचीवा एतस्मै व्युच्छन्ति यस्याग्निने शस्यमाने सूर्यो नोदेति यदादि३त्यो ऽमुमेवास्मा उन्नयति बहुरूपो भवति बहूनि वै रश्मीनां रूपाणि रश्मीनामेवास्मै रूपाण्याप्त्वोन्नयत्यग्निर्वै सृष्टो न व्यरोचत ३सो ऽग्नये तेजस्विने ऽजं कृष्णग्रीवमालभत तेन तेजस्व्यभवत्सो ऽकामयत सर्वं च विभवेयमिति ३सो ऽग्नये विभूतिमते

---

1) Die Mss. schwanken; P ककुब्भिरिति कक्प्.भिः।; Hg ककुभिः; M 3 u. A ककुभिः; desgl. B, ohne Accent; W ककुद्भि; vgl. übrigens TS 3, 3, 9, 2; vielleicht wie dort ककुभि zu lesen. 2) P वि। भज। 3) W °त्वाग्निनं-दित्यं (an der Stelle des - steht in der Handschrift ein unleserlicher Buchstabe).

ऽजं कृष्णग्रीवमालभतं तेन सर्वेच ह्यभवत्सो ऽकामयतं सर्वेचा-
पिभागः स्यामितिं ३सो ऽग्नये भागिने ऽजं कृष्णग्रीवमालभतं तेन
सर्वेचापिभागो ऽभवत्सो ऽकामयतं दानकामा मे प्रजाः स्युरितिं
३सो ऽग्नये दा३चे ऽजं कृष्णग्रीवमालभतं तेनासै दानकामाः प्रजा
अभवन्यैः कामयेतं तेजस्वी स्याꣳ सर्वेच विभवेयꣳ सर्वेचापिभागः
स्यांं दानकामा मे प्रजाः स्युरितिं स एतानजान्कृष्णग्रीवानालभेतं
तेजस्वी भवतिं सर्वेच विभवतिं सर्वेचापिभागो भवतिं दानकामा
अस्मै प्रजा भवन्तिं प्राजापत्यं बहुरूपमालभेत पशुकामःं प्राजापत्या
वै पशवःं प्रजापतिः पशूनां प्रजनयितां तमेव भागधेयेनोपा-
सरत्सो ऽस्मै पशून्प्रजनयतिं बहुरूपो भवतिं बहूनि वै पशूनाꣳ रूपा-
णिं पशूनामेवास्मै रूपाण्याव्रुन्द्धेंयामꣳ शुकहरिमालभेत श्रुणत्ꣳ
वा यः कामयेतं यमलोकं ऋध्नुयामित्येतेन वै य३मो ऽमुष्मिंल्लोक
आर्ध्नोद्य३मो ऽमुष्य लोकस्याधिपत्यमानशेंतमेव भागधेयेनोपासरत्स
एनममुष्य लोकस्याधिपत्यं गमयत्येकधा वा एतेन यमलोकं ऋध्नोतिं
परे वयसि[1] यष्टव्यंं ताजग्घि प्रमीयतेंं श्रुणठो वा भवति शुकहरिर्वैष
३ह्येतस्य देवतया पशूनाꣳ समृद्धः ॥ ११ ॥

Vgl. (TS 2, 1, 4.)

॥ इति मध्यमकाण्डे पञ्चमः प्रपाठकः[2] ॥

---

1) B वयसी 2) So Hg, W (u. A); in M 3 मध्यमकांडे पशुबंध प्रपाठकः ॥; in B इति द्वितीयकांडे पशुबंधनाम पंचमः प्रपाठकः ॥

अनुमत्या अष्टाकपालं निर्वपन्ति ये प्रत्यञ्चः शम्यामतिशीयन्ते तन्नैर्ऋतमेककपालमुभौ सह मृतौ[1] कुर्वन्ति नैर्ऋतेन पूर्वेण प्रचरन्ति दक्षिणा परेत्य स्वकृता इरिण एकोल्मुकं निधाय विस्रंसिकायाः काण्डाभ्यां जुहोति ॥ जुषाणा निर्ऋतिर्वेतु स्वाहा ॥ वासः कृष्णं भिन्नान्तं दक्षिणा पुनरेत्यानुमत्या अष्टाकपालेन प्रचरन्ति धेनुर्दक्षिणाथ ये उदञ्चः शम्यामतिशीयन्ते तानुदङ् परेत्य वल्मीकवपामुद्गृह्य जुहुयात् ॥ इदमहममुष्यामुष्यायणस्य क्षेत्रियमवयजे[2] ॥ तत्पुनरपिदधाति ॥ इदमहममुष्यामुष्यायणस्य क्षेत्रियमपिदधामि[3] ॥ श्वो भूते आदित्येभ्यो भुवद्वाजो घृते चरुर्वरो दक्षिणा श्वो भूते आग्नावैष्णव एकादशकपालोऽनड्वान्वामनो दक्षिणा श्वो भूते ऽग्नीषोमीया एकादशकपालो हिरण्यं दक्षिणा श्वो भूते ऐन्द्राग्न एकादशकपालोऽनड्वानृषभो दक्षिणा श्वो भूते आग्नेयो ऽष्टाकपालो माहेन्द्रं [illegible] वासः क्षौमं दक्षिणा ॥ १ ॥

Vgl. TS 1, 8, 1 (ânumatâdayo ऽsthâu yâgâḥ); Kâṭh. 15, 1; VS 9, 35; Çat. Br. 5, 2, 3, 2 flg.; Mân. Çr. 9, 1, 1.

ऐन्द्राग्नमेकादशकपालं निर्वपेदाग्नेन्द्रं वा वैश्वदेवश्चरुः सौम्यः श्यामाकश्चरुर्द्यावापृथिवीया एककपालो वत्सः प्रथमजो दक्षिणा सीरं द्वादशयोगं[4] दक्षिणोष्टारो वानड्वान् ॥ २ ॥

Vgl. TS 1, 8, 1; (cf. oben 2, 6, 1); Kâṭh. 15, 1 a. E.

आग्नेयो ऽष्टाकपालो वारुणो यवमयश्चरुः रौद्रो गावीधुकश्चरुरैन्द्रं दधि धेनुरनड्वाही दक्षिणापां न्ययनादपामार्गानाहरन्ति ता-

---

1) So Hg; (in A मृतौ; desgl. Kâṭh., ohne Accent); M 3 u. W म्रितौ; desgl. B, ohne Accent; s. unten 2, 6, 6. 2) M 3 u. W °यजेत् 3) B °दधाति 4) B द्वादशयोगं

नसंकॢप्तां दक्षिणां परेत्य स्वकृता इरिण एकोल्मुकं निधाय पर्णमयेन सुवेण जुहोति ॥ देवस्य त्वा सवितुः प्रसऽवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामिन्द्रस्यौजसा रक्षोहासि स्वाहा हतꣳ रक्षो ऽवधिष्म[1] रक्षः ॥ वरो दक्षिणा ॥ ये देवाः पुरःसदो अग्निनेत्रा रक्षोहणस्ते नो ऽवन्तु ते नः पान्तु तेभ्यः स्वाहा ये देवा दक्षिणात्सदो यमनेत्रा रक्षोहणस्ते नो ऽवन्तु ते नः पान्तु तेभ्यः स्वाहा ये देवाः पश्चात्सदो मरुन्नेत्रा रक्षोहणस्ते नो ऽवन्तु ते नः पान्तु तेभ्यः स्वाहा ये देवा उत्तरात्सदो मित्रावरुणनेत्रा[2] रक्षोहणस्ते नो ऽवन्तु ते नः पान्तु तेभ्यः स्वाहा ये देवा उपरिषदो ऽवस्वद्वन्तः[3] सोमनेत्रा रक्षोहणस्ते नो ऽवन्तु ते नः पान्तु तेभ्यः स्वाहेदमहꣳ रक्षो ऽभिसमूहाम्यग्ने[4] संदह रक्षः संदग्धꣳ रक्षो ऽग्ने पुरःसदे स्वाहा यमाय दक्षिणात्सदे स्वाहा मरुद्भ्यः पश्चात्सद्भ्यः स्वाहा मित्रावरुणाभ्यामुत्तरात्सद्भ्याꣳ स्वाहा सोमायोपरिषदे ऽवस्वद्वते[5] रक्षोघ्ने स्वाहा रथः पञ्चवाही दक्षिणा ॥ ३ ॥

Vgl. TS 1, 8, 7 (çunâsîryâdikarmacatushṭayam); Kâṭh. 15, 2; VS 9, 35—38; Çat. Br. 5, 2, 4, 5 flg.; Mân. Çr. 9, 1, 1.

अनुमत्यै चरुः राकायै चरुः सिनीवाल्यै चरुः कुहूै चरुर्धात्रे द्वादशकपालः पष्ठौही दक्षिणाग्नावैष्णव एकादशकपाल ऐन्द्रावैष्णवश्चरुर्वैष्णवस्त्रिकपालो वामनो दक्षिणा सौमापौष्ण[6] एकादशक-

1) P अवधिष्म। 2) P मित्रावरुणनेत्रा इति मित्रावरुण.नेत्राः। 3) P वस्वद्वंत इति वस्वत्.वंतः। 4) P रक्षः। अभिसंमूहामीत्यभि.संमूहामि। 5) P अवस्वद्वन इत्यवस्वत्.वने। 6) So Hg, M 3, W (u. A), desgl Kâṭh.; in B सोमाप°, vgl. TS 1, 8, 8.

पाल॑ऽऐन्द्रापौष्णश्चरुः॑ पौष्णश्चरुः॑ श्यामो॑ दक्षिणाग्नये॑ वैश्वानराय॑ द्वादशकपालो॑ वारुणो॑ यवमयश्चरु॑र्हिरण्यं॑ चाश्वश्च॑ दक्षिणा॥ ४॥

Vgl. TS 1, 8, 8 (devikâdikarmashaṭkam); Kâṭh. 15, 3; Çat. Br. 5, 2, 5; Mân. Çr. 9, 1, 1.

बार्हस्पत्यश्चरुर्ब्रह्मणो॑ गृहे॑ शितिपृष्ठो॑ दक्षिणैन्द्र॑ एकादशकपालो॑ राज्ञो॑ गृहे॑ ऋषभो॑ दक्षिणादित्यश्चरुर्महिष्या॑ गृहे॑धेनुर्दक्षिणा॑ नैर्ऋत-श्चरुर्नेखावपूतानां॑ परिवृक्त्या॑ गृहे॑ श्येनी॑[1] वरण्डापस्फुरा॑[2] दक्षिणाग्ने-३यो॑ ऽष्टाकपालः॑ सेनान्यो॑ गृहे॑ हिरण्यं॑ दक्षिणाश्विनो॑ द्विकपालः॑ संग्रहीतुर्गृहे॑ सव३त्यौ॑[3] दक्षिणा॑ सावि३त्रो॑ ऽष्टाकपालः॑ क्षत्तुर्गृहे॑ श्येतो॑[4] दक्षिणा॑ वारुणो॑ यवमयो॑ दशकपालः॑ सूतस्य॑ गृहे॑ बभ्रुर्महा-निरष्टो॑ दक्षिणा॑ मारुतः॑ सप्तकपालो॑ वैश्यस्य॑ ग्रामण्यो॑ गृहे॑ पृश्निः॑ षष्टौही॑ दक्षिणा॑ पौष्णश्चरुर्भागदुघस्य॑ गृहे॑ श्यामो॑ दक्षिणा॑ वैष्णव-स्त्रिकपालस्त्वष्टरथकारयोर्गृहे॑ सर्वायसानि॑[5] दक्षिणा॑ रौद्रो॑ गावीधुक-श्चरुरक्षावापस्य॑ गृहे॑ गोविकर्तस्य॑ चासिर्वालापितस्थो॑[6] दक्षिणा॑ शब-लो॑ वा चित्रवत्सो॑ ऽभिधानी॑ वा केसरपाशा॥ ५॥

Vgl. TS 1, 8, 9 (ratninâṃ havîṃshi); Kâṭh. 15, 4; Çat. Br. 5, 3, 1; Mân. Çr. 9, 1, 1.

इन्द्रायाऽहोमुचा॑ एकादशकपालं॑ निर्वपेदिन्द्राय॑ सुत्राम्णा॑ एका-दशकपालमृषभो॑ दक्षिणा॑ स्वयऽरुणाया॑ अश्वत्थशाखायाः॑ पात्रं॑

---

1) M 3 श्येनी 2) In allen Mss. der Anlaut mit व, desgl. Kâṭh. 15, 4; s. aber Pet. W. s. v. वण्ड 3) So Hg u. B; in M 3 सवत्यौ३; (A सवत्यौ); W सव३त्यो; vgl. सवात्यू in den andern Saṃhitâ's (s. Pet. W. s. v.); auch Kâṭh. 15, 4 सवात्यो दक्षिणा 4) W श्येतो; M 3 श्वेतो 5) So Hg, W, (u. A); in M 3 सर्वायसानि 6) So Hg (u. A); in W चाश्विर्वालापितस्थो; M 3 चासिर्वालापिदस्तो; B वासीर्वाला-पिस्थो; Kâṭh. 15, 4 रौद्रो गावीधुकश्चरुरक्षावापस्य च गोवृक्षस्य च गृहे ऽसिर्वालावृतो वा व्रीयालप्रतिग्रथिता वरासी द्वाम दूषा वत्सतरी वा शबलो दक्षिणा

भवत्यथ[1] श्वेता॰ श्वेतवत्सां दुहन्ति तत्स्वयं मूर्छति स्वयं मथ्यते स्वय॰विलीनमाज्यं भवत्यथ मैत्राबार्हस्पत्य॰ हविर्निर्वपन्ति ये क्षौदिष्टास्तण्डुलास्तं बार्हस्पत्यं चरु॰ श्रृतं[2] कुर्वन्ति तंत्र तत्पात्रमपिधायाज्यमासिच्य ये स्थविष्टास्तण्डुलास्तानावपन्त्युभौ सह श्रृतौ[3] कुर्वन्ति मैत्रेण पूर्वेण प्रचरन्त्यश्वो मैत्रस्य दक्षिणा शितिपृष्ठो बार्हस्पत्यस्याग्नये गृहपतय आपतन्तानामष्टाकपालं निर्वपेत्सोमाय वनस्पतये श्यामाकं चरु॰ सवित्रे प्रसवित्रे सतीनानामष्टाकपालं बृहस्पतये वाचस्पतये नैवारं चरुमिन्द्राय ज्येष्ठाय हायनानामेकादशकपालं मित्राय सत्यस्य पतये नाक्षानां चरु॰ वरुणाय धर्मस्य पतये यवमयं चरु॰ रुद्राय पशुपतये गावीधुकं चरुम् ॥ सविता त्वा प्रसवाना॰ सुवतामग्निर्गार्हपत्यानाम् सोमो वनस्पतीनां बृहस्पतिर्वाचामिन्द्रो ज्यैष्ठ्यानां मित्रः सत्याना॰ वरुणो धर्मणा॰ रुद्रः पशूनां ते देवा असपत्नमिमं॰ सुवध्वममुमामुष्यायणममुष्याः पुत्रममुष्या॰ विशि महते क्षत्राय महते जानराज्याय शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मा॰श्च सत्यश्च ऋतपाश्चात्य॰हा ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्चान्तिमित्रश्च दूरेऽमित्रश्च[4] गण[5] ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्ता च विधर्ता च विधारयः ॥ ६ ॥

Vgl. TS 1, 8, 9 (ratninâṃ havîṃshi) und 10 (devasuvâṃ havîṃshi); Kâṭh. 15, 4 a. E. u. 5; VS 9, 39 u. 40; 17, 80. 82. 83; Çat. Br. 5, 3, 2, 4 flg.; 5, 3, 3, 2 flg.; Mân. Çr. 9, 1, 1 a. E. u. 2.

देवीरापो अपां नपाद्राष्ट्रदाः स्थ राष्ट्रं दत्त स्वाहा देवीरापो अपां

---

1) W schiebt hier मैत्राबार्हस्पत्य ein. 2) W श्रितं; desgl. Mân. Çr. 9, 1, 2; M 3 मृतं; B श्रुतं; Kâṭh. श्रृतं 3) B श्रितौ (desgl. Mân. Çr. 9, 1, 2). 4) P दूरेमित्र इति दूरे॰अमित्रः ।; s. दूरेअमित्र VS 17, 83. 5) P गणः । ऋतः ।

नपाद्राष्ट्रदाः स्थ राष्ट्रममुष्मै दत्त वृषोर्मिरसि वृषसेनो ऽस्यपां पतिरस्यप्रहावरीः स्थ परिवाहिणीः स्थौजस्विनीः स्थ मान्दाः स्थ व्रजक्षितः स्थ सूर्यवर्चसः स्थ सूर्यत्वचसः स्थ मरुतामोजः स्थ वशाः स्थ शक्करीः स्थ विश्वभृतः[1] स्थ जनभृतो ऽपामोषधीनाꣳ रसः श्रविष्टाः स्थ राष्ट्रदाः स्थ राष्ट्रममुष्मै दत्त ॥ ७ ॥

Vgl. TS 1, 8, 11 (abhishekajalamantrâḥ); Kâṭh. 15, 6; VS 10, 2—4; Çat. Br. 5, 3, 4, 4 flg.; Mân. Çr. 9, 1, 2.

देवीरापो मधुमतीः सꣳसृज्यध्वं महि क्षत्रं क्षत्रियाय[2] वन्वानाः ।
अनाधृष्टाः सीदतोर्जस्वतीर्महि[3] वर्चः क्षत्रियाय दधतीः ॥
अपो देवीर्मधुमतीरगृभ्णन्नूर्जस्वती राजसूयायचितानाः ।
याभिर्मित्रावरुणा अभ्यषिञ्चꣳस्ताभिरिन्द्रमनयद्वत्यरातीः[4] ।
अनिभृष्टमसि वाचो बन्धुस्तपोजाः सोमस्य दात्रम् ॥
शुक्रा वः शुक्रेण पुनामि चन्द्रा वश्चन्द्रेण पुनामि ॥
देवो वः सविता पुनात्वच्छिद्रेण पवित्रेण ।
वसोः सूर्यस्य रश्मिभिः ॥
स्वाहा राजसूयाः ॥

सधमादो द्यु३म्न्या ऊर्जा एका अनाधृष्टा[5] अप३स्यो वसानाः[6] ।
पत्न्यासु चक्रे वरुणः सधस्थमपाꣳ शिप्रुर्मातृतमास्वन्तः ॥

---

1) B विश्वंभृत 2) W क्षचीयाय 3) P सोदत । ऊर्जस्वतीः । 4) P असिंचन् । 5) P ऊर्जाः । एकाः । अनाधृष्टाः । 6) So Hg, M 3 (u. A); ebenso TS 1, 8, 12, 1; W वसानाः; desgl. B, ohne Accent.

रुद्र यत्ते गिरिषु नाम तस्मिन्हुतमसि यमेष्टमसि[1] स्वाहा सोमा इन्द्रो वरुणो मित्रो अग्निस्ते देवा धर्मधृतो धर्मं धारयन्तु ॥ ८ ॥

Vgl. TS 1, 8, 12 (abhishekajalasaṃskâramantrâḥ); Kâṭh. 15, 6; VS 10, 1. 4. 6. 7; Çat. Br. 5, 3, 4, 3. 27. 28; 5, 3, 5, 16 flg.; Mân. Çr. 9, 1, 2 a. E. u. 3.

क्षत्रस्य योनिरसि क्षत्रस्योल्बमसि क्षत्रस्य नाभिरस्यावित्तो अग्निर्गृहपतिरावित्ता इन्द्रो वृद्धश्रवा आवित्तौ मित्रावरुणौ धृतव्रता आवित्ते द्यावापृथिवी ऋतावृधा आवित्तः पूषा विश्ववेदा आवित्ता देव्यदितिरावित्तो ऽयमसा आमुष्यायऽणो ऽमुष्याः पुऽत्रो ऽमुष्या विशि महते क्षत्राय महते जानराज्यायैष ते जनते राजा सोमो ऽस्माकं ब्राह्मणानां राजेन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्त्वयायं वृत्रं वध्याऽशत्रुबाधनाः स्थ पात प्राच्यं पात प्रत्यच्यं पात तिर्यच्यं पातान्वच्यं पातोर्ध्वं दिग्भ्य एनं[3] पात मित्रो ऽसि वरुणो ऽसि ॥

हिरण्यवर्णमुषसो व्युष्टा अयःस्थूणमुदितौ सूर्यस्य।
आरोहथो वरुण मित्र गर्तं ततश्चक्राथे अदितिं दितिं[4] च ॥

॥ ९ ॥ Vgl. TS 1, 8 12 (abhishekajalasaṃskâramantrâḥ); Kâṭh. 15, 7; VS 10, 8. 9. 16; Çat. Br. 5, 3, 5, 20 flg.

समिधमातिष्ठ गायत्री त्वा छन्दसामवतु त्रिवृत्स्तोमो रथन्तरꣳ सामाग्निर्देवता ब्रह्म द्रविणमुष्णामातिष्ठ[5] त्रिष्टुप्त्वा छन्दसामवतु पञ्चदशः स्तोमो बृहत्सामेन्द्रो देवता क्षत्रं द्रविणं प्राचीमातिष्ठ जगती त्वा छन्दसामवतु सप्तदशः स्तोमो वैरूपꣳ साम विश्वे देवा देवता विड् द्रविणमुदीचीमातिष्ठानुष्टुप्त्वा छन्दसामवत्वेकविꣳशः स्तोमो वै-

---

1) So alle Mss. (s. TS 1, 8, 14, 2); nur P यमेष्टमिति यम.इष्टम्। 2) P सोमः। 3) B एवैनं 4) M 3 अदीत्यं दीत्यं 5) So Hg, M 3 (u. A); in W °मुर्यम°; desgl. B, ohne Accent.

राज॑[1] साम॑ मित्रावरुणौ देवता॑ पुष्टे॑[2] द्रविणमू॒र्ध्वामा॑तिष्ठ॑ पङ्क्ति॑स्त्वा छन्दसामवतु॑ त्रिण॑वत्रयस्त्रि॑ꣳशौ स्तोमौ॑ शाक्करैवते॑ सामनी॑ बृहस्पतिर्दे॑वता॑ फलं॑ द्रविण॑॑ सोमस्य॑ त्विषिरसि॑ त्विषिमन्नेवे॑व मे त्विषिर्भूयात् ॥

प्रत्यस्तं॑ नमुचेः शिरो॑ ऽवेष्टा॑[3] दन्दशू॑काः[4] ।
मृत्योः पाहि॑ दिदिवः[5] पाहि ॥

॥ १० ॥ Vgl. TS 1, 8, 13 (digvyâsthâpanamantrâḥ) und 14 (abhishekaḥ); Kâṭh. 15, 7; VS 10, 10—15; Çat. Br. 5, 4, 1, 3—7; Mân. Çr. 9, 1, 3.

अग्नये॑ स्वाहा॑ सोमा॑य स्वाहा॑ सवि॑त्रे॑ स्वाहा॑ सर॑स्वत्यै॑ स्वाहा॑ पू॒ष्णे॑ स्वाहा॑ बृहस्पत॑ये स्वाहेन्द्रा॑य स्वाहा॑ घोषा॑य स्वाहा॑ श्लोका॑य स्वाहा॑॑ꣳशाय॑ स्वाहा॑ भगा॑य स्वाहा॑ क्षत्रस्य॑ पत॑ये स्वाहा॑ सोमस्य॑ त्वा द्यु॒म्नेनाग्नेस्तेज॑सेन्द्रस्येन्द्रि॑येण वि॒श्वेषां॑ त्वा देवा॑नां क्रतु॑नाभिषिञ्चा॑मीन्द्रस्य॑ योनि॑रसि॑ जनया॑ति[6] द्यून्पा॑हि[7] ॥

समा॑ववृक्त॒न्नधरा॑गुदक्ता॑[8] अ॒हिं बु३ध्न्य॑मन्वी॑यमानाः[9] ।
ताः पर्व॑तस्य वृष॒भस्य॑ पृ॒ष्ठान्नावो॑ वि॒यन्ति॑ सु॒सिचो॑ न॑ वा॑णीः ॥

इन्द्रस्य॑ व॒ज्रो ऽसि वाजसनिस्त्वा॑याय॑॑[10] वाज॑॑ सेन्मि॑त्रावरुणयोस्त्वा॑[11] प्रशास्त्योः॑ प्रशि॑षा युनज्मि॑ विष्णोः॑ क्रमो॑ ऽसि॑ सपत्नहा॑ मरु॑तां प्र॑-

---

1) P वैराज्यं । 2) Hg पुष्टिं 3) P ॐवेष्टा इत्यव॰ इष्टाः । 4) W दंदशुकाः; Mân. Çr. 9, 1, 3 दंदशुका इति 5) So Hg u. W; desgl. B, ohne Accent; (A दिदिवः); M 3 दीदिवः; TS 1, 8, 14, 1 दिवौका पाहि; Kâṭh. दिवौत्पाह्यग्नये etc. 6) So M 3; vgl. die folgende Anmerkung; Hg u. W जनयाति; (A जनयाति); desgl. B, ohne Accent. 7) So W u. B, ohne Accent; M 3 द्यौन्; Hg द्युन्; (desgl. A, ohne Accent); vgl. VS 10, 17 अति दिवून्पाहि; TS 1, 8, 14, 2 अति दिवस्पाहि; (so auch Kâṭh., ohne Accent). 8) So die Mss.; nur P उदक्ता इत्युत् । अक्ताः ।; s. VS 10, 19; TS 1, 8, 14, 2. 9) P ॐनु । ईयमानाः ।; Hg, W u. M 3 ॰मन्वीयम॰ 10) P त्वया । वर्धं । 11) P वाजं । सेत् । मित्रावरुणयोः ।

सर्वे जयाम्[1] मनः समिन्द्रियेणेष वज्रो वाजसातमस्तेन नो पुचो वाज सेत् ॥ ११ ॥

Vgl. TS 1, 8, 13 (digvyâsthâpanamantrâḥ). 14 (abhishekaḥ). 15 (rathena vijayaḥ); Kâṭh. 15, 7 u. 8; VS 10, 5. 19. 21; Çat. Br. 5, 3, 5, 8 u. 9; 5, 4, 2, 5 flg.; Mân. Çr. 9, 1, 3.

इयदस्यायुरस्यायुर्मे धेहि युङ्क्ष्वि वर्चो ऽसि वर्चो मे धेह्यूर्गस्यूर्जं मयि धेहि मित्रो ऽसि वरुणो ऽसि सदसि समहं विश्वेदेवैर्नमो मात्रे पृथिव्यै मा मां माता पृथिवी हिꣳसीत् ॥

प्रति त्यन्नाम[2] राज्यमधायि स्वां तꣳव वरुणो ऽसुषोत्[3]।
शुचेर्मित्रस्य व्रत्या[4] अभूमामन्महि[5] महदस्य नाम ॥
सर्वे व्राता[6] वरुणस्याभूम नि मित्रयुररतीनतारीत्[7]।
अशूशुभन्त[8] यज्ञिया[9] ऋतेन नि चितो जरिमाणं न आनट् ॥

स्योनासि सुषदा स्योनामासीद सुषदामासीद ॥

निषसाद धृतव्रतो वरुणः पꣳस्त्यास्वा।
साम्राज्याय सुक्रतुः ॥

अग्नये स्वाहा सोमाय स्वाहेन्द्रस्यौजसे स्वाहा मरुतां बलाय स्वाहा ॥

हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्।
नृषद्वरसदसत्सद्व्योमसदब्जा[10] गोजा ऋतजा अद्रिजा ऋतम् ॥

ब्रह्माꣳस्त्वं[11] ब्रह्मासि सवितासि सत्यसवो ब्रह्माꣳस्त्वं[11] ब्रह्मासि मि-

---

1) P जय। आम्। ; aber M 3 u. W जयाम; Kâṭh. 15, 8 जयाम 2) So corrigirt. Die Mss., auch P त्यंनाम; Hg (u. A) त्यन्नाम; vgl. Pet. W. s. v. 3) P असुषोत्। असुसोदित्यसुसोत्। ; M 3 सूषोत्। 4) P व्रत्याः। 5) P अभूम। अमन्महि।; M 3 अभूमा° 6) P व्रातः। 7) So Hg, M 3 (u. A), (desgl. Kâṭh. 15, 8); W मित्रयूर°; desgl. B, ohne Accent; P मित्रयूरिति मित्र.यूः। अरतीन्। अतारीत्। 8) P अशुशुभंत।; desgl. B, ohne Accent. 9) P यज्ञियाः। 10) P अब्जा इत्यप्.जाः। 11) Die ३ als Zeichen der Plutirung fehlt in diesem Falle in den Mss. und ist von mir ergänzt; (im Kâṭh. findet sie sich geschrieben); in Hg soll eine १ über der Linie wohl die Plutirung andeuten; P ब्रह्मन्। त्वं।; s. TS 1, 8, 16, 1.

वृो ऽसि सुशेवो ब्रह्मासीन्द्रो ऽसि सत्यौजा ब्रह्मा३ꣳस्त्वं[1] ब्रह्मासि वरुणो ऽसि विश्वौजाः ॥
एष वज्रस्तेन मे रध्य दिशो अभ्यभूदयम्[2] ॥
प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव।
यस्मै कं जुहुमस्तन्नो अस्तु ॥
असा अमुष्य पु३चो ऽमुष्यासौ पुचः ॥
वयꣳ स्याम पतयो रयीणाम् ॥

॥ १२ ॥ Vgl. TS 1, 8, 15 (rathena vijayaḥ) u. 16 (sarvâiḥ sevyatvam); ferner 1, 8, 10, 2 und 14, 2; Kâṭh. 15, 8; VS 10, 25. 23. 26—28. 24. 20; Çat. Br. 5, 4, 3, 20 flg.; 5, 4, 4, 2 flg.; Mân. Çr. 9, 1, 4.

अपां नप्त्रे स्वाहोर्जो नप्त्रे स्वाहाग्नये गृहपतये स्वाहा ॥ सावि३चो ऽष्टाकपालः श्येनो दक्षिणा सारस्वतश्चरुर्धेनुर्दक्षिणा पौष्णश्चरुः श्यामो दक्षिणा बार्हस्पत्यश्चरुः शितिपृष्ठो दक्षिणैन्द्र एकादशकपाल ऋषभो दक्षिणा वारुणो यवमयो दशकपालो बभ्रुर्महानिरष्टो[3] दक्षिणा त्वा३ष्ट्रो ऽष्टाकपालो ऽꣳसेपाञ्ज्गुष्ठो[4] ऽधिरूढाकर्णो[5] वा दक्षिणाग्नेय३यो ऽष्टाकपालो हिरण्यमष्टापूर्ड[6] दक्षिणा सौम्यश्चरुर्बभ्रुर्दक्षिणा वैष्णवस्त्रिकपालो वामनो दक्षिणाग्नेय३यो ऽष्टाकपालो हिरण्यं दक्षिणा बार्हस्पत्यश्चरुः शितिपृष्ठो दक्षिणैन्द्र एकादशकपाल ऋषभो दक्षिणा वैश्वदेवश्चरुः पिशङ्गो दक्षिणा मैत्रावरु३ण्यामिक्षा वशा दक्षिणाग्नेय३यो ऽष्टाकपालः सौम्यश्चरुः सावित्रो द्वादशकपालो

1) Vgl. die vorige Anmerkung. 2) M 3 अभ्यभूद° 3) So Hg u. W; in M 3 महानिरष्टो; über den Accent in A s. Vorrede; vielleicht doch महानिरष्टो zu betonen. 4) P ऽꣳसेपादित्वꣳसेपात्। 5) So betonen Hg u. W; in M 3 धिरूढाकर्णो 6) So Hg, W (u. A); in M 3 °मष्टापूर्ण; B °मष्टावृड; vgl. अष्टामृड (Epith. zu हिरण्यम्) Kâṭh. 13, 10 (s. Böthl. Wört. Bd. 1, Nachtr.)

बार्हस्पत्यश्चरुरग्नये वैश्वानराय द्वादशकपालस्त्वाऽष्ट्रो ऽष्टाकपालो दक्षिणो रथवाहनवाहो दक्षिणा सारस्वतश्चरुः पौष्णश्चरुर्मैत्रश्चरुर्वारुणश्चरुरादित्ये चरुः क्षैत्रस्य पतये चरुः सभ्यो रथवाहनवाहो दक्षिणा मारुती पृश्निः षष्ठौही गर्भिण्यादित्याजा मल्हा[1] गर्भिणी सवित्रे प्रसवित्रे सतीनानामष्टाकपालो ऽश्विभ्यां पूष्णे[2] एकादशकपालः सरस्वत्यै सत्यवाचे चरुर्दण्ड[3] उपानहौ[4] शुष्कदतिः सा दक्षिणा ॥ १३ ॥

Vgl. TS 1, 8, 16 a. E. u. 17 (saṃsṛpâṃ havîṃshi). 19 (diçâm aveshṭayaḥ paçudvayaṃ sâtyadûtânâṃ havîṃshi ca). 20 (prayujâṃ havîṃshi); Kâṭh. 15, 8 a. E. u. 9; Çat. Br. 5, 4, 5, 6 flg.; Mân. Çr. 9, 1, 5.

॥ इति मध्यमकाण्डे राजसूयो नाम षष्ठः प्रपाठकः ॥

युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियः ।
अग्निं[5] ज्योतिर्निचाय्य पृथिव्या अध्याभरत[6] ॥
युक्तेन मनसा वयं देवस्य सवितुः सवे । 10
स्वर्ग्याय शक्तये ॥
युक्ताय सविता देवान्स्वर्यतो[7] धिया दिवम् ।
बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् ॥

---

1) M 3 जामलिहा; W जामलिहा; desgl. B, ohne Accent; P जामलिहेति जामलिहा । 2) P पूष्णे । ; M 3 पौष्ण 3) P दंडः । 4) W उपानहो; desgl. B, ohne Accent; Kâṭh. उपानहौ 5) P अग्निः । ; Kâṭh. अग्निं 6) P पृथिव्याः । अधि । आ । अभरत् । 7) So die Mss.; P स्वः । यतः । ; (s. TS 4, 1, 1, 1); Kâṭh. द्वर्यतो

युञ्जते मनः ॥

युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक[1] एतु पथ्येव[2] सूरिः।
शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः॥
यस्य प्रयाणमन्वन्य[3] इद्ययुर्देवा देवस्य महिमानमचैतः।
यः पार्थिवानि विममे स एतशो रजाꣳसि देवः सविता महित्वना॥

देव सवितः ॥

इमं मे देव सवितर्यज्ञं प्रणय देवायुवम्[4]।
वसुविदꣳ सचाजितं धनजितꣳ स्वर्विदम्।
ऋचा स्तोमꣳ समर्धय गायत्रेण रथन्तरम्।
बृहन्नायत्रवर्तनि॥

देवस्य त्वा सवितुः प्रसꣳवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे[v] नारिरसि[v] गायत्रेण छन्दसा पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदाभरा[v] वैष्टुभेन छन्दसाभिरसि[v] नारिरसि[v] त्वया वयमग्निꣳ शकेम खनितुꣳ सधस्था[6] आ जागतेन छन्दसा॥

हस्त[7] आधाय सविता बिभ्रदग्निꣳ हिरण्ययीम्।
अग्निं ज्योतिर्निचाय्य पृथिव्या अध्याभरत्॥

आनुष्टुभेन छन्दसा॥ १॥

Vgl. 3, 1, 1. 2. — TS 4, 1, 1 (ukhyo ऽgniḥ; abhryâdânam); Kâṭh. 15, 11 u. 16, 1; VS 11, 1—11; Mân. Çr. 6, 1, 1.

प्रतूर्तꣳ वाजिन्नाद्रव वरिष्ठामनु सꣳवतम्।

---

1) P श्लोकः। 2) P पथ्या. इव।; Kâṭh. पथेव सूरः 3) P अन्ये। 4) P देवायुवमिति। देव। आयुवं। 5) P आ। भर। च॰ 6) P सधस्थ इति सध. स्थे। 7) P हस्ते।

दिवं ते जन्म परममन्तरिक्षे तव नाभिः पृथिव्यामधि योनिरित् ॥

युञ्जाथाꣳ रासभꣳ युवमस्मिन्यामे वृषण्वसू ।
अग्निं भरन्ता[1] अस्मयुम्[2] ॥
योगे योगे तवस्तरꣳ वाजे वाजे हवामहे ।
सखाया[3] इन्द्रमूतये ॥

प्रतूर्वन्नेह्यवक्रामन्नशस्ती रुद्रस्य गाणपत्यान्मयोभूरेहि ॥ उ३र्वन्तरिक्षꣳ वीहि[4] ॥ स्वस्तिगव्यूतिरभयानि कृण्वन्पूषा सयुजा सह ॥ अग्निं पुरीष्यमङ्गिरस्वदाभरोग्निं पुरीष्यमङ्गिरस्वदच्छेमोꣳ ऽग्निं पुरीष्यमङ्गिरस्वद्भरिष्यामः ॥ अन्वग्निः[5] ॥

आगत्य वाज्यध्वानꣳ सर्वा मृधो विधूनुते[6] ।
अग्निꣳ सधस्थे महति चक्षुषा निचिकीषति ॥
आक्रम्य वाजिन्पृथिवीमग्निमिच्छ रुचा त्वम् ।
भूम्या[7] वृत्राय[8] नो ब्रूहि यतः खनेम तꣳ वयम् ॥
द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षꣳ समुद्रो योनिः ।
विक्ष्णाय[9] चक्षुषा त्वमभितिष्ठ पृतन्यतः ॥
उत्क्राम महते सौभगायास्मादास्थानाद्द्रविणोदा वाजिन् ।
वयꣳ स्याम सुमतौ पृथिव्या[10] अग्निं खनन्त[11] उपस्थे अस्याः ॥
उदक्रमीद्द्रविणोदा वाज्यर्वाकः[12] सु लोकꣳ सुकृतं पृथिव्याः ।

---

1) P भरंतः । 2) So corrigirt nach Anleitung von TS 4, 1, 2, 1; VS 11, 13; auch Kâṭh. 16, 1 अस्मयुम्; die Mss. अस्मयुः; auch P अस्मयुरित्यस्म. युः ।; M 3 अस्मयुं; vielleicht अस्मयूं? 3) P संखायः । 4) P वि । हि । 5) P अनु । अग्निः । उषसां । 6) P वि । धुनुते ।; auch W धुनुते; (A धुनुते) 7) P भूम्याः । 8) W u. P वृत्राय । 9) M 3 विक्ष्णाय; P विक्ष्णायेति विक्षाय ।; B विक्षाय 10) P पृथिव्याः । 11) P खनंतः । 12) P वाजी । अर्वा । अकरित्यर्वाकः ।

ततः खनेम सुप्रतीकमग्निꣳ ३ स्वो रुहाणा[1] अधि नाक[2] उत्तमे ॥

आ त्वा जिघर्मि मनसा घृतेन प्रतिक्षियन्तं[3] भुवनानि विश्वा ।
पृथुं तिरश्चा वयसा बृहन्तꣳ व्यचिष्ठमन्नꣳ रभसं दृशानम् ॥
आ विश्वतः प्रत्यञ्चं जिघर्म्यरक्षसा मनसा तज्जुषस्व ।
मयोभूः स्पृहयद्वर्णो अग्निर्नोभिधृषे[4] तꣳन्वा जहेषाणः ॥
परि वाजपतिः ॥
परि त्वाग्ने पुरꣳ वयꣳ विप्रꣳ सहस्य धीमहि ।
धृषद्वर्णं दिवे दिवे हन्तारं भङ्गुरावताम् ॥
त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ।
त्वꣳ वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥

देवस्य त्वा सवितुः प्रसꣳवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां पृथिव्याः सधस्थे अग्निं पुरीषमङ्गिरस्वत्खनामि[5] ज्योतिष्मन्तं त्वाग्ने सुप्रतीकमञ्जस्रेण भानुना दीद्यतꣳ शिवं प्रजाभ्यो ऽहिꣳसन्तं पृथिव्याः सधस्थे अग्निं पुरीषमङ्गिरस्वत्खनामः ॥ २ ॥

Vgl. 3, 1, 3. 4. — TS 4, 1, 2 (mṛdâkrântiḥ) u. 3 a. A. (khananam); Kâṭh. 16, 1—3; VS 11, 12—28; Mân. Çr. 6, 1, 1.

अपां पृष्ठमसि योनिरग्नेः समुद्रमभितः पिन्वमानम्[5] ।
वर्धमानो महा आ[6] च पुष्करे दिवो मात्रया वरिणा प्रथस्व ॥
शंमे च स्थो वंमे च स्थो अछिद्रे बहुले उभे ।
व्यचस्वती सꣳवसेथां भर्तमग्निं पुरीषम् ॥

---

1) P ३स्वरिति स्वः । रुहाणाः । 2) P नाके । 3) So P; M 3 u. Hg क्षीयंतं; (A क्षोयंतं); W क्षियंतं; desgl. B, ohne Accent; Kâṭh. क्षियंतं 4) P नं । अभिधृष इत्यभि.धृषे । 5) P पिन्वमान ।; W पिन्वमाना 6) P महान् । आ ।; Kâṭh. महाꣳ आ

सꣳवसेथाꣳ स्वर्विदा समीची उरसा त्मना।
अग्निं भरिष्यन्ती अन्ना रोचमानमजस्रमित[1] ॥
पुरीष्यो ऽसि विश्वभरा[2] ऽथर्वा त्वा प्रथमो निरमन्थदग्ने ॥
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत।
मूर्ध्नो विश्वस्य वाघतः ॥
तमु त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः।
वृत्रहणं पुरंदरम् ॥
तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम्।
धनंजयꣳ रणे रणे ॥
सीद होतः स्व[3] उ लोके चिकित्वान्त्सादया यज्ञꣳ सुकृतस्य योनौ।
देवावीर्देवान्हविषा[4] यजास्यग्ने[5] बृहद्यजमाने वयो धाः ॥
नि होता होतृषदने विदानस्त्वेषो दीदिवाँ[6] असदत्सुदक्षः[7]।
अदब्धव्रतप्रमतिर्वसिष्ठः सहस्भरः शुचिजिह्नो अग्निः ॥
सꣳसीदस्व महाँ[8] असि शोचस्व देववीतमः।
वि धूममग्ने अरुषं मेध्य सृज प्रशस्त[9] दर्शतम् ॥
जनिष्व[10] हि जेन्यो अग्ने अह्नाꣳ हितो हितेष्वरुषो वनेषु।
दमे दमे सप्त रत्ना दधानो ऽग्निर्होता निषसाद[11] यजीयान् ॥
अयमिह[12] ॥

---

1) P अतः। रोचमानं। 2) B विश्वंभरा 3) P स्वे। 4) P देवावीरिति देव-अवीः। 5) P यजासि। यजसीति यजसि।; W यजात्य° 6) P दीदिवांनिति दीदि-वान्। 7) W सदंचः। 8) P महान्।; M 3 महꣳ 9) P प्रशस्तेति प्र-शस्त। 10) So die Mss.; vgl. TS 4, 1, 3, 4; nur P जनिष्ट।, vgl. RV 5, 1, 5; Kâṭh. 16, 3 जनिष्ट 11) Hg u. W °सादा 12) P अयं। इहं। प्रथमः।

इमꣳ स्तोममर्हते जातवेदसे रथमिव सꣳमहेमा[1] मनीषया।
भद्रा हि नः प्रमतिरस्य सꣳसद्यग्ने सख्ये मा रिषामा वयं तव॥

अयं ते[2] ॥ ३ ॥

Vgl. 3, 1, 5. — TS 4, 1, 3 (khananam); Kâṭh. 16, 3; VS 11, 29—37.

अपो देवीरुपसृजा[3] मधुमतीरयक्ष्माय प्रजाभ्यः।
तासामास्थानादुज्जिहतामोषधयः[4] सुपिप्पलाः[5]॥
सꣳ ते वायुर्मातरिश्वा दधातूत्तानायां[6] हृदयꣳ यद्विकस्तम्।
यो देवानां चरसि प्राणथेन कꣳसै देव वषडस्तु तुभ्यम्॥
सुजातो ज्योतिषा[7] शर्म वरूथमासदत्स्वः।
वासो अग्ने विश्वरूपꣳ सꣳव्ययस्व विभावसो॥
उदु तिष्ठ स्वध्वर[8] स्तवानो देव्या कृपा।
दृशे च भासा बृहता सुशुक्रनाग्ने[9] याहि सुशस्तिभिः॥
ऊर्ध्व ऊ षु ण[10] ऊतये तिष्ठा[11] देवो न सविता।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे॥
सजातो[12] गर्भो असि रोदस्योरग्ने चारुर्विभृता[13] ओषधीषु।
चित्रः शिशुष्परि तमाꣳस्यक्तः[14] प्र मातृभ्यो अधि कनिक्रदज्जाः॥

---

1) P सं। महेम।; W समहेमा 2) P अयं। ते। योनिः। 3) P उप। सृज। 4) P उत्। जिहतां। 5) So M 3; in Hg u. W सुपिप्पलाः; P सुपिप्पला इति सु.पिप्पलाः।; (A सुपिप्पलाः); B सुपिःपलाः 6) P उत्तानाया इत्युत्तानायाः। 7) B schiebt hier सह ein; s. TS 4, 1, 4, 1; in Kâṭh. ohne सह 8) P स्वध्वरेति सु.अध्वर। 9) P सुशुक्रनेति सु.शुक्रना। आ। अग्ने। Kâṭh. सुशुक्राभिरा ग्ने; TS 4, 1, 4, 1 सुशुक्रनिरा ग्ने 10) P ऊर्ध्वः। उ इत्यु। सु। नः। 11) P तिष्ठ। 12) So die Mss.; P स। जातः। 13) P विभृत इति वि.भृतः। 14) B °स्यक्तू; P अक्तः।; Kâṭh. तमोसूक्तः

स्थिरो भव वीड्वङ्ग[1] आशुर्भव वाज्यर्वन् ।
पृथुर्भव सुषदस्त्वमग्नेः[2] पुरीष्यवाहनः ॥
शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः ।
मा द्यावापृथिवी हिꣳसीर्मान्तरिक्षं मा वनस्पतीन् ॥
प्रैतु वाजी कनिक्रदन्नानदद्रासभः[3] पत्वा । 5
भरन्नग्निं पुरीꣳ३ष्यं मा पाद्यायुषः पुरा ॥
वृषाग्निꣳ वृषणं भरन्नपां गर्भꣳ समुद्रियम् ।
अग्ना[4] आयाहि वीतये ॥
ऋतꣳ सत्यमृतꣳ सत्यमग्निं पुरीष्यमङ्गिरस्वज्जरामः ॥ ४ ॥

Vgl. 3, 1, 5. 6. — TS 4, 1, 4 (mṛdâharaṇam); Kâṭh. 16, 4; VS 11, 38—47; Mân. Çr. 6, 1, 1 a. E.

ओषधयः प्रतिगृभ्णीताग्निमेतꣳ शिवमायन्तमभ्यच युष्मान् । 10
व्यस्यन्विश्वा अनिरा[5] अमीवा निषीदन्वो अप दुर्मतिं जहि ॥
ओषधयः प्रतिमोदध्वमेनं पुष्पवतीः सुपिप्पलाः[6] ।
अयꣳ वो गर्भ ऋत्वियः प्रत्नꣳ सधस्थमासदत्[8] ॥
वि पाजसा पृथुना शोशुचानो बाधस्व रिपून्नक्षसो अमीवाः ।
सुशर्मणो बृहतः शर्मणि स्यामग्नेरहꣳ सुहवस्य[9] प्रणीतौ ॥ 15
आपो हि ष्ठा[10] मयोभुवस्ता न[11] ऊर्जे दधातन ।
महे रणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः ।
उशतीरिव मातरः ॥

---

1) P वीड्वङ्ग इति वीड्वङ्गः । 2) P सुषदः । सुसद इति सु. सदः । 3) P नानदन् । 4) P अग्ने । 5) P अनिराः । 6) Hg सुपिप्पलाः; P सुपिप्पला इति सु. पिप्पलाः । 7) P गर्भः । 8) P आ । असदत्; Hg आसदत् 9) M 3 सूहवस्य 10) P स्थ । 11) P तोः । नः ।

तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ।
आपो जनयथा[1] च नः ॥
मित्रः स॰सृज्या[2] पृथिवीं भूमिं च ज्योतिषा सुवः।
सुजातं जातवेदसमयक्ष्माय त्वा स॰सृजामि प्रजाभ्यः ॥
रुद्राः स॰सृज्या पृथिवीं बृहज्ज्योतिः समीधिरे।
तेषां भानुरजस्रा[3] इज्शुक्रो देवेषु रोचते ॥
स॰सृष्टा॰ वसुभी[4] रुद्रैर्धीरैः कर्मꣳ३ण्यां[5] मृदम्।
हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली कृणोतु ताम् ॥
सिनीवाली सुकपर्दा सुकरीरा स्वौपशा[6]।
सा तुभ्यमदिते मह्योखां[7] ददातु हस्तयोः ॥
उखां कृणोतु शक्त्या बाहुभ्यामदितिर्धिया।
माता पुत्र॰ यथोपस्थे साग्निं बिभर्तु गर्भो[8] आ ॥ ५ ॥

Vgl. 3, 1, 6. — TS 4, 1, 4 a. E. u. 5 (ukhânirmâṇam); Kâṭh. 16, 4 u. 5; VS 11, 48—57; Mân. Çr. 6, 1, 2.

मखस्य शिरो ऽसि॰ वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसाङ्गिरस्वदुखे॰ ध्रुवासि॰ पृथिव्यसि॰ धारया[9] मयि प्रजा॰ रायस्पोषं गौपत्य॰ सुवीर्य॰ सजातानस्मै यजमानाय॰ रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वदुखे॰ ध्रुवास्यन्तरिक्षमसि॰ धारया मयि प्रजा॰ रायस्पोषं गौपत्य॰ सुवीर्य॰ सजातानस्मै यजमानायादित्यास्त्वा कृण्वन्तु जागतेन छन्दसाङ्गिरस्वदुखे॰ ध्रुवासि॰ द्यौरसि॰ धारया मयि प्रजा॰ रायस्पोषं

1) P जनयथ। 2) P स॰सृज्येति स॰सृज्य।; so auch weiterhin. 3) P अजस्रः। इत्। 4) P वसुभिः। 5) So B; P कर्मण्या।; Kâṭh. 16, 5 कर्मण्याम्मृदम्; s. TS 4, 1, 5, 2; Hg, M 3, W (u. A) कर्मꣳ३ण्या 6) M3 स्वौपशा; desgl. B, ohne Accent; P स्वौपशेति सु. औपशा।; Kâṭh. स्वौपशा 7) P मह्यि। चा। उखां। 8) P गर्भे। 9) P धारय।

गौपत्यꣳ सुवीर्यꣳ सजातानस्मै यजमानायꣳविश्वे त्वा देवा वैश्वानराः कृण्वन्त्वानुष्टुभेन छन्दसाङ्गिरस्वदुखेꣳध्रुवासिꣳदिशो ऽसिꣳधारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातानस्मै यजमानायादित्या रास्नास्यदितिष्टे बिलं गृभ्णातु[1] ॥

कृत्वाय सा महीमुखां मृन्मयीꣳ योनिमग्नये।
तां पुत्रेभ्यः प्रायच्छददितिः श्रपयानिति ॥

वसवस्त्वा धूपयन्त्वङ्गिरस्वदुꣳरुद्रास्त्वा धूपयन्त्वङ्गिरस्वदादित्यास्त्वा धूपयन्त्वङ्गिरस्वदिन्द्रस्त्वा धूपयत्वङ्गिरस्वद्वरुणस्त्वा धूपयत्वङ्गिरस्वद्विष्णुस्त्वा धूपयत्वङ्गिरस्वद्बृहस्पतिष्ट्वा धूपयत्वङ्गिरस्वददितिष्ट्वा देवी विश्वदेव्यवती पृथिव्याः सधस्थे अङ्गिरस्वत्खनत्ववट[2]ꣳ देवानां त्वा पत्नी- 10
र्देवीर्विश्वदेव्यवतीः पृथिव्याः सधस्थे अङ्गिरस्वद्दधतूखेꣳधिषणा त्वा देवी विश्वदेव्यवती पृथिव्याः सधस्थे अङ्गिरस्वदभीन्द्रामुखे[3]ꣳ मास्त्वा देवीर्विश्वदेव्यवतीः पृथिव्याः सधस्थे अङ्गिरस्वञ्श्रपयन्तूखेꣳ वरुची त्वा देवी विश्वदेव्यवती पृथिव्याः सधस्थे अङ्गिरस्वत्पचतामुखेꣳ जनयस्त्वाछिन्नपचा[4] देवीर्विश्वदेव्यवतीः पृथिव्याः सधस्थे अङ्गिरस्वत्पचन्तूखे ॥ 15

मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसिं।
द्युम्नं चित्रश्रवस्तमम् ॥
देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः।
सुबाहुरुत शक्त्या ॥ 20
उत्तिष्ठ बृहती भवोर्ध्वा तिष्ठ ध्रुवा त्वम्।

---

1) P गृह्णातु। 2) P खनतु। अवट। 3) So corrigirt; Hg °दभीन्धाम°; (in A °दभोधांम°); M 3 u. W °दाभीधांम°; P अभि। इंधां। उखे।; Kâṭh. 16,6 °दभीन्धताम° (s. TS 4, 1, 6, 2). 4) P अछिन्नपचा इत्यछिन्न.पचाः।

अव्यथमाना पृथिव्यांशा[1] दिशा[2] आपृण ॥
मिचैतां[3] त उखां परिदाम्यभित्त्या[4] एषा मा भेदि ॥
वसवस्त्वाछृन्दन्तु[5] गायत्रेण छन्दसाङ्गिरस्वदुषे[6] रुद्रास्त्वाछृन्दन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वदुष आदित्यास्त्वाछृन्दन्तु जागतेन छन्दसाङ्गिरस्वदुषे विश्वे त्वा देवा वैश्वानरा आछृन्दन्त्वानुष्टुभेन छन्दसाङ्गिरस्वदुषे ॥ ६ ॥

Vgl. 3, 1, 7. 8. — TS 4, 1, 5 (ukhânirmâṇam) und 6 (tatsaṃskâraḥ); Kâṭh. 16, 5 u. 6; VS 11, 57—65; Mân. Çr. 6, 1, 2.

आकूतमग्निं प्रयुजꣳ स्वाहा मनो मधामाग्निं प्रयुजꣳ स्वाहा चित्तꣳ[6] विज्ञातमग्निं प्रयुजꣳ स्वाहा वाचो विधृतमग्निं प्रयुजꣳ स्वाहा प्रजापतये मनवे स्वाहाग्नये वैश्वानराय स्वाहा ॥

विश्वो[7] देवस्य नेतुर्मर्तो[8] वुरीत सख्यम् ।
विश्वो राय इषुध्यति द्युम्नꣳ वृणीत पुष्यसे ॥
स्वाहा ॥

मा सु भित्था[9] मा सु रिषो हꣳहस्व वीरयस्व सु ।
अस्र धृष्णु वीरयस्वाग्निश्चेदं[10] करिष्यथः ॥

हꣳहस्व देवि पृथिवि स्वस्तये आसुरी माया स्वधया कृतासि ।
जुष्टं देवेभ्य इदमस्तु हव्यमरिष्टा त्वमुदिहि यज्ञे अस्मिन् ॥

---

1) So Hg, M 3, W (u. A); P पृथिवी । आशाः ।; s. auch TS 4, 1, 6, 3; in B पृथिव्यामाशा wie auch Kâṭh. 16, 6, u. 19, 7; VS 11, 63; so auch unten 3, 1, 8, die Mss. H, Bb u. B. 2) P दिशः । 3) P मिच । एतां । 4) P अभित्थे । 5) P त्वा । आ । छृन्दन्तु । und so auch weiterhin; B छिंदंतु und so auch weiterhin. 6) W चित्तिꣳ; desgl. B, ohne Accent. 7) B विश्वे; s. TS 4, 1, 9, 1. 8) B मर्त्यो 9) P भित्थाः । 10) P च । इदं ।

द्रुवः[1] सर्पिरासुतिः प्रत्नो होता वरेण्यः।
सहस्स्पुत्रो अद्भुतः॥
परस्या[2] अधि सꣳवतो ऽवरं[3] अभ्यातर[4]।
यत्राहमस्मि तँ[5] अव॥
परमस्याः परावतो रोहिदश्व इहागहि।
पुरीष्यः पुरुप्रियो अग्ने[6] त्वं तरा[7] मृधः॥
यदग्ने यानि कानि चा[8] ते दारूणि दध्मसि।
सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य॥
यदत्त्युपजिह्विका यद्व्मो अतिसर्पति[9]।
सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य॥
राचीꣳ राचीमप्रयावं भरन्तो ऽश्वायेव[10] तिष्ठते घासमस्मै।
रायस्पोषेण समिषा मदन्तो ऽग्ने[11] मा ते प्रतिवेशा[12] रिषाम॥
नाभा पृथिव्याः समिधानो अग्निꣳ रायस्पोषाय बृहते हवामहे।
इरंमदं बृहदुक्थꣳ यजत्रं जेतारमग्निं पृतनासु सासहिम्[13]॥
याः सेना अभीत्वरीराव्याधिनीरुगणा[14] उत।
ये स्तेना ये च तस्करास्ताꣳस्ते अग्ने[15] अपिदधाम्यास्ये॥
ये जनेषु मलिम्लवः स्तेनासस्तस्करा वने।
ये कक्षेष्वघायवस्ताꣳस्ते दधामि जम्भयोः॥
दꣳष्ट्राभ्यां मलिम्लून्अग्ने जम्भाभ्यां तस्करं[16] उत।

---

1) So Hg (u. A), nur ohne Accent; P द्रुव इति। द्रु. अव्नः।; M 3 u. W द्रुवव्नः; desgl. B und Mân. Çr. 6, 1, 3, ohne Accent. 2) P परस्याः। 3) P अरवान्। 4) P अभि। आ। तर। 5) P तान्।; B तꣳ 6) W u. B ऽग्ने 7) P तर। 8) P च। आ। 9) Hg, M 3 u. W अत्ति सर्पति 10) P अश्वायेवेत्यश्वाय. इव। 11) P मदंतः। अग्ने। 12) P प्रतिवेशाः। 13) P सासहिं। ससहिमिति स. सहिं। 14) P उगणाः। 15) Dies Wort fehlt in W; M 3 अग्ने 16) P तस्करान्।

हनुभ्या॰ स्तेनान्भगवस्ता॰स्त्वं[1] खाद सुखादितम्[2] ॥
यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः ।
निन्दाद्यो अस्मान्दिप्साच्च[3] सर्वा॰स्तान्मृस्मृसा[4] कुरु॥
उदेषां बाहूनतिरमुद्वर्चो[5] अथो बलम् ।
क्षिणोमि ब्रह्मणामित्रानुन्नयामि[6] स्वं[7] अहम् ॥
सं॰शितं मे ब्रह्म सं॰शित॰ वी३र्यं बलम् ।
सं॰शितं क्षत्रं मे जिष्णु यस्याहमस्मि[8] पुरोहितः ॥
ब्रह्म क्षत्र॰ सयुजा न व्यथेते ब्रह्माह[9] क्षत्रं जिन्वति क्षत्रियस्य।
क्षत्रं ब्रह्म जिन्वति ब्राह्मणस्य यत्समीची कृणुतो वीर्याणि ॥

॥ ७ ॥ Vgl. 3, 1, 9.— TS 4, 1, 9 (agnyutpâdanam) u. 10 (agnidhâraṇam); Kâṭh. 16, 7; VS 11, 66—82; Mân. Çr. 6, 1, 3.

हशानो रुक्म उरुया विभाति दुर्मर्षमायुः श्रिये रुचानः[10] ।
अग्निरजरो ऽभवत्सहोभिर्यदेनं[11] द्यौरजनयत्सुरेताः ॥
नक्तोषासा समनसा विरूपे धापयेते शिशुमेक॰ समीची ।
द्यावाक्षामा रुक्मो अन्तर्विभाति देवा अग्निं धारयन्द्रविणोदाः[12] ॥
विश्वा रूपाणि प्रतिमुञ्चते कविः प्रासावीद्भद्रं[13] द्विपदे चतुष्पदे।
वि नाकमक्रक्षत्सविता[14] वरेण्यो ऽनु प्रयाणमुषसो विराजति ॥
सुपर्णो ऽसि गरुत्मा॰स्त्रिवृत्ते[15] शिरो॰ गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ॰

1) P भगवदिति भग॰वः । तान् । 2) P सुखादितमिति सु॰खादितं ।; Kâṭh. सुखादितान् (s. TS 4, 1, 10, 2). 3) P दिप्सात् । च ।; W दिप्साच्च 4) So Hg, M 3 u. P; (in A मृस्मृसा); W मृस्मृशा; desgl. B, ohne Accent; Kâṭh. मस्मसा; TS मस्मसा 5) B बाहुनातिरम॰; Kâṭh. बाहू अतिरम॰ wie TS 4, 1, 10, 3. 6) P ब्रह्मणा । अमित्रान् । 7) P स्वान् । 8) B जिष्णुर्य॰ 9) P ब्रह्म । अह । 10) B रुचानः । 11) P अभवत् । 12) W धारयं 13) P प्रं । असावीत् । 14) B °मक्षत्स॰ 15) So W; desgl. B und Mân. Çr. 6, 1, 3, ohne Accent; Hg गरुत्मान्स्त्रि॰; (A गरुत्मान्स्त्रि॰); M 3 गरुत्मां त्रि॰; desgl. Kâṭh. (ohne Accent).

स्तोम आत्मा छन्दाꣳस्यङ्गानि यजूꣳषि नाम साम ते तनूर्वामदेव्यꣳ यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः ॥ सुपर्णोऽसि गरुत्मान् दिवं गच्छ स्वः पत ॥ विष्णोः क्रमोऽसि सपत्नहा गायत्रं छन्दा आरोह पृथिवीमनुविक्रमस्व विष्णोः क्रमोऽस्यभिमातिहा त्रैष्टुभं छन्दा आरोहान्तरिक्षमनुविक्रमस्व विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतं छन्दा आरोह दिवमनुविक्रमस्व विष्णोः क्रमोऽसि शत्रूयतो हन्तानुष्टुभं छन्दा आरोह दिशोऽनुविक्रमस्व ॥

अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो[2] अक्शदा[3] रोदसी भानुना भात्यन्तः ॥
अग्ने ऽभ्यावर्तिन्नग्ने अङ्गिरः पुनरूर्जा सह रय्या ॥
आ त्वाहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलत्[4. 5. 6] ।
विशस्त्वा सर्वा वाञ्छन्त्वस्मे राष्ट्राणि धारय ॥
उदुत्तमꣳ वरुण पाशमस्मत् ॥
अग्ने बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान्तमसो[7] ज्योतिषागात्[8] ।
अग्निर्भानुना रुशता स्वङ्गा[9] आ जातो विश्वा सद्मान्यप्राः ॥
हꣳसः शुचिषत् ॥
सीद त्वं मातुरस्या[10] उपस्थे विश्वान्यग्ने वयुनानि विद्वान् ।
मैनामर्चिषा[11] मा तपसाभिशोचीरन्तरस्या[12] शुक्रज्योतिर्विभाहि॥

---

1) P छंद: । 2) P वि । हि । द्धं । द्धः । ; Hg u. W वि हिमिद्धो; desgl. B, ohne Accent; (A विहिमिद्धो); M 3 वीहिमिद्धो; aber cf. RV 10, 45, 4; TS 4, 2, 1, 2; auch Kâṭh. 16,9 वि हीमिद्धो 3) M 3 u. W अचदा; Hg अचदाꣳ; desgl. B, ohne Accent; P अकक्षत् । आ । 4) P त्वा । अहार्ष । ; M 3 हारिषम°; W हरिषम° 5) P अभूः ।; B °भूद्ध्रु°; Hg °भूध्रु°; (A °भूंध्रु°); s. TS 4, 2, 1, 4; Kâṭh. आ त्वा हर्षमंतरभूर्ध्रु° 6) Hg, W तिष्ठावि°; P तिष्ठ । अविचाचलदित्यवि.चाचलत् । 7) P अस्थात् । 8) P ज्योतिषा । आ । अगात् ।; M 3 ज्योतिषागात् 9) P स्वंगा इति सु.अंगः; B स्वर्गा 10) P अस्याः । 11) P मा । एनां । अर्चिषा । 12) M 3 स्वाꣳ; P अस्याः ।

अन्तरग्ने रुचा त्वमुषायाꣳ सदने स्वे ।
तस्यै त्वꣳ हरसा तपञ्जातवेदः शिवो भव ॥
शिवो भूत्वा मह्यमग्ने अथा[1] सीद शिवस्त्वम् ।
शिवाः कृत्वा दिशः सर्वाः स्वꣳ[2] योनिमिहासदः[3] ॥ ८ ॥

Vgl. 3, 2, 1. — TS 4, 1, 10 (agnidhâraṇam) u. 4, 2, 1 (citikshetram; âsandyâm ukhyâgnisthâpanam); Kâṭh. 16, 8; VS 12, 1—17; Mân. Çr. 6, 1, 3.

दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परि जातवेदाः ।
तृतीयमप्सु नृमणा अजस्रमिन्धान[4] एनं जनते[5] स्वाधीः ॥
विद्मा[6] ते अग्ने त्रेधा त्रयाणि विद्मा ते सद्म विभृतं पुरुत्रा ।
विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सꣳ यत आबभूथ ॥
समुद्रे त्वा नृमणा[7] अ३प्स्वन्तर्नृचक्षा ईधे दिवो अग्ना[8] ऊधन् ।
तृतीये त्वा रजसि तस्थिवाꣳसमृतस्य योनौ महिषा अगृभ्णन् ॥
श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः ।
वसुः सूनुः सहसो अप्सु राजा विभात्यग्र[9] उषसामिधानः ॥
उशिक्पावको अरतिः सुमेधा मर्त्येष्वग्निरमृतो[10] निधायि ।
इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन् ॥
अक्रन्ददग्निः ॥
विश्वस्य जज्ञे भुवनस्य राजा[11] रोदसी अपृणाज्जायमानः[12] ।
वीडुं चिदद्रिमभिनत्परायञ्जना यदग्निमयजन्त पञ्च ॥
नक्तोषासा ॥

---

1) P अथ । 2) M 3 सर्वास्वꣳ 3) P इह । आ । असदः । 4) P इंधानः । 5) So die Mss., auch Kâṭh. 16, 9; aber P जरते । in Uebereinstimmung mit RV 10, 45, 1; TS 4, 2, 2, 1; VS 12, 18. 6) P विद्म । 7) P नृ. मनाः । 8) P अग्ने । 9) P अग्ने । 10) P मर्त्वेषु ।; Kâṭh. मर्त्विष्व°; aber M 3 मर्तेष्व° 11) Hg राजा 12) B आपृणा°; P आपृणात् ।

यस्ते अद्य कृणवद्भद्रशोचेऽपूपं[1] देव घृतवन्तमग्ने।
प्र तं नय प्रतरं वस्यो अच्छाभि सुम्नं देवभक्तं यविष्ठ्य[2]॥
आ तं भज सौश्रवसेष्वग्न उक्थ उक्था[3] आभज शस्यमाने।
प्रियः सूर्ये प्रियो अग्नौ[4] भवात्युज्जातेन भिनदद्युज्जनित्वैः॥
त्वामग्ने यजमाना[5] अनु द्यून्दूतं[6] कृण्वाना अयजन्त हव्यैः।
त्वया सहं द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो विवव्रुः॥
अस्तावि अग्निर्नृणां सुशेवो वैश्वानरः[7] ऋषिभिः सोमगोपाः।
अद्वेषे द्यावापृथिवी हुवे देवा धत्त[8] रयिमस्मे सुवीरम्॥ ९॥

Vgl. 3, 2, 2. — TS 4, 2, 2, (tasyâgner upasthânam); Kâṭh. 16, 9; VS 12, 18—29; Mân. Çr. 6, 1, 3.

उदु त्वा विश्वे देवा अग्ने भरन्तु[9] चित्तिभिः।
स नो भव शिवस्त्वं सुप्रतीको विभावसुः॥
प्रेद्धो अग्ने[10] ज्योतिष्मान्याहि शिवेभिरर्चिभिर्दुवस्यन्।
बृहद्भिर्भानुभिर्भासन्मा हिंसीस्तन्वा प्रजाः॥
अक्रन्ददग्निः॥
समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्[11]।
आस्मिन्हव्या[12] जुहोतन॥
प्र प्रायमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः[13]।

---

1) P अपूपं। 2) P यविष्ठ। 3) P उकयं उकथ इत्युकथे उक्थे। 4) Auch P अग्नौ। 5) P यजमानाः। 6) So M 3; desgl. B, ohne Accent; Hg द्यूतं; (A द्यूतं); W द्युतं; P द्युतं। 7) B वैश्वानरो 8) M 3 u. P धत्त; W धत्त; desgl. B, ohne Accent. 9) So Hg in Uebereinstimmung mit TS 4, 2, 3, 1; Kap. S. 25, 1; VS 12, 31; M 3 u. P भरत; desgl. B, ohne Accent; W भरत; Kâṭh. 16, 10 भरतो 10) P प्र। इत्। अग्ने। 11) P बोधयत। अतिथिं।; M 3 °तातिथ्यं; B °तातिथं 12) P आ। अस्मिन्। 13) So Hg u. M 3 in Uebereinstimmung mit RV 7, 8, 4; TS 4, 2, 3, 2; Kap. S. 25, 1; dagegen W बृहद्भाः u. P बृहद्भा इति बृहत्-भाः। in Uebereinstimmung mit VS 12, 34.

अभि यः पूरुं[1] पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः ॥
आपो देवीः प्रतिगृभ्णीत भस्मैतत्स्योनं कृणुध्वꣳ सुरभौ[2] उ लोके ।
तस्मै नमन्तां जनयः सनीडा[3] मातेव पुत्रं बिभृता स्वेनत्[4] ॥
अप्सृग्ने सधिष्टव सौषधीरनुरुध्यसे[5] ।
गर्भः सञ्जायसे[6] पुनः ॥
गर्भो ऽस्योषधीनां गर्भो वनस्पतीनाम् ।
गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि ॥
प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने ।
सꣳगत्य मातृभिष्ट्वं ज्योतिष्मान्पुनरासदः[7] ॥
पुनरासद्य सदनमपश्च पृथिवीमग्ने ।
शेषे मातुर्यथोपस्थे अन्तरस्याꣳ शिवतमः ॥
पुनरूर्जा[8] सह रय्या ॥
बोधा[8] मे अस्य वचसो यविष्ठ मꣳहिष्ठस्य प्रभृतस्य स्वधावः[9] ।
निन्दति त्वो अनु त्वो ववन्द वन्दारुं ते तन्वꣳ वन्दे अग्ने[10] ॥
सं बोधि सूरिर्मघवा वसुदावा वसुपतिः ।

---

1) So P in Uebereinstimmung mit RV 7, 8, 4; Kâṭh. 16, 10; TS 4, 2, 3, 2; VS 12, 34; Hg, M 3 (u. A) पूर्; so auch Kap. S. 25, 1! W पूरु; B पुरं 2) P सुरभौ। 3) P सनीडा इति स.नीडाः। 4) So die meisten Mss.; (Hg स्वेनट्); vgl. TS 4, 2, 3, 2; aber P विभृत। अप्स्वित्यप्.सु। एनत्।; s. VS 12, 35; Kap. S. 25, 1 liest विभृता स्वोनं; Kâṭh. स्विनम; eig. स्वैनम् geschrieben, dann corrigirt. 5) M 3 सं औषधीर°; P सं। औषधीः। 6) So alle Mss.; (desgl. Kap. S. 25, 1; Kâṭh, 16, 10); nur P सन्। जायसे।; vgl. auch VS 12, 36; RV 8, 43, 9; TS 4, 2, 3, 2. 7) P आ। असदः। 8) P बोध 9) M 3 स्वभावः 10) M 3 अग्ने।

युयोऽध्यस्मद्द्वेषाꣳसि यानि कानि च चकृम ॥ १० ॥

Vgl. 3, 2, 2. — TS 4, 2, 3 (cayanârthasya devayajanasya parigrahaḥ; vahner ukhyasya cayanadeçam prati nayanam); Kâṭh. 16, 10; Kap. S. 25, 1; VS 12, 31—43; Mân. Çr. 6, 1, 4.

अपेत वीत वि च सर्पतातो ये ऽत्र स्थ[1] पुराणा ये च नूतनाः।
अदादिदꣳ यमो ऽवसानं पृथिव्या[2] अक्रन्निमं पितरो लोकमस्मै ॥ 5

अग्नेर्भस्मास्यग्नेः पुरीषमसि[3] संज्ञानमसि कामधरणं[4] मयि ते कामधरणं भूयात् ॥

अयꣳ सो अग्निर्यस्मिन्त्सोममिन्द्रः सुतं[5] दधे जठरे वावशानः।
सहस्रियꣳ वाजमत्यं न सप्तिꣳ ससवान्त्सꣳस्तूयसे[6] जातवेदः ॥ 10
अग्ने दिवो अर्णमच्छाजिगास्यच्छा[7] देवꣳ ऊचिषे धिष्ण्या ये।
याः परस्ताद्रोचनाः[8] सूर्यस्य याश्चावस्तादुपतिष्ठन्ता[9] आपः ॥
अग्ने यत्ते दिवि वर्चः पृथिव्याꣳ यत्पर्वतेष्वोषधीष्वप्सु।
येनान्तरिक्षमुर्वाततन्थ[10] त्वेषः सं भानुरर्णवो नृचक्षाः[11] ॥
पुरीष्यासो अग्नयः प्रवणेन सजोषसः। 15
जुषन्ताꣳ हव्यमाहुतमनमीवा इषो महीः ॥

---

1) So M 3; in Hg u. W स्थ; in P, A u. B ebenso, nur ohne Accent. 2) P पृथिव्याः। 3) Hg (u. A) सूतं 4) M 3 u. W सहस्रीयं 5) So die Mss.; P सन्। स्तूयसे।; B सूयसे; RV 3, 22, 1; TS 4, 2, 4, 2; VS 12, 47 संन्स्तूयसे; auch Kap. S. 25, 2 संन्स्तूयसे; desgl. Kâṭh., ohne Accent. 6) P अक्। जिगासि। अक्।; M 3 betont जिगास्य॰ 7) P देवान्। 8) B पुरस्ता॰ 9) P उप. तिष्ठन्ते। 10) P उरु। आततन्थेत्या. ततन्थ। 11) W नुचचाः; P नृचचा इति नृ. चचः।; s. TS 4, 2, 4, 3; VS 12, 48; auch Kap. S. 25, 2 नृचचाः; desgl. Kâṭh., ohne Accent.

इडामग्ने पुरुदꣳस सनिं गोः शश्वत्तमꣳ हवमानाय साध[1]।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥
अयं ते॥ चिदसि[v] तया देवतयाङ्गिरस्वद्ध्रुवा सीद[2v] परिचिदसि[v] तया देवतयाङ्गिरस्वद् ध्रुवा सीद[v] चितः स्थ[v] परिचितः स्थोर्ध्वचितः श्रयध्वम्॥
समित[v] सँकल्पेथा[v] सँप्रियौ रोचिष्णू सुमनस्यमानौ।
इषमूर्जमभि स[v]वसानौ ॥
स[v] वां मना[v]सि स[v] व्रता समु चित्तान्याकरम्[3]।
अग्ने पुरीष्याधिपा भव त्वं ना[4] इषमूर्ज[v] यजमानाय धेहि ॥
त्वमग्ने पुरीष्यो रयिमान्पुष्टिमा[5] असि।
शिवाः कृत्वा दिशः सर्वाः स्व[v] योनिमिहासदः[6] ॥
भवतं नः ॥
मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योना अभारुखा[7]।
ता[v] विश्वैर्देवैर्ऋतुभिः स[v]विदानः प्रजापतिर्विश्वकर्मा वि-
मुञ्चतु ॥ ११ ॥

Vgl. 3, 2, 3. — TS 4, 2, 4 (gârhapatyacayanam) u. 5 (âhavanîyacayanârtham bhuvaḥ karshaṇam); Kâṭh. 16, 11; Kap. S. 25, 2; VS 12, 45—51. 53. 57—61; Mân. Çr. 6, 1, 5.

असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि[8] तस्करस्य।
अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥
नमः सु ते निर्ऋते तिग्मतेजो ऽयस्मय[v] विचृता[9] बन्धमेतम्।
यमेन त्वꣳ यम्या[10] स[v]विदानोत्तमे नाके अधि रोहयैनम् ॥

1) W हवमानो वस°; M 3 साध 2) P ध्रुवा। सीद। 3) P आ। अकरं।; Hg (u. A) °करन् 4) P नः। 5) P पुष्टिमानिति पुष्टि. मान्।; Kap. S. schreibt hier (25, 2) auch पुष्टिमं असि; Kâṭh. पुष्टिमा° 6) P इहं। आ। असदः। 7) P योनौ। अभाः। उखा। 8) P स्तेनस्य। इत्या। अनु। इहि। Vgl. TS 4, 2, 5, 4; VS 12, 62. 9) P वि। चृत। 10) So W in Uebereinstimmung mit TS 4, 2, 5, 3; in Hg, M 3 (u. A) यम्या; P यम्या।; so auch VS 12, 63.

यंद्य ते[1] ॥

यं ते देवी निर्ऋतिराबबंन्ध पाशं ग्रीवास्वविचर्त्यम्[2]।
तं ते विध्याम्यायुषो नु मध्ये ऽथा[3] जीवः पितुमद्धि[4] प्रमुक्तः[5] ॥
यदस्य पारे रजसो महश्चिच्चं ज्योतिरजायत।
तन्नः पर्षदति[6] द्विषो ऽग्ने वैश्वानर॥
स्वाहा[7] भूत्यै नमः ॥
निवेशनः संगमनो वसूना॰ विश्वा रूपाण्यभिचष्टे शचीभिः।
देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम् ॥
येन देवा ज्योतिषोर्ध्वा उदायन्येनादित्या वसवो येन रुद्राः।
येनाङ्गिरसो महिमानमानशुस्तेन यन्तु यजमानाः स्वस्ति ॥
पूषा युनक्तु सविता युनक्तु बृहस्पतिर्वो युनक्तु।
अग्नेस्तेजसा सूर्यस्य वर्चसा ॥
सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक्।
धीरा देवेषु सुम्नया ॥
युनक्त सीरा वि युगा तनोत कृते योनौ वपतेह बीजम्।
गिरा च श्रुष्टिः[8] सभरा[9] असन्नो नेदीया[10] इत्सृण्यः पक्वमायत[11] ॥
लाङ्गलं पवीरवं॰ सुशेवं॰ सोमपित्सरु[12]।
उदिद्वपतु गामविं[13] प्रस्थावद्रथवाहनं पुरुष्यं॰ च पीवरीम् ॥

1) P यत्। अद्य। ते। घोरे। आसन्। 2) So M 3; Hg °चर्त्तिं; W °चर्त्तिं; P अविचृत्यमित्यवि.चृत्यं।; Kap. S. 25, 3 °चृत्यं; Kâṭh. °चर्त्यम् 3) P अथ। 4) P पितुम्। अद्धि।; M 3 °मद्धि 5) W प्रयुक्तः 6) So im Anschluss an P पर्षत्। अति।; Hg परिषद्°; M 3 (u. A) परिषद्°; W u. B, ohne Accent. So auch Kap. S. 25, 3; aber vgl. TS 4, 2, 5, 2. 7) B सृष्टि°; W स्रुष्टिः 8) P संभरा इति सं. भराः। 9) P असत्। नः। 10) P नेदीयः। 11) P आ। अयत्।; Kap. S. °मेयात 12) P सोमपित्सर्वीति सोमपित्.सरु।; Hg सोमपित्सरु; (A सोमपित्सरु); M 3 सोमपित्सरी; B सोमपिक्करु; s. VS 12, 71; Kâṭh. 16, 12; anders TS 4, 2, 5, 6. 13) M 3 गामव्यं

शुनं॑ सुफा॑ला[1] वितुदन्तु भूमिं॑ शुनं॑ कीनाशो अभ्येतु वाहैः॑ ।
शुनासीरा हविषा तोशमाना[2] सुपिप्पला[3] ओषधीः कर्तनास्मै॑ ॥
शुनं॑ नरो लाङ्गलेनानुड्वाङ्भिर्गः[4] फालैः॑ सीरपतिर्मरुद्भिः॑ ।
पर्जन्यो बीजमीरयानो धिनोतु शुनासीरा कृणुतं धान्यं॑ नः ॥
शुनासीरा प्रकृषतं कृणुतं धान्यं॑ बहु॑ ।
भूमिरियमुत्तियवती तां फाला[6] उपजिघ्नतु ॥
घृतेन सीता मधुना समज्यता॑ विश्वैर्देवैरनुमता मरुद्भिः॑ ।
ऊर्जो॑ भागं॑ मधुमत्संव्वमानास्सान्तसीते पयसाभ्यावव॑र्त्स्व[7] ॥
उद्यो॑जनमक्तर्यामसोषां[8] खुग३स्य॑ शंवम् ।
अष्ट्रां तांडं प्रतीनाहा॑ उभे॑ मरुद्भ्यो॑ युजे ॥
उदस्थान्नो॑जिदश्वजिद्धिरण्यजित्सूनृतया परीवृतः[9]॑ ।
एकचक्रेण सविता॑ रथेनोर्जो॑ भागं॑ पृथिव्या[10] यात्यापृणन् ॥
इमामिन्द्र हस्तच्युतिं॑ सच्युतिं॑ जघनच्युतिम् ।
संसूतिमिन्द्र[11] संधितिमूर्जे॑ संपीतिमुत्कृषे[12] ॥
उष्टारयोः पील्वृयोरथो[13. 14] आबन्धनीययोः ।
सर्वेषा॑ विश्न वो नाम वाहाः॑ कीलालपेशसः ॥
विमुच्यध्वमध्वा[15] देवयाना अंतारिष्टं तमसस्पारमस्य॑ ।
ज्योतिरापाम ॥ १२ ॥

Vgl. 3, 2, 4. — TS 4, 2, 5 (âhavanîyacayanârtham bhuvaḥ karshaṇam); Kâṭh. 16 12; Kap. S. 25, 3; VS 12, 62—71. 73; Mân. Çr. 6, 1, 5.

1) P सुफालाः । 2) P तीषमाना ।; vgl. aber auch AV 3, 17, 5. 3) P सुपिप्पला इति सु पिप्पलाः । 4) P कर्तन । अस्मै । 5) W भागः 6) P फालाः । 7) P पयसा । अभि । आ । ववृत्स्व । 8) So betont W; M 3 ऊर्त् व्यौजन°; in Hg उर्व्यौजन°; auch P उर्व्यौजनमित्युत् व्यौजगम् । (A उर्व्योजन° s. Vorr.) 9) So Hg, M 3 (u. A); W परिवृ°; B परिवृतः; P परिवृत इति परि वृतः । 10) P पृथिव्याः । 11) W °मिन्द्रे 12) B सणीतिम° 13) So Hg; M 3 u. W; nur P betont पील्वयोः । (und A पोल्वयोर°; s. aber Vorr.) 14) P अथो इत्यथो । 15) P अध्वाः ।

या ओषधयः प्रथमजा देवेभ्यस्त्रियुगं पुरा।
मन्वे[1] नु[2] बभ्रूणामहꣳ शतं धामानि सप्त च॥
शतꣳ वो अग्ने धामानि सहस्रमुत वो रुहः।
अथा[3] शतक्रतो यूयमिमं मे अगदं कृत॥
पुष्पवतीः प्रसूवरीः फलिनीरफला उत। 5
अश्वा इव सजित्वरीर्वृषः पारयिष्णवः॥
ओषधीरिति मातरस्तद्वो देवीरुपब्रुवे।
रपाꣳसि विप्रुषीरित रपश्चातयमानाः॥
अश्वत्थे वो निषदनं पर्णे वो वसतिः कृता।
गोभाजा[4] इत्किलासथ[5] यत्सनवाथ[6] पूरुषम्[7]॥ 10
यदोषधयः सꣳगच्छन्ते राजानः समिता इव[8]।
विप्रः स उच्यते भिषग्रक्षोहामीवचातनः॥
निष्कृतिर्नाम वो माताथा त्वमसि सꣳकृतिः॥
सराः[10] पतत्रिणीः स्थन[11] यदामयति निष्कृत॥
अश्वावतीꣳ[12] सोमवतीमूर्जयन्तीमुदोजसम्। 15
आयुषि[13] सर्वा[14] ओषधीरस्मा अरिष्टतातये॥
यदिमा वाजयन्नहमोषधीर्हस्त[15] आदधे।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा॥

---

1) So M 3, W u. P; in Hg (u. A) मन्वे 2) M 3 नू 3) P अथ। 4) P गोभाज इति गो-भाजः। 5) P किल। असथ। 6) So die Mss.; (desgl. Kâṭh. 16, 13); P सनवथ। 7) So M 3, (A) u. B; in Hg u. W पुरुषं; P पूरुषं। पुरुषमिति पुरुषं। 8) P समिता इवेति समिता-इव। 9) P कविः। 10) Hg u. W सरां:; (A सरा:); desgl. B, ohne Accent; M 3 सरा; P सुरा:; s. TS 4, 2, 6, 2; Kap. S. 25, 4 सुरा:; Kâṭh. 16, 13 सरा: 11) So M 3 u. P; in Hg, (A), W u. B स्तन; Kâṭh. 16, 13 स्थ 12) P अश्वावतीं। अश्ववतीमित्यश्व-वतीं। 13) P आ। अयुचि।; Hg आ युंचि; (A आयुचि); W आयुंचि; M 3 आयुंषि 14) P सर्वाः। 15) P हस्ते।

उ॒ष्मुषा॑[1] ओषधीनां गावो गोष्ठादिवेरते[2]।
धन॑ सनिष्यन्तीनामात्मानं तव पूरुष[3] ॥
अति॑ विश्वाः परिष्ठाः स्तेन इव व्रजमक्रमुः ॥
ओषधयः प्राचुच्यवुर्यत्किंच तऽन्वो रपः ॥
यास्त आविविशुरात्मान॑ या आतस्थुः परुः परुः।
ताँस्ते यक्ष्म॑ विबाधन्तामुयो मध्यमशीरिव ॥
साक॑ यक्ष्म प्रपत चाषेण किकिदीव्ना[4]।
साक॑ वातस्य ध्राज्या साकं नश्य निहाकया ॥
अन्या वो अन्यामवत्वन्यान्यस्या उपावत।
ताः सर्वाः स॑विदाना ओषधयः प्रावत वाचं मे ॥
याः फलिनीर्या अफला अकोशा याश्च कोशिनीः।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्व॑हसः ॥
अवपतन्तीरवदन्दिव[5] ओषधयस्परि।
यं जीवमश्नवामहे न स रिषाति पूरुषः[6] ॥
दिवं ब्रूमो नक्षचाणि भूमि॑ यक्षाणि[7] पर्वतान्।
समुद्रान्नद्यो[8] वेशन्ता॑स्ते[9] नो मुञ्चन्त्व॑हसः ॥
ब्रूमो राजान॑ वरुणं धातारमुत पूषणम्।
त्वष्टारमग्नीयं[10] ब्रूमस्ते नो मुञ्चन्त्व॑हसः ॥ १३ ॥

Vgl. TS 4, 2, 6 (oshadhivâpaḥ); Kâṭh. 16, 13; Kap. S. 25, 4; VS 12, 75—91; Mân. Çr. 6, 1, 6.

---

1) P उ॒ष्माः।; in Hg उष्मा ohne Accent. 2) P इव। ईरते। 3) W u. B पुरुषः; auch P पुरुषः। पुरुष इति पुरुषः। 4) So Hg, M 3 u. P; (A किकिदीव्या); W किकिदीव्या 5) P दिवः। 6) W पुरुषः 7) So P; in Hg यक्षाणि; (A यंकक्षाणि); M 3 यक्ष्शानि; W यक्ष्शाणि; B यच्याणि 8) Hg u. W नद्यो; (A नद्यो) 9) So Hg; desgl. B, ohne Accent; P वेशंतान्। ते।; M 3 वेशंता॑स्ते; W वशंता॑स्ते 10) So Hg u. M 3; (in A °मयीयं); B °मग्नियं।; P अग्नियं।; W मग्नियं

मा नो हिꣳसीज्जनिता[1] यः पृथिव्या[2] यो दिवꣳ सत्यधर्मा
व्यानट्।
यश्चापश्चन्द्राः प्रथमो जजान कस्मै देवाय हविषा विधेम॥
अभ्यावर्तस्व पृथिवि[3] यज्ञेन पयसा सह।
वपां ते अग्निरिषितो अरोहत्॥
अग्ने यज्ञुक्रꣳ यज्ञन्द्रꣳ[4] यत्पूतꣳ यच्च यज्ञियम्।
तद्देवेभ्यो भरामसि॥
इषमूर्जमहमित आदि घृतस्य[5] धारां महिषस्य योनिम्।
आ नो गोषु विशत्वोषधीषु जहामि सेदिमनिराममीवाम्[6]॥
कामं कामदुघे धुक्ष्व प्रजाभ्या[7] ओषधीभ्यः।
इन्द्रायाग्नये पूष्णे मित्राय वरुणाय च॥
अग्ने तव श्रवो वयो महि भ्राजन्यर्चयो विभावसो।
बृहद्भानो शवसा वाजमुक्थ्यं दधासि दाशुषे कवे॥
पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना।
पुत्रो मातरा विचरन्नुपावस्योभे[8] पृणासि रोदसी॥
इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य।
स दर्शतस्य वपुषो विराजसि पृणक्षि सानसिꣳ रयिम्॥
ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः।
त्वे एषः[9] संदधुर्भूरिवर्पसश्चित्रो वामजाताः॥

1) P हिꣳसीत्। जनिता।; B हिꣳसीर्ज्जनिता; auch Kap. S. हिंसोर्जनिता 2) P पृथिव्याः। 3) So Hg u. A; in M 3, W, B u. P पृथिवी 4) B शुक्रꣳ 5) B आदिर्घृतस्य; Kâṭh. 16, 14 आवृतस्य 6) M 3 u. W °मनीराम° 7) P प्रजाभ्यः। 8) So das Verb betont in W; P उप। अवसि। आ। उभे इत्युभे।; aber Hg u. M 3 °नुपावस्य°; cf. TS 4, 2, 7, 3. 9) So Hg u. W, d. h. wohl त्वे। आ। इषः।; (A त्व एष); M 3 त्व एकः; P त्वे इति त्वे। इषः।; in TS u. VS 12, 108 त्वे इषः; Kap. S. ते विश्वे; Kâṭh. त्वे विश्वे

ऋतावानं महिषं विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जनाः[1]।
श्रुत्कर्णं सप्रथस्तमं त्वा गिरा दैवं मानुषा युजा[2] ॥
इष्कर्तारमध्वस्य प्रचेतसं क्षयन्तं राधसो महः।
रातिं वामस्य सुभगां महीमिषं दधासि सानसिं क्रतुम् ॥
आपायस्व समेतु ते विश्वतः सोम वृष्ण्यम्[3]।
भवा[4] वाजस्य संगथे ॥
सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः।
आपायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व ॥

॥ १४ ॥ Vgl. 3, 2, 5. — TS 4, 2, 7 (loshṭakshepâdikam); Kâṭh. 16, 14; Kap. S. 25, 5; VS 12, 102—113; Mân. Çr. 6, 1, 6.

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः[5]।
स बुध्न्या[6] उपमा[7] अस्य विष्ठाः[8] सतश्च योनिमसतश्च विवः ॥
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
अद्भ्यः संभृतः पृथिव्यै[9] रसाच्च विश्वकर्मणः समवर्तताधि।
तस्य त्वष्टा विदधद्रूपमेति तत्पुरुषस्य देवमाजानमग्रे[10] ॥
द्रप्सश्चस्कन्द ॥

---

1) W पुरोजनाः 2) So Hg, M3, W (u. A); auch P गिरा। दैवं। मानुषा। युजा।; B गिरा दे प्रचेतसं वं अमानुषा युजा 3) So B (ohne Acc.); in Hg, M3, P und wohl auch W वृष्णिं; (A वृष्णिं) Vgl. die verwandten Sâmbîtâ's. 4) P भव। 5) P वेनः। आवरित्यावः।; W आवः 6) W बुध्ना; P बुध्नाः। 7) P उपमा इत्युप·माः। 8) P विष्ठाः। विष्ठा इति वि·स्थाः। 9) P पृथिव्याः। 10) P आजानमित्या·जानम्। अग्रे।

नमो अस्तु[1] सर्पेभ्यो ये केच पृथिवीमनु ।
ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥
ये इषवो यातुधानानाꣳ ये वनस्पतीनाम् ।
ये ऽवटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥
ये अमी रोचने दिवो ये वा सूर्यस्य रश्मिषु । 5
ये अप्सु षदाꣳसि[2] चक्रिरे तेभ्यः सर्पेभ्यो नमः ॥
कृणुष्व पाजः प्रसितिं[3] न पृथ्वीꣳ याहि राजेवामवाꣳ[4] इभेन ।
तृष्वीमनु प्रसितिं[5] द्रूणानो[6] ऽस्तासि[7] विध्य रक्षसस्तपिष्ठैः ॥
तव भ्रमास[8] आशुया पतन्त्यनुस्पृश धृषता[9] शोशुचानः ।
तपोभिरग्ने जुह्वा पतङ्गानसंदितो[10] विसृज विष्वगुल्काः ॥ 10
प्रति स्पशो विसृजा[11] तूर्णितमो भवा[12] पायुर्विशो अस्या[13] अदब्धः ।
यो नो दूरे अघशꣳसो यो अन्त्यग्ने माकिष्टे व्यथिरादधर्षीत् ॥
उदग्ने तिष्ठ प्रत्यातनुष्व ऽन्यमित्वं[14] ओषतात्तिग्महेते ।
यो नो अरातिꣳ समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ॥
ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविः कृणुष्व दैव्यान्यग्ने । 15
अव स्थिरा तनुहि यातुजूनां जामिमजामिं[15] प्रमृणीहि शत्रून् ॥
अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः ।
मूर्धा कवी रयीणाम् ॥

1) B ऽस्तु 2) Die Mss. schwanken; M 3 अप्सु षदाꣳसी; P अप्स्वित्यप् . सु । सदाꣳसि ।; aber Hg u. W अप्सुषदाꣳसि; über A s. Vorr. 3) P प्रसितिमिति प्र . सितिं ।; nur B प्रसृतिन्न 4) So Hg (u. A); in M 3 °वामवꣳ; B °वामवां; W °वामवा; P अमवानित्यम . वान् । 5) P wie oben; M 3 प्रसित्यं; B प्रसृतिं 6) P द्रुणानः ।; Kâṭh. द्रुणानो 7) P अस्ता । असि । 8) P भ्रमासः । 9) M 3 दृषता 10) So M 3 u. B (ohne Accent); P असंदित इत्यसं . दितः ।; Hg असन्नितो; W असंनितो 11) B विसृज; P वि । सृज । 12) P भव । 13) P अस्याः । 14) So Hg (u. A); W न्यमित्व; M 3 न्यमित्वं; B न्यमित्वाꣳ; P नि । अमित्वान् । 15) P जामिः । अजामिं ।

अग्नेष्ट्वा तेजसा सादयामि तया देवतयाङ्गिरस्वद् ध्रुवा सीद[1] ॥
भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः।
दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहम् ॥

इन्द्रस्य त्वौजसा सादयामि तया देवतयाङ्गिरस्वद् ध्रुवा सीद ध्रुवासि धरुणास्तृता[2] विश्वकर्मणा सुधृता मा त्वा समुद्र उद्वधीन्मा[3] सुपर्णोऽव्यथमाना पृथिवीं दृꣳह तेजो ऽसि तेजो मे यच्छ पृथिवी यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीः पृथिव्या[4] मा पाहि ज्योतिरसि ज्योतिर्मे यच्छान्तरिक्षꣳ यच्छान्तरिक्षं दृꣳहान्तरिक्षं मा हिꣳसीरन्तरिक्षान्मा पाहि स्वरसि स्वर्मे यच्छ दिवꣳ यच्छ दिवं दृꣳह दिवं मा हिꣳसीर्दिवो मा पाहि ॥

यास्ते अग्न आर्द्रा योनयो याः कुलायिनीर्यास्ते अग्ना[5] इन्दवो या उ नाभयः।
ताभिष्ट्वमुभयीभिः सꣳविदानः प्रजानꣳस्त३न्वेह[6] निषीद ॥
काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि।
एवा[8] नो दूर्वे प्रतनु सहस्रेण शतेन च ॥
या शतेन प्रतनोषि सहस्रेण विरोहसि।
तस्यै ते देवीष्टके विधेम हविषा वयम् ॥ १५ ॥

Vgl. 3, 2, 6. — TS 4, 2, 8 (rukmâdyupadhânam) u. 9 (svayamâtṛṇṇâdîshṭakopadhânam); 1, 2, 14; Kâṭh. 16, 15 u. 16; VS 13, 3—21; Mân. Çr. 6, 1, 7.

यास्ते अग्ने सूर्ये रुचो दिवमातन्वन्ति रश्मिभिः।
ताभिर्नो अद्य सर्वाभी[9] रुचे जनाय नस्कृधि ॥

---

1) P ध्रुवा। सीद। 2) P धरुणा। आसृतेत्या-स्तृता। (!) 3) P समुद्रः। उत्। वधीत्।; B उद्वधीर्मा; desgl. Kâṭh. 16, 16. 4) P पृथिव्याः। 5) P अग्ने। 6) P प्रजानन्निति प्र-जानन्। तन्वा। इह। 7) So Hg, M 3 (u. A); P प्ररोहंतीति। प्र-रोहंती।; W प्ररोहंति desgl. B, ohne Accent. 8) P एवं। 9) P सर्वाभिः।

या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः ।
इन्द्राग्नी ताभिः सर्वाभी[1] रुचं नो धेहि बृहस्पते ॥

विराड् ज्योतिरधारयत्स्वराड् ज्योतिरधारयत्सम्राड् ज्योतिरधारयद्भूरसि भुवनस्य रेता[2] इष्टका[3] स्वगा लोको मनसा त्वान्वारोहाम्यग्निर्ज्योतिर्ज्योतिरग्निस्तया देवतयाङ्गिरस्वद् ध्रुवा सीद सूरसि[4] सुवनस्य रेता[2] इष्टका[3] स्वगा लोको वाचा त्वान्वारोहामि सूर्यो ज्योतिर्ज्योतिः सूर्यस्तया देवतयाङ्गिरस्वद् ध्रुवा सीद[5] बृहस्पतिष्ट्वा सादयतु पृथिव्याः पृष्ठे ज्योतिष्मतीꣳ विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय विश्वं ज्योतिर्यच्छाग्निष्टे ऽधिपतिस्तया देवतयाङ्गिरस्वद् ध्रुवा सीद विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीꣳ विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय विश्वं ज्योतिर्यच्छ वायुष्टे ऽधिपतिस्तया देवतयाङ्गिरस्वद् ध्रुवा सीद परमेष्ठी त्वा सादयतु दिवः पृष्ठे ज्योतिष्मतीꣳ विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय विश्वं ज्योतिर्यच्छ सूर्यस्ते ऽधिपतिस्तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥

अषाढासि सहमाना सहस्वारातिꣳ[6] सहस्व पृतनायतः ।
सहस्रवीर्यसि सा मा जिन्व ॥
मधु वाता[7] ऋतायते[8] मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ॥
मधु नक्तमुतोषसो[9] मधुमत्पार्थिवꣳ रजः ।
मधु द्यौरस्तु नः पिता ॥

1) P सर्वाभिः । 2) P irrig रेताः । 3) B इष्टकाः u. P auch इष्टकाः । 4) P सूः । असि । 5) Von hier bis विश्वकर्मा (excl.) in B fehlend. 6) P सहस्व । अरातिं । 7) P मधुवाताः । (!) 8) P ऋतायते । ऋतयत इत्यृत-यते । 9) P उत । उषसः ।

मधुमान्नो वनस्पतिर्मधुमां[1] अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥

अपां त्वा गह्मन्त्सादयामि[2] समुद्रस्योन्नवतश्छायायां[3] ऽनमः समुद्राय ऽनमः समुद्रस्य चक्षसे ऽनु त्वा दिव्या वृष्टिः[4] सचतां मा त्वा सूर्यो ऽभितापसीन्मागिर्वैश्वानरो ऽछिन्नपचः प्रजा अनुवीक्षस्व[5] ॥

वीन्त्समुद्रान्त्समसृपत्स्व३र्गो ऽपां पतिर्वृषभ इष्टकानाम् ।
तच गछ यच पूर्वे परेताः पुरीष वसानः सुकृतस्य लोकम् ॥

महो द्यौः पृथिवी च न[6] इमं यज्ञं मिमिक्षताम् ।
पिपृतां नो भरीमभिः ॥

इदं विष्णुः ॥

अध स्मा[7] ते वनस्पते वातो विवात्यग्रमित् ।
उतो त्विन्द्राय[8] पातवे सुनु सोममुलूखल ॥

नक्तोषासा ॥

स्यूता[9] देवेभिरमृतेनागादुषा[10] स्वसारमधि वेदिमस्थात् ।
सत्यं पूर्वैर्ऋषिभिः सविदानो अग्निः प्रविद्वां[11] इह तत्कृणोतु ॥

पृथिवि पृथिव्यां सीद मातुर्मातरि माता ।
स्योनासि सुषदा स्योनामासीद सुषदामासीद ॥

निषसाद धृतव्रतो वरुणः प३स्त्यास्वा ।
साम्राज्याय सुक्रतुः ॥

---

1) P मधुमानिति मधु-मान् ।; M 3 मधुमꣳ; B मधुमां 2) P गह्मन् ।; Hg u. W गह्मत्स°; B गहा स°; M 3 गंहमत् स° 3) So Hg, M 3 (u. A); P उग्रन् । अवतः । छायायां ।; W °स्थायायां; B °स्थायायां 4) B पृष्टिः 5) P अभि । तापीत् । 6) P प्रजाः । अनु । वीक्षस्व । 7) So Hg, M 3, W (u. A); P स्वर्ग इति स्वः .गः ।; B स्व३र्गो 8) P नः । 9) P स्म । 10) P नु । इन्द्राय । 11) B स्युता; desgl. Mân. Çr. 6, 1, 7. 12) P अमृतेन । आ । अगात् । 13) P प्रविद्वानिति प्र-विद्वान् ।

क्रतुं देवानां महिमानमीमहे अग्निꣳ सधस्थे सदनेष्वद्भुतम् ।
वैश्वानरं ब्रह्मणा विश्वव्यचसꣳ स्तोमस्य धामन्निदधे पुरीष्यम् ॥
न्यधुर्मीढ्वायां कवयो वयोधसो अग्निꣳ सधस्थे सदनेष्वच्युतम् ।
वैश्वानरं ब्रह्मणा विश्वव्यचसꣳ स्तोमस्य धामन्निहितं पुरीष्यम् ।
समिध्यमानꣳ समिधा समिन्धते[1] अग्निꣳ सधस्थे सदनेषु सु- 5
क्रतुम् ।
वैश्वानरं ब्रह्मणा विश्वव्यचसꣳ स्तोमस्य धामन्पवमानमाभृतम् ॥

॥ १६ ॥ Vgl. 3, 2, 7. — TS 4, 2, 9 (svayamâtṛṇṇâdîshṭakopadhânam); Kâṭh. 16, 16; 39, 3; VS 13, 22—32; Mân. Çr. 6, 1, 7.

अग्ने युक्ष्वा[2] हि ये तवाश्वासो देव साधवः ।
अरꣳ वहन्त्याशवः ॥
युक्ष्वा[2] हि देवहूतमं अश्वं[3] अग्ने रथीरिव । 10
नि होता पूर्व्यः सदः[4] ॥
समिन्मिन्वन्ति सरितो न धेना[5] अन्तर्हृदा मनसा पूयमानाः ।
घृतस्य धारा[6] अभिचाकशीमि हिरण्ययो वेतसो मध्य आग्नेः ॥
ऋचे त्वा रुचे त्वा भासे त्वा ज्योतिषे त्वाभूदिद[7]ꣳ विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य चाग्निस्तेजसा तेजस्वान् रुक्मो वर्चसा व- 15
र्चस्वान्त्सहस्रदा[8] असि सहस्राय त्वा ॥
आदित्यं गर्भं पयसा समङ्ग्धि[9] सहस्रस्य प्रतिमाꣳ विश्वरूपम् ।

---

1) W समिध्यते 2) P युक्त्वं । 3) P देव.हूतमान् । अश्वान् । 4) So M 3; in Hg, W (u. A) सदः betont; P सीद । 5) P धेनाः । 6) P धाराः । 7) Hier beginnt ein Vers, der aber in den Mss. nicht als solcher gefasst ist; vgl. dasselbe weiter unten. 8) P सहस्र.दाः ।; B सहस्रधा 9) Die Mss. schwanken; Hg u. M 3 समंग्धि; (A समंग्धि); W wohl समग्धि; desgl. B, ohne Accent; P सम् । अङ्धि ।

परिवृङ्ग्धि[1] हरसा मा भिशोचीः शतायुषं कृणुहि चीयमानः ॥
वातस्य जूतिꣳ वरुणस्य नाभिमश्वं जज्ञानꣳ सलिलस्य मध्ये ।
शिशुं नदीनाꣳ हरिमद्रिबुध्नमग्ने मा हिꣳसीः परमे व्योमन्[2] ॥
अजस्रमिन्दुमरुषं भुरण्युमग्निमीडे[3] पूर्वचित्तिं नमोभिः ।
स पर्वभिर्ऋतुशः कल्पमानो गां मा हिꣳसीरदितिꣳ विराजम् ॥
त्वष्टुर्वरूत्रीꣳ वरुणस्य नाभिमविं जज्ञानाꣳ रजसः परस्मात् ।
महीꣳ साहस्रीमसुरस्य मायामग्ने मा हिꣳसीः परमे व्योमन्[4] ॥
यो अग्निरग्नेस्तपसोऽधि जातः शोकात्पृथिव्या[5] उत वा दिवस्परि ।
यं इमाः प्रजा विश्वकर्मा जजान तमग्ने हेडः परि ते[6] वृणक्तु ॥
इमं[7] मा हिꣳसीर्द्विपादं पशुꣳ सहस्राक्षो मेधाय चीयमानोᵛ मयुमारण्यमनु ते दिशामिᵛ तेन चिन्वानस्त३न्वं निषीदᵛ मयुं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छत्विमं मा हिꣳसीरेकशफं पशुं कनिक्रदꣳ वाजिनꣳ वाजिनेषुᵛ गौरमारण्यमनु ते दिशामिᵛ तेन चिन्वानस्त३न्वं निषीदᵛ गौरं ते शुगृच्छतुᵛ यं द्विष्मस्तं ते शुगृच्छत्विमꣳ साहस्रꣳ शतधारमुत्सꣳ व्यच्यमानꣳ[8] सलिलस्य[9] मध्ये घृतं दुहानामदितिं जनायाग्ने मा हिꣳसीः परमे व्योमन्[10] ॥ गवयमारण्यमनु ते दिशामिᵛ तेन चिन्वानस्त३न्वं निषीदᵛ गवयं ते शुगृच्छतुᵛ यं द्विष्मस्तं ते शुगृच्छत्विममूर्णायुꣳ वरुणस्य नाभिं त्वचं पशूनां द्विपदां चतुष्पदां त्वष्टुर्देवानां प्रथमं जनित्रमग्ने मा हिꣳसीः परमे व्योमन्[11] ॥ मेषमारण्यमनु ते

---

1) P परि । वृङ्धि । 2) In den Mss. ohne Accent; P व्योमन्निति वि॰ ओमन् । 3) M 3 भूरण्युम॰; B भरण्युम॰; P भुरण्युं । 4) In den Mss. ohne Accent. 5) P पृथिव्याः ।; Kap. S. लोकात्पृ॰ 6) P परि । वः । 7) Hier und im Folgenden stecken Verse, welche aber von den Mss. nicht als solche behandelt sind (wohl aber im Kâṭh.) 8) W वाच्यमानꣳ; M 3 विच्यमानꣳ 9) Kap. S. u. Kâṭh. 16, 17 सरिरस्य wie VS 13, 49. 10) In den Mss. ohne Accent. 11) In den Mss. ohne Accent.

दिशामि तेन चिन्वानस्त्र३न्वं निषीद मेषं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छत्वजो ३ह्यग्नेरजनिष्ट शोकात्सो अपश्यज्जनितारमग्ने तेन देवा देवतामग्रमाय॰स्तेन[1] रोहमायन्नुप मेध्यासः[2] शरभमारण्यमनु ते दिशामि तेन चिन्वानस्त्र३न्वं निषीद शरभं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥ १७ ॥

Vgl. TS 4, 2, 9 (s. oben) und 10 (paçuçîrshopadhânam); Kâṭh. 16, 16 u. 17; Kap. S. 25, 8; VS 13, 36—51; Mân. Çr. 6, 1, 7.

अपां त्वेमन्त्सादयाम्यपां[3] त्वोज्मन्त्सादयाम्यपां[4] त्वायने सादयाम्यपां त्वा ज्योतिषि सादयाम्यपां त्वा भस्मनि[5] सादयामि समुद्रे त्वा सदने सादयाम्यर्णवे त्वा सदने सादयामि सलिले त्वा सदने सादयाम्यपां त्वा क्षये सादयाम्यपां त्वा सध्रिषु[6] सादयाम्यपां त्वा सदने सादयाम्यपां त्वा सधस्थे सादयाम्यपां त्वा योनौ सादयाम्यपां त्वा पुरीषे सादयाम्यपां त्वा पाथसि सादयामि गायत्रेण त्वा छन्दसा सादयामि त्रैष्टुभेन त्वा छन्दसा सादयामि जागतेन त्वा छन्दसा सादयाम्यानुष्टुभेन त्वा छन्दसा सादयामि पाङ्क्तेन त्वा छन्दसा सादयामि ॥ १८ ॥

Vgl. 3, 2, 8. — TS 4, 3, 1 (prathamâ citiḥ; apasyâbhidhânâ ishṭakâḥ); Kâṭh, 16, 18; Kap. S. 25, 9; VS 13, 53; Mân. Çr. 6, 1, 8.

अयं पुरो भूस्तस्य[7] प्राणो भौवायनो वसन्तः प्राणायनो[8] गायत्री

1) P आयन् । 2) So betont in M 3 u. P, wie auch Kap. S. 25, 8; TS 4, 2, 10, 4; VS 13, 51; in Hg u. W °नुपमेध्यासः 3) Der Nasal vor dem त्स fehlt in den Mss.; P त्वा । एमन् । 4) Der Nasal vor dem त्स fehlt in den Mss.; P उज्मन् । 5) So Hg, M 3, (A) und P (desgl. Kâṭh.); in W भस्मत्स°; B भस्मनित्स°; ursprünglich hat vielleicht doch भस्मन्त्स° gestanden, wie in den meisten verwandten Saṃhitâ's, was ja auch mit dem Vorhergehenden in besserer Harmonie stünde. 6) So Hg u. P; in M 3, W u. B संधृषु; aber Kâṭh., Kap. S., TS und VS lesen संधिषि 7) P पुरः । भूः । 8) P प्राणायनं इति प्राण. आयनः ।

वासन्ती ऽगायत्र्या[1] गायत्रं ऽगायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत्त्रिवृतो रथन्तरꣳ वसिष्ठ[2] ऋषिः ऽप्रजापतिगृहीतया त्वया प्राणं गृह्णामि ऽप्रजाभ्यो ऽयं दक्षिणा विश्वकर्मा ऽतस्य मनो वैश्वकर्मणं ऽग्रीष्मो मानसस्त्रिष्टुब् ऽवैषमी ऽचिष्टुभः स्वारꣳ स्वारादन्तर्यामो ऽन्तर्यामात्पञ्चदशः ऽपञ्चदशाद्बृहद्भरद्वाजा[3] ऋषिः ऽप्रजापतिगृहीतया त्वया मनो गृह्णामि ऽप्रजाभ्यो ऽयं पश्चा[4] विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसꣳ वर्षाणि चाक्षुषाणि ऽजगती वार्षी ऽजगत्या ऋक्समम्ऋक्समाञ्शुक्रः ऽशुक्रात्सप्तदशः ऽसप्तदशाद्वैरूपं ऽजमदग्निऋषिः ऽप्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि ऽप्रजाभ्य इदमुत्तरादुत्स्वस्तस्य श्रोत्रꣳ सौवꣳ ऽशरऽश्रौ-ऽनुष्टुप्[5] शारद्यनुष्टुभ ऐडमैडान्मन्थी ऽमन्थिन एकविꣳशं एकविꣳशाद्वैराजꣳ ऽविश्वामित्रा[6] ऋषिः ऽप्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि ऽप्रजाभ्य इयमुपरि मतिस्तस्या वाङ् मात्या ऽहेमन्तो वाच्यः[7] पङ्क्तिर्हैमन्ती ऽपङ्क्त्या[8] निधनवन्निधनवत[9] आयायण[10] ऽआयायणान्त्रिणवत्रयस्त्रिꣳशौ ऽत्रिणवत्रयस्त्रिꣳशाभ्यां शाक्करैवते ऽविश्वकर्मा ऋषिः ऽप्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यः ॥ १९ ॥

Vgl. TS 4, 3, 2 (prâṇabhṛta ishṭakâḥ); Kâṭh. 16, 19; Kap. S. 25, 9; VS 13, 54—58.

प्राची दिग्वसन्त ऋतुरग्निर्देवता ब्रह्म द्रविणं गायत्री छन्दो ऽरथन्तरꣳ साम ऽत्रिवृत्स्तोमः ऽस उ पञ्चदशवर्तनिः ऽसानगा[11] ऋषिस्त्र्य-

---

1) M 3 गायत्री या; P गायत्र्याः; TS 4, 3, 2, 1 गायत्रियै; Kap. S. 25, 9; VS 13, 54 गायत्र्यै aber Kâṭh. 16, 19 auch गायत्र्या wie M. S. 2) P वसिष्ठः। 3) P भरद्वाज इति भरत्.वाजः। 4) P पश्चात्। 5) So gemäss P श्रौची। (s. TS 4, 3, 2. 2; VS 13, 57; Kâṭh. 16, 19); M 3 श्रौत्रीयꣳ; die andern Mss. श्रौत्र्यꣳ; auch Kap. S. श्रौत्र्यꣳ 6) P विश्वामित्रः। 7) Hg वाच्यूः(?) 8) P पङ्क्त्याः। 9) So Hg u. M 3; P निधनवदिति निधन.वत्।; W निधानवं निधयनवत; B निधानवं निधानवत 10) P आयायणः 11) P सानग इति सान.गः।

विर्वयः कृतमयानां पुरोवातो वातः पितरः पितामहाः परे ऽवरे[1] ते नो ऽवन्तु ते नः पान्वस्मिन्ब्रह्मण्यस्यां पुरोधायामस्मिन्कर्मण्यस्यामाशिष्यस्यां देवहूतौ ॥ दक्षिणा दिग्ग्रीष्म ऋतुरिन्द्रो देवता क्षत्रं द्रविणं त्रिष्टुप्छन्दो बृहत्साम पञ्चदशः स्तोमः स उ सप्तदशवर्तनिः सनातना[2] ऋषिर्दित्यवाड् वयस्तायानां[3] दक्षिणाद्वातो वातः पितरः पितामहाः परे ऽवरे ते नो ऽवन्तु ते नः पान्वस्मिन्ब्रह्मण्यस्यां पुरोधायामस्मिन्कर्मण्यस्यामाशिष्यस्यां देवहूतौ ॥ प्रतीची दिग्वर्षा[4] ऋतुर्विश्वे देवा देवता विड् द्रविणं जगती छन्दो वैरूपꣳ साम सप्तदशः स्तोमः स उ एकविꣳशवर्तनिरहभूना[5] ऋषिस्त्रिवत्सो वयो द्वापरो ऽयानां पश्चाद्वातो[6] वातः पितरः पितामहाः परे ऽवरे ते नो ऽवन्तु ते नः पान्वस्मिन्ब्रह्मण्यस्यां पुरोधायामस्मिन्कर्मण्यस्यामाशिष्यस्यां देवहूतौ ॥ उदीची दिक् शरदृतुर्मित्रावरुणौ देवता पुष्टं द्रविणमनुष्टुप्छन्दो वैराजꣳ सामैकविꣳशः स्तोमः स उ त्रिणववर्तनिः पुराणा[7] ऋषिस्तुर्यवाड् वयो ऽभिभवो ऽयानामुत्तराद्वातो वातः पितरः पितामहाः परे ऽवरे ते नो ऽवन्तु ते नः पान्वस्मिन्ब्रह्मण्यस्यां पुरोधायामस्मिन्कर्मण्यस्यामाशिष्यस्यां देवहूतौ ॥ ऊर्ध्वा दिग्घेमन्तशिशिरा[8] ऋतू बृहस्पतिर्देवता फलं द्रविणं पङ्क्तिश्छन्दः शाक्करैवते सामनी त्रिणवः स्तोमः स उ त्रयस्त्रिꣳशवर्तनिः सुपर्णी[9] ऋषिः पष्ठवाड् वय आस्कन्दो ऽयानामुपरिष्टाद्वातो वातः पितरः

---

1) P परे। अवरे। 2) P सनातन इति सना. तनः।; Hg सनातना; M 3 सनातना; W सनानातना 3) P चैता। अयानां। 4) P वर्षाः। 5) P अहभूनः। 6) P पश्चाद्वात इति पश्चात्. वातः। 7) P पुराणाः।; in W eig. पुराण geschrieben, in पुराणा corr.; in M 3 der ganze Satz ohne Accent. 8) P हेमंतशिशिरेति हेमंत. शिशिरा। 9) P सुपर्णः।

पितामहाः परे ऽवरे ते नो ऽवन्तु ते नः पान्त्वस्मिन्ब्रह्मण्यस्यां पुरोधायामस्मिन्कर्मण्यस्यामाशिष्यस्यां देवहूतौ ॥ २० ॥

Vgl. TS 4, 3, 3 (apânabhṛta ishṭakâḥ).

॥ इति मध्यमकाण्डे सप्तमः प्रपाठकः ॥

लोकं पृण छिद्रं पृणाथा[1] सीद ध्रुवा त्वम् ।
इन्द्राग्नी त्वा बृहस्पतिरस्मिन्योना असीषदन् ॥
ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः ।
जन्मन्देवानाꣳ विशस्त्रिष्वा[2] रोचने दिवः ॥
ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि ध्रुवꣳ योनिमासीद साध्याः ।
उख्यस्य केतुं प्रथमं जुषाणा अश्विनाध्वर्यू सादयतामिह त्वा ॥
कुलायिनी घृतवती पुरंधिः स्योने सीद सदने पृथिव्याः ।
अभि त्वा रुद्रा वसवो गृणन्त्विदं ब्रह्म पिपृहि[3] सौभगाय ।
अश्विनाध्वर्यू सादयतामिह त्वा ॥
स्वे दक्षे दक्षपितेह सीद देवानाꣳ सुम्ने बृहते रणाय ।
पितेवैधि सूनवे यꣳ सुशेवः स्वावेशया तन्वा सꣳविशस्व ।
अश्विनाध्वर्यू सादयतामिह त्वा ॥

---

1) P पृण । अथ । 2) P चिषु । आ । 3) P पिपृहि ।; M 3 पिप्रीहि; Kap. S. 25, 10 u. Kâṭh. 17, 1 पीपिहि wie VS 14, 2. 4) P पिता. इव । एधि ।

पृथिव्याः पुरीषमस्यप्सो[1] नाम तां त्वा विश्वे अभिगृणन्तु देवाः।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणायजस्व[2]।
अश्विनाध्वर्यू सादयतामिह त्वा ॥
अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य धर्त्री विष्टम्भनीं दिशाम्।
भुवनस्याधिपत्नीमूर्मिर्द्रप्सो अपामसि।
अश्विनाध्वर्यू सादयतामिह त्वा ॥
सजूर्ऋतुभिः सजूर्विधाभिः सजूर्देवैः सजूर्देववैर्युनाधैरग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः सजूर्ऋतुभिः सजूर्विधाभिः सजू रुद्रैः सजूर्ऋतुभिः सजूर्विधाभिः सजूरादित्यैः सजूर्ऋतुभिः सजूर्विधाभिः सजू र्विश्वेदेवैर्वैश्वानरैः सजूर्देववैर्युनाधैरग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा ॥ १ ॥

Vgl. 3, 2, 8 u. 9. — TS 4, 3, 4 (dvitîyasyâm citâu; âçvinyâkhyâ ishṭakâḥ); Kâṭh. 17, 1; Kap. S. 25, 10; VS 12, 54. 55; 14, 1—5. 7; Mân. Çr. 6, 2, 1.

प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्मे उरुया विभाहि श्रोत्रं मे श्लोकयापः[3] पिन्वौषधीर्जिन्व द्विपादव चतुष्पात्पाहि दिवो वा वृष्टिमेरय क्षत्रं वयो मयन्त छन्दो विष्टम्भो वयोऽधिपतिश्छन्दो मूर्धा वयः प्रजापतिश्छन्दो विश्वकर्मा वयः परमेष्ठी छन्दस्त्र्यविर्वयस्त्रिष्टुप्छन्दो दित्यवाड् वयो विराट् छन्दः पञ्चाविर्वयो

1) P अप्सः।; M 3 अपस्यो; cf. 2, 8, 7. 2) P द्रविणा। आ। यजस्व। 3) P श्लोकय। अपः। 4) P वृष्टिं। आ। इरयत्।

गायत्री छन्दस्त्रिवत्सो[1] वय उष्णिहा छन्दस्तुर्यवाड् वयो ऽनुष्टुप्छन्दः पष्ठवाड् वयो बृहती[2] छन्द उक्षा वयः ककुप्छन्द ऋषभो वयः सतोबृहती छन्दो ऽनड्वान्वयः पङ्क्तिश्छन्दो धेनुर्वयो जगती छन्दो वस्तो वयो युवलं छन्दो वृष्णिर्वयो विशालं छन्दः पुरुषो वयस्तन्द्र छन्दः सिꣳहो वयश्छदिश्छन्दो व्याघ्रो वयो ऽनाधृष्यं छन्दः ॥ २ ॥

Vgl. TS 4, 3, 4 (âçvinyâkhyâ ishṭakâḥ) und 5 (vayasyâkhyâ ishṭakâḥ); Kâṭh. 17, 1 a. E. u. 2; Kap. S. 25, 10 und 26, 1; VS 14, 8—10.

इन्द्राग्नी अव्यथमानामिष्टकां दꣳहतꣳ युवम् ।
पृष्ठेन द्यावापृथिवी आपृणान्तरिक्षं च विबाधस्व ॥

राड्यसि प्राची दिग् विराडसि दक्षिणा दिक् सम्राडसि प्रतीची दिक् स्वराडस्युदीची दिगधिपत्न्यस्यूर्ध्वा दिगायुर्मे पाहि प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्मे पाहि श्रोत्रं मे पाहि मनो मे पिन्व वाचं मे जिन्वात्मानं मे पाहि ज्योतिर्मे यछ मा छन्दः प्रमा छन्दः प्रतिमा छन्दो ऽस्रीवीश्छन्दः[3] पङ्क्तिश्छन्द उष्णिहा छन्दो गायत्री छन्दस्त्रिष्टुप्छन्दो जगती छन्दो ऽनुष्टुप्छन्दो विराट् छन्दो बृहती छन्दः पृथिवी छन्दो ऽन्तरिक्षं छन्दो द्यौश्छन्दो नक्षत्राणि छन्दः समा[4] छन्दः कृषिश्छन्दो[5] वाक्छन्दो मनश्छन्दो गौश्छन्दो ऽश्वश्छन्दो ऽजा छन्दो हिरण्यं छन्दो ऽग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवतेन्द्रो देवता वरुणो देवता बृहस्पतिर्देवता विश्वे देवा देवता मूर्धासि राड् ध्रुवासि धरुणा धर्त्र्यसि धरणी[6]यायुषे त्वा वर्चसे

1) Hg त्रिवत्सो; M 3 त्रीवत्सो 2) Von hier bis सतोबृहती (incl.) in B fehlend. 3) M 3 श्रीवी; P अस्रीवी ।; Kâṭh. 17, 3 स्त्रीवयश्छंदः 4) So M 3; wohl auch W; desgl. B, ohne Accent; Hg समा; P संमाः । 5) W ऋषिश्छंदो 6) P धरिणी ।

त्वा कृषै त्वा क्षेमाय त्वा यन्त्री राड् यन्त्र्यसि[1] यमनी धर्त्र्यसि धरित्रीषे त्वोर्जे त्वा रय्यै त्वा पोषाय त्वा ॥ ३ ॥

Vgl. 3,2,9. — TS 4, 3, 6 (tṛtîyasyâṃ citâu; svayamâtṛṇṇâdyâ ishṭakâḥ) und 7 (bṛhatyâkhyâ ishṭakâḥ); Kâṭh. 17, 3; Kap. S. 26, 2; VS 14, 11. 13. 17–22; Mân. Çr. 6, 2, 1.

आप्नुस्त्रिवृद्ब्रह्मान्तः पञ्चदशो व्योमा[2] सप्तदशः प्रतूर्तिरष्टादशस्त्र्यपो नवदशो ऽभीवर्तः[3] सविꣳशो[4] धरुण[5] एकविꣳशो वर्चो[6] द्राविꣳशः संभरणस्त्रयोविꣳशो योनिश्चतुर्विꣳशो गर्भाः पञ्चविꣳश ओजस्त्रिणवो विराट् त्रिꣳशः क्रतुरेकत्रिꣳशो विधृतिर्द्वात्रिꣳशः[7] प्रतिष्ठा चयस्त्रिꣳशो ब्रह्मस्य विष्टपं चतुस्त्रिꣳशो नाकः षट्त्रिꣳशो वीवर्तो[8] ऽष्टाचत्वारिꣳशो धर्त्र चतुष्टोमः ॥ ४ ॥

Vgl. TS. 4, 3, 8 (caturthyâṃ citâu; akshṇayâstomîyâkhyâsv ishṭakâsu kâçcit); Kâṭh. 17, 4; Kap. S. 26, 3; VS 14, 23; Mân. Çr. 6, 2, 1.

अग्नेर्भागो ऽसि दीक्षाया आधिपत्यं ब्रह्म स्तृतं त्रिवृत्स्तोमा इन्द्रस्य भागो ऽसि विष्णोराधिपत्यं क्षत्रं स्तृतं पञ्चदशः स्तोमो नृचक्षसां भागो ऽसि धातुराधिपत्यं जनित्र स्तृतꣳ सप्तदशः स्तोमो मित्रस्य भागो ऽसि वरुणस्याधिपत्यं दिवो वृष्टिर्वातः[9] स्तृतं एकविꣳशः स्तोमो ऽदित्या भागो ऽसि पूष्ण आधिपत्यमोजः स्तृतं त्रिणवः स्तोमो वसूनां भागो ऽसि रुद्राणामाधिपत्यं चतुष्पात्स्तृतं चतुर्विꣳशः स्तोम आदित्यानां भागो ऽसि मरुतामाधिपत्यं गर्भाः

1) P यंचो। रांड्। यंची। असि। 2) In Hg u. W ohne Accent, in M 3 Paroxytonon. P व्योमेति वि. ओमा। 3) P अभीवर्तः। अभिवर्त इत्यभि. वर्तः।; B भिवर्त्तः; W व्योमीवर्त्त 4) So Hg; P सविꣳश इति स. विꣳशः।; M 3 सं विꣳशो; W स्त्रविꣳशो 5) P धरुणः। 6) P वर्चः। 7) W विवृति° 8) P विवर्त इति वि. वर्तः। 9) So Hg (desgl. Kap. S. u. VS); cf. oben 2, 4, 8; in M 3 u. W वृष्टि° (wie auch in TS).

स्मृताः ᳚ पञ्चवि᳚ꣳशः स्तोमः ᳚ सवितुर्भागो ऽसि ᳚ बृहस्पतेराधिपत्य᳚ꣳ समीची᳚ दिꣳशः स्मृताश्चतुष्टोमः स्तोमो ᳚ यवानां भाऽगो ऽस्ययवाना-मांधिपत्यं ᳚ प्रजाः स्मृताश्चतुश्चत्वारि᳚ꣳशः स्तोम ᳚ ऋभूणां भागो ऽसि ᳚ विश्वेषां देवानामाधिपत्यं ᳚ भूतं निशान्त᳚ꣳ स्मृतं ᳚ चयस्ति᳚ꣳशः स्तोमः ॥ ५ ॥

Vgl. 3, 2, 10; TS 4, 3, 9 (avaçishṭâ akshṇayâstomîyâḥ); Kâṭh. 17, 4; Kap. S. 26, 3; VS 14, 24—26; Mân. Çr. 6, 2, 1.

एकयास्तुवत ᳚ प्रजा अधीयन्त ᳚ प्रजानां पतिरधिपतिरासी᳚त्त्रिसृ-भिरस्तुवत ᳚ ब्रह्मासृज्यत ᳚ ब्रह्मणस्पतिरधिपतिरासीत्पञ्चभिरस्तुवत ᳚ भू-तान्यसृज्यन्त ᳚ भूतानां पतिरधिपतिरासोत्सप्तभिरस्तुवत ᳚ सप्तऋषयो ऽसृज्यन्त ᳚ धाताधिपतिरासीन्नवभिरस्तुवत ᳚ पितरो ऽसृज्यन्तादितिर-धिपतिरासीदेकादशभिरस्तुवतार्तवा असृज्यन्त ᳚ ऋतवो ऽधिपतय आस᳚न्त्रयोदशभिरस्तुवत ᳚ मासा असृज्यन्त ᳚ स᳚ंवत्सरो ऽधिपति-रासीत्पञ्चदशभिरस्तुवत ᳚ क्षत्रमसृज्यतेन्द्रो ऽधिपतिरासीत्सप्तदशभिर-स्तुवत ᳚ ग्राम्याः पशवो ऽसृज्यन्त ᳚ बृहस्पतिरधिपतिरासीन्नवदशभिर-स्तुवत ᳚ शूद्रार्यौ असृज्येतामहोरात्रे अधिपत्नी आस्तामेकवि᳚ꣳश-त्यास्तुवतैकशफमसृज्यत ᳚ वरुणो ऽधिपतिरासीत्त्रयोवि᳚ꣳशत्यास्तुवत ᳚ क्षुद्राः पशवो ऽसृज्यन्त ᳚ पूषाधिपतिरासीत्पञ्चवि᳚ꣳशत्यास्तुवतारण्याः पशवो ऽसृज्यन्त ᳚ वायुरधिपतिरासीत्सप्तवि᳚ꣳशत्यास्तुवत ᳚ वनस्पतयो ऽसृज्यन्त ᳚ सोमो ऽधिपतिरासीन्नववि᳚ꣳशत्यास्तुवत ᳚ द्यावापृथिवी वै-ता᳚ꣳ᳚ वसवो रुद्रा अनुव्याय᳚ꣳस्त उ[4] एवाधिपतय आसन्नेकत्रि᳚ꣳशता-

1) P एकया । अस्तुवत । 2) So Hg; P सप्तऋषय इति सप्त. ऋषयः । 3) In den Mss. ohne Accent (s. VS 14, 30; Kap. S. 26, 4); P वि । ऐता । 4) M 3, W u. B ऊ

स्तुवत᳖ प्रजा असृज्यन्त᳖ यवाश्चायवाश्चाधिपतय आस᳖न्त्स्त्रियस्त्रि᳖शता-
स्तुवत᳖ भूतान्यशाम्यन्प्रजापतिः परमेष्ठ्यधिपतिरासीत् ॥ ६ ॥

Vgl. 3, 2, 10; TS 4, 3, 10 (sṛshṭinâmakâ ishṭakâḥ); Kâth. 17, 5; Kap. S. 26, 4; VS 14, 28—31; Mân. Çr. 6, 2, 1.

अग्ने जातान्प्रणुदा नः[1] सपत्नान्प्रत्यजातान्जातवेदो नुदस्व।
अधि नो ब्रूहि सुमना अहेडन्᳖शर्म᳖स्ते[2] स्याम चिवरूथा[3] उद्भौ[4] ॥
सहसा जातान्प्रणुदा नः सपत्नान्प्रत्यजातान्जातवेदो नुदस्व। 5
अधि नो ब्रूहि सुमनस्यमानो वय᳖ स्याम प्रणुदा नः[5] सप-
त्नान् ॥
चतुश्चत्वारि᳖ंशी स्तोमो᳖ वर्चो द्रविण᳖[6]᳖ षोडशी स्तोमा᳖ ओजो द्र-
विणम् ॥
अग्नेः पुरीषमस्यप्सो[7] नाम तां त्वा विश्वे अभिगृणन्तु देवाः। 10
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणायजस्व ॥
तया देवतयाङ्गिरस्वद् ध्रुवा सीदैव᳖च्छन्दो᳖ वरिव᳖च्छन्द᳖ आछ᳖च्छन्दो[8]᳖
मन᳖च्छन्दः᳖ शंभू᳖च्छन्दः᳖ परिभू᳖च्छन्दः᳖ सिन्धु᳖च्छन्दो᳖ व्यच᳖च्छन्दः᳖ समुद्र
छन्दः᳖ सलिलं छन्दः᳖ ककुप्छन्दस्तिककुप्छन्दः᳖ काव्यं छन्दो᳖ऽकूप[9]
छन्दो᳖ऽक्षरपङ्क्ति᳖च्छन्दः᳖ पदपङ्क्ति᳖च्छन्दो᳖ विष्टारपङ्क्ति᳖च्छन्दः᳖ क्षुरो भृ- 15
ज᳖च्छन्दः[10]᳖ पक्ष᳖च्छन्दः᳖ प्रछ᳖च्छन्दः[11]᳖ स᳖यच्छन्दो[12]᳖ वियच्छन्दो[13]᳖ वृहच्छ-

---

1) P प्र। नुद। नः। 2) P शर्मन 3) P चिवरूथ इति चि. वरूथे। 4) W उद्भौः; M 3 जतभूः; P उद्भाविद्युत. भौ। 5) P प्र। नुद। नः। 6) W schiebt hier ein गायत्राछन्दो रथतर᳖ 7) M 3 °स्यप्सो; vgl. 2, 8, 1. 8) Die Mss. आछछन्दो; B आछत्छंदो; P आछंदित्या. छत्। 9) P अंकुप।; B कूप; 10) Kap. S. क्षुरो भृजश्छन्दः; 11) Die Mss. प्रछछ°; P प्रछंदिति प्र. छत्। 12) P संयंदिति सं. यत्।; B स᳖यत्छंदो; die andern Mss. स᳖यंछ° 13) P वियंदिति वि. यत्।; M 3 वीयछ°; die andern Mss. वियछ°;

न्दो[1] रथन्तरं छन्दो निकायं छन्दो वीवधं[2] छन्दो गिरश्छन्दो[3] भृ-
जश्छन्दः[4] सꣳस्तुप्छन्दो ऽनुष्टुप्छन्दा एवश्छन्दो वरिवश्छन्दो वयश्छन्दो
वयस्कृच्छन्दो[5] विशालं छन्दो विष्पर्धाश्छन्दश्छदिश्छन्दो[6] दूरोहणं[7] छन्द-
स्तन्द्रं छन्दो ऽङ्कावङ्कं[8] छन्दः ॥ ७ ॥

Vgl. 3, 2, 10. — TS 4, 3, 12 (pañcamyâṃ citâu; asapatnâdyâ ishṭakâḥ); Kâṭh. 17, 6; Kap. S. 26, 5; VS 15, 1—5; Mân. Çr. 6, 2, 2.

रश्मिना क्षयाय क्षयं जिन्व प्रेत्या धर्मणे धर्मं[9] जिन्वोन्वित्या
दिवे दिवं जिन्व संधिनान्तरिक्षायान्तरिक्षं जिन्व प्रतिधिना पृ-
थिव्यै पृथिवीं जिन्व विष्टम्भेन वृष्ट्यै वृष्टिं जिन्व प्रवायाहूं[10] ऽहर्जि-
न्वानुवाय[11] रात्र्यै रात्रीं[12] जिन्वोशिजा वसुभ्यो वसून्जिन्व प्रकेतेन
रुद्रेभ्यो रुद्रान्जिन्व सुदितिनादित्येभ्य आदित्यान्जिन्व तन्तुना प्रजा-
भ्यः प्रजा जिन्वौजसा पितृभ्यः पितॄन्जिन्व[13] पृतनाषाहा पशुभ्यः
पशून्जिन्व रेवतौषधीभ्या ओषधीर्जिन्वाभिजिता युक्त्याखेन्द्रायेन्द्रं
जिन्वाधिपतिना प्राणाय प्राणं जिन्व धरुणेनापानायापानं जिन्व
सꣳसर्पेण चक्षुषे चक्षुर्जिन्व वयोधसाधीतायाधीतं[14] जिन्व चिवृता
चिवृते चिवृज्जिन्व प्रवृता प्रवृते प्रवृज्जिन्व सवृता सवृते सवृज्जि-
न्वानूवृतानूवृते ऽनूवृज्जिन्व[15] विरोहेण विरोहाय विरोहं जिन्व प्रो-

---

1) P बृहत् ।; M 3 u. B बृहत्छ°; die andern Mss. बृहच्छ° 2) P वीवधं । विवधमिति वि. वधं ।; B विवधं । 3) So M 3 u. W; P गिरः । (s. TS 4, 3, 12, 2; VS 15, 5); Hg गिरश्छ°; B गिरिश्छंदो (= Kap. S. 26, 5). 4) P भजः । 5) P वयः. कृत्; B वयस्कृत्छंदो; die andern Mss. वयस्कृच्छ° 6) P विष्पर्धा । विषर्धेति वि. स्पर्धा । 7) P दूरोहणमिति दूः. रोहणं । 8) P अंकावंकमित्यंकौ. अंकं । (cod. कां); M 3 अंकावंकं 9) So W; die andern Mss. धर्मे 10) P प्रवायेति प्र. वाय । अहूं । अहः ।; Hg प्रवायाहूं ऽहं° 11) P अनुवायेत्यनु. वाय । 12) P रात्रिं । 13) Von पितृ° bis ओषधी° in B fehlend. 14) W धीतिं 15) So Hg, W (u. A); in M 3 °नुवृतानुवृते नुवृ°; desgl. B, ohne Accent; P अनुवृता । अनुवृते । अनुवृत् ।; Kap. S. अनू°;

हेण प्ररोहाय प्ररोहं जिन्व सꣳरोहेण सꣳरोहाय सꣳरोहं जिन्वानूरोहेणानूरोहायानूरोहं[1] जिन्व वसुकेन वसुकाय वसुकं जिन्व वेषश्रिया वेषश्रियै[2] वेषश्रीं जिन्व वस्यष्ट्या वस्यष्ट्यै वस्यष्टिं जिन्वाक्रान्त्याक्रान्त्या[3] उत्क्रान्तिं जिन्वोत्क्रान्त्योत्क्रान्त्या[4] आक्रान्तिं जिन्व ॥ ८ ॥

Vgl. 3, 3, 1. — TS 4, 4, 1 (pañcamaciteḥ çeshaḥ; stomabhâgâkhyâ ishṭakâḥ); Kâṭh. 17, 7; Kap. S. 26, 6; VS 15, 6. 7. 9; (Mân. Çr. 6, 2, 2.)

राड्यसि प्राची दिग्वसवस्ते देवा अधिपतयो ऽग्निर्हेतीनां प्रतिधर्ता चिवृत्त्वा स्तोमः पृथिव्याꣳ श्रयत्वाज्यमुक्थमव्यथायै स्तभ्नोतु रथन्तरꣳ साम प्रतिष्ठित्या[5] अन्तरिक्षꣳ ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिणा प्रथन्तु विधर्ता चायमधिपतिश्च ते त्वा सर्वे सꣳविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु विराडसि दक्षिणा दिग् रुद्रास्ते देवा अधिपतया इन्द्रो हेतीनां प्रतिधर्ता पञ्चदशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु प्रउगमुक्थमव्यथायै स्तभ्नोतु बृहत्साम प्रतिष्ठित्या अन्तरिक्षꣳ ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिणा प्रथन्तु विधर्ता चायमधिपतिश्च ते त्वा सर्वे सꣳविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु सम्राडसि प्रतीची दिगादित्यास्ते देवा अधिपतयः सोमो हेतीनां प्रतिधर्ता सप्तदशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु मरुत्वतीयमुक्थमव्यथायै स्तभ्नोतु वैरूपꣳ साम प्रतिष्ठित्या अन्तरिक्षꣳ ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिणा प्रथन्तु विधर्ता चायमधिपतिश्च ते त्वा सर्वे

1) B °नुरोहेणनुरोहायानुरोहं; P अनु-रोहेण। अनु रोहाय। अनु-रोहं।; Kap. S. अनू° 2) So Hg (und, vom Accent abgesehen, auch A); P वेषश्रियेति वेष-श्रिया। वेषश्रियै। वेष-श्रियं।; M 3 वेषः श्रीया वेषः श्रीयै वेषः श्रीं; desgl. B, ohne Accent; W वेषः श्रीया वेषः श्रीयै वेषश्रीं 3) P आक्रांत्या इत्या-क्रांत्यै।; B °क्रांत्योत्क्रांत्या 4) P उत्-क्रांत्यै। 5) P प्रतिष्ठित्यै। प्रतिस्थित्या इति प्रति-स्थित्यै।

सꣳविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ꣳस्वराड-
स्युदीची दिङ्[1] ꣳमरुतस्ते देवा अधिपतयो ꣳवरुणो हेतीनां प्रतिधत्तां
विꣳशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु ꣳनिष्केवल्यमुक्थमव्यथायै स्त-
भ्नोतु ꣳवैराजꣳ साम प्रतिष्ठित्या अन्तरिक्षा ꣳऋषयस्त्वा प्रथमजा
देवेषु दिवो मात्रया वरिणा प्रथन्तु ꣳविधर्ता चायमधिपतिश्च ꣳते त्वा
सर्वे सꣳविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्त्व-
धिपत्न्यस्यूर्ध्वा दिग्विश्वे ते देवा अधिपतयो ꣳबृहस्पतिर्हेतीनां प्र-
तिधत्तां ꣳक्षणवत्यस्त्रिꣳशौ त्वा स्तोमौ पृथिव्याꣳ श्रयता ꣳवैश्वदेवा-
ग्निमारुते उक्थे अव्यथायै स्तभ्नुता ꣳशाक्वररैवते सामनी प्रतिष्ठित्या
अन्तरिक्षा ꣳऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिणा प्रथन्तु ꣳ
विधर्ता चायमधिपतिश्च ꣳते त्वा सर्वे सꣳविदाना नाकस्य पृष्ठे स्वर्गे
लोके यजमानं च सादयन्तु ॥ ९ ॥

Vgl. 3, 3, 1. — TS 4, 4, 2 (nâkasadâkhyâ ishṭakâḥ); Kâṭh. 17, 8; Kap. S. 26, 7; VS 15, 10—14; (Mân. Çr. 6, 2, 2.)

अयं पुरो हरिकेशः सूर्यरश्मिस्तस्य रथकृत्श्च रथौजाश्च सेनानी-
ग्रामण्यौ ꣳपुञ्जिकस्थला च कृतस्थला चाप्सरसौ ꣳयातुधाना[2] हेती[3]ꣳ
रक्षाꣳसि प्रहेतिस्तेभ्यो नमो अस्तु ꣳते नो मृडन्तु ꣳते यं द्विष्मो यश्च
नो द्वेष्टि तमेषां जम्भे दध्मो ऽयं दक्षिणा विश्वकर्मा ꣳतस्य रथस्वनश्च
रथेचित्रश्च सेनानीग्रामण्यौ ꣳमेनका च सहजन्या चाप्सरसौ ꣳदङ्क्षणवः
पशवो हेतिः ꣳपौरुषेयो वधः प्रहेतिस्तेभ्यो नमो अस्तु ꣳते नो मृडन्तु ꣳ
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मो ꣳऽयं पश्चा[4] विदद्वसु-
स्तस्य रथप्रोतश्चासमरथश्च[5] सेनानीग्रामण्या ꣳआस्रोचन्ती च प्रस्रोचन्ती

1) B दिꣳ 2) P यातु.धानाः। 3) P हेतिः। 4) P पश्चात्। 5) P असम.रथः।

चाप्सरसो व्याघ्रा हेतिः सर्पाः प्रहेतिस्तेभ्यो नमो अस्तु ते नो मृडन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मो ऽयमुत्तरात्स-युड्सुस्तस्य सेनजिच्च सुषेणश्च सेनानीयामण्यौ विश्वाची च घृताची चाप्सरसा आपो हेतिर्वातः प्रहेतिस्तेभ्यो नमो अस्तु ते नो मृडन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मो ऽयमुपर्यर्वाग्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च[1] सेनानीयामण्या उर्वशी च पूर्वचित्तिश्चाप्सरसा अवस्फूर्जन्हेतिर्विद्युत्प्रहेतिस्तेभ्यो[2] नमो अस्तु ते नो मृडन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ १० ॥

Vgl. 3, 3, 1. — TS 4, 4, 3 (pañcacoḍâdaya ishṭakâḥ); Kâṭh. 17, 9; Kap. S. 26, 8; VS 15, 15—19; (Mân. Çr. 6, 2, 2.)

प्राच्या त्वा दिशा सादयाम्यग्निना देवेन देवतया गायत्रेण छन्दसाग्नेः शिरा[3] उपदधामि गायत्रस्य छन्दसो ऽग्नेः शीर्ष्णाग्नेः शिरा उपदधामि दक्षिणया त्वा दिशा सादयामीन्द्रेण देवेन देवतया त्रैष्टुभेन छन्दसाग्नेः पक्षमुपदधामि त्रैष्टुभस्य छन्दसो[4] ऽग्नेः पक्षेणाग्नेः पक्षमुपदधामि प्रतीच्या त्वा दिशा सादयामि विश्वेभिर्देवेभिर्देवतया जागतेन छन्दसाग्नेः पुच्छमुपदधामि जागतस्य छन्दसो ऽग्नेः पुच्छेनाग्नेः पुच्छमुपदधाम्युदीच्या त्वा दिशा सादयामि मित्रावरुणाभ्यां देवाभ्यां देवतयानुष्टुभेन छन्दसाग्नेः पक्षमुपदधाम्यानुष्टुभस्य छन्दसो ऽग्नेः पक्षेणाग्नेः पक्षमुपदधाम्यूर्ध्वया त्वा दिशा सादयामि बृहस्पतिना देवेन

---

1) So B (ohne Accent); P तार्क्ष्यः । अरिष्टनेमिरित्यरिष्ट-नेमिः ।; aber Hg तार्क्ष्यश्चारिष्टनेमिश्च; (A ebenso, vom Accent abgesehen); M 3 तार्क्ष्यश्चारिष्टनेमिश्च; W तार्क्ष्यश्चाष्टनेमिश्च; Kâṭh. 17, 9 तार्क्ष्यश्चारिष्टनेमिश्च 2) P अवस्फूर्जदित्यव-स्फूर्जत् । 3) P शिरः । 4) Die letzten fünf Worte in B repetirt.

देवतया पाङ्क्तेन छन्दसाग्नेः पृष्ठमुपदधामि पाङ्क्तस्य छन्दसो ऽग्नेः पृष्ठेनाग्नेः पृष्ठमुपदधामि ॥ ११ ॥

Vgl. 3, 3, 2. — (Mân. Çr. 6, 2, 2.)

मधुश्च माधवश्च वासन्तिका[1] ऋतव अग्नेरन्तःश्लेषो ऽसि ॥
कल्पेतां द्यावापृथिवी कल्पन्तामापा[2] ओषधयः ।
कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय संव्रताः ॥
ये अग्नयः समनसो ऽन्तरा[3] द्यावापृथिवी ।
वासन्तिका ऋतव अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु ॥

शुक्रश्च शुचिश्च ग्रैष्मा[4] ऋतव नभश्च नभस्यश्च वार्षिका[5] ऋतव इषश्चोर्जश्च शारदा[6] ऋतव सहश्च सहस्यश्च हैमन्तिका[7] ऋतव तपश्च तपस्यश्च शैशिरा[8] ऋतव अग्नेरन्तःश्लेषो ऽसि ॥
कल्पेतां द्यावापृथिवी कल्पन्तामापा ओषधयः ।
कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय संव्रताः ॥
ये अग्नयः समनसो ऽन्तरा[9] द्यावापृथिवी ।
शैशिरा ऋतव अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु ॥ १२ ॥

Vgl. 3, 3, 3. — TS 4, 4, 11 (ṛtavyâkhyâ ishṭakâḥ); Kâṭh. 17, 10; Kap. S. 26, 9; VS 13, 25; 14, 6. 15. 16. 27; 15, 57.

रायस्पोषꣳ विष्य[10] नाभिमस्मे ॥
वनस्पते ऽवसृजा[11] रराणस्त्मना[12] देवेभ्यः।
अग्निर्हव्यꣳ शमिता सूदयाति ॥

---

1) P अछ। अयम्। एति।; M 3 u. W °मेति 2) W इडानो; desgl. B, ohne Accent. 3) So Hg u. M 3; P मंद्राः।; W मद्राः; desgl. B, ohne Accent. 4) P सुप्रयासा इति सु-प्रयासाः। 5) B विश्वे 6) So Hg, M 3 u. W; B °र्ज्जिमभि°; P जिह्वां। (cf. VS 27, 18; TS 4, 1, 8, 2); Kâṭh. u. Kap. S. जिह्वयाभिगृणीतम् 7) P आ। इदं। 8) M 3 °मीडा 9) So Hg u. M 3 (= Kâṭh.); in W u. P त्वष्टुः; B त्वष्टु; Kap. S. त्वष्टा 10) P विं। स्य।; B विष्यतां; W विष्वषा। Kap. S. विष्यतं; Kâṭh. विष्य 11) P अव। सृज। 12) W रराण त्मना; desgl. B, ohne Accent.

अग्ने स्वाहा कृणुहि जातवेदा इन्द्राय देवेभ्यः ।
विश्वे देवा हविरिदं जुषन्ताम् ॥ ६ ॥

Vgl. 3, 4, 6. — TS 4, 1, 8 (prayâjayâjyâ âprînâmakâḥ; Kâṭh. 18, 17; Kap. S. 29, 5; VS 27, 11—22.

॥ इति मध्यमकाण्डे द्वादशः प्रपाठकः ॥

समन्या यन्त्युपयन्त्यन्याः[1] समानमूर्वं नद्यः पृणन्ति[2] ।
तमु शुचि ँ शुचयो दीदिवाँसमपां नपातं परितस्थुरापः ॥
हिरण्यवर्णः स हिरण्यसंदृगपां नपात्सेदु[3] हिरण्यवर्णः ।
हिरण्ययात्परि योनेर्निषद्य[4] हिरण्यदा ददत्यन्नमस्मै ॥
हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो[5] या-
स्विन्द्रः ।
अग्निँ या गर्भं दधिरे विरूपास्ता ना आपः शँ[6] स्योना
भवन्तु ॥ 10
यासाँ राजा वरुणो याति मध्ये सत्यानृते[7] अवपश्यञ्ज-
नानाम् ।
मधुश्चुतः[8] शुचयो याः पावकास्ता ना आपः शँ[9] स्योना
भवन्तु ॥

---

1) Das Verb an erster Stelle so betont in M 3 (wie TS 2, 5, 12, 1); in Hg u. W ohne Accent. 2) B वृणंति 3) P सः । इत् । ऊ इत्यु । 4) Die Mss. schwanken; M 3 परियोनेः; Hg u. W पर्योनेः; desgl. B, ohne Accent; P परि । योनेः । 5) M 3 पश्चपो 6) Hg u. M 3 शँ 7) Hg सत्यानृते 8) So Hg u. M 3 (cf. 2, 8, 14 a. E.); W मधुश्च्युतः; desgl. B, ohne Accent; P मधुश्च्युत इति मधुश्च्युतः । 9) Hg u. M 3 शँ

यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति।
याः पृथिवीं पयसोन्दन्ति शुक्रास्ता ना आपः शं[1] स्योना भवन्तु ॥
शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृशत त्वचं मे।
सर्वा अग्नीꣳरप्सुषदो हुवे मयि वर्चो बलमोजो निधत्त[2] ॥
यद्दः[3] संप्रयतीरहा[4] अनदता[5] हते।
तस्मादा नऽद्यो नाम स्थ ता वो नामानि सिन्धवः[6] ॥
संप्रच्युता[7] वरुणेन यज्ञीभꣳ[8] समवल्गत[9]।
तदाप्नोदिन्द्रो वो यतीस्तस्मादापो अनुष्ठन[10] ॥
अपकामꣳ स्यन्दमाना अवीवरत वो हि कम्।
इन्द्रो वः शक्तिभिर्देवीस्तस्माद्वार्नाम[11] वो हितम् ॥
एको वो देवो अप्यतिष्ठत्स्यन्दमाना यथावशम्।
उदानिषुर्महीरिति तस्मादुदकमुच्यते ॥
आदित्पश्याम्युत वा शृणोम्या मा घोषो गच्छति वाङ्मासाम्[12]।
मन्वो रसो मधुपृचामरंगमं[13] आ मा प्राणेन सह वर्चसागन्[14] ॥

---

1) Hg शꣳ 2) M3 विधर्त्ते 3) So corrigirt; die Mss. (Hg, M3 u. W) यद्दः; P यत्। अदः। 4) P अहो। 5) So corrigirt; die Mss. schwanken; Hg अनदता; M3 अनदत्ता; W अनुदता; B अन्वदंता; P अनदत। 6) M3 सिंधवः 7) So Hg; in M3 u. W संप्रच्युता 8) P यत्। शीभं।; B शिवꣳ 9) So Hg u. M3; dem entsprechend P; in W समावल्गत; desgl. B, ohne Accent. 10) P अनु। स्थन।; B अनुष्ठनः 11) In Hg u. M3 शंक्तीभि॰ 12) So Hg; W वांखासा; M3 वांत् न्वासां; B वान्वासां; P वांक्। नु। आसां। s. TS5, 6, 1, 4; in Kâṭh. 39, 2 वान्नाम 13) M3 °गमा 14) P वर्चसा। अगन्।

आपो देवीर्घृतमिन्वा[1] ऊ आपो अग्नीषोमौ बिभर्त्यापा[2] इत्ताः ।
मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं यदा वः ॥
आपो हि ष्ठेति तिस्रः ॥ दिवि श्रयस्वान्तरिक्षे यतस्व पृथिव्याः[3] संभवं भ्राजं गच्छ ॥ १ ॥

Vgl. TS 5, 6, 1 (kumbheshṭakâmantraṇârthâ mantrâḥ); Kâṭh. 39, 2; Mân. Çr. 6, 1, 6 a. E.

तपो योनिरसि विश्वाभिस्त्वा[4] धीभिरच्छिद्रामुपदधाम्यृतं योनिः सत्यं योनिर्ब्रह्म योनिः क्षत्रं योनिः पृथिवी योनिरन्तरिक्षं योनिर्द्यौर्योनिर्दिशो योनिः ॥ २ ॥

(Vgl. 3, 2, 6); Kâṭh. 39, 2.

प्राणादपानं संतन्वंपानाद्व्यानं संतनु व्यानाच्चक्षुः संतनु चक्षुषः श्रोत्रं संतनु श्रोत्रात्पृथिवीं संतनु पृथिव्या[5] अन्तरिक्षं संतन्वंन्तरिक्षाद्दिवं संतनु दिवो दिशः संतनु दिग्भ्यः स्वर्गं लोकमनुसंतनु ॥ ३ ॥

Vgl. TBr. 1, 5, 7; Kâṭh. 39, 8.

ऋचा त्वा छन्दसा सादयामि वषट्कारेण त्वा छन्दसा सादयामि हिंकारेण त्वा छन्दसा सादयामि प्रस्तावेन त्वा छन्दसा सादयाम्युद्गीथेन त्वा छन्दसा सादयामि प्रतिहारेण त्वा छन्दसा सादयामि स्तुतेन त्वा छन्दसा सादयामि निधनेन त्वा छन्दसा सादयामि ॥ ४ ॥

दूतं वो विश्ववेदसं हव्यवाहममर्त्यम् ।
यजिष्ठमृञ्जसे गिरा ॥

1) Die Mss. schwanken; M3 u. W घृतमिन्वा; Hg घृतमिन्वा; P घृतं । इत् । नु । आ ।; Kâṭh. घृतमिदाप 2) P आपः । 3) So die Mss.; auch P; wohl in पृथिव्या zu corr. 4) B विश्वाभ्यस्त्वा 5) P पृथिव्याः ।

अगन्म महा नमसा यविष्ठ्यं यो दीदाय समिद्धः[1] स्वे दुरोणे।
चित्रभानुꣳ रोदसी अन्तरुर्वी स्वाहुतꣳ[2] विश्वतः प्रत्यञ्चम् ॥
अयमिह ॥

दध्वे वा[3] यदीमनु[4] वोचन्ब्रह्माणि वेरु[5] तत् ।
परि विश्वानि काव्या नेमिश्चक्रमिवाभुवत्[6] ॥
ओभे[7] सुश्चन्द्र विश्पते[8] दर्वी श्रीणीष[9] आसनि।
उतो ना[10] उत्पुपूर्या[11] उक्थेषु शवसस्पता[12] इषꣳ स्तोतृभ्या[13]
आभर ॥ ५ ॥

Vgl. RV 4,8,1; 7,12,1; 2,5,3; 5,6,9; TBr. 3, 11, 6, 3; TS 3, 3, 3, 3; 2, 2, 12, 7; 4, 4, 4, 6 (s. unten 2, 13, 7 u. 8); Kâṭh. 12, 15; 39, 13.

इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः[14] ।
जघान नवतीर्नव ॥
अचाह[15] गोरमन्वत नाम त्वष्टुरपीच्यम् ।
इत्था चन्द्रमसो गृहे ॥
इछन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम्[16] ।
अत्रिन्द्रञ्शर्यणावति[17] ॥
इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः ।
इन्द्रꣳ वाणीरनूषत ॥

---

1) B समिद्धे 2) In den Mss. ohne Accent. 3) W नो 4) Die Mss. यदिमनु; nur P यत् । ईम् । अनु । (s. TS 3, 3, 3, 3). 5) So M 3; P वेः । उ इत्यु ।; in Hg u. W मेरु; desgl. B, ohne Accent. 6) B निमिश्च° 7) So Hg; M 3 उभे; W ebenso oder ओभे; B ओभ; P आ । उभे इत्युभे । 8) Hg विष्पते 9) P श्रीणीषे । 10) P नः । 11) So Hg u. M 3; W पुष्पूर्या; B पुपूर्या 12) P शवसः । पते । 13) P स्तोतृभ्य इति स्तोतृ.भ्यः । 14) B अस्थिभि°; P अस्थिभिरित्यस्थिभिः ।; vgl. RV 1,84 13; Kâṭh. 39,12 (अस्थभि°) 15) P अच । अह । 16) M 3 ध्वपसृतं; W °ध्वपसृत 17) B आविंदञ्

इन्द्रो दीर्घाय चक्षसा[1] आ सूर्यꣳ रोहयद्दिवि ।
वि गोभिरद्रिमैरयत् ॥
इन्द्रा इङ्द्यॊः सचा सम्मिश्ला[2] आ वचोयुजा ।
इन्द्रो वज्री हिरण्ययः ॥
इन्द्र वाजेषु नो ऽव सहस्रप्रधनेषु च ।
उग्र उग्राभिरूतिभिः ॥
तमिन्द्रꣳ वाजयामसि महे वृत्राय हन्तवे ।
स वृषा वृषभो भुवत् ॥
इन्द्रः स दामने कृत ओजिष्ठः स बले हितः ।
द्युम्नी श्लोकी स सोम्यः[3] ॥
गिरा वज्रो न सम्भृतः सबलो अनपच्युतः ।
ववक्ष[4] उग्रो अस्तृतः[5] ॥ ६ ॥

Vgl. Kâṭh. 39, 12; TBr 1, 5, 8, 1—3; RV 1, 84, 13. 15. 14; 1, 7, 1—4; 8, 93 (82), 7—9.

अयमग्निः सहस्रिणो ऽग्निर्मूर्धा त्वामये पुष्करादधि ॥
अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।
यह्वा[6] इव प्र वयामुज्जिहानाः[7] प्र भानवः सिस्रते नाकमच्छ ॥
अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे ।
गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यञ्चमश्रेत् ॥
अबोधि होता यजथाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्थात् ।

---

1) P चक्षसे 2) P सं-मिश्लः । 3) So M 3 u. P; in Hg सोम्यूः; W सौम्य 4) P ववक्षे । 5) So P; in Hg, M 3, W ohne Accent. 6) M 3 जिह्वा; B बह्वा 7) P उज्जिहाना इत्युत्-जिहानाः ।

समिद्धस्य रुशददर्शि पाजो महान्देवस्तमसो निरमोचि ॥
जनस्य गोपा अजनिष्ट[1] जागृविरग्निः सुदक्षः सुविताय नव्यसे।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्विभाति भरतेभ्यः शुचिः ॥
त्वाममे अङ्गिरसो गुहा हितमन्वविन्दञ्छिश्रियाणं वने वने।
स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमङ्गिरः ॥
तुभ्येदमग्ने[2] मधुमत्तमं वचस्तुभ्यं मनीषा इयमस्तु शं हृदे[3]।
त्वां गिरः सिन्धुमिवावनीर्महीरापृणन्ति शवसा वर्धयन्ति च ॥
सं समिद्युवसे वृषन्नग्ने[4] विश्वान्यर्य[5] आ।
इडस्पदे समिध्यसे स नो वसून्याभर ॥
अग्निं वः[6] पूर्व्यं[7] गिरा देवमीडे वसूनाम्।
सपर्यवः पुरुप्रियं मित्रं न क्षेत्रसाधसम् ॥
त्वां चित्रश्रवस्तम[8] हवन्ते विक्षु जन्तवः।
शोचिष्केशं पुरुप्रियाग्ने[9] हव्याय वोढवे ॥
आ ते अग्न[10] इधीमहि द्युमन्तं देवाजरम्।
यद्ध[11] स्या ते पनीयसी समिद्दीदयति द्यवीषं स्तोतृभ्या आभर ॥

अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः।
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिना[12] इषं स्तोतृभ्या आभर ॥

सो अग्नियों वसुर्गृणे सं यमायन्ति धेनवः।

---

1) Hg अजनिष्ट 2) B तुभ्यमिदम°; P तुभ्यं। इदं। अग्ने।; s. RV 5, 11, 5. 3) So Hg, M 3 u. P; in W हृदि; desgl. B, ohne Accent; vgl. aber RV 5, 11, 5. 4) M 3 वृष° 5) P अर्यः। 6) B अग्निर्वः 7) So W u. P; in Hg पूर्वं dann die Correctur in पूर्व्यं angedeutet; B पूर्वं; M 3 पूर्व्यं 8) B चित्रश्रवस्तमं 9) B पुरुप्रिया अग्ने 10) B अग्ना 11) P यत्। ह।; W यदह 12) P वाजिनः।

समंवन्तो रघुद्रुवः सं॰ सुजातासः[1] सूरया[2] इषं॰ स्तोतृभ्या आ-
भर ॥ ७ ॥

Vgl. TS 4, 4, 4 (chando ʃbhidhâ ishṭakâḥ); 1, 8, 22, 3; Kâṭh. 39, 14; (2, 15; 11, 12); VS 15, 20—22. 24. 25. 27. 28. 30. 31. 41. 42.

एना वो अग्निं नमसोर्जो नपातमाहुवे ।
प्रियं चेतिष्ठमरतिं॰ स्वध्वरं॰ विश्वस्य दूतममृतम् ॥
त्वमग्ने गृहपतिस्त्वं॰ होता नो अध्वरे । 5
त्वं पोता विश्ववार प्रचेता यक्षि वेषि च वार्यम् ॥
देवो वो द्रविणोदाः पूर्णां॰[3] विवष्ट्यासिचम्[4] ।
उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥
अग्ने वाजस्य गोमता[5] ईशानः सहसो यहो ।
अस्मे धेहि[6] जातवेदो महि श्रवः ॥ 10
सं इधानो[7] वसुः कविरग्निरीड्येो गिरा ।
रेवदस्मभ्यं पुर्वणीक[8] दीदिहि ॥
क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः[9] ।
सं तिग्मजम्भ रक्षसो दह प्रति ॥
अग्ने तमद्याश्वं न स्तोमैः[10] क्रतुं न भद्रं॰ हृदिस्पृशम् । 15
ऋध्यामा ता[11] ओहैः ॥
अधा[12] ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः ।
रथीऋतस्य बृहतो बभूथ ॥
आभिष्टे अद्य गीर्भिर्गृणन्तो ऽग्ने[13] दाशेम ।

---

1) W सजातास 2) P सूरयः । 3) B पूर्णं॰ 4) P विवेष्टु ।; M 3 विविष्य॰ 5) P गोमत इति गो॰ मतः । 6) M 3 धेहि 7) M 3 u. W ईधानो Kâṭh. 39, 15 एधानो; 8) B पूर्वणीक 9) P उत । उषसः । 10) B सोमैः 11) P ऋध्याम । ते । 12) P अध । 13) W अग्ने

प्र ते दिवो न स्तनयन्त शुष्मैः ॥
अग्निꣳ होतारं मन्ये दास्वन्तꣳ वसुꣳ सूनुꣳ सहसो जातवेदसꣳ
विप्रं न जातवेदसम् ।
यꣳ ऊर्ध्वया स्वध्वरो देवाच्या कृपा ।
घृतस्य विभ्राष्टिमनु[2] शुक्रशोचिषः ॥
आजुह्वानस्य सर्पिषः ॥ हꣳसः शुचिषदꣳ त्वं देवꣳ सवितारमग्ने
त्वं नो अन्तमः ॥ अधा ह्यग्ने[3]ऽ एवा[4] ह्यग्ने[5] ॥ ८ ॥

Vgl. TS 4, 4, 4 (chando ʃbhidhâ ishṭakâḥ); Kâṭh. 39, 15; VS 15, 32. 35—37. 44. 45. 47.

आयाहि सुषुमा[6] हि ता[7] इन्द्र सोमं पिबा[8] इमम् ।
एदं बर्हिः सदो[9] मम ॥
आ त्वा ब्रह्मयुजा हरी वहतामिन्द्र केशिना ।
उप ब्रह्माणि नः[10] शृणु ॥
ब्रह्माणस्त्वा वयꣳ युजा सोमपामिन्द्र सोमिनः ।
सुतावन्तो हवामहे ॥
अभि त्वा शूर नोनुमो ऽदुग्धा[11] इव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ।
न त्वावꣳ[12] अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥
त्वामिद्धि हवामहे सातौ वाजस्य कारवः ।

1) P यः । 2) So M 3 u. P; in Hg u. W विभ्राष्ट्रिम°; B विभ्राष्ट्रीम°; Kâṭh. विभ्राष्टिम°; cf. TS 4, 4, 4, 8. 3) Hg ह्यग्ने; so auch W, wo aber die beiden folgenden Worte fehlen; M 3 ह्यग्नं 4) P एवं । 5) In den Mss. ohne Accent. 6) P सुषुमा । सुषुमेति सु-सुमा । 7) P ते । 8) P पिब 9) P सदः । 10) B मे 11) P नोनुमः । अदुग्धा इवेत्यदुग्धाः इव ।; in W नोनुमो दुग्धा 12) P त्वावानिति त्वा-वान् ।

त्वाꣳ वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्ववतः[1] ॥
स त्वं नश्चित्र वज्रहस्त धृष्णुया महः स्तवानो अद्रिवः ।
गामश्वꣳ रथ्यमिन्द्र सं किर सचा वाजं न जिग्युषे[2] ॥
कया नश्चित्र[3] आभुवदूती सदावृधः सखा ।
कया शचिष्ठया वृता ॥
कस्त्वा सत्यो मदानां मꣳहिष्ठो मत्सदन्धसः[4] ।
दृढा चिदारुजे वसु ॥
अभी[5] षु णः[6] सखीनामविता जरितॄणाम् ।
शतं भवास्यूतिभिः ॥
यज्ञा यज्ञा वो अग्नये गिरा गिरा च दक्षसे ।
प्र प्र वयममृतं जातवेदसं प्रियं मित्रं न शꣳसिषम् ॥
ऊर्जो नपातꣳ स हिनायमस्मयुर्दाशेम[7] हव्यदातये ।
भुवद्वाजेष्वविता भुवद्वृधः[8] उत त्राता तनूनाम् ॥ ९ ॥

Vgl. (4, 12, 4. 5); 4, 9, 27. — TS 2, 4, 14, 2. 3; 4, 2, 11, 2 u. 4, 4, 12, 5 (yajyânuvâkyâḥ); TA 4, 42, 3; Kâṭh. 39, 12; VS 27, 35—42. 44; Mân. Çr. 6, 2, 3.

ऋतूनां पत्नी प्रथमेयमागादहां[9] नेत्री जनिꣳ३युतं प्रजानाम् ।
एका सती बहुधोषो[10] ꣳ३व्युच्छाजीर्णा[11] त्वं जरय[12] सर्वमन्यत् ॥
को विराजो मिथुनत्वं प्रवेद ऋतून्को अस्याः क उ[13] वेद रूपम् ।
दोहान्को वेद कतिधा विदुग्धाः कति धामानि कति ये विवासाः[14] ॥

1) P अर्वतः । 2) B वाजं अजिग्युषे 3) P चित्रः ।; B °श्चित्रा 4) M 3 मत्स° 5) So Hg; in M 3 अभि, desgl. B, ohne Accent; P अभि । (s. aber RV 4, 31, 3). 6) P सु । नः । 7) P हिन । अयम् । अस्मयुरित्यस्मयुः । 8) P वृधे । 9) P प्रथमा । इयं । आ । अगात् । 10) W बहुधोषा 11) P fehlerhaft वि । उछ । जीर्णा । 12) So Hg (u. A); in W u. B जरया; M 3 जरयाः; P जरयः; Kâṭh. 39,10 जरय; TS 4,3,11,5 जरयसि 13) P कः । उ इत्यु । 14) So M 3; in den anderen Saṃh.-Mss. fehlt Visarga; P विवासा इति वि.वासाः ।

इयमेव सा या प्रथमा व्यौछत्सा[1] ३ प्स्वन्तश्चरति[2] प्रविष्टा।
वधूर्मिमाय नवगज्जनित्री[3] त्रय एनां महिमानः सचन्ते॥
छन्दस्वती उषसौ पेपिशाने समानꣳ योनिमनुसंचरेते।
सूर्यपत्नी विचरतः प्रजानती केतुमती अजरे[4] भूरिरेतसौ॥
ऋतस्य पन्थामनु तिस्र आगुस्त्रयो घर्मासो अनु रेतसागुः[5]।
प्रजामेका जिन्वत्यूर्जमेका[6] क्षत्रमेका रक्षति देवयूनाम्॥
चतुष्टोममदधाद्या तुरीया यज्ञस्य पक्षा ऋषयो भवन्ती[7]।
गायत्रीं त्रिष्टुभं जगतीꣳ विराजमर्कꣳ युञ्जानाः ३स्वराभरन्निदम्[8]॥
पञ्चभिर्धाता विदधा[9] इदं तासाꣳ स्तृरजनन्यश्च पञ्च।
तासामु यन्ति[10] प्रयवेण पञ्च नाना रूपाणि क्रतवो वसानाः॥
ऋतस्य धामन्प्रथमा[11] व्यूषुषपामेका[12] महिमानं बिभर्ति।
सूर्यस्यैका चरति निष्कृतानि घर्मस्यैका सवितैकां नियछते॥
इदꣳ श्रेयो मन्यमानो वा[13] आगामहꣳ[14] वो अस्मि सख्याय शेवः।
समानजन्मा क्रतुरस्त्येकः सर्वैः सर्वा[15] विचरतु प्रजानन्॥

---

1) व्यौछत् in den Mss. ohne Accent (s. aber TS 4, 3, 11, 1). 2) Die ३ fehlt in den Mss. 3) P नवगदिति नव.गत्। जनित्री। 4) B अजिरे 5) So die Samh.-Mss.; P रेतसा। अगुः। 6) In P जिन्वति। ohne Accent. 7) S. TS 4, 3, 11, 2; die Mss. schwanken, Hg u. W ऋषयो भवन्ति। desgl. B, ohne Accent; M 3 ऋषयो भवंती; P ऋषयः। भवंति।; Kâṭh. भवंती 8) Die Mss. ohne die ३; P स्वरिति स्वः। आ। अभरन्। 9) P वि। दधे। 10) So Hg u. W; in M 3 तासामू यंति; B तासामुयति; P तासां। उ इत्यु। यंति।; (s. TS 4, 3, 11, 2). 11) B धाम प्र° 12) So Hg (u. A); P व्यूषुषोति वि.उषुषी। (s. TS 4, 3, 11, 5); M 3 व्युषूष्य°; W व्युषुष्य°; desgl. B, ohne Accent; ebenso Kâṭh. 13) P वः। 14) P आं। अगां। 15) P सः। सर्वाः।

भूयास्म ते सुमतौ विश्ववेदा आष्टाः[1] प्रतिष्ठामविदो हि गाधम् ।
सत्यꣳ वदन्तीर्महिमानमापान्या[2] वो अन्यामति मा[3] प्रयुक्त[4] ॥
रुशद्विधाना समना पुरस्तात्प्रजानती याममुषा[5] अयासीत् ।
ब्रह्मद्विषस्तमसा देवशूनभिवहन्ती विश्ववारा वूवाट्[6] ॥
पञ्च व्युष्टीरनु पञ्च दोहा[7] गां पञ्चनाम्नीमृतवो ऽनु[8] पञ्च ।
पञ्च दिशः पञ्चदशेन कॢप्ताः समानमूर्ध्वीरभि लोकमेकम् ॥
त्रिꣳशत्स्वसारः[9] उपयन्ति निष्कृतꣳ[10] समानं केतुं प्रतिमुञ्चमानाः ।
ऋतूꣳस्तन्वते कवयः प्रजानतीर्मध्येछन्दसः परियन्ति भास्वतीः ॥
ज्योतिष्मतीः प्रतिमुञ्चते नभो[11] देवी रोची सूर्यस्य व्रतानि ।
विपश्यन्ति पशवो जायमाना नानारूपा मातुरस्या उपस्थे ॥
प्रथमा ह व्युवास सा धेनुरभवद्यमे ।
सा नः पयस्वती दुहा[12] उत्तरामुत्तराꣳ समाम्[13] ॥ १० ॥

Vgl. TS 4, 3, 11 (vyushṭyâkhyâ ishṭakâḥ); Kâṭh. 39, 10.

पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा-
विवेश । 15
वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषस्पातु[14]
नक्तम् ॥

---

1) So Hg u. A, nur ohne Visarga; in M 3 u. W आष्टा; B अष्टा; P आ । ष्टा ।; TS 4, 3, 11, 4 आष्ट 2) P आप । अन्याः । 3) P अन्यां । अतिमा ।; in Hg °मतिमा ohne Accent. 4) So wohl Hg; in M 3 प्र युक्त; W प्र युक्तः; B प्रायुंक्त; P प्र । युक्त । 5) P यामं । उषा । (!); die Saṃh.-Mss. याममुषा 6) P वि । अवाट् ।; M 3 वूराट् 7) P दोहाः । 8) P ऋतवो अनु ।; s. TS 4, 3, 11, 4; Hg °मृतवो नु 9) P स्वसारः । 10) M 3 निकृतꣳ; B निर्कृतꣳ 11) P नभः ।; B नमो 12) P दुहे ।; M 3 दुहामुत्तराम°; so Kâṭh. (ohne Accent). 13) W समा 14) Hg u. M 3 ऋषस्पातु; W ऋषस्पातु; B रिषः पातु; cf. 1, 2, 4 इडायास्पदे; 1, 3, 39 रिषस्पाहि

त्वꣳ यविष्ठ दाशुषो नृꣳष्पाहि[1] शृणुधी[2] गिरः ।
रक्षा[3] तोकमुत त्मना ॥
अग्ने धामानि तव जातवेदो देव स्वधावो ऽमृतस्य नाम ।
यांश्च मायाः[4] मायिनाꣳ विश्वमिन्व त्वे पूर्वीः संदधुः पृष्ठबन्धो[5] ॥ ११ ॥

Vgl. 3, 16, 4. — (TS 1, 5, 11, 1); Kâṭh. 40, 3; 7, 16; VS 18, 73 u. 77; 13, 52; RV 1, 98, 2,; 8, 84 (73), 3; 3, 20, 3.

यवा अयवा[6] ऊमा[7] एवा अद्रिः सगरः सुमेको ऽग्ने कह्यग्ने किꣳशिलाग्ने दुध्राग्ने वन्याग्ने[8] कक्ष्य[9] या ता[10] इषुर्युवा नाम तया विधेम तस्यै ते नमस्तस्यास्ता[10] उप पत्सुतो[11] जीवा भूयासꣳ ते यꣳ द्विष्मो यश्च नो द्वेष्टि तमस्या[12] जम्भे दध्मः ॥ १२ ॥

Vgl. TS 4, 4, 7, 2 a. E. (bhûyaskṛdâdaya ishṭakâḥ); 5, 5, 9, 1 (agnividhiḥ; âhutyâdikam); Kâṭh. 40, 3; (Mân. Çr. 6, 2, 3.)

यो अ३प्स्वन्तरग्नियो वृत्रे यः पुरुषे[13] यो अश्मनि ।
य[14] आविवेशौषधीर्यो वनस्पतीꣳस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥
यः सोमे अन्तर्यो गोष्वन्तर्वयाꣳसि य[14] आविवेश यो मृगेषु ।
य[14] आविवेश द्विपदो यश्चतुष्पदस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥
येनेन्द्रस्य रथꣳ संबभूवुर्यो वैश्वानर[15] उत विश्वदाव्यः ।

---

1) Die Mss. schwanken; Hg नृꣳष्पाहि; M 3 u. W नृꣳष्पाहि, wobei Visarga aus ꣳ entstellt sein dürfte; P नृन् । cf. RV 8, 84 (73), 3; in Kâṭh. 7, 16 नृः पाहि 2) W u. P शृणुधि 3) P रक्ष ।; B रक्ष 4) P मायाः । 5) P पृष्ठबंधो इति पृष्ठ-बंधो । (s. RV 3, 20, 3); M 3 u. B पृष्ठबंधोः; W पृष्ठबंधोः; ebenso Hg, nur ist hier der Visarga später erst mit rother Tinte zugefügt. 6) P यवाः । अयवाः । 7) P ऊमाः ।; B उमा 8) P अग्ने । काह्य । अग्ने । किꣳशिल । अग्ने । दद्र (!)। अग्ने । वन्य । अग्ने । 9) So im Anschluss an die Lesart von M 3 u. W कक्ष्य, mit Hinweis auf 2, 9, 6; Kâṭh. 40, 3; VS 16, 34; die andern Mss., auch P, lesen कक्ष 10) P ते । 11) So Hg; P पत्सुत इति पत्-सुतः ।; B पत्सुतो; M 3 पतत्सूतो; W °तानुपचत्सुतो 12) P अस्याः ।; B °स्यां 13) M 3 पूरुषे; Hg पुरुषो 14) P यः । 15) P वैश्वानरः ।

धीरो यः शक्रः परिभूरदाभ्यस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥
विश्वादमग्निꣳ यमु काममाहुर्यं दातारं प्रतियहीतारमाहुः ।
यं जोहवीमि[1] पृतनासु सासहिं तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥
उक्षान्नाय वशान्नाय सोमपृष्ठाय[2] वेधसे ।
स्तोमैर्विधेमाग्नये ॥
वैश्वानरज्येष्ठेभ्यस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥ १३ ॥

(Vgl. TS 1, 3, 14, 7); Kâṭh. 40, 3. 5.

मा छन्दस्तृथिव्यग्निर्देवता तेन छन्दसा तेन ब्रह्मणा तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ प्रमा छन्दस्तदन्तरिक्षꣳ वायुर्देवता प्रतिमा छन्दस्तद् द्यौः सूर्यो देवतासीवीश्छन्दस्तद्दिशः[3] सोमो देवता गायत्री छन्दस्तदजा बृहस्पतिर्देवता त्रिष्टुप्छन्दस्तदविरण्यमिन्द्रो देवता जगती छन्दस्तदौक्षः प्रजापतिर्देवतानुष्टुप्छन्दस्तदायुर्मित्रो देवतो ष्णिक्छन्दस्तच्चक्षुः पूषा देवता विराट् छन्दस्तदश्वो वरुणो देवता बृहती छन्दस्तत्कृषिः पर्जन्यो देवता पङ्क्तिश्छन्दस्तत्पुरुषः[4] परमेष्ठी देवता तेन छन्दसा तेन ब्रह्मणा तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ १४ ॥

Vgl. 2, 8, 3. — TS 4, 3, 7, 1 (bṛhatyâkhyâ iṣṭakâḥ); Kâṭh. 39, 4; VS 14, 18–20.

पृथिव्यसि जन्मना वशा सा[5] मग्निं[6] गर्भमधत्थाः[7] सा मया संभवान्तरिक्षमसि जन्मना वशा सा[8] वायुं गर्भमधत्थाः सा मया संभव

1) B यज्ञो हवीषि 2) M3 सोमपृष्ठाय; W सोमपृष्ठाय; P सोमपृष्ठायेति सोमपृष्ठाय । 3) So Hg u. W; in M3 °श्रीवी छ°; B स्त्रोवी छ°; P ganz corrupt स्त्रावी। (eig. स्त्रावीः।, dann Visarga gestrichen); vgl. oben 2, 8, 3. In Kâṭh. 39, 4 °स्त्रोवयश्छ° 4) M3 तत्पुरुषः 5) Hg सामिं; M3 सा ऽग्निं; P वशा । सा । अग्निं । 6) So Hg; M3 °धथाः; W धच्छाः (छ häufig für थ verschrieben); B °धथाः; P अधथाः । 7) Von hier bis संभव द्यौरसि (excl.) in B fehlend. 8) सा in Hg ohne Accent.

द्यौरसि जन्मना वशा सादित्यै[1] गर्भमधत्थाः[2] सा मया संभव नक्षत्रा-
णयसि जन्मना वशा सा[1] चन्द्रमसं गर्भमधत्थाः[2] सा मया संभव
ऋगसि जन्मना वशा सा[1] साम गर्भमधत्थाः[2] सा मया संभव
विडसि जन्मना वशा सा[1] राजानं गर्भमधत्थाः[2] सा मया संभव
वागसि जन्मना वशा सा[1] प्राणं गर्भमधत्थाः[2] सा मया संभवापो
ऽसि जन्मना वशा सा[1] यज्ञं गर्भमधत्थाः[2] सा मया संभव ॥ १५ ॥

Vgl. Kâṭh. 39, 8; (Mân. Çr. 6, 2, 3.)

या देव्यसीष्टके कुमार्युपशीवरी सा मोपशेष्व जायेव सदमित्पति या देव्यसीष्टके प्रफर्व्युपशीवरी सा मोपशेष्व जायेव सदमित्पति या देव्यसीष्टके युवतिरुपशीवरी[3] सा मोपशेष्व जायेव सदमित्पति या देव्यसीष्टक आयुदाः प्राणदा अपानदा व्यानदाश्चक्षुदाः श्रोत्रदाः पृथिव्यामन्तरिक्षे दिवः पृष्ठ उपशीवरी सा मोपशेष्व जायेव सदमित्पति या देवीः स्येष्टकाः[4] सुशेवा उपशीवरीस्ता मोपशेध्वं[5] जाया इव सदमित्पतिम् ॥ १६ ॥

Vgl. Kâṭh. 39, 9; (Mân. Çr. 6, 2, 3).

संवयसे त्वाभिवयसे त्वोर्ध्ववयसे त्वा बृहद्वयसे त्वा सहीयसे त्वा सहमानाय त्वा सासहये त्वा सहस्वते त्वाभीषाहे[6] त्वाभिभ्वे त्वाभिमातिषाहे त्वाभिमातिघ्ने त्वा ॥ १७ ॥

(Mân. Çr. 6, 2, 3).

भूयस्कृदसि वरिवस्कृदसि प्राच्यस्यूर्ध्वास्यन्तरिक्षमस्योजोदां त्वौजसि सादयामि पयोदां त्वा पयसि सादयामि तेजोदां त्वा तेजसि

---

1) In Hg सा ohne Accent. 2) So Hg; M 3 °धथाः; W °धच्छाः; B °धस्थाः 3) So Hg; in M 3 युवतीर°; W युवतीर°; P युवतीः। 4) Hg स्येष्टकाः 5) P मा। उप। शेध्वं।; B मोपशेष्व 6) P अभिषाहे। अभिसाह इत्यभि. साहे।

साद्यामि यशोदां त्वा यशसि साद्यामि वर्चोदां त्वा वर्चसि सादयामि[IV] पृथिव्यास्त्वा द्रविणे साद्याम्यन्तरिक्षस्य त्वा द्रविणे सादयामि दिवस्त्वा द्रविणे साद्यामि दिशां त्वा द्रविणे सादयामि द्रविणोदां त्वा द्रविणे साद्याम्यप्सुषदसि गृध्रसदसि श्येनसदसि सुपर्णसदसि नाकसदसि ॥ १८ ॥

Vgl. TS 4, 4, 7 (bhûyaskṛdâdaya ishṭakâḥ) und 6 (viçvajyotirâdyâ ishṭakâḥ); Kâṭh. 39, 9; (Mân. Çr. 6, 2, 3.)

ज्योतिष्मतीं त्वा साद्यामि ज्योतिष्कृतं त्वा सादयामि ज्योतिर्विदं त्वा साद्याम्यूर्ध्वज्योतिषं त्वा सादयामि बृहज्ज्योतिषं त्वा सादयामि विश्वज्योतिषं त्वा साद्याम्यजस्रां त्वा सादयामि भास्वतीं त्वा साद्यामि दीप्यमानां त्वा सादयामि रोचमानां त्वा साद्यामि ज्वलन्तीं त्वा सादयामि मल्मलाभवन्तीं[2] त्वा साद्यामि जायतीं त्वा साद्यामि बोधयन्तीं त्वा सादयामि ॥ १९ ॥

Vgl. TS 1, 4, 34 (poshaṇe dâhe viniyuktâni yajûṃshi); TÂ 3, 19; Kâṭh. 40, 4; (Mân. Çr. 6, 2, 3).

कृत्तिका नक्षत्रमग्निर्देवताग्नेः रुचः स्थ प्रजापतेः सोमस्य धातुर्-ऋचे त्वा रुचे त्वा भासे त्वा ज्योतिषे त्वा तेन छन्दसा तेन ब्रह्मणा तया देवतयाङ्गिरस्वद् ध्रुवा सीद रोहिणी नक्षत्रं प्रजापतिर्देवते-न्वगा[3] नक्षत्रं मरुतो देवता बाहुनक्षत्र रुद्रो देवता पुनर्वसुनक्षत्र-मदितिर्देवता तिष्यो नक्षत्रं बृहस्पतिर्देवताश्लेषा[4] नक्षत्र सर्पा देव-ता मघा नक्षत्र पितरो देवता फल्गुनीनक्षत्रं भगो देवता फल्गुनी-

1) Von hier bis दिवस्त्वा (excl.) in B fehlend. 2) Kâṭh. मन्मलाभवंती 3) M 3 °तेन्वंगा; P इल्वगा। wohl Schreibfehler für इन्वगा।; Kâṭh. °तेन्वका 4) P श्लेषा।

नक्षत्रमर्यमा देवता हस्तो नक्षत्रꣳ सविता देवता चित्रा नक्षत्रं त्वष्टा देवता निष्ट्यं[1] नक्षत्रꣳ वायुर्देवता विशाखं[2] नक्षत्रमिन्द्राग्नी देवतानूराधा[3] नक्षत्रं मित्रो देवता ज्येष्ठा नक्षत्रꣳ वरुणो देवता मूलं नक्षत्रं निर्ऋतिर्देवतापाढा नक्षत्रमापो देवता-
5 षाढा नक्षत्रꣳ विश्वे देवा देवताभिजिन्नक्षत्रं[4] ब्रह्मा[5] देवता श्रोणा नक्षत्रꣳ विष्णुर्देवता श्रविष्ठा नक्षत्रꣳ वसवो देवता शतभिषं[6] नक्षत्रमिन्द्रो देवता प्रोष्ठपदा[7] नक्षत्रमहिर्बुध्न्यो देवता प्रोष्ठपदा[8] नक्षत्रमज एकपाद्देवता रेवती नक्षत्रं पूषा देवताश्वयुजौ नक्षत्रम-
श्विनौ देवता भरणीर्नक्षत्रꣳ[9] यमो देवता ब्राह्मणो नक्षत्रꣳ सोमो
10 देवतागने रुचः स्थ प्रजापतेः सोमस्य धातुश्छन्दसां त्वा रुचे त्वा भासे त्वा ज्योतिषे त्वा तेन छन्दसा तेन ब्रह्मणा तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ २० ॥

Vgl. TS 4, 4, 10 (nakshatreshṭakâḥ); Kâṭh. 39, 13; (Mân. Çr. 6, 2, 3.)

समीची नामासि प्राची दिक्तस्यास्ते ऽग्निरधिपतिरसितो[10] रक्षिता यश्च ते ऽधिपतिर्यश्च रक्षिता ताभ्यां नमो अस्तु तौ नो मृडतां[11] ते
15 यं द्विष्मो यश्च नो द्वेष्टि तमेनयोर्जम्भे दध्म ओज३स्या नामासि दक्षिणा दिक्तस्यास्ता इन्द्रो ऽधिपतिस्तिरश्चीनराजी[12] रक्षिता

---

1) Die Mss. schwanken; Hg निष्ट्यं oder निष्टिं; M 3 निष्टं; B निष्टिं; W निष्टि; P निष्टः ।; Kâṭh. 39, 13 निष्ट्या नक्षत्रम् 2) So Hg u. M 3; P विशाखमिति वि. शाखं ।; W विशाषं; nur B विशाखे; Kâṭh. विशाखा नक्षत्रम् 3) P अनुराधेत्यनु. राधा । 4) P अभिजिदित्यभि. जित् ।; M 3 °भिर्ज्यं; W °भिजि 5) So Hg u. W; desgl. B, ohne Accent; P ब्रह्मा ।; M 3 ब्रह्म 6) So Hg, W u. P; in M 3 शतभीषꣳ; B शतभिषङ्; so auch Kâṭh. 39, 13. 7) W प्रोष्टपदा; dem entsprechend auch P; M 3 प्रोष्टपादा 8) W प्रोष्टपदा; M 3 प्रौष्टपादा 9) M 3 भरणी नꣳ; P भरणी । 10) M 3 °सीतौ 11) P मृडतां । 12) P तिरश्चीनराजिरिति तिरश्चीन. राजिः ।

यश्च ते ऽधिपतिर्यश्च रक्षिता ताभ्यां नमो अस्तु तौ नो मृडतां ते यं द्विष्मो यश्च नो द्वेष्टि तमेनयोर्जम्भे दध्मः प्राची नामासि प्रतीची दिक्स्यास्ते सोमो ऽधिपतिः स्वजो रक्षिता यश्च ते ऽधिपतिर्यश्च रक्षिता ताभ्यां नमो अस्तु तौ नो मृडतां ते यं द्विष्मो यश्च नो द्वेष्टि तमेनयोर्जम्भे दध्मः सुषदा नामास्युदीची दिक्स्यास्ते वरुणो ऽधिपतिः मृदागू[2] रक्षिता यश्च ते ऽधिपतिर्यश्च रक्षिता ताभ्यां नमो अस्तु तौ नो मृडतां ते यं द्विष्मो यश्च नो द्वेष्टि तमेनयोर्जम्भे दध्मो ऽवस्था[3] नामास्यवाची दिक्स्यास्ते विष्णुरधिपतिः कल्माषग्रीवो रक्षिता यश्च ते ऽधिपतिर्यश्च रक्षिता ताभ्यां नमो अस्तु तौ नो मृडतां ते यं द्विष्मो यश्च नो द्वेष्टि तमेनयोर्जम्भे दध्मो ऽधिपत्नी नामास्यूर्ध्वा दिक्स्यास्ते बृहस्पतिरधिपतिश्चित्रो रक्षिता यश्च ते ऽधिपतिर्यश्च रक्षिता ताभ्यां नमो अस्तु तौ नो मृडतां ते यं द्विष्मो यश्च नो द्वेष्टि तमेनयोर्जम्भे दध्मः ॥ २१ ॥

Vgl. TS 5, 5, 10 (sarpâhutir mahâhomo mokaç ca).

स्वयं कृण्वानः सुगमप्रयावं तिग्मशृङ्गो वृषभः शोशुचानः।
प्रान्ं सधस्थमनुपश्यमाना आ तन्तुमग्निर्दिव्यं ततान॥
त्वं तन्तुरुत सेतुरग्ने त्वं पन्था भवसि देवयानः।
त्वयाग्ने पृष्ठं वयमारुहेम यत्र देवैः सधमादं मदेम॥
अतिसर्गं दद्तो मानवायोर्ध्वं पन्थामनुपश्यमानाः।
अजुषन्त मरुतो यज्ञमेतं वृष्टिद्यावानममृतं स्वर्विदम्॥
आवर्तमानो भुवनस्य मध्ये प्रजाः कृण्वन्जनयन्विरूपाः।

1) W ते नो मृडता 2) M 3 सृदाकू; P सदाकुः। 3) P अवस्थेत्यव. स्था।
4) So Hg u. M 3; P अनु. पश्यमानः।; W °पद्यमाना; desgl. B, ohne Accent.

स॰वत्सरः परमेष्ठी धृतव्रतो यज्ञो[1] नः पातु रजसः परस्मात् ॥
प्रजां ददातु परिवत्सरो नो धाता दधातु सुमनस्यमानः।
बह्वीः साकं बहुधा विश्वरूपा एकव्रता मामभिस॰वि-
शन्तु ॥ २२ ॥

Vgl. Kâṭh. 40, 12; TBr. 2, 4, 2, 5 u. 6. (Mân. Çr. 6, 2, 6).

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक[2] आसीत्।
स दाधार[3] पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
यः प्राणतो निमिषतश्च[4] राजा पतिर्विश्वस्य जगतो बभूव।
ईशे यो अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥
य ओजोदा बलदा[5] यस्य विश्व उपासते प्रशिष॰ यस्य देवाः।
यस्य छायामृत॰[6] यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥
यस्येमे[7] विश्वे[8] गिरयो महित्वा समुद्र॰ यस्य रसया सहाहुः[9]।
दिशो यस्य प्रदिशः पञ्च देवीः कस्मै देवाय हविषा
विधेम ॥
येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभित॰[10] येन नाकः।
यो अन्तरिक्ष॰ विममे वरीयः कस्मै देवाय हविषा विधेम ॥
य[11] इमे द्यावापृथिवी[12] तस्तभाने[13] अधारयद्रोदसी[14] रेज-
माने।

---

1) B यज्ञो 2) P एकः। 3) P दधार। 4) B निमिषश्च 5) P ओजोदा इत्योजः दाः। बलदा इति बलदाः। 6) P छाया। अमृतं। 7) P यस्य। इमे। 8) Dies Wort fehlt in B. 9) So wohl Hg; in M 3 u. W सहाहुः; P सह। आहुः। 10) B स्वभृत॰; vgl. den folgenden Vers. 11) P यः। 12) So Hg, M 3 u. W (desgl. Kâṭh.); dem entsprechend P; in B द्यावापृवी; das Metrum könnte ॰पृथ्वी vermuthen lassen, welche Form oben 2, 7, 15 sich zeigte, und auch unten 4, 10, 1; 4, 17, 7 (zugleich metrisch nothwendig) auftritt. 13) M 3 तस्थभाने; desgl. B, ohne Accent. 14) B आधारयद्; auch M 3 eigentlich आधारयत, aber dann in अध॰ corrrigirt.

यस्मिन्नधि वितततः सूरा[1] एति कस्मै देवाय हविषा विधेम।
आपो ह यन्महतीर्विश्वमायन्गर्भं[2] दधाना[3] जनयन्तीरग्निम्।
ततो देवानां निरवर्ततासुः कस्मै देवाय हविषा विधेम॥
आ नः प्रजां जनयतु प्रजापतिर्धाता दधातु सुमनस्यमानः।
सꣳवत्सर[4] ऋतुभिः सꣳविदानो मयि पुष्टिं पुष्टिपतिर्दधातु॥ 5

॥ २३ ॥ Vgl. (2, 7, 15; 3, 12, 16. 17); RV 10, 121; TS 4, 1, 8, 3 flg. (prayâjayâjyâ âprînâmakâḥ); Kâṭh. 40, 1; (Mân. Çr. 6, 2, 3); VS 13, 4; 23, 1 u. 3; 25, 10—13; 27, 25 u. 26; 32, 3. 6 u. 7.

---

1) P सूरः। 2) P आ। अयन्। 3) P दधानाः। 4) P सꣳवत्सरः।

॥ इति मध्यमकाण्डे त्रयोदशमः प्रपाठकः ॥

॥ इति मध्यमकाण्डं समाप्तम् ॥

Druck von Gebr. Unger (Th. Grimm) in Berlin SW., Schönebergerstrasse 17a.

॥ मैत्रायणी संहिता ॥

MÂITRÂYANÎ SAMHITÂ

HERAUSGEGEBEN

VON

DR. LEOPOLD VON SCHROEDER.

DRITTES BUCH.

GEDRUCKT AUF KOSTEN DER DEUTSCHEN MORGENLÄNDISCHEN GESELLSCHAFT.

LEIPZIG

IN COMMISSION BEI F. A. BROCKHAUS

1885.

Vorwort.

Für die Ausarbeitung des vorliegenden dritten Buches der Mâitrâyaṇî Saṃhitâ hat mir leider nur ein sehr beschränktes handschriftliches Material zu Gebote gestanden, und sind auch weitere Mss. dieses Buches bisher nicht bekannt geworden. Vergebens hatte ich gehofft, dass auch für dieses Buch, wie für alle andern, sich in Indien eine alte Handschrift werde auffinden lassen. Es ist dies bis jetzt nicht der Fall gewesen.

Die einzigen bisher bekannten und von mir benutzten Handschriften dieses Buches sind:

1. Die Haug'sche Handschrift, der Münchener Hof- und Staatsbibliothek gehörig, von einem älteren Ms. in Nasik im Jahre 1884 copiert; ich habe dieselbe schon in der Einleitung zum ersten Buche der Mâitr. Saṃh. p. XXXV erwähnt und mit H bezeichnet.

2. Die Handschrift von Bombay, moderne Copie, aus derselben Quelle stammend, mit Bb bezeichnet (vgl. Einleitung zum ersten Buche p. XXXVI).

3. Die unaccentuirte Bühler'sche Handschrift, von mir mit B bezeichnet, moderne Copie, ebenfalls aus Nasik stammend (s. Einleitung zum ersten Buche p. XXXVI).

Alle diese drei Handschriften sind ganz moderne Copieen und gehen ersichtlich auf dieselbe Quelle, ein älteres, in Nasik (Dekhan) befindliches Ms. zurück; sie vertreten demnach alle zusammen ein und dieselbe ältere Handschrift, und musste also der Text eigentlich nach einer einzigen Handschrift festgestellt werden. Dazu kam dann nun freilich noch der Padapâṭha, und es ist auf denselben bei dem geringen sonstigen Material vielleicht mehr Gewicht gelegt worden, als dies sonst geschehen wäre.

Unter solchen Umständen war die Aufgabe, den Text des vorliegenden Buches lesbar und korrekt herzustellen, keine ganz leichte. Die Zahl der nothwendigen Verbesserungen, die eine einzige ältere Handschrift uns wohl zum grossen Theil erspart hätte, war sehr beträchtlich und es werden Irrungen im Einzelnen

unvermeidlich gewesen sein. Auch haben einige Stellen in der völlig unverständlichen Form bleiben müssen, wie sie die Handschriften bieten, da sich für alle Schwierigkeiten eine befriedigende Lösung schlechterdings nicht finden liess.

Wenn ich nun auch nicht daran zweifle, dass ein schärferes Auge noch manche Schwierigkeit hätte lösen können, manche scheinbar gelöste richtiger gelöst hätte, so glaube ich doch, dass die oben dargelegten ungünstigen Handschriften-Verhältnisse mir für manchen bei der mühsamen Arbeit begangenen Fehler die Indemnität von Seiten der berufenen Richter sichern werden.

Eine Reihe von Berichtigungen und mehrere zum Theil evidente, zum Theil sehr beachtenswerthe Conjecturen, die ich meinem verehrten Freunde, Prof. B. Delbrück in Jena verdanke, sind als „Corrigenda" aufgeführt.

Endlich erfülle ich noch eine angenehme Pflicht, indem ich dem Hochverordneten Conseil der Kaiserl. Universität zu Dorpat für die Verleihung des Heimbürgerschen Reisestipendiums meinen wärmsten Dank abstatte. Nur durch diese Unterstützung war ich im Stande, die erforderlichen handschriftlichen Studien in Deutschland auszuführen, namentlich auch das Ms. des *Kâṭhaka* in Berlin zu vergleichen.

Auch die Verwaltung der Königl. Bibliothek zu Berlin, welche mir die Benutzung der Kâṭhaka-Handschrift möglich machte, bitte ich meinen Dank entgegen nehmen zu wollen.

Zum Schluss noch die Bemerkung, dass auch das vierte Buch der Mâitr. Saṃh. vollständig druckfertig in der Officin liegt und der Druck desselben unverzüglich in Angriff genommen werden soll.

Dorpat, im August 1885.

Dr. L. v. Schroeder.

मैत्रायणी संहिता

जनविक्रमिणा श्रोत्रा लीवोणयदेशोद्भवेन शोधिता

प्रुश्यनाम्नि राष्ट्रे बेर्लीणाख्यायां राजधान्यां मुद्रिता

संवत्सरे १८८५

जुहूमग्ने समार्ष्टि जुहूर्वै यज्ञमुखं मुखतो वा एतद्यज्ञमालब्ध जु३ह्वा वै देवा विराजमह्वयन्त तज्जुह्वा[1] जुहूत्वमन्न वै विराडन्नं जुहूर३को ऽग्नियज्जुह्वा जुहोत्यन्नस्य चाकस्य चावरुद्धा अष्टौ कृत्वो जुह्वां[2] गृह्णात्यष्टाक्षरा[3] गायत्री गायत्री यज्ञमुखं यज्ञमुखमेवालब्ध यत्सावित्राणि हूयन्ते प्रसूत्या अथो यजुषामेव नानावीर्यत्वाया- 5
ग्निर्वै यच्च यच्चागच्छत्त सवितान्वपश्यद्यत्सावित्राणि हूयन्ते ऽग्नेरेवानुक्शात्या[4] अग्निं ज्योतिर्निचाय्य पृथिव्या अध्याभरदिति सविता वा एतद्ग्ने ज्योतिः पृथिव्याः समभरत्तस्मादेवमाह युक्तिमन्ति च जुहोति[5] मनस्वती च युक्तेन हि मनसा यज्ञस्तायते षड्गृमाणि[6] भवन्ति षड्वा ऋतव ऋतुष्वेव प्रतितिष्ठत्येति वा एष यज्ञमुखाद्३यो 10
ऽत्यामाग्नेय्या[8] अग्ने देवतामुपैति यत्सावित्राणि न स्युरियात्सावित्रात्रसवादृष्टौ वा एतानि यजू॰ष्यष्टाक्षरा गायत्री गायत्री यज्ञमुखं तेन यज्ञमुखान्नैति यदु सावित्राणि तेन सावित्रात्रसवान्नैति छन्दोभिर्जुहोति छन्दोभिर्वा एतद्ग्नये बलिं॰ हारयति बहवो हास्य बलिहृतो भवन्त्यृग्वै यज्ञस्य नेदीयो यजुर्यजमानस्य यदि कामयेत 15
यज्ञं॰ यज्ञयशसेनार्पयेयमित्यृगुत्तमानि कुर्याद्यज्ञं॰ वा एतद्यज्ञयशसे-

1) Die Mss. जुह्वा 2) H u. Bb जुह्वां; B जुह्वा 3) Das Verb in den Mss. accentuirt गृह्णात्य॰ 4) Die Mss. ॰च्यात्या॰ 5) So Bb; in H accentuirt जुहोति 6) Die Mss. रिग्माणि 7) Die ३ fehlt in den Mss. 8) Die Mss. ॰मेर्या॰ 9) So corrigirt; die Mss. स्युरीयात्; cf. unten 3, 3, 3 a. A.

नार्पयति यदि कामयेत यजमानꣳ यज्ञयशसेनार्पयेयमिति यजुरुत्तमानि कुर्याद्यजमानꣳ वा एतद्यज्ञयशसेनार्पयत्याहुतीनाꣳ वा अभिक्रान्त्या यजमान ऋध्नोति यं कामयेत ऋध्नुयादिति तस्य सकृत्सर्वाण्यनुद्रुत्य जुहुयाद्ऋध्नोत्येव यं कामयेत पापीयान्त्स्यादिति तस्य नाना जुहुयात्पापीयान्भवत्यृचा स्तोमꣳ समर्धयेत्याह समृद्ध्या एवं गायत्रेण रथन्तरमितीयꣳ वै गायत्रीयꣳ रथन्तरमसौ बृहदनयोर्वा एषा लोकयोर्व्यृध्या अन्ततः क्रियते ऽष्टौ वा एतानि यजूꣳष्यष्टाक्षरा गायत्र्यक्षरशो वा एतन्नायत्रीं प्रीणात्येव यदाहुतिर्नवमी तेन विवृतो यज्ञमुखान्नैत्येव यदेकामाहुतिमष्टाभिर्यजुर्भिर्जुहोति तस्मादेकस्मै सते बहवो बलिꣳ हरन्ति बहवो हास्य बलिहृतो भवन्ति यजुरुत्तमान भवन्ति ब्रह्म वै यजुर्ब्रह्मणि वा एतदन्ततो यज्ञस्य यजमानः प्रतितिष्ठति ॥ १ ॥

Vgl. 2, 7, 1. — TS 5, 1, 1 (ukhyâgnih; sâvitrâhutir abhreç ca svîkârah); Kap. S. 29, 7; Çat. Br. 6, 3, 1, 1 flg.

सावित्रैरभिमादत्ते प्रसूत्यै चतुर्भिरादत्ते चत्वारि वै छन्दाꣳसि छन्दोभिरेवादत्ते ऽथो ब्रह्म वै छन्दाꣳसि ब्रह्मणैवादत्त इयꣳ वै गायत्र्यन्तरिक्षं त्रिष्टुब्द्यौर्जगती दिशो ऽनुष्टुप्सवितृप्रसूतो वा एतदेभ्यो लोकेभ्यश्छन्दोभिर्दिग्भ्यश्चाग्निꣳ सꣳभरति यच्च वा अ३दो ऽग्निर्होचाङ्गीषापाक्रामत्स सर्वेषु भूतेष्ववसद्यावनस्पतिष्ववसत्तावेणा अवसत्स यच्च निरदहत्तानि कल्माषाण्यभवन्येन समचरत्तत्सुषिरꣳ यच्चावसत्तत्पर्व यद्वेणव्यभिभवति स्वेनैवैनꣳ योनिना सꣳभरति यो वै वनस्पतीनां फलग्रहितमः स एषाꣳ वीर्यवत्तमो वेणुर्वै वनस्पतीनां फलग्रहितमः स एषाꣳ वीर्यवत्तमो ऽन्नꣳ वै फलमन्नम३र्को ऽ३र्को

ऽग्निरर्केण वा एतदन्नमर्कमग्निꣳ संभरति व्याममात्री काꣳर्यैतावद्वै पुरुषे वीर्यꣳ वीर्यसंमिता क्रियते ऽथो एतावान्वै पुरुषे महिमा महिम्नो ऽवरुद्धा अरत्निमात्री कार्या यज्ञपुरुषासंमिता प्रादेशमात्री काꣳर्या विष्णुना यज्ञेन संमितोभयतःक्षुत्काꣳर्योभयस्यान्नाद्यस्यावरुद्धा अन्यतःक्षुत्कार्या अन्यतःक्षुद्धि फालस्तावन्तमर्कं करोत्यन्नꣳ वा अꣳर्को ऽन्नाद्यस्यावरुद्धा औदुम्बरी कार्योर्ग्वा उदुम्बर ऊर्जो ऽवरुद्धा अपरिमिता कार्यापरिमितस्यावरुद्धै य एव कश्च वृक्षः फलग्रहिस्तस्य काꣳर्यान्नाद्यस्यावरुद्धै ॥ २ ॥

Vgl. 2, 7, 1. — Kâṭh. 19, 1; Kap. S. 29, 8; Çat. Br. 6, 3, 1, 30 flg.

अश्वेन वै देवा अग्ये विजितिꣳ व्यजयन्त यदश्वेन यन्ति विजित्या अग्निर्वै यच्च यच्चागच्छत्तं प्रजापतिरन्वपश्यत्प्राजापत्यो ऽश्वो यदश्वेन यन्त्यग्नेरेवानुकशात्यै प्रजापतिर्वा अग्निꣳ संभरिष्यन्स एभ्यो लोकेभ्यो ऽश्वं निर्मांय दिग्भ्यश्चाग्निꣳ समभरद्यदाह दिवि ते जन्म परममन्तरिक्षे तव नाभिः पृथिव्यामधि योनिरिति यथादेवतꣳ वा एतदेभ्यो लोकेभ्यो ऽश्वं निर्मांय दिग्भ्यश्चाग्निꣳ संभरति युञ्जाथा रासभꣳ युवमित्याह युक्त्या एव गर्दभेन संभरत्येष हि पशूनामनुपजीवनीयतमो ऽग्निर्वा एतस्याग्ये सृष्टस्य योने रेतो निरदहत्तस्मादेष समावदन्यैः पशुभी रेतो धत्ते ऽथ कनिष्ठो ऽश्वं पूर्वं नयन्ति गर्दभमपरं पापवसीयसस्य व्यावृत्त्यै तस्माज्ज्येयाꣳसं पूर्वꣳ यन्तं पापीयान्पश्चादन्वेति यदि कामयेत पापवसीयसꣳ स्यादिति गर्दभं पूर्वं नयेयुरपरमश्वमेतेन वै विपूजनः सौराकिः पापवसीयसं चकार तत्पापवसीयसमेवैतेन करोति योगे योगे तवस्तरमित्यूतिमत्या वाजव-

1) Die Mss. पशुभि

त्या यन्त्यन्न॰ वै वाजो गातुरुतिरन्नाय च खलु वै गातवे चाग्निश्चीयते यदूतिमत्या वाजवत्या यन्त्यन्नस्य च गातोश्चावरुद्धै भवति वा एष ३यो ऽग्निं चिनुते सर्वो वै भवत[1] इरस्यति[2] वज्री वा एष प्राजापत्यो यदश्वो यदाह प्रतूर्वन्नेह्यवक्रामन्नशस्तीरिति वज्रेण वा एतदशस्तीररातीयन्तमवक्रामति[3] रौद्रा वै पशवो ऽग्नी रुद्रो यद्रुद्रात्पशूननिर्याच्याग्निं चिन्वीत रुद्रो ऽस्य पशूनभिमानुकः स्याद्यदाह रुद्रस्य गाणपत्यान्मयोभूरेहीति रुद्राद्वा एतत्पशून्निर्याच्याग्निं चिनुते ऽघातुको ऽस्य पशुपतिः पशून्भवत्यु३र्वन्तरिक्ष॰ वीहीत्याहैषां लोकानां विधृत्यै रक्षा॰सि वा एतौ जिघा॰सन्त्यग्नि॰ संभरिष्यन्तौ यदाह स्वस्तिगव्यूतिरभयानि कृण्वन्निति स्वस्तिमेवाभ्यामकः पुरीष॰ वा अग्नेरायतनमङ्गिरस एतमग्ने समभरद्यदाहाग्निं पुरीषमङ्गिरस्वदाभरेति सायतनमेवैनं देवताभिः संभरति येन पुरुषेण संगच्छेत तमभिमन्त्रयेताग्निं पुरीषमङ्गिरस्वद्धेमा इति वाजमेव तेन तस्माद्वृङ्क्ते प्रजापतये प्रोच्याग्निश्चेत३व्या इत्याहुर्यतः सूर्यस्योदयनं ततो वल्मीकवपामपन्नेब्रूयादग्निं पुरीषमङ्गिरस्वद्धरिष्यामा इतीयं॰ वै प्रजापतिस्तस्या एष कर्णो यद्वल्मीकस्तस्मा एवं प्रोच्याग्निं चिनुते शृण्वन्ति हैनमग्निं चिक्यानमंसा अग्निमचेष्टेति तस्मात्पापीयाञ्श्रेयसः कर्णे आह कर्णः कर्णायाह ॥ ३ ॥

Vgl. 2, 7, 2. — TS 5, 1, 2 (mṛtkhanam gachann açvenâkramayed bhuvam); Kâṭh. 19, 2; Kap. S. 29, 8; Çat. Br. 6, 3, 2 u. 3, 1–5.

---

1) In den Mss. nicht recht deutlich; B eher वै द्रवत; H u. Bb वर्धेवत; wobei jedoch das ध्व sich einem entstellten भ in der Form nähert; vgl. Kâṭh. 19, 2 बहुर्वै भवतो भ्रातृव्यो भवति; s. folg. Anm. 2) So B; ich übersetze: jeder neidet den, dem es gut geht (भवति), wozu dann das Schutzmittel passt, welches gleich darauf empfohlen wird; in H u. Bb इतरस्यति 3) So corrigirt; die Mss. °शस्तिररातीयं-तमंपक्रामंति; vgl. Kâṭh. 19, 2 वज्रेणैव पाप्मानं भ्रातृव्यमवक्रामति

अन्वग्निरुषसामग्रमक्शदित्याहानुक्शात्या[1] एवागत्य व्राज्यध्वान᳚ सर्वा मृधो विधूनुता इति मृध एव व्यास्यतेऽछ्द्रा एतं प्रजापतिः पूर्वयर्चाविन्ददुत्तरयैषीदेवैनं पूर्वयर्चाविन्ददुत्तरया द्यौस्ते पृष्ठं पृथिवी सधस्थमिति द्यौ३ह्येतस्य[2] पृष्ठं पृथिवी सधस्थमात्मान्तरिक्ष᳚ समुद्रो योनिरित्यात्मा ३ह्येतस्यान्तरिक्ष᳚[3] समुद्रो योनिर्विक्शाय[4] चक्षुषा त्वमभितिष्ठ पृतन्यत इति पृतन्यन्तमेवाभितिष्ठति यं द्विष्यात्तं ब्रूयात् ॥ अमुमभितिष्ठ ॥ इति तमेवाभितिष्ठत्युत्क्रामेत्याहोत्क्रान्या एव यच्च वै यज्ञस्यानुरूपं क्रियते तद्यजमान ऋध्नोत्युत्क्रामोदक्रमीदित्यनुरूप᳚ वा एतत्क्रियते यज्ञस्यावरुद्धै कृष्णो वै भूत्वाग्निरश्वं प्राविशत्स एतद्गछद्यच्च मृगशफो यदश्वस्य पदं जुहोत्यग्निमत्येव जुहोत्यायतनवत्येन्धो ऽध्वर्युः स्याद्यदनायतने जुहुयादेतद्वै तद्यदाहुर्मृगशफमरेन्वराडिति मनस्वतीभ्यां जुहोति मनसा ह्याहुतीराप्यन्ते चिष्टुब्भ्यां जुहोतीन्द्रियस्यावरुद्ध्या अन्नवतीभ्यां जुहोत्यन्नाद्यस्यावरुद्धै गायत्र्या परिलिखत्यस्या एवैनं तेन परिगृह्णाति चिष्टुभान्तरिक्षात्तेनानुष्टुभा परिलिखत्यनुष्टुब्वै सर्वाणि छन्दा᳚सि परिभूस्तस्मादनुष्टुभा परिलिखति सावित्रैरभिमादत्ते प्रसूत्यै द्वाभ्यां खनति द्विपाद्यजमानः प्रतिष्ठित्यै भुग्वा अत्र प्रजा ऋछति यत्राग्निः खायते चीयते वा यदाह शिवं प्रजाभ्यो ऽहि᳚सन्तमिति प्रजाभ्य एवैन᳚ शिवमकः ॥ ४ ॥

Vgl. 2, 7, 2. — TS 5, 1, 2 u. 3 (utkramayyâçvaṃ bhûsaṃskâro jalâdibhiḥ); Kâṭh. 19, 3 u. 4; Kap. S. 30, 1; Çat. Br. 6, 3, 3, 6 flg.

---

1) So corrigirt; H u. Bb °क्ष्यदित्याहानुकशात्या; B °क्ष्यदित्याहानुक्ष्यात्या; Kap. S. 30 °मग्रमक्षादित्यनुख्यात्या; Kâṭh. 19, 3 °मग्रमख्यदित्यनुक्शात्या 2) Die ३ fehlt in den Mss. 3) Die ३ fehlt in den Mss. 4) So corrigirt; die Mss. विक्षाय

अपां पृष्ठमसीत्याहापा॑ ३ह्येतत्पृष्ठं पृष्ठेनैवैनत्पृष्ठमकर्योनिरग्नेरिति योनिर्वा ए३षो ऽग्नेर्यत्पुष्करपर्णं नाभिर्वधकः सयोनिरेव सनाभिः संभियते दिवो मात्रया वरिणा प्रथस्वेत्यनयोरेवैनं मात्रया वरिणा प्रथयति शर्म च स्थो वर्म च स्था इति कृष्णाजिनं च पुष्करपर्णं च संस्तृणाती मे एवासा एतद् द्यावापृथिवी संस्तृणाति व्यचस्वती संवसेथामिति न वा एतन्मनु३था यन्तुमर्हन्त्याभ्यामेवैनं परिगृह्णाति कृष्णाजिनेन संभरत्येष हि पशूनामनुपजीवनीयतमो ऽथो आरण्यानेव पशूञ्शुचार्पयति लोमतः संभरत्यंतो वै कृष्णाजिनस्य संदेव यज्ञेनैव यज्ञं संभरति पुष्करपर्णेन संभरति योनिर्वा ए३षो ऽग्नेर्यत्पुष्करपर्णं स्वेनैवैनं योनिना संभरति गायत्रीभिर्ब्राह्मणस्य संभरति गायत्रो हि ब्राह्मणस्त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राज३न्यो जगतीभिर्वैश्यस्य जागतो हि वैश्यो यं कामयेत ऋध्नुयादिति तस्य गायत्रीभिश्च त्रिष्टुब्भिश्च[2] संभरेद्यो ऽसि विश्वंभरा अथर्वा त्वा प्रथमो निरमन्थदग्ना इति प्रजापतिर्वा अथर्वा स एतमग्ने ऽमन्थत्सो ऽजनयत्स्व एवैनं मन्थति स जनयति तिसृभिः संभरति त्रयो वा इमे लोका एभ्य एवैनं लोकेभ्यः संभरति यजुस्तुरीयं दिग्भ्य एवैनं तेन संभरति पुरोवात वै वातं वर्षमनुप्रतितिष्ठति वर्षमन्वोषधया ओषधीरनु पशवः पशूननु मनुष्या एता वै प्रतिष्ठास्ता यजमानो ऽवरुन्द्धे ऽपो देवीरुपसृजा मधुमतीरित्याहौषधीनां प्रतिष्ठित्यै तासामास्थानादुज्जिहतामोषधयः सुपिप्पला इति तस्मादेतासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः सं ते वायुर्मातरिश्वा दधात्विति तस्मादेतस्या यत्कृष्यते य-

1) Die Mss. द्यावापृथिवी 2) Die Mss. त्रिष्टुभिश्च

त्खायते तत्संधीयते यद्घृतेन जुहुयाञ्ज्रुचेमामर्पयेद्थ यदप उपसृजति शमयत्येव यो देवानां चरसि प्राणथेन कस्मै देव वषडस्तु तुभ्यमिति षड्वा ऋतव ऋतुषु वा एतद्वृष्टिं प्रतिष्ठापयति तस्मात्सर्वे ऋतवो वृष्टिमन्तः सुजातो ज्योतिषेति स्वग्र्यमेवैनमकर्वासो अग्ने विश्वरूप सं व्ययस्व विभावसा इति छन्दाꣳसि वा अग्नेर्वासश्छन्दाꣳस्येष वस्ते छन्दोभिरेवैनं परिदत्यागामुकमेनमसिंल्लोके वासो भवत्यनग्नो[2] ऽमुष्मिंल्लोके भवति य एवꣳ वेद वरुणमेनिर्वा एष एतद्युदु तिष्ठ स्वध्वरेत्यूर्ध्वामेव वरुणमेनिमुत्सृजति द्वाभ्यामुत्सृजति द्विपाद्यजमानः प्रतिष्ठित्यै स जातो गर्भो असि रोदस्योरित्यनयोर्वा एष गर्भ आभ्यामेषो ऽधिजायत आभ्यामेवैनमधिजनयत्यग्ने चारुर्विभृता ओषधीष्विति तस्मात्सर्वास्वोषधीष्वग्निः प्र[3] मातृभ्यो अधि कनिक्रदन्ना इत्योषधयो वा एतस्य मातरस्ताभ्या एवैनमधिप्रच्यावयतेऽछ्वा एतं प्रजापतिः पूर्वेणार्धर्चेनानूत्तरेणातिष्ठतैषीदेवैनं पूर्वेणार्धर्चेनानूत्तरेणास्थित ॥ ५ ॥

Vgl. 2, 7, 3. — TS 5, 1, 4 (mṛdam khâtvâ saṃbharec carmapattrayoḥ) u. 5; Kâṭh. 19, 4 u. 5; Kap. S. 30, 2 u. 3; Çat. Br. 6, 4, 1, 6 flg.

स्थिरो भव वीड्वङ्गा[4] इति गर्भमादधाति वीर्यमस्मिन्दधाति तस्मात्सर्वेषां पशूनां गर्भो वीर्यवत्तमो वी३र्यꣳ ह्यस्मिन्दधाती[5]श्वरो वा ए३षो[6] ऽन्तरिक्षसंभूत्वा प्रजा हिꣳसितोर्यदाह शिवो भव प्रजाभ्या इति प्रजाभ्य एवैनꣳ शिवमकर्मा पाद्यायुषः पुरेत्यायुरेवास्मिन्दधाति समह्यै वृषाग्निꣳ वृषणं भरन्निति वृषा ३ह्येष वृषणं

1) So corrigirt; die Mss. उप सृजति 2) Die Mss. °नग्नो 3) In den Mss. ohne Accent. 4) So corrigirt; die Mss. वीड्वंगा 5) So corrigirt; die Mss. ह्यस्मिन् 6) So corrigirt; in den Mss. एषो

भरन्नपां गर्भꣳ समुद्रियमित्यपाꣳ ३ह्येष गर्भः समुद्रियो ऽग्ना आ-
याहि वीतया इत्यग्निना वै मुखेन देवा इमाँल्लोकानभ्यूजयन्नग्निना
वा एतन्मुखेन यजमान इमाँल्लोकानभिजयत्यृतꣳ सत्यमृतꣳ सत्यमृते
चैव सत्ये च प्रतितिष्ठतीयꣳ वा ऋतमसौ सत्यमनयोरेव प्रतितिष्ठ-
त्यहर्वा ऋतꣳ रात्रिः सत्यमहोरात्रयोरेव प्रतितिष्ठत्योषधयः प्रतिगृ-
ह्णीताग्निमेतमित्योषधीरेवैनꣳ सम्यञ्चं दधाति पुष्पवतीः सुपि-
प्पला इत्योषधीरेव फलं ग्राहयति तस्मादोषधयः शीर्षन्फलं गृह्णा-
ति वरुणमेनिर्वा एष एतद्युपनह्यो वि पाजसा पृथुना शोशुचाना
इत्यनुरूपेणैव वरुणमेनिꣳ विष्यति द्वाभ्याꣳ विष्यति द्विपाद्यजमानः
प्रतिष्ठित्या आपो हि ष्ठा मयोभुवा इत्यप उपसृजत्यापो वा अ-
शान्तस्य शमयित्रिकास्तस्मादप उपसृजति शान्त्यै तिसृभिरुपसृजति
त्रिवृद्ध्यग्निर्वरुणमेनिर्वा एष एतर्हि मित्रः सꣳसृज्या पृथिवीमिति
मित्रेणैव वरुणमेनिꣳ सꣳसृजति रुद्राः सꣳसृज्या पृथिवीमित्येता
वा एतामग्रे देवताः प्रजापतये समसृजꣳस्ताभिरेवैना सꣳसृजति
पञ्चभिः सꣳसृजति पाङ्क्तो यज्ञो यावानेव यज्ञस्तमालब्ध ॥ ६ ॥

Vgl. 2, 7, 4. 5. — TS 5, 1, 5 (saṃbhṛtâm etâṃ yajñabhûmâu samâharet) u. 6 (ukhâṃ nirmimîta); Kâṭh. 19, 5 u. 6; Kap. S. 30, 4; Çat. Br. 6, 4, 4, 3 flg.

मखस्य शिरो ऽसीत्याह यज्ञो वै मखस्तस्य वा एतच्छिरो यदुखा
मुखतो वा एतद्यज्ञमालब्ध वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसेति
छन्दोभिश्च वा एषा देवताभिश्च क्रियते छन्दोभिश्चैवैना देवताभिश्च
करोति ध्रुवासि पृथि३व्यसीति छन्दसामेवैषाशीरेत्या रास्वास्य-
दितिष्टे बिलं गृभ्णात्विति यजुषा करोत्ययजुषा हि मनुष्याः कुर्वन्ति

1) Die ३ fehlt in den Mss.

व्यावृत्त्यै तां पुत्रेभ्यः प्रायच्छददितिः अपयानित्यादित्या वा इदꣳ सर्वं यन्मनुष्यास्तेभ्य एवैनाꣳ संप्रादात् ऋष्टिः[1] काश्यर्षयो वा इमे लोका एषाꣳ वा एषा[2] लोकानामुषा प्रतिमा क्रियतेऽष्टस्तना कार्या गायत्र्या रूपं चतुस्तना कार्यादित्या दोहायद्विस्तना काश्यर्यान्तरिक्षꣳ वा उखेमौ लोकौ स्तनौ प्रज्ञौ ह वा इमौ लोकौ दुहे य एवꣳ वेद व्याममात्री काश्यैतावद्वै पुरुषे वीर्यꣳ वीर्यसंमिता क्रियतेऽथो एतावान्वै पुरुषे महिमा महिम्नोऽवरुद्ध्या अरत्निमात्री कार्या यज्ञपुरुषासंमिता[3] प्रादेशमात्री काश्यर्षा विष्णुना यज्ञेन संमितोऽथो प्रजापतेरेवानतिवादाय सप्तभिर्धूपयति सप्त वै शीर्षन्प्राणाः शिर एतद्यज्ञस्य यजुषा शीर्षन्वा एतत्प्राणान्दधाति सप्तभिर्धूपयति सप्त वै छन्दाꣳसि छन्दोभिरेवैनां धूपयत्यथो ब्रह्म वै छन्दाꣳसि ब्रह्मणैवैनां धूपयति वैष्णवꣳ वा एतत्पात्रं तत्स्वया देवतया व्यृधयति यदन्याभिर्देवताभिर्धूपयति यदाह विष्णुस्त्वा धूपयत्वङ्गिरस्वदिति स्वयैवैनं देवतया समर्धयत्यश्वशकेन धूपयति वृषा ह्यश्वो वृषाग्निः समृद्ध्या अथो प्राजापत्यो वा अश्वः प्राजापत्यो ऽग्निस्तस्मादश्वशकेन धूपयति सयोनित्वाय ॥ ७ ॥

Vgl. 2, 7, 6. — TS 5, 1, 6 u. 7 (ukhâṃ nirmimîta; saṃskaroti tâm); Kâṭh. 19, 6; Kap. S. 30, 4; Çat. Br. 6, 5, 2, 2 flg.

प्रजापतिर्वा अमन्यत यो वा अस्या अग्रे विखनिष्यत्यार्तिꣳ स आरिष्यतीति स एतद्यजुरपश्यददितिष्ट्वा देवी विश्वदेव्यवती[4] पृथिव्याः सधस्थे अङ्गिरस्वत्खनत्ववटेतीयꣳ वा अदितिर्देवी विश्वदेव्यवत्यनया

1) Vgl. Kâṭh. 19, 6 ऋष्टि und पंचोष्टि 2) Die Mss. एषां cf. 4, 1, 3. 3) Die Mss. °पुरुषासंमिता 4) B देवीर्विश्वदेव्यवतीः; Kap. S. 30, 5 देवीर्विश्वदेव्यावती; Kâṭh. 19, 7 देवीविश्वदेव्यावती

वै स तदस्यामखनदहि॰सायै न हि स्वः[1] स्व॰ हिनस्ति देवानां[2] त्व पत्नीर्देवीर्विश्वदेव्यवतीः पृथिव्याः सधस्थे अङ्गिरस्वद्धधतूखा इत्योष धयो वै देवानां पत्नीर्देवीर्विश्वदेव्यवतीरोषधीष्वेवैनां प्रतिष्ठापयति धिषणा त्वा देवी विश्वदेव्यवती[1] पृथिव्याः सधस्थे अङ्गिरस्वद्भीन्धा तामुखा[3] इति वाग्वै धिषणा देवी विश्वदेव्यवती[4] वाचैवैनामभीन्द्धे ग्रास्त्वा देवीर्विश्वदेव्यवतीः पृथिव्याः सधस्थे अङ्गिरस्वञ्श्रपयन्तूख इति छन्दा॰सि वै ग्राः[5] देवीर्विश्वदेव्यवतीश्छन्दोभिरेवैना॰ श्रपयति वरूत्री[6] त्वा देवी विश्वदेव्यवती[7] पृथिव्याः[8] सधस्थे अङ्गिरस्वत्पचता मुखा इत्यहोरात्रे वै वरूत्री देवी विश्वदेव्यवती[9] अहोरात्राभ्यामेवैनं पचति जनयस्त्वाछिन्नपचा देवीर्विश्वदेव्यवतीः पृथिव्याः सधस्थे अङ्गिरस्वत्पचन्तूखा इति नक्षत्राणि वै जनयोऽछिन्नपचा देवीर्विश्वदेव्यवतीर्नक्षत्रैरेवैनां पचत्येता वा एतामये देवताः प्रजापतयेऽपच॰स्तस्मादेतानि पङ्क्तिमन्ति यजू॰षि तैरेवैनां पचति द्वाभ्यां पचति द्विपाद्यजमानः प्रतिष्ठित्यै वरुणमेनिर्वा एष एतर्ह्यभीद्धो मिचस्य चर्षणीधृता इति मित्रेणैव वरुणमेनिमुपैति देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिरिति सवितृप्रसूत एवैनामुद्वपत्यात्मनोऽहि॰साया उत्तिष्ठ बृहती भवेत्याह धृत्या एवाव्यथमाना पृथिव्यामाशा दिशा आपृणेति तस्मादग्निः सर्वा दिशा आभाति ॥ मित्रैतां त

1) So corrigirt; B स; in H u. Bb स्वं; TS 5, 1, 7, 1 स्वः; Kâṭh. स्वस्व॰; Kap. S स्वं स्वं हि॰ 2) Von hier bis zum folgenden वै (incl.) in H fehlend; in Bb von विश्वदेव्यवतीः bis zum folgenden विश्वदे॰ fehlend; die Accente mussten daher nach den entsprechenden Stellen ergänzt werden; Kap. S. धिषणास्त्वा देवीर्विश्वदेव्यावतीरिति; B धिषणा त्वा देवीर्विश्वदेव्यवती; Kâṭh. 19, 7 धिषणास्त्वेति 3) Die Mss °स्वदाभीधाताम॰ 4) Die Mss. देवीर्विश्वदेव्यवती 5) Die Mss. ग्रास्त्वा 6) B वरूची 7) B देवीर्विश्वदेव्यवतीः (s. TS 5, 1, 7, 2); Kap. S. 30, 5 वरूचीस्त्वा देवीर्विश्वदेव्यावतीरितिः Kâṭh. 19, 7 वरूचीस्त्वेति 8) Von hier bis अहोरात्राभ्याम॰ in H u. Bb fehlend; daher die Accente ergänzt. 9) B देवीर्विश्वदेव्यवती

उखां परिदद्म्यभित्त्या एषा मा भेदि ॥ इति मिचायैवैनां परिदद्-
त्यभित्त्यै यद्धि मिचायापरित्ता भिद्येत पुनः कार्या स्याद्ऽसवस्त्वा-
छृन्दन्तु[1] गायत्रेण छन्दसेति छन्दोभिश्च वा एषा देवताभिश्च क्रियते
छन्दोभिश्चैवैनां देवताभिश्चाछृणत्ति स्वेनायतनेनाजक्षीरेणाछृणत्त्या-
मेयं वा एतत्पयो यदजक्षीरमाग्नेयमेतत्पाचं यदुखा स्वेन वा एत- 5
त्पयसा स्वं पाचमाछृणत्ति परमं वा एतत्पयो यदजक्षीरं परममेत-
त्पाचं यदुखा परमेण वा एतत्पयसा परमं पाचमाछृणत्ति ॥ ८ ॥

Vgl. TS 5, 1, 7 (saṃskaroti tâm); Kâṭh. 19, 7; Kap. S. 30, 5; Çat. Br. 6, 5, 4.

षडेतान्याधीतयजूंषि जुहोति षड्वा ऋतव ऋतुभिर्वा एतत्पृ-
थिव्या वीर्यमुद्यछते नाना जुहोति नानावीर्या ३हीमे प्राणाः प्रा-
णानां विधृत्यै यं कामयेत बधिरः स्यादिति तस्य सकृत्सर्वाण्य- 10
नुद्रुत्य जुहुयात्प्राणानस्य संभिनत्ति बधिरो भवति तस्माद्बधिरो वाचं
वदति न शृणोति वाचं ह्यस्येन्द्रियमनुपद्यते प्राणा वा एतानीतराणि
छन्दांसि वागनुष्टुब्यदनुष्टुभा सप्तमं जुहोति वाचं वा एतत्प्राणे-
षूपसंदधाति तस्मादियं वाक्सप्तमी प्राणानां मा सुं भित्था मा
सुं रिषा इति प्रवृणक्त्यसुरमाया वा एषासीत्तां देवा एतेन यजुषावृ- 15
ञ्जतासुरी माया स्वधया कृतासीति तन्मायामेवैतेन यजमानो भ्रा-
तृव्यस्य वृङ्क्ते द्वाभ्यां प्रवृणक्ति द्विपाद्यजमानः प्रतिष्ठित्यै प्रवृञ्ज्याङ्गू-
तिकामस्य भविष्यद्वा इदमुपजीवामो भविष्यदेवोपेति श्वः श्वः श्रे-
यान्भवति जातमवदध्याज्जातश्रीर्जातो वा एष यो गतश्रीर्जातेनैवैनं
जनयति भ्रष्ट्रादाहरेद्यं कामयेतान्नादः स्यादित्येष[2] वा अग्नीना- 20
मन्नाद्यो ऽन्नकरणं भ्रष्ट्रमन्नाद्यमस्मा अवरुन्द्धे प्रदावादाहरेद्यं काम-

1) Die Mss. छिंदंतु 2) Die Mss. °षा

येत प्रसेनेनास्य राष्ट्रं जायुकꣳ स्यादिति प्रसेनेनास्य राष्ट्रं जायुकं भवति यतः कुतश्चाहत्यावदध्याद्यं कामयेतास्य पाप्मा भ्रातृव्यो द्वितीयो जायेतेत्येतद्वै यजमानस्यायतनꣳ स्वे वावास्मा एतदायतने पाप्मानं भ्रातृव्यं द्वितीयं जनयति द्रुन्नः[1] सर्पिरासुतिरिति क्रुमुकं घृताम्वक्तमादधात्येषा वा अग्नेः प्रिया तनूर्यत्क्रुमुकस्तेजो घृतं प्रिययैवैनं तꣳवा तेजसा च समर्धयति परस्या अधि सꣳवता इत्यौदुम्बरीं देवा यत्रोजेꣳ व्यभजन्त तत उदुम्बरा उदतिष्ठद्यदौदुम्बर्यूर्जमेवावरुन्द्धे परमस्याः परावता इति वैकङ्कतीमग्नेर्वै सृष्टस्य भा अपाक्रामत्तद्वैकङ्कतं प्राविशद्यद्वैकङ्कती भा एवावरुन्द्धे यदग्ने यानि कानि चेति शमीमयीꣳ शान्त्या अग्नये वै न किंचनापरुवृक्णमस्वदन्त तस्मै वा एतया सङ्क्षः प्रयोगिः सर्वमस्वदयद्यदग्ने यानि कानि चेति तदग्नय एवैतया सर्वꣳ स्वदयति सर्वमस्मै स्वदितं भवति राचीꣳ राचीमप्रयावं भरन्ता इत्याशिषमेवाशास्ते नाभा पृथिव्याः समिधानो अग्निमिति पृतनाजितमेवैनमकरग्निꣳ वै सृष्टꣳ रक्षाꣳस्यजिघाꣳसꣳस्तानि वा एताभिरेवापाहत याः सेना अभीत्वरीरिति तदग्नेरेवैताभी[2] रक्षाꣳस्यपहन्त्येतां एव समिधा आदध्याद्यच्च रक्षोभ्यो बिभीयाद्रक्षसामपहत्या अथो याहुका ह ता ꣳ समाꣳ स्तेनाभवन्ति तैल्वकीमभिचरन्नादध्यादेष वै वनस्पतीनाꣳ वज्रस्तेजग्घ प्रमीयते यं द्विष्यात्तं तर्हि मनसा ध्यायेन्मनो वा आशीर्यो वाच आहुतिमेवैनं भूतमग्नये ऽपिदधाति यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जना इति तस्मादग्निचितो ऽक्षीलं न कीर्तयितव्यं नो अग्निविदः सꣳशितं मे ब्रह्म सꣳशितꣳ वीर्यं बलमिति ब्रह्मणा वा एतत्क्षत्रꣳ सꣳ-

1) Die Mss. द्रुवन्नः; vgl. aber 2, 7, 7. 2) Mss. °ताभि

श्यति क्षत्रेण ब्रह्मोथो ब्रह्म चैव क्षत्रं च सयुजा अकरेतद्वा एषाभ्यनूक्ता ॥ ब्रह्म क्षत्रꣳ सयुजा न व्यथेते इति ब्रह्माह क्षत्रं जिन्वति क्षत्रियस्य।

क्षत्रं ब्रह्म जिन्वति ब्राह्मणस्य यत्समीची कृणुतो वीर्याणि ॥ ९ ॥

Vgl. 2, 7, 7. — TS 5, 1, 9 (vahner ukhyasya janih) u. 10 (ukhyam dadhîta); Kâṭh. 19, 9 u. 10; Kap. S. 30, 7 u. 8; Çat. Br. 6, 6, 1, 15 flg.

अग्निभ्यः ॥ इति कामायालभ्यन्ते यत्कामो भवति सꣳ हास्मै स कामो नमत्यप्रीणन्ति यज्ञियानेवैनान्मेध्यान्कुर्वन्ति पर्यग्निकृतानुत्सृजन्त्ययातयामत्वायैकेन सꣳस्थापयन्ति यज्ञस्य संतत्या अविच्छेदाय पुष्करा भवन्ति सेन्द्रियत्वाय चिष्टुभो याज्यानुवाक्या भवन्तीन्द्रियस्यावरुद्ध्या अथै३षो ऽग्नये वैश्वानराय द्वादशकपालः सꣳवत्सरो वा अग्निर्वैश्वानर एषा वा अग्नेः प्रिया तनूर्यद्वैश्वानरः प्रिययैवैनं त३न्वा समर्धयत्यथो अयातयामत्वायैवायातयामा हि वैश्वानरः श्वेतꣳ वायवे नियुत्वता आलभेत तेजस्कामो वायुर्वा अग्नेस्तेजस्तस्माद्वायुमग्निरन्वेति यद्वायवे ऽग्नेः सतेजस्त्वाय यद्वायव एकधा स्यादुन्मादुको यजमानः स्याद्यन्नियुत्वते द्वितीयत्वायाथो धृत्या अनुन्मादायꣳ सर्वेषाꣳ वा एष पशूनाꣳ रूपाणि प्रति यद्वायव एकधा स्यादुन्मादुको यजमानः स्याद्यदेष प्राजापत्यो द्वादशकपालो द्वितीयत्वायाथो धृत्या अनुन्मादायाथैष आग्नावैष्णव एकादशकपालो ऽग्निर्वै सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं चालब्ध्याथैष आदित्यो घृते चरुरादित्या वा इत उत्तमाः स्वर्गं लोकमायꣳस्तेभ्य एव प्रोच्य स्वर्गं लोकमेत्यादित्या वा अस्मिंल्लोक ऋद्धा आदित्या अमुष्मिन्पुरोडाशेन वै देवा

1) Die Mss. श्यꣳस्यति 2) Die Mss. यज्ञियामेवैनां मेध्यान्

असिंल्लोकऽआप्नुव॰श्चरुणामुष्मिन्नसिन्नेव लोके पुरोडाशेन चृप्नोति॑ चरुणामुष्मिन्नयै३षो ऽग्नये वैश्वानराय द्वादशकपालो॑ देवायतन॰ वा अग्निर्वैश्वानरो॑ देवायतन एव प्रतिष्ठायाग्निं बिभर्त्ययो कामो वै वैश्वानरो[1]॑ यत्कामो भवति स॰ हास्मै स कामो नमति ॥ १० ॥

Vgl. TS 5, 1, 8, 2 (paçavaḥ); Kâṭh. 19, 8; Kap. S. 30, 6.

॥ इत्युपरिकाण्डे[2] जुहूमय्गीयः[3] प्रथमः प्रपाठकः ॥

5 दृशानो रुक्म उरुया विभातीति रुक्मं प्रतिमुञ्चते॑ ऽमृत॰ वै हिरण्यं॑ मृत्यो रेतद्रूप॰ यदग्निर्यत्पाशो ऽमृतेनैव मृत्युमन्तर्धत्ते॑ ऽथैतं निर्बाधा॑ देवाश्च वा असुराश्चास्पर्धन्त॑ ते देवा एतान्निर्बाधानपश्य॰-स्तैरसुरानेभ्यो लोकेभ्यो निरबाधन्त॑ तन्निर्बाधानां निर्बाधत्व॑ तदेतै-रेव निर्बाधैर्यजमानो भ्रातृव्यमेभ्यो लोकेभ्यो निर्बाधता॑ एकवि॰-10 शतिनिर्बाधो[4] भवति प्रतिष्ठित्या॑ उपरिष्टान्निर्बाधं बिभर्त्यधस्तान्नि-र्बाध॰ सादयति भ्रातृव्यस्य विनुत्त्यै॑ नक्तोषासा समनसा विरूपा इत्यहोरात्राभ्यामेवाग्निमाधत्ते॑ धापयेते शिश्नुमेक॰ समीची इत्येत॰ ३ह्येतं धापयेते शिश्नुमेक॰ समीची॑ द्यावाक्षामा रुक्मो अन्तर्विभाती-त्येष ३ह्येतयो रु३क्मो ऽन्तर्विभाति॑ देवा अग्निं धारयन्द्रविणोदा 15 इति॑ प्राणा वै देवा द्रविणोदाः॑ प्राणैरेवाग्निमुद्यच्छते॑ विश्वा रूपाणि

1) Von hier bis zum folgenden वैश्वानरो (incl.) in B fehlend. 2) Das इति fehlt in den Mss. 3) H u. Bb जुह्वमयीयः; B जुह्वमग्रियः 4) Die Mss. (H u. Bb) betonen एकवि॰शतिनिर्बाधो; s. TS 5, 1, 10, 3.

प्रतिमुञ्चते कविरिति विश्वा हि रूपाण्यग्निः प्रासावीद्वृद्धिपदे चतुष्पदा इत्याह प्रसूत्या एव वि नाकमक्रमीत्सविता वरेण्या इति सवितृप्रसूत एवाग्निं बिभर्त्येनु प्रयाणमुषसो विराजतीति तस्मादुषसो व्युष्टिमन्वग्निराधीयते सुपर्णोऽसि गरुत्मान्त्रिवृत्ते शिरो गायत्रं चक्षुरित्येवैवा एषा संभृतिरग्निमेतत्संभरति तस्मात्संभरति तस्मात्सर्वैरङ्गैः पशुर्जायते पशु३र्ह्यग्निर्दिवं गच्छ स्वः पतेत्याह स्वर्गस्य लोकस्य समष्ट्या अथैते क्रमा देवाश्च वा असुराश्चास्पर्धन्त ते देवा एतान्क्रमानपश्यन्त्सैरसुरानेभ्यो लोकेभ्यः प्राणुदन्त तानन्नपजय्यमजयन्त्सैतैरेव क्रमैर्यजमानो भ्रातृव्यमेभ्यो लोकेभ्यः प्रणुदतेऽनपजय्य ह जयति षड्डाव शिक्यं भवति षड्वा ऋतव ऋतुभिरेवाग्निं परिगृह्णात्युपरिनाभि बिभर्त्युपरिनाभि३र्ह्यात्मनः सदेव सदेव एव देवता आत्मन्बिभर्ति यदधोनाभि बिभृयाद्योनिं निर्दहेदथो ऽवधेनं घातुक स्यात्प्रक्रामति तस्माद्ग्राम्याः पशवः प्रेरतेऽथ यत्पुनरभ्यावर्तते तस्मात्पुनः समावर्तन्त ऊर्जो वा एष पशुभिरुत्क्रामन्त्सहोत्क्रामति पुनरूर्जो निवर्तस्वेति तदूर्जमेव पशूनपुनरवरुन्द्धे पुनर्वतीर्भवन्ति समृद्ध्यै चतसृभिरभ्यावर्तते चतुष्पादो वै पशवः पशूनेवावरुन्द्धे इत्थं पर्यावर्तत एव हि यज्ञः पर्यावर्ततेऽथो अमुष्य वा एतदादित्यस्यावृतमनुपर्यावर्तता आ त्वाहार्षमन्तरभूरित्यन्ता३र्ह्येष एतद्युदुत्तमं वरुण पाशमस्मादिति वरुणपाशमेवोन्मुञ्चत आत्मनोऽहिꣳसाया अग्ने बृहन्नुषसामूर्ध्वो अस्थादिति ज्योतिषैवैनꣳ

1) Die ३ fehlt in den Mss. 2) Die Mss. तानन्नपजन्यम॰ 3) Die Mss. नपजन्य॰; (B schreibt wieder नपजन्य॰). 4) Die Mss. schreiben षड्डाव॰ 5) Die Mss. ॰नाभी; Kâṭh. 19, 11 नाधोनाभि 6) In den Mss. fehlt die ३ 7) So B (ohne Accent); H u. Bb ॰द्यो 8) H u. Bb घातु॰; B धातुक॰ 9) In den Mss. पुन॰ ohne Accent. 10) H u. Bb त्वाहार्षम॰

समर्धयति ह्यसः शुचिषद्वसुरन्तरिक्षसदिति[1] सादयति सप्त[2] एवैनꣳ होत्रासु प्रतिष्ठापयत्येष वै सप्त[3] वा एतेन साप्नान्यग्नेक्ष्नोत्या[4.5] सप्तमात्पुरुषाद्वादो भवति रेतो वा अग्निरन्तरिक्षꣳ वै रेतो ऽनुषिच्यते यदधो निदध्यादधृताः पशूनां गर्भाः प्रपादुकाः स्युरथ यदुपरि सादयत्यन्तरिक्षसदमेवैनमकर्गर्भाणां धृत्यै सूयते वा एषो ऽग्नीनाꣳ यश्चीयते तस्मादेष आसन्दीसत्तीद[6] त्वं मातुरस्या उपस्था इतीयꣳ वा अग्नेर्योनिः स्व एवैनꣳ योनौ सꣳवेशयति तिसृभिरुपतिष्ठते चिवृ३द्ध्यग्निः[7] ॥ १ ॥

Vgl. TS 5, 1, 10 (ukhyam dadhîta) u. 9; Kâṭh. 19, 11; Kap. S. 32, 1; Çat. Br. 6, 6, 4 u. 7, 2.

अथैतद्वात्सप्रमे तेन वै वत्सप्रीर्भालन्द३नो ऽग्नेः प्रियं धामाराभ्नोत्[8] तदग्नेरेवैतेन प्रियं धाम राध्नोत्यागामुकमेनं प्रियं भवति वत्सप्रियꣳ वै भालन्दनमृषयो ऽध्यवदन्स्तेना[10] इति स एतत्सूक्तमपश्यत्तेनाधिवादमपाजयत्तेनापचितिमगच्छत्तदधिवादमेवैतेनापजयत्यपचितिमेव गच्छति द्वादशभिरुपतिष्ठते द्वादश मासाः सꣳवत्सरः सꣳवत्सरमेवाप्नोवरुन्द्धे चिष्टुभो भवन्तीन्द्रियस्यावरुद्ध्या अन्येद्युः प्रक्रामयत्यन्येद्युरुपतिष्ठते योगक्षेमꣳ वा एतत्प्रजानां दाधार तस्माद्यायावरा अन्याः प्रजाः क्षेम्या अन्या अथ[11] यत्र क्रम्योपतिष्ठते तस्माद्यायावरः क्षेम्यमभिप्रयाति[12] तस्माद्यायावरस्य क्षेम्यो ऽन्नं बभूव

1) Die Mss. ०त्सत्सदिति 2) Bb सत्व 3) Bb सत्व 4) So corrigirt; H संप्रान्य०; desgl. B, ohne Accent; Bb संत्यान्य०; cf. Kâṭh. 19, 11 und Kap. S. 32, 1 साप्नान्येवैतया प्रीणाति 5) H u. Bb ०ग्ने क्ष्नो०; B ग्ने कृष्नो० 6) In den Mss. सीद ohne Accent. 7) So corrigirt; H u. Bb चिवृ ह्यग्निः; B चिवृत् ह्यग्निः 8) Die Mss. धामाराभ्नोत्त०; Kâṭh. 19, 12 प्रियं धामावरुंधेरैवैतेन प्रियं धामावरुंधे 9) Die Mss. राभ्नोत्व०; vgl. die vor. Anm. 10) B ध्यवदत् स्तेना 11) In den Mss. ohne Accent. 12) B प्रायाति

यद्दह्श्वेषमाणः स्यात्तद्दहरुभयꣳ समस्येत्प्रे च क्रामेदुप च तिष्ठेद्योगक्षेमꣳ वा एतदन्नाद्यꣳ यजमानो भ्रातृव्यस्य वृङ्क्ते उदु त्वा विश्वे देवा इति विश्वे ३हीदं देवाः स्मो यन्मनु३षा अग्ने भरन्त[1] चित्तिभिरिति यस्मा एवं चित्तायाग्निराधीयते तेनैनं चित्तेन समर्धयति प्रेदग्ने ज्योतिष्मान्याहीति ज्योतिषैवैनꣳ समर्धयित्वा प्रवापयत्येक्रन्दद्[2]- 5
ग्निः स्तनयन्निव द्यौरित्यनुब्रूयाद्यद्यक्ष[3] उत्क्वेदेदीश्वरो वा एष उत्क्वेदन्यजमानस्य प्रजां पशून्निष्क्विदस्तात्क्रदितमेवास्याकरंथो[4] शमयित्वैवाशिषमाशास्ते समिधाग्निं दुवस्यतेति गायत्र्या ब्राह्मणस्यादध्यान्नायत्रो हि ब्राह्मणस्त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राज३न्यो द्वाभ्यां गायत्रीभ्याꣳ वैश्यस्य ये हि द्वे गाय३त्र्यौ सा जगत्यथो ब्रह्मणे 10
वा एतद्विशमन्नं करोति यदि भस्म[5] प्रतिपूर्येतापस्सु प्रवेशयेदापो वा अग्नेर्योनिः स्व एवैनद्योनौ दधाति पुरीषं कुर्यात्पशुकामस्य पशवो वै पुरीषं पशुमान्भवतीष्टका वा सꣳयुयात्तेनास्य[6] सर्वा आग्नेयीरिष्टका भवन्त्यूर्जो वा एष पशुभिरुत्सीदन्त्सहोत्सीदति पुनरूर्जा निवर्तस्वेति तदूर्जमेव पशून्पुनरवरुन्द्धे बोधा मे अस्य वचसो यविष्ठेति बो- 15
धयतीभ्यामुपतिष्ठते तस्मात्प्रजाः सुप्त्वा[7] पुनः प्रबुध्यन्ते द्वाभ्यामुपतिष्ठते द्विपाद्यजमानः प्रतिष्ठित्यै ॥ २ ॥

Vgl. TS 5, 2, 1 (âsandyâṃ vahnyavasthitiḥ, vâtsapreṇâpyupasthânam) u. 2 (ukhyanayanam); Kâṭh. 19, 12; Kap. S. 32, 2; Çat. Br. 6, 7, 4; 6, 6, 4.

---

1) S. 2, 7, 10; Kap. S. 32, 2 भरंतु; Kâṭh. undeutlich, wahrscheinlich भरतु 2) B प्रयापय° 3) So wohl zu lesen; in H u. Bb यद्यच; B यद्वाच; Kâṭh. यदि क्ष्वेदेत् 4) Die Mss. निक्ष्विदस्त° 5) So ist wohl zu schreiben; in B भस्मा प्र°; H u. Bb भस्मत्र°; Kâṭh. 19, 12 भस्मैतदित्यप्सु भस्म प्रवपति 6) So B (ohne Accent); H u. Bb सꣳपुयात् 7) So meine Correctur; H u. Bb सुप्ता; B सुग्चा

अपेत वीत वि च सर्पतातो इत्याह यमदेव३त्यो वा अयं लोको य३मो ऽमुष्य लोकस्याधिपत्यमानश यद्यमाद्देवयजनमनिर्याच्याग्निं चिन्वीतायमदेवत्यो ऽस्याग्निः स्यादस्वर्ग्यो यदाहादादिद यमो ऽवसानं पृथिव्या अक्रन्निमं पितरो लोकमस्मा इति यमाद्वा एतेनास्या देवयजनं निरयाचिष्ट स्मृते देवयजने ऽग्निं चिनुते यमदेवत्यो ऽस्याग्निर्भवति स्वर्गं उदु घ्नन्ति यदेवास्या अयज्ञियममेध्यं तदुद्घ्नन्ति व्याममात्रमुद्घ्नन्त्येतावद्वै[2] पुरुषे वीर्यं वीर्यसम्मिते चीयते ऽथो एतावान्वै पुरुषे महिमा महिम्नो ऽवरुद्ध्या अवोक्षति यदेवास्या उद्घ्नन्तः[3] कूर्मक्ष स्तत्कूर्मकस्तञ्शमयत्यथो आपो वा अग्नेर्योनिः स्व एव योनौ चीयते ऽग्नेर्भस्मास्यग्नेः पुरीषमसीति सिकता निवपत्यग्नेर्वा एतद्वैश्वानरस्य भस्म यत्सिकता स्व एव भस्मञ्श्चीयते योनिर्वै सिकता रेता ऊषा यत्सिकता न्युप्योषान्निवपति योनौ वा एतद्रेतो दधाति तस्माद्योनौ रेतो हितं तस्माद्योने रेतः प्रजायते प्रजापतिः प्रजा असृजत ता वा ऊषेभ्य[4] एव योनेरसृजत प्रजननञ् वा ऊषाः[5] प्रजनने वा एतदग्निश्चीयत इमे वै सहास्तां ते वियती अब्रूतामस्तु नौ प्रियं धाम सहेत्यापो वा अस्या यज्ञिया मेध्यास्तां अमूरूषा[6] अमुष्या यज्ञिया मेध्यास्त इमे यदापश्चोषाश्च भवन्ति यदेवैनयोर्यज्ञियं मेध्यं तदवरुन्द्धे ऽथो अनयो रेवैनं प्रिये धामन्निधत्ते संज्ञानञ् वा ऊषा[7] उभये वा एतान्पशवो ऽभिसंजानते ये ग्राम्याः पशवो ये चारण्या उभये हैनं पशवो ऽभिसंजानते चे-

---

1) B तदुदु घ्नंति 2) Die Mss. °मुद्घ्न°; cf. 4, 1, 10. 3) Bb उद्धू घ्नंतः; desgl. B, ohne Accent; cf. 4, 1, 10. 4) So corrigirt; die Mss. उषेभ्य (cf. oben ऊषा). 5) So corrigirt; die Mss. उषाः 6) So corrigirt; die Mss. °रूषा 7) So corrigirt; die Mss. उखा; cf. TS 5, 2, 3, 2. 3.

तस्रः प्राचीः सादयति चत्वारि वै छन्दा᳐सि छन्दोभिर्वै देवाः स्वर्गं लोकमाय᳐न्ते दिशा आक्रमन्त[1] ता अब्रूयन्त ता एताभिरह᳐न्त्यदेता उपधीयन्ते दिशां धृत्यै पशवो वा इष्टका गार्हपत्य᳐ वै पशवो ऽनूपतिष्ठन्ते द्वे समीची पुरस्तादुपदधाति द्वे समीची पश्चादुभयत एवास्मै समीचः पशूनुपदधाति पशूनां परिगृहीत्या अष्टोपदधात्यष्टाक्षरा गायत्री गाय३त्रो ऽग्नि᳐र्यावानेवाग्निस्तं चिनुता एकवि᳐शतिः का३र्या प्रतिष्ठित्यै प्रतिष्ठा ह्येकवि᳐शो ऽथो एकवि᳐शतिविधो हि गार्हपत्यस्तिचितिकः का३र्यस्त्रयो वा इमे लोका इमानेव लोकानाप्नोति पञ्चचितिकः का३र्यः पाङ्क्तो यज्ञो यावानेव यज्ञस्तमालब्ध चतुर्भिः संनिवपति चत्वारि वै छन्दा᳐सि छन्दोभिरेव संनिवपत्यथो ब्रह्म वै छन्दा᳐सि ब्रह्मणैव संनिवपति क्षत्र᳐ वा एषो ऽग्नीना᳐ यश्चीयते क्षत्र᳐ य उख्यो[2] ब्रह्म यजुर्यद्यजुषा संनिवपति ब्रह्मणा वा एतत्क्षत्र᳐ संनयति तस्माद्ब्रह्मणा क्षत्र᳐ सं चैति वि च द्वौ वा एतौ व्याघ्रौ संपद्येते ता ईश्वरा अशान्तौ यजमान᳐ हि᳐सितोर्यदाह भवतं नः समनसौ समोकसौ सचेतसा अरेपसा इति शमयत्येव शान्त एव न्युप्यते यजमानस्याहि᳐साया ऋतुभिर्वै पृथिव्या वी३र्यमुद्यतं तदृतुभिः पुनर्विमुच्यते यदाह प्रजापतिर्विश्वकर्मा विमुञ्चत्विति प्रजापतिरेवैना᳐ विश्वकर्मा विमुञ्चति ॥ ३ ॥

Vgl. TS 5, 2, 3 (gârhapatyam cinoti); Kâṭh. 20, 1; Kap. S. 32, 3.

अथैता नैर्ऋतीस्तिस्रस्तुषपक्वा भवन्त्येतद्वै नैर्ऋतमन्नस्य यतुषाः कृष्णा भवन्त्येतद्वै निर्ऋत्या रूपमेतां दिश᳐ हरन्त्येषा हि निर्ऋत्या दिक्ताः स्वकृता इरिणे पराचीर्निदधात्येतद्वै निर्ऋतिगृहीतं पृथिव्या

1) B आक्रमंतु 2) So meine Correctur; die Mss. उचो

निर्ऋतिगृहीत एव निर्ऋतिं निरवदयते प्राणमेवास्य प्रथमया मुञ्चत्यपानं द्वितीयया व्यानं तृतीययाथो च्यृक्षरो वै पुरुषो यावानेव पुरुषस्तं निर्ऋत्याः पाप्मनो मुञ्चति निर्ऋतिर्वै कर्मण उपद्रष्ट्रिका ता वा एतत्स्वेन भागधेयेन शमयित्वाथ सवितृप्रसूतो ऽग्निं चिनुते यं ते देवी निर्ऋतिराबबन्धेति जालमिष्टकास्वध्यस्यति[1] निर्ऋतिपाशमेवोन्मुञ्चत आत्मनो ऽहिꣳसाये ॥

यदस्य पारे रजसो महश्चिच्चं ज्योतिरजायत।
तन्नः[2] परिषदति द्विषो ऽग्ने वैश्वानरः ॥

स्वाहेत्यपः परिषिञ्चन्पर्येति निर्ऋत्या अनन्ववायाय भूत्यै नमा इत्युल्कावर्तते भूतिरेव भूत्वावर्तत आत्मनो[3] ऽहिꣳसाया अनपेक्षमाणा आयन्ति निर्ऋत्या अनन्ववायाय परोगोष्टं मार्जयन्ते परोगोष्टमेव निर्ऋतिं निरवदयन्त इन्द्रियेण वा एष वीर्येण व्यृध्यते यो नैर्ऋतीरुपधत्ते निवेशनः संगमनो वसूनामित्यैन्द्र्या गार्हपत्यमुपतिष्ठत इन्द्रियेणैवात्मानꣳ समर्धयति त्रिष्टुभोपतिष्ठता ओजो वै वीर्यं त्रिष्टुबोजस्येव वीर्ये प्रतितिष्ठति गार्हपत्यो ऽग्ने चीयते प्रतिष्ठित्यै गार्हपत्ये वै देवाः प्रतिष्ठाय प्राञ्चः स्वर्गं लोकमभिजयन्त आयन्यावान्पुरुष ऊर्ध्वबाहुस्तावता वेणुना विमिमीत एतावद्वै पुरुषे वीर्यं वीर्येणैव विमिमीते ऽथो एतावान्वै पुरुषे महिमा महिम्नो ऽवरुद्ध्यै यो वै वनस्पतीनां फलग्रहितमः स एषां वीर्यवत्तमो वेणुर्वै वनस्पतीनां फलग्रहितमः स एषां वीर्यवत्तमो ऽन्नꣳ वै फलमन्नमर्को ऽर्को ऽग्निरर्केण वा एतदन्नमर्कमयꣳ विमिमीते सप्त पु-

1) So B; in H °स्वंधेति; Bb °स्वंधेती; Kap. S. 32, 4 °बबंधेति सिक(त)ामधिन्यस्यति; Kâṭh. 20, 2 शिक्षामधिन्यस्यति 2) So im Anschluss an H u. Bb तं नः; B liest तेन 3) Die Mss. आत्मनो

रुषान्प्रमिमीते सप्तभ्य एव पुरुषेभ्यो लोकꣳ विन्दत्यो सप्तमात्पुरुषादन्नादो भवत्यरत्निमात्रं पक्षयोरत्युपदधाति पक्षं बृहद्धि वयः षड्भिः कृषति षड्वा ऋतव ऋतुभिरेव कृषतीत्यमभ्यावर्तन्त कृषत्येषा हि देवानामावृदथो अमुष्य वा एतदादित्यस्यावृतमनुपर्यावर्तन्ते तिस्रस्तिस्रः सीताः संपादयति चिवृ३द्ग्निर्द्वादश सीता भवन्ति द्वादश मासाः सꣳवत्सरः सꣳवत्सरस्य वा एष विधामनुविधीयत इयꣳ वा अबिभेदग्निर्मातिधक्ष्यतीति यत्कृषत्यस्या वा एतद् द्विगुणं क्रियते ऽनतिदाहायाथो पृथिव्या वा एतद् द्विगुणेनाग्नेर्वी३र्यमुद्यच्छन्त एतां दिशमुत्सृजन्त्येषा हि देवानां दिगथो स्वर्गमेवैनां लोकमनूत्सृजन्ति ॥ ४ ॥

Vgl. TS 5, 2, 4 (ukhyâgnim tatra samvapet) u. 5 (kṛshati kshetram); Kâṭh. 20, 2 u. 3; Kap. S. 32, 4 u. 5.

कृष्टे वपति कृष्टे ह्योषधयः क्षेपिष्ठं प्रतिष्ठन्त्यन्नस्यान्नस्य वपत्योषधीनामृग्भिर्ब्रह्म वा ऋग्ब्रह्मणैवासा अन्नाद्यमवरुन्द्धे चतुर्दशभिर्वपति द्वादश मासाः सꣳवत्सरो ऽथ य एते चतुर्दशे अहोरात्रे एवैते तत्सꣳवत्सरेण च वावासा एतदहोरात्राभ्यां चान्नाद्यमवरुन्द्धे ऽन्नꣳ वै फलमन्नमꣳर्को ऽꣳर्को ऽग्निरर्केण वा एतदन्नमर्कमग्निꣳ वपति यस्यान्नस्य निवपति यन्नस्याश्नीयाद्यान्यवरुद्धानि तैर्व्यृध्येतेध्मे तस्यापिकुर्यादथो तन्मनसा ध्याये तेनैव तदवरुन्द्धे यदि सर्वं न सꣳविन्देद्यवान्मधूद्युतान्वपेद्यद्यवा ग्राम्यं तेनान्नाद्यमवरुन्द्धे यन्मध्यारण्यं तेन तेनैव तदुभयमवरुन्द्धे ऽथैते संभारा दिग्भ्यो वा

1) So die Mss.; also ein Adjectiv पक्षंबृहत्; Kâṭh. 20, 3 u. Kap. S. 32, 5 पक्षप्रवयांसि वयांसि 2) In den Mss. das Verb ohne Accent. 3) Die ३ fehlt in den Mss. 4) Die Mss. °नुत्सृजंति

एतत्पृथिव्या ऊर्जꣳ संभरत्यू३र्ज्यग्निश्चीयते यां जनतां कामयेत क्षोधुका स्यादितीषमूर्जमहमित आदीति तस्या अर्धादादत्त क्षोधुका ह सा जनता भवति कामं कामदुघे धुक्ष्वेत्यभिमृशति तेनास्य सर्वा इष्टकाः कामदुघा भवन्त्युत्तरवेदिं निवपत्युत्तरवेदिमित्येवास्याग्निश्चीयतेऽथो यज्ञपरुषो[2]ऽनन्तर्हित्या अग्निर्वा एष न्युप्यते यदुत्तरवेदिर्यदुत्तरवेदिं न्युप्याग्निं चिनोत्यग्नौ वा एतदग्निश्चीयतेऽग्ने तव श्रवो वया इति सिकता निवपत्येता वै वैश्वानरीरिष्टका अपरिमिता एतदग्नेरपरिमितं चीयतेऽग्नेर्वा एतद्वैश्वानरस्य सूक्तमेषा वा अग्नेः प्रिया तनूर्यद्वैश्वानरः प्रियाया वा एतत्तन्वामग्निश्चीयते सतनूर्को निधीयते लोमशꣳ वा एतच्छन्दः[3] पशव्यमूनातिरिक्तं प्रजननायाशीत्यक्षरमे तेन वै देवाः स्वर्गं लोकमायꣳस्तदस्याशीत्यक्षरत्वꣳ समुद्रꣳ वा एतच्छन्दो योनिः समुद्रः सोमो रेतोधा यत्सौमीभ्या व्यूहति योनौ वा एतद्रेतो दधाति तस्माद्योनौ रेतो हितमाप्यानवती भवतस्तस्माद्योनौ रेता आप्यायते छन्दोभिर्वा अग्निरुत्तरवेदिमभिप्रह्रियते या अग्नौ प्रहियमाणे ऽन्वाहुस्तां तर्हि मनसा ध्यायेच्छन्दोभिरेवैनमुत्तरवेदिमभिप्रहरति[4. 5] मनसान्वाहानिरुक्तमिव ३ह्येतदव्यावृत्तꣳ व्यावृतं[6] पाप्मना भ्रातृव्येण गछत्यश्वं पुरस्तान्नयन्ति रक्षसामपहत्या आक्रमयन्ति यं एवैनेन भ्रातृव्यः सहेꣳ तꣳ वज्रेणावबाधन्ते प्राञ्चं प्रक्रमयन्ति यं एवैनं भ्रातृव्यो ऽति तꣳ वज्रेण प्रणुदते प्रत्यञ्चमभ्यावर्तयन्ति यं एवैनं भ्रातृव्यो ऽनु तꣳ वज्रेण प्रतिनुदते तन्नो-

1) Bb आदिति; Kap. S. 32, 6 आदमिति; aber Kâṭh. 20, 4 इषमूर्जमहमित आदीतीषमेवास्या ऊर्जमादत्ते 2) So B (ohne Accent); in H u. Bb यज्ञपुरुषो; Kâṭh. 20, 4 u. Kap. S. 32, 6 अथो यज्ञपरुरेव cet. 3) So corrigirt; B एतत्छंदः; H एतत्संदः; Bb एतत्संदः; cf. unten. 4) Die Mss. ध्याये कꣳ 5) So B (ohne Accent); in H u. Bb °मतिप्रहरति 6) So B (ohne Accent), in H u. Bb व्यावृत्तं

तृव्यस्य वा एष विनोदः कृष्णो वै भूत्वाग्निरश्वं प्राविशत्स एतद्ग-
ह्वच मृगशफो यदश्वमाक्रमयन्ति यदेवाग्नेयृक्तं तस्यावरुद्धै॥५॥

Vgl. 2, 7, 13. — TS 5, 2, 5 (kṛshati kshetram) u. 6 (atra sikatâdikam vapet); Kâṭh. 19, 3 a. E. u. 4; Kap. S. 32, 5—7.

तपो योनिरसीति पुष्करपर्णीमुपदधाति योनिर्वा एष ऽग्नेर्यत्पु-
ष्करपर्णी नाभिर्वधकः सयोनिरेव सनाभिश्चीयत इयं वा अबिभेद-
ग्निर्मोतिधक्ष्यतीति यत्पुष्करपर्णीमुपदधात्यस्या अनतिदाहायाधस्ता- 5
न्नाभि[1] सादयत्योषधीनां प्रतिष्ठित्या अथो ३ये ऽ३प्स्वग्नयस्तानेवा-
वरुन्द्धे प्रजापतिः प्रजा असृजत याः पुरा ब्रह्मणो ऽसृजत ताभिर्नो-
राध्नोदथ[2] या ब्रह्ममुखा असृजत ताभिरराध्नोद्यद्ब्रह्म[3] जज्ञानं प्रथमं
पुरस्तादिति रुक्ममुपदधात्यृद्ध्या ऋध्नोत्येवाथो मिथुनत्वाय न पृ-
थिव्यामग्निश्चेत३व्यो नान्तरिक्षे न दिवीत्याहुरमृतꣳ वै हिरण्यममृते 10
वा एतदग्निश्चीयते श्मशानचितो वा एते चीयन्ते चित्यां चित्याꣳ
हिरण्यशकलमुपास्यति तेन वा एषो[4] ऽश्मशानचित्तेन स्वर्गो ऽथैष
पुरुषो हिरण्मयो यजमानलोकमेवैष दाधारैष ह ३त्वेव यजमानो
ऽग्निनामुष्मिंल्लोके सम्यङ् यस्यैष उपधीयतेऽथो मध्ये ज्योतिरेव
चीयते द्रप्सश्चस्कन्द पृथिवीमनु द्यामित्यभिमृशति होचास्वैवैनं प्र- 15
तिष्ठापयत्यथैतानि सर्पनामानि मृत्युर्वै सर्पनामानि यदुपदध्या-
त्ममायुकः स्यात्तस्मादनुदिशति सोमे वा एका त्विषिर्व्याघ्र एका
सर्प एका ता एवावरुन्द्धे वामदेवस्य राक्षोघ्नेन व्याघारयत्येतेन वै

1) So ist wohl zu lesen; die Mss. °धस्तान्नाभि; cf. अधस्तान्निर्बाधम् Çat. Br. 7, 4, 1, 10. 2) So corrigirt; die Mss. °नीराध्नोदथ; cf. folgende Anmerkung. 3) So H u. Bb; in B wieder °राध्नोत् 4) So corrigirt; die Mss. एषो श्मशानचित्; s. unten 3, 2, 7; 3, 5, 1 a. A. u. TS 5, 2, 8, 5.

वामदेवः कुसिताय्याः[1] शिरा आदीपयद्रक्षसामपहत्यै पञ्चभिर्व्यूहा-
रयति पाङ्क्तो यज्ञो यावानेव यज्ञस्तमालभ्याथो यावानेव यज्ञस्त-
स्माद्रक्षाꣳस्यपहन्त्यथैते स्रुचौ कार्ष्मर्यमयीं दक्षिणतः सादयति रक्ष-
सामपहत्यै दक्षिणतो वै देवानाꣳ यज्ञꣳ रक्षाꣳस्यजिघाꣳसꣳस्तानि
कार्ष्मर्येणैवापाघ्नत यत्कार्ष्मर्यमयीं दक्षिणतः सादयति रक्षसाम-
पहत्यै घृतस्य पूर्णा भवत्येषा वा अग्नेः प्रिया तनूर्यद् घृतं प्रिययैवैनं
तꣳवा समर्धयति गायत्र्या सादयति तेजो वै गायत्री ब्रह्मवर्चसं
तेज एव ब्रह्मवर्चसमवरुन्द्धा औदुम्बरीमुत्तरतः सादयति दघ्नः पूर्णी-
मूर्ग्वा उदुम्बरो[2] ऽन्नं दध्यू३र्ज्यैवास्यान्नं[3] दधाति त्रिष्टुभा सादयत्योजो
वै वीर्यं त्रिष्टुबोज एव वी३र्यमवरुन्द्धे पूर्णं सादयत्यक्षिते यजमान-
लोकमुपतिष्ठते मूधन्वतीभ्याꣳ सादयति मूर्धन्यो ऽसानीति विराज्य-
ग्निश्चेत३व्या इत्याहुः स्रुचौ वै विराजौ यत्स्रुचा उपदधाति विरा-
जि वा एतदग्निश्चीयते ऽथैषा स्वयमातृण्णेयꣳ[5] वै प्रथमा स्वयमा-
तृण्णान्तरिक्षं द्वितीयासौ तृतीयेमानेव लोकानुपधत्ते ऽस्यमुपधाय्य
सादयति प्रजापतिचित एवास्य भवत्यथो प्राणानामुत्सृष्ट्यै भूरसी-
ति प्राचीमुदूहेद्यद्येनं भ्रातृव्यो ऽतीव स्याद्भूमिरसीति प्रतीचीꣳ य-
द्यन्वदितिरसि भूमिरसीति तिरश्चीꣳ यदि सद्दङ्ख्यꣳ वा अदितिर-
नया वा एतद्यजमानो भ्रातृव्यं प्रभूतं प्रणुदते ऽनया प्रतिनुदते
ऽनया विनुदते तद्भ्रातृव्यस्य वा एष विनोदः कारण्डात्कारण्डात्प्ररो-
हन्ती[6]ति दूर्वेष्टकामुपदधात्योषधीनां[7] प्रतिष्ठित्यै कारण्डात्कारण्डा३द्धेषा

1) So schreibe ich; die Mss. कुसिताया:; den Nom. कुसिताची s. oben 2, 1, 11.
2) Die Mss. उदुंबरो 3) So meine Correctur; Bb दध्यू३र्जैवास्यान्नं; H दध्यू३र्जैवा-
स्यान्नं; B दध्यू३र्जैवास्यादन्नं 4) So corrigirt; die Mss. विराजी; cf. TS 5, 2, 7, 5.
5) Die Mss. °तृणेय° 6) So H u. Bb (desgl. Kap. S.); in B °मुदहेद् 7) B
पूर्वेष्टकाम°

प्रतितिष्ठतीति[1] पशवो वा इष्टका[2] न वै पशवा आयवसे रमन्ते[3] यद्वेष्टकामुपदधात्यायतनमिव[3] वा एतत्क्रियते पशूनां[4] यत्या अथैषा वामभृद् द्विर्यजुर्यजमानलोकमन्येन[4] दाधार भ्रातृव्यलोकमन्येन[5] वृङ्क्ते एतया वै देवा असुराणां वामं पशूनवृञ्जत तद्वामभृतो वामभृत्त्वं छन्दाꣳसि वै देवानां वामं पशवश्छन्दाꣳस्येवैतया वामं पशून्यजमानो भ्रातृव्यस्य वृङ्क्ते ऽथैते रेतःसिचा[6] इयꣳ[7] विराडसौ स्वराडसा एव रेतः सिञ्चतीयं प्रजनयत्यग्निरन्नादो[8] भवति यस्यैते उपधीयेते यदि पुची चिन्वीत प्रथमायां चित्यामन्यामुपदध्यादुत्तमायामन्यां रेतसः सिक्तस्य परिगृहीत्यै यद्यपुचः प्रथमायां चित्यामुभे उपधेये सम्यञ्चौ हि भूत्वा रेतः सिञ्चतः ॥ ६ ॥

Vgl. 2, 7, 15. — TS 5, 2, 6 a. E. 7 (rukmâdy upadadhyât) u. 8 (sthâpayet svayamâtṛṇṇâm); Kâṭh. 20, 5 u. 6; Kap. S. 32, 7 u. 8.

अथैता विश्वज्योतिषः एषु वा एतल्लोकेषु[9] ज्योतिष्मन्तमग्निं निधत्ते ऽथो प्राणानां विधृत्या अथैषा व्यालिखिते मे[10] वै लोकास्त्र्यालिखितेमानेव लोकानुपाधत्त उभये वा एतामुपादधत देवाश्च वा असुराश्चोपरिष्टाल्लक्ष्माणं देवा उपादधताधस्ताल्लक्ष्माणमसुरास्ततो देवा अभवन्परासुर उपरिष्टाल्लक्ष्माणमुपदधीत भ्रातृव्यवान्यो वास्य प्रियः स्यात्तस्य भवत्यात्मना परास्य भ्रातृव्यो भवत्येष[11] वा असपत्नेष्टकासपत्नो भवति य एतामुपधत्ते ऽथो देवलक्ष्मं वा एषा देवलक्ष्ममेवोपधत्ते या सोषाया[12] अधि मृदुञ्शिष्यते[13] तस्या एतां कु-

1) Die Mss. °ष्ठंतीति 2) Die Mss. ररमंते 3) So corrigirt; in H u. Bb यंदूवेष्ट°; B यत्पूर्वेष्ट° 4) So corrigirt; die Mss. यजमानलोकम° 5) So corrigirt; die Mss. भ्रातृव्यलोकम° 6) So corrigirt; H u. Bb रेतः सीचा; B रेतः सीवा 7) H ईयं°; desgl. B, ohne Accent. 8) Die Mss. °त्यमीर° 9) So die Mss. 10) Die Mss. स्त्र्यालि° 11) So die Mss. 12) So corrigirt; die Mss. सोषाया 13) Die Mss. मृदुञ्शिष्यते

यीत्तैनास्य[1] सर्वा आग्नेयीरिष्टका भवन्त्यथैष कूर्मः श्मशानचितो वा एते चीयन्ते जीवः कूर्म उपधेयस्तेन वा एषोऽश्मशानचित्तेनोत्पाती[2] पशूनाꣳ वा एष मेध एतꣳ वै मेधं पश्यन्त एनं पशवोऽमुष्मिंल्लोक उपतिष्ठन्ते प्रत्यञ्चꣳ सादयति प्रत्यञ्चो हि पशवो मेधमुपतिष्ठन्ते द्यावापृथिवीयया सादयति द्यावापृथिवी हि[3] पशवोऽनूपतिष्ठन्ते पशुभिरेवैनꣳ सम्यञ्चं दधाति विष्णोर्नाभ्यामग्निश्चेत३व्या इत्याहुः प्रादेशमात्रमुलूखलं कार्यमेतावान्वै विष्णुर्विष्णोर्वा एतन्नाभ्यामग्निश्चीयत ऊ३र्ज्यग्निश्चेत३व्या इत्याहुरूर्ग्वा उदुम्बरो यदौदुम्बरमुलूखलं[4] भवत्यूर्जि वा एतदग्निश्चीयते वैष्णव्या सादयति वैष्णवꣳ३ह्युलूखलꣳ[5] स्वयैव देवतयाथैषोखा[6] पृथिव्या वा एतदोजो वी३र्यꣳ संभ्रियता ओजो वा एतद्वीर्यं मध्य३तोऽग्नेर्धीयते[7]ऽथो मध्ये ज्योतिरेव[8] चीयते यद्रिक्तामवेक्षेत क्षोधुको यजमानः स्यादथ यत्पूर्णामवेक्षते तथा हाक्षोधुको भवति सिकताभिः पूरयित३व्याग्नेर्वा एतद्वैश्वानरस्य भस्म यत्सिकताः स्वेनैवैनां भस्मना प्रीणाति दध्नः पूरयितव्योग्वै[9] दध्यूर्जमेवावरुन्द्धे घृतस्य पूरयित३व्यैषा वा अग्नेः प्रिया तनूर्यद् घृतं प्रिययैवैनं त३न्वा समर्धयति मधोः पूरयितव्या हास्य प्रजायां मधव्यो जायते व्यृध्यै न्द्रियाणि वै पशुशीर्षाण्ययज्ञियान्यमेध्यानि यच्छिद्रेषु[10] हिरण्यशकलान्यपस्यतीन्द्रियेणैवैनानि वीर्येण समर्धयति मेध्यान्येनानि यज्ञियानि करोत्यर्धꣳ वै पुरुषः

---

1) Die Mss. schreiben एतान् nnd betonen कुर्यात्; Kâṭh. एतां 2) So corrigirt; in den Mss. एषो श्मशानचित् (cf. Mâitr. S. 3, 5, 1 u. TS 5, 2, 8, 5). 3) In den Mss. ohne Accent. 4) So corrigirt; in den Mss. यदूदुम्बरम° 5) Die ३ fehlt in den Mss. 6) So corrigirt; die Mss. °थैषोषा 7) So corrigirt; H u. Bb मे धीयते; B मे धीयते 8) ज्योतिर° in den Mss. ohne Accent. 9) So corrigirt; die Mss. °तक्नोर्वै 10) Die Mss. यच्छि°

सहस्रस्य यच्छन्त्यर्धमितरे पशवस्तस्मादेतन्मध्यत उपदधात्यभिता इतराणि पशोः सवीर्यत्वायाथो सायतनत्वाय यं कामयेत पशुमान्स्यादिति तस्य समीचीनानि पशुशीर्षाण्युपदध्यात्समीच एवास्मै पशूनुपदधाति पशुमान्भवत्यथ यं कामयेतापशुः स्यादिति तस्य विषूचीनानि पशुशीर्षाण्युपदध्याद्विषूच एवास्मै पशूनुपदधात्यपशुर्भवत्येता वै साहस्रीरिष्टकाः पञ्चिष्टकास्ताः सोमदक्षः कौश्रेयो विदांचकार ताः श्यापर्णायोपदधौ स सहस्रं पशूनाप प्र सहस्रं पशूनाप्नोति यस्यैता उपधीयन्ते यविष्ठो वै नामैषोऽग्निस्तस्माच्चिन्वतान्तरा न व्येतवै यद्वीयात्प्राणानस्य युवेतोत्सर्गरूपतिष्ठत आरण्यानेव पशूञ्शुचमनूत्सृजति ॥ ७ ॥

Vgl. TS 5, 2, 8 u. 9; Kâṭh. 20, 6 u. 7; Kap. S. 32, 8 u. 9.

पुरुषशीर्षमुपदधात्येष हि पशूनां वीर्यवत्तमो वीर्यमस्मिन्दधात्येकमुपदधात्येकधास्मिन्वीर्यं दधाति सौर्यो पुरुषशीर्षमभिजुहोति स्वर्गस्य लोकस्य समष्ट्यै सौरी वा एषा सती मैत्रावरुण्यहर्वै मित्रो रात्रिर्वरुणोऽहोरात्रयोरेव प्रतितिष्ठत्यर्धर्चाभ्यां जुहोतीयं वा अर्धर्चाऽयमर्धर्चोऽनयोरेव प्रतितिष्ठत्यथ यदेकयर्चा जुहोति तस्मादेकः सन्पुरुषो द्विपाद्यद्वा एतत्किंचाकयोनि वा एतद्यदेकयैतामपस्याः सादयति तस्मिन्नेव योनौ रेतो दधातीयं

1) So meine Correctur; H u. Bb तास्यापर्णा°; desgl. B, ohne Accent; Kap. S. 32, 10 सोमदक्षः कौश्रेय स्यापर्णायोपदधौ; Kâṭh. 20, 8 सोमरक्षः कौश्रेयश्श्यामपर्णायोपदधौ 2) In den Mss. प्राप ohne Accent. 3) In den Mss. ohne Accent. 4) Da die Mss. dieses Buchs nur nach der gewöhnlichen Weise des RV accentuirt sind, lässt sich nicht entscheiden, ob sie व्येतवै od. व्येतवै lesen. 5) So meine Correctur; Bb मैत्रावरुण्यहर्विवै; desgl. B, ohne Accent; H मैत्रावरुण्यहर्वि वै 6) In den Mss. द्विर् ohne Accent.

वा अबिभेदग्निर्मातिधक्ष्यतीति सैता इष्टका अपश्यदथो आहुः प्रजापतिरपश्यदिति ता उपाधत्ते यदेता उपधीयन्ते ऽस्या अनतिदाहाय यदिदन्नमिति होवाचेयं य एता उपदधाता इत्यन्नादो भवति यस्यैता उपधीयन्ते तस्माद्रेतसः सिक्तादेष पशुः संभवति यदेताश्छन्दस्याः पशवो वै छन्दाꣳसि यद्दक्षिणत उपदध्यादभीपतः प्रजा वरुणो गृह्णीयादथ यदुत्तरत उपदधात्यपवाहत एवैताः प्राणभृतस्तास्मिन्पशौ संभूते प्राणं चक्षुः श्रोत्रꣳ वाचं तानि दधात्यक्ष्णया[1] सादयति पशुꣳ वा एतदाक्रमयति तस्मात्पशवो ऽक्ष्णयाङ्गानि प्रहरन्तो यन्ति दशभिर्दशभिर्वा अता इष्टकाभिर्ऋषय आध्रुवꣳस्ता ऋड्डीर्ऋध्नोति यस्यैता उपधीयन्ते ऽथैताः सꣳयतो रेतो वा एतत्सिच्यते यदग्निश्चीयते यदेता उपधीयन्ते रेतसः सिक्तस्य सꣳयत्यै लोकं पृण छिद्रं पृणेत्येषा वा अछिद्रेष्टका ऽछिद्रा वा एतया चितयश्चीयन्त इन्द्राग्नी त्वा[2] बृहस्पतिरित्योजो वै वीर्यमिन्द्राग्नी ओजसा वा एतद्वीर्येणाग्निश्चीयते ता अस्य सूददोहसा इति परुषि परुष्येव रसं दधाति सोमꣳ श्रीणन्ति पृश्नया इत्यन्नꣳ वै पृश्न्यन्नमेवावरुन्द्धे जन्मन्देवानाꣳ विश इत्याह प्रजात्या एवं चिष्वा रोचने दिव इति सवनानि वै त्रीणि रोचनानि सवनचितमेवैनमकरनुष्टुब्वा एषा वाग्वा अनुष्टुप् प्राणो वै वाग्यदेषा सर्वा इष्टका अनुसंचरति तस्मात्प्राणः सर्वाण्यङ्गान्यनुसंचरत्यग्नेयी वा एषा वर्णेन

---

1) Die Mss. schwanken; Bb तानिदधात्य°; H ता निद्धात्य°; B तार्निदधात्य°; Kap. S. 32, 11 प्राणभृत उपदधाति रेतस्यक्ते प्राणं मनश्चक्षुः श्रोत्रं वाचं दधाति——वाचमेव मथतो दधाति तस्मान्मथतो वाग् (व)दत्यक्ष्णयोपदधाति तस्माद्दक्षिणया पदः पशवः प्रहरंतो यंति cet. 2) B त्वां

स्वेन वा एतच्छन्दसाग्निश्चीयते[1] नाध्वर्युः सन्नार्त्तिमार्छति य एवꣳ वेद ॥ ८ ॥

Vgl. 2, 8, 1. — TS 5, 2, 9 u. 10; Kâṭh. 20, 8 u. 9; Kap. S. 32, 10 u. 11.

उत्सन्नयज्ञो वा एष यदग्निश्चित्यः को ह तद्वेद यदेतस्य क्रियते यन्नाश्विनौ वै देवानां भिषजा अकूप्नस्य कल्पयितारौ यदेता आश्विनीरुपधीयन्ते ऽकूप्नस्य कॢप्त्यै पञ्चोपदधाति पाङ्क्तो यज्ञो यावानेव यज्ञस्तमालब्ध्वाथो यावानेव यज्ञस्तमचीकॢपदेताश्चाश्विनीर्ऋतव्या अनूपधीयन्ते रेतसे वा एतत्सिक्ताय ऋतूनुपाधात्तस्मात्सर्वेष्वृतुषु रेतो हितं तस्मात्सर्वानृतूनेतो ऽनुप्रजायते ऽथैता ऋतव्या वायव्या अनूपधीयन्ते तस्मात्सर्वानृतून्वायुरन्वावरीवर्त्यथैता वायव्या अपस्या अनूपधीयन्ते तस्मात्पशवो नानाव्रताः[2] सन्तो ऽप एवाभि संव्रताश्चतस्रः पुरस्तादुपदधाति चतुर्विधꣳ हि शिरः प्राणश्चक्षुः श्रोत्रꣳ वाङ् मूर्धन्वतीभिः सादयति मूर्धन्यो ऽसानीति पञ्च पञ्चाभिता उपदधाति पशोः सवीर्यत्वायाथो सायतनत्वाय तस्मात्पशुः पश्चाङ्गरीयाञ्श्रोणिमत्तरस्तस्मादु[3] प्राङ् संहाना इन्द्राग्नी अव्यथमानामिष्टकां दꣳहत युवमित्यन्तरिक्षꣳ वा एषा चितिरन्तरिक्षमिमाः प्रजा इन्द्राग्नी वै देवानामोजोभृता ओजो वीर्यमिन्द्राग्नी ओजो वा एतद्वीर्यं मध्यतः प्रजानां धीयते ऽथैता दिश्या देवा वै स्वर्गं लोकमायꣳस्ते दिश आक्रमन्त ता अवीयन्त ता एताभिरदꣳहन्यदेता उपधीयन्ते दिशां धृत्यै पञ्चोपदधाति पाङ्क्तो यज्ञो यावानेव यज्ञस्तमालब्ध्व दशैताः पुरस्तात्सादयति दशाक्षरा विराड् विराट् खलु

1) Die Mss. एतक्॰ 2) H u. Bb नानावृताः Kâṭh. 20, 10 नानाव्रताः 3) So corrigirt; die Mss. श्रोणिमुत्तरस्

वै चक्षुज्योतिश्छन्दसां चक्षुर्वा एतज्ज्योतिः पुरस्तात्पशोर्दधाति तस्मादिदं पुरस्ताच्चक्षुरथो अन्न॰ वै विराडन्न॰ वा एतन्मुखतो दधाति मा छन्दः प्रमा छन्दः प्रतिमा छन्दा इतीय॰ वै मान्तरिक्षं प्रमा सौ प्रतिमेमानेव लोकानुपधत्ते ऽथो देवछन्दसानि वा एतानि देवछन्दसान्येवोपधत्ते द्वादश द्वादशाभिता उपदधाति तत्षट्चि॰शत्षट्चि॰शदक्षरा बृहती बृहती खलु वै छन्दसा॰ स्वाराज्यमानशे गच्छति स्वाराज्य॰ यस्यैता उपधीयन्ते पशवो वै बृहती पशवो मध्यमा चितिस्तस्मादेतस्यां चित्यामेता उपधीयन्त आदित्यधामानो वा उत्तरे प्राणा अङ्गिरोधामानो ऽधरे मूर्धासि राडिति य उत्तरे प्राणास्तानेताभिर्दोधार यन्त्री राडिति ये ऽधरे प्राणास्तानेताभिर्दोधार तदेषा॰ वावैताः प्राणाना॰ विधृत्यै समावङ्गाजः सादयति समावङ्गाजो ३हीमे प्राणाः प्राणाना॰ विधृत्यै यं द्विष्यात्तस्याक्ष्णया सादयेत्प्राणानस्य मोहयति प्रमायुको भवति मूर्धन्वतीभिः सादयति मूर्धन्यो ऽसानीति ॥ ९ ॥

Vgl. 2, 8, 1—3. — TS 5, 3, 1 u. 2; Kâṭh. 20, 10 u. 11; Kap. S. 32, 12 u. 13.

चिवृद्वतीं पुरस्तात्सादयति चिवृद्वै यज्ञमुखं मुखतो वा एतद्यज्ञमुखं दधाति सप्तदशवतीं दक्षिणतो ऽन्न॰ वै सप्तदशो ऽन्न॰ वा एतद्दक्षिणतो दधाति तस्माद्दक्षिणेन हस्तेनान्नमद्यते तस्माद्दक्षिणो ऽर्ध आत्मनो वीर्यवत्तरस्तस्माद्दक्षिणमर्ध॰ वया॰स्यनुपर्यावर्तन्ते पञ्चदशवतीमुत्तरत ओजो वै पञ्चदश ओजो वा एतदुत्तरतो दधात्येकविं॰शवतीं पश्चात्प्रतिष्ठित्यै चिवृद्वतीं पुरस्तात्सादयति चिवृद्वै यज्ञमुखं मुखतो वा एतद्यज्ञमुखं दधाति पञ्चदशवतीं दक्षिणतः सादयति सप्तदशवतीमुत्तरतः पक्षयोः सवीर्यत्वायाथो सायतनत्वाय

तस्मादुभाभ्या॰ हस्ताभ्यामन्नमद्यते ऽथो वज्रो वै पञ्चदशो वज्रेण वा एतद्यजमानो भ्रातृव्यमुभयतो निर्भजत्येकवि॰शवतीं पश्चात्प्रतिष्ठित्यै प्रतिष्ठा ह्येकवि॰3शो ऽकस्य वा एष विधामनुविधीयते ऽन्नमर्को ऽन्नादो भवति यस्यैता उपधीयन्ते ऽग्नेर्भागो ऽसि दीक्षाया आधिपत्यं ब्रह्म स्पृतं चिवृत्स्तोमा इति स्पृतो वै नामैता इष्टका एताभिर्वै प्रजापतिर्यद्यदकामयत तत्तदस्पृणोद्यद्यदेवैताभिर्यजमानः[1] कामयते[2] तत्तत्स्पृणोत्येकयास्तुवत प्रजा अधीयन्तेति सृष्टयो वै नामैता इष्टका एताभिर्वै प्रजापतिर्यद्यदकामयत तत्तदसृजत यद्यदेवैताभिर्यजमानः कामयते तत्तत्सृजते ऽग्ने जातान्प्रणुदा नः सपत्नानिति पुरस्तात्सादयति य एव जाताः सपत्नास्तानेतया प्रणुदते प्रत्यजातान्जातवेदो नुदस्वेति पश्चाद्य एव जाताः सपत्नास्तानेतया प्रतिनुदते तद्भ्रातृव्यस्य वा एष विनोदश्चतुश्चत्वारि॰शी स्तोमो वर्चो द्रविणमिति दक्षिणतः सादयति षोडशी स्तोमा ओजो द्रविणमित्युत्तरतश्चतुश्चत्वारि॰शदक्षरा वै चिष्टुब्वज्रस्त्रिष्टुब्वज्रः षोडशी सव्यापग्रहणो वै वज्रो दक्षिणाप्रहरणः सव्यापग्रहण॰ वा एतद्वज्रं दक्षिणाप्रहरण॰ यजमानो भ्रातृव्याय प्रहरति पुरीषवतीं मध्यतः सादयति पुरीषमिव 3हीदं मध्यतः पशोः पुरीषं मध्यमात्मनः सात्मानमेवाग्निं चिनुते ऽथैता विराजो वाग्वै विराट् पशवो वा एता इष्टकाः पशुषु वा एतदुत्तमा॰ वाचं दधाति तस्मात्पशुमानुत्तमा॰ वाच॰ वदति ॥ १० ॥ Vgl. 2, 8, 6 u. 7. — TS 5, 3, 3—5; Kâṭh. 20, 12 u. 13; Kap. S. 32, 14—17.

॥ इत्युपरिकाण्डे[3] हशानो नाम द्वितीयः प्रपाठकः ॥

1) Die Mss. यद्यदेवैताभि॰ 2) H u. Bb कामयेत; vgl. aber gleich weiter unten die entsprechende Wendung, wo die Mss. übereinstimmen. 3) Das इति fehlt in den Mss.

अथैताः स्तोमभागा एता वै बृहस्पतिरसुरेभ्योऽधि यज्ञस्य प्रतिष्ठामाहरद्यदेता उपधीयन्ते यज्ञस्य प्रतिष्ठित्यै यज्ञो वै देवानामपद्यत तं देवाः स्तोमभागाभिः प्रत्युदस्तभ्नुवन्यदेता[1] उपधीयन्ते यज्ञस्योत्तब्ध्यै प्रजापतिर्वा एतत्पृथिव्या अग्नेस्तेजः समभरत्तत एवैतत्तेजः संभ्रियते ऽथैता नाकसदो नाकं ह वा अस्मा अग्निं चिक्यानाय भवति न वै तच्च किं चन जग्मुषे कं तस्मान्नाकसदो नाकसत्सु पञ्चचूडा अध्युपदधाति स्वर्गस्य लोकस्य समष्ट्या एष ह ३ वेव यजमानः पत्नीभिरग्निनामुष्मिंल्लोके सम्यङ् यस्यैता उपधीयन्तेऽथो मध्ये ज्योतिरेव[2] चीयत एता वा अमुष्मिंल्लोके यजमानस्य पत्नीस्तस्मादग्निचिता स्त्री नोपेत्येर्षा हि सा पश्चात्प्राचीमुत्तमामुपदधाति पश्चा३द्धीतं[4] प्राची[5] पत्न्यन्वास्ते[6] ऽथैताः कॢप्तयः प्रजापतिः प्रजा असृजत ता एन[7] सृष्टा अत्यमन्यन्त स प्रजापतिरेता इष्टका अपश्यत्ता उपाधत्त ततो वा अकल्पत यदेता उपधीयन्ते प्रजानां कॢप्त्या अथैता वृष्टिसनयो वृष्टिर्वै देवेभ्योऽन्नाद्यमपाक्रामत्तत इदं सर्वमशुष्यत्ते देवाः प्रजापतिमेवोपाधावन्स प्रजापतिरेता इष्टका अपश्यत्ता उपाधत्त तेभ्यो वृष्टिमन्नाद्यमवारुन्द्ध[8] यदेता उपधीयन्ते वृष्ट्या अन्नाद्यस्यावरुद्ध्या आवपनं वा उत्तमा चितिरन्या अन्या इष्टका उपदधात्यन्यानन्यानेवास्मै पशून्प्रजनयति प्राणो वै स्वयमातृण्णायुर्वायव्या समीची उपदधात्यायुष्ट्वेव[9] प्राणं च

---

1) So corrigirt; (s. auch Kap. S. 32,17); die Mss. प्रत्यूदस्तभ्नुवन्; Kâṭh. 21, 2 प्रत्युदस्तभ्नुवन् 2) In den Mss. ज्योतिर° ohne Accent. 3) H u. Bb नोपेत्येर्षा हि; B नोपेत्येषा हिं 4) Die ३ fehlt in den Mss. 5) In den Mss. ohne Accent. 6) In den Mss. °न्वास्ते 7) Die Mss. एनं 8) So corrigirt; die Mss. °मवरुंध 9) So corrigirt; die Mss. उपदधात्य°

युंजा अकरंथो समीचीनाभ्या᳔ ह्यायुषा च प्राणेन च भुञ्जते प्राणो स्वयमातृणा᳔ नामुत्तमामुपदधात्युत्तम᳔ ह्यायुर्यदन्यामुत्तरामुपदधात्प्राणमस्यापिदध्यात्प्रमायुकः स्यात्तस्मात्तामुत्तमामुपदधात्युत्तम᳔ मायुः ॥ १ ॥

Vgl. 2, 8, 8—10. — TS 5, 3, 5—7; Kâṭh. 21, 1—3; Kap. S. 32, 17.

अथैषा छन्दश्चिति᳔श्छन्दा᳔सि वै देवाना᳔ वामं पशव᳔श्छन्दा᳔स्येवैतया वामं पशून्यजमानोऽवरुन्द्ध एता᳔ वै यज्ञसेनश्चैत्र उपदधे[2] स आनर्ध ऋध्नोति य एतामुपधत्ते गायत्रीभिः पुरस्तात्सादयति तेजो वै गायत्री ब्रह्मवर्चसं तेज एव ब्रह्मवर्चसमवरुन्द्धे तिस्र उपदधाति त्रिवृ३द्यज्ञमूर्धन्वतीभिः सादयति मूर्धन्यो ऽसानीति त्रिष्टुब्भिर्दक्षिणत[3] ओजो वै वीर्यं त्रिष्टुबोज एव वी३र्यमवरुन्द्धे जगतीभिः पश्चाज्जागताः पशवः पशूनेवावरुन्द्धेऽनुष्टुब्भिरुत्तरतो[4] ऽनुष्टुब्वै सर्वाणि छन्दा᳔सि सर्वाण्येवास्य छन्दा᳔स्युपहितानि भवन्त्यथ पङ्क्तीरथ बृहतीरथोष्णिहो ऽथ ककुभो ऽथ विराज एवमस्य यथापूर्वं छन्दा᳔स्युपहितानि भवन्ति द्विपदा उत्तमाः सादयति द्विपाद्यजमानः प्रतिष्ठित्यै छन्दा᳔सि वै देवाना᳔ वामं पशवो यजमानायतन᳔ वा आहवनीयो भ्रातृव्यायतन[5] धिष्ण्या[6] यत्पश्चोपदध्याद्भ्रातृव्यायतने[7] वामं पशून्दध्यादथ यत्पुर उपदधाति यजमानायतने वा एतद्वामं पशून्दधात्यष्टोपदधात्यष्टाक्षरा गायत्री गाय३त्रो ऽग्नि र्यावानेवाग्नि स्तं चिनुते ऽष्टौ गायत्रीभिः पुरस्ताद्बृहिः-

1) H u. Bb यज्ञसेन° 2) B उपदधो 3) Die Mss. त्रिष्टुभि°; so auch Kap. S. 4) H u. Bb ऽनुष्टुप्भिरु°; Bb ऽनुष्टुभिरु°; in Kap. S. 32, 19 अथानुष्टुब्भिर°. 5) So corrigirt; die Mss. भ्रातृव्यायतनं 6) H u. Bb विष्ण्या 7) Die Mss. भ्रातृव्यायतने 8) H u. Bb यत्पुरं

पवमानस्योपदध्याद्यद्येनं भ्रातृव्यो ऽतीव स्यादेकादश चिष्टुब्भिः[1] पुरस्तान्माध्यंदिनस्य पवमानस्य द्वादश जगतीभिः पुरस्तादार्भवस्य पवमानस्यैता एव पश्चात्पवमानानामुपदध्याद्यद्येनं भ्रातृव्यो ऽतीव स्यात्प्राणो[2] वै पवमानो ऽग्नेस्तेजः पवमानस्तेजसा वा एतद्यजमानो भ्रातृव्यं प्रभूतं प्रणुदते तेजसा प्रतिनुदते तेजसा विनुदते तद्भ्रातृव्यस्य वा एष विनोदो जानुदघ्नं प्रथमं चिन्वानश्चिन्वीत गायत्री-चितं नाभिदघ्नं द्वितीयं चिन्वानश्चिन्वीत चिष्टुप्चितं चुबुकदघ्नं तृतीयं चिन्वानश्चिन्वीत जगच्चित[3] यज्ज्यायाꣳसं चित्वा कनीयाꣳसं चिन्वीत कनीयाꣳस यज्ञक्रतुमुपेयात्कनीयसीं प्रजां कनीयसः पशून्कनीयो ऽन्नाद्यं पापीयान्स्यादथ यत्कनीयाꣳसं चित्वा ज्यायाꣳसं चिनुते ज्यायाꣳसमेव यज्ञक्रतुमुपैति भूयसीं प्रजां भूयसः पशून्भूयो ऽन्नाद्य वसीयान्भवत्येषा वा अग्नेरुत्तरवती नाम चितिरुत्तरमुत्तरꣳ श्वः श्वः श्रेयान्भवति य एवꣳ वेद ॥ २ ॥

Vgl. 2, 8, 11. — TS 5, 3, 8; Kâṭh. 21, 4; Kap. S. 32, 19.

पञ्चचितिकः का३र्यः पाङ्क्तो यज्ञः पाङ्क्ताः पशवस्तस्मात्पञ्चचितिकः पञ्च चितयः पञ्च पुरीषाणि तद्विराज संपद्यते तद्यद्विराज संपद्यते तदग्नेः स्तोत्रं का३र्यꣳ यत्पञ्चचितिकः स्यादियाद्विराजो यदृशचितिक इयाद्यज्ञाच्च पशुभ्यश्च यत्पञ्चचितिकस्तेन यज्ञाच्च पशुभ्यश्च नैत्यथ यत्पञ्च चितयः पञ्च पुरीषाणि तेन विराजो नैति तदुभाभ्यां वावास्मा एतद्वर्णाभ्यां पशूनवरुन्द्धे यदेषां पाङ्क्तꣳ यच्च वैराजं द्व्यक्षरं लोम द्व्यक्षरा त्वग् द्व्यक्षरं माꣳसं द्व्यक्षरमस्थि द्व्यक्षरो मज्जा तद्दश दशाक्षरा विराड्वैराजाः पशवः पशूनेवावरुन्द्धे पञ्च-

1) Die Mss. चिष्टुभिः 2) So H u. Bb; in B प्राणो 3) Die Mss. °चित

चितिकः कार्यः इमे वै लोकास्तिस्रश्चितयो यजमानो द्वे यजमानश् वा एतदेषु लोकेषु प्रतिष्ठापयामकः का प्रथमा चितिः किं पुरीषमित्याहुरियश् वाव प्रथमा चितिरोषधयः पुरीषं का द्वितीया चितिः किं पुरीषमित्याहुरन्तरिक्षश् वाव द्वितीया चितिर्वयाश्सि पुरीषं का तृतीया चितिः किं पुरीषमित्याहुरसौ वाव तृतीया चितिर्नक्षत्राणि पुरीषं का चतुर्थी चितिः किं पुरीषमित्याहुर्यज्ञो वाव चतुर्थी चितिर्दक्षिणा पुरीषं का पञ्चमी चितिः किं पुरीषमित्याहुर्यजमानो वाव पञ्चमी चितिः प्रजा पुरीषमेतावद्वा अस्ति यावदेवास्ति तत्स्पृणोति तदवरुन्द्धे ऽथैता ऋतव्याः सश्वत्सरो वा अग्निर्वैश्वानरः एषा वा अग्नेः प्रिया तनूर्यद्वैश्वानरस्तस्य वा अहोरात्राण्येवेष्टका उपधीयन्ते द्वे द्वे उपदधाति प्रतिष्ठित्या अवकामुपास्य सादयति शान्त्या अनिर्दाहाय चतस्रो मध्यमायां चित्यामुपदधात्यप्रतिष्ठितमिव ३ह्यन्तरिक्षं प्रतिष्ठित्यै द्वादशोपदधाति द्वादश मासाः सश्वत्सरः सश्वत्सरो वा अग्निर्वैश्वानरः एषा वा अग्नेः प्रिया तनूर्यद्वैश्वानरः प्रियायाश् वा एतन्नव्वामग्निश्चीयते सतनूरकौ निधीयते ऽग्नेरन्तःश्ले३षो ऽसीत्येतस्य ह ३त्वेवाग्निः सश्लिष्टो यस्यैता उपधीयन्ते सश्लिष्टो वा एतस्याग्निर्यस्यैता उपधीयन्ते कल्पेतां द्यावापृथिवी इति कल्पते ह वा अस्या अग्निं चिक्यानाय प्र समानानां ज्यैष्ठ्यमाप्नोति य एवश् वेद सश् वा एतदग्निमिन्द्धे यच्चिनोति तं दीपयत्येव ऋतव्याभिः ॥ ३ ॥

Vgl. 2, 8, 12. — TS 5, 4, 2; Kâṭh. 21, 5; Kap. S. 32, 20.

तमो वै स्वर्गं लोकमन्तरा तिष्ठत्येता वै ज्योतिष्मतीरिष्टका यद्धिरण्यशकलैः प्रोक्षति विवासयति वा एतद्यजमानाय ज्योति-

रस्मिन्दधाति सहस्रं भवन्ति साहस्रो[1] वै प्रजापतिः प्रजापतिमेवाप्नोति यावद्वै सहस्रं तावदि३तो ऽसौ लोकः स्वर्गस्य लोकस्य समष्ट्या इमा मे अग्ना इष्टका धेनवः सन्त्विति धेनवो वै नामैता इष्टका एताभिर्वै प्रजापतिर्यद्यदकामयत तत्तदुदुह यद्यदेवैताभिर्यजमानः कामयते तत्तदुह ऋतुष्टाः स्थ ऋतावृधा इत्यृतुष्टा एवैना[2] अकृत ऋतावृधो घृतश्चुतो मधुश्चुता इति घृतश्चुत एवैना अकृत मधुश्चुता ऊर्जस्वतीः पयस्वतीरित्यूर्जस्वतीरेवैना अकृत पयस्वतीः स्वधायिनीः कुलायिनीरिति कुलायिनी३र्ह्येता[3] विराजो नाम कामदुघा इति यत्र वा अदो देवेभ्यः कामदुघाः काममदुह तदेता अपि दुदुहे तत्पुष्टिमैवैताभिरवरुन्द्धे[4] ऽमुचामुष्मिंल्लोक इत्यमुष्मै हि लोकायामिक्षीयते रुद्रꣳ वै देवा यज्ञादन्तरायꣳस्तानायतयाभिपर्यावर्तत तस्माद्वा अबिभयुस्ते[5] देवाः प्रजापतिमेवोपाधावन्स प्रजापतिरेतञ्शतरुद्रियमपश्यत्तेनैनमशमयत्तद्य एवꣳ वेद वेदाह वा एनं प्रजापतिर्नैनमेष देवो हिनस्ति यत्र रुद्रः प्रजाः शमायेत तदुदङ् परेत्येतदेव वदꣳश्चक्रम्येत स्वायाꣳ वा एतद्दिशि स्वेन भागधेयेन रुद्रꣳ शमयति जानुदघ्ने प्रथमं जुहोत्यस्या एवैनं तेन शमयति नाभिदघ्ने द्वितीयमन्तरिक्षात्तेन छुबुकदघ्ने तृतीयं दिवस्तेन चिजुहोति चयो वा इमे लोका एभ्यो वा एतं लोकेभ्यो रुद्रꣳ शमयति चिरमुतः पुनः प्रत्यवहारं जुहोति यानेवैतो रुद्रान्यजति[6] तानमुतो ऽवयजति चिरितो जुहोति चिरमुतस्तत्षट् षड्वा ऋतव ऋतुभ्यो वा एतद्रुद्रमवयजति समावꣳशो विभाजं[7] जुहोति समावद्भाजो[8] हि रुद्राणां भागा ह्रासाहानि जुहो-

1) So corrigirt; die Mss. सहस्रो 2) Die Mss. betonen एवैना 3) Die Mss. ३ह्येता 4) Die Mss. °मेवैताभिरवरुन्धे 5) Die Mss. अबिभयुस् 6) H u. Bb जयति 7) B विभाजं 8) So corrigirt; B समावद्भाजो; H u. Bb समावत् माजो

ति द्वासाहैवैं स तमशमयद् द्वासाहैरेवैन[1] शमयत्यैकपर्णेन जुहोत्यैकेण वा एतदर्कमवयजति यत्पाचेण[2] जुहुयादुदूं प्रजास्वन्ववनयेत्तस्मादारण्येन[3] जुहोति पशुर्वा अग्निः स वै तर्ह्येव जायते यर्हि चीयते स भागधेयमिच्छति यथा वत्सो जातः स्तनमिच्छति सो ऽध्वर्युं च यजमानं च प्रेक्षते यज्ञतरुद्रियं जुहोति स्वेनैवैनं भागधेयेन शमयति यासा उत्तरार्धे जघनार्धे श्रोणिस्तस्या होत३य स्वाया वा एतद्धिशि स्वेन भागधेयेन प्रतिहृत्य रुद्रं शमयत्यङ्गिरसो वै स्वर्यन्तो ऽजायां घर्मं प्रासिञ्चन्सा[5] शोचन्ती पर्णं परामृश३त्सो ऽकौ ऽभवद्यदर्कपर्णेन जुहोत्यर्केण वा एतदर्कमवयजति यं द्विष्यात्तस्य पशूना संचरे न्यस्येद्यः प्रथमं आक्रमति स आर्तिमार्छति ॥ ४ ॥

Vgl. 2, 8, 14. — TS 5, 4, 2 (s. oben) u. 3 (çatarudrîyahomaḥ); Kâṭh. 21, 6; Kap. S. 32, 21.

अश्मन्वूर्जं पर्वते शिश्रियाणामित्यपः परिषिञ्चन्पर्येति प्रजापतेर्वा एष रसः प्रजापतेरेव रसेन परिषिञ्चत्यश्मस्ते क्षुदित्यश्मानमेव क्षुधार्पयति मयि ता ऊर्गित्यात्मन्नेवोर्जं धत्ते यं द्विष्मस्तं ते शुगृच्छत्विति यमेव द्वेष्टि तमग्नेः शुचार्पयति चितिः परिषिञ्चन्पर्येति त्रयो वा इमे लोका एभ्यो वा एतं लोकेभ्यो ऽग्नेः शुच शमयति चितिः परिषिञ्चन्पर्येति चिरपरिषिञ्चस्तत्षट् षड्वा ऋतव ऋतुभ्यो वा एतदग्नेः शुच शमयति यद्यभिचरेदेतदेव यजुर्वदन्नपरिषिञ्चन्पुनः परीयाद्यैवाग्नेः शुक्तयैनमर्पयति[6] यद्यभिचरेत् ॥ इदमहममुष्यामुष्या-

1) Die Mss. तमशमयद्वास° 2) Die Mss. यत्पाचेण 3) So H; in Bb °स्वन्वनये°; B °स्वन्यवभये° 4) So die Mss.; cf. auch 3, 6, 7; 3, 9, 6; 1, 9, 5 a. A.; vgl. TS 5, 4, 3, 2 u. 3. 5) So corrrigirt; H u. Bb प्रासिंचत्; B प्राग्निचत् 6) Die Mss. यैवाग्नेः शुक्तयै°

यणममुष्मात्पुचममुष्या॰ दिशि प्रक्षिणामि ॥ इति कुम्भं जघन्याया॰ श्रोण्यां प्रक्षिणीयाद्यत्प्रक्षिणाति तस्यैवार्तिमन्वार्तिमार्छत्यथ यन्नाम गृह्णात्यायतनमेवास्य छिनत्त्यग्नेयपावमान्यां गायत्रं गायते प्राणो वै पवमानः शिरो गायत्री यदाग्नेयपावमान्यां गायत्रं गायते शीर्षन्वा एतत्प्राणान्दधातीय॰ वै रथन्तरमन्तरिक्ष॰ वामदेव्यमसौ बृहत्त्रिधातुर्वा एतदर्कौ निधीयत आत्मा वै वामदेव्यं प्रतिष्ठा यज्ञायज्ञियं बृहद्रथन्तरे पक्षौ यद्बृहद्रथन्तरे अभितो गायत आत्मन्नेव पक्षौ धत्ते यज्ञ॰ वै देवाना॰ रक्षा॰स्यजिघा॰स॰स्तानि बृहद्रथन्तराभ्यामेवापाघ्नत यद्बृहद्रथन्तरे अभितो गायते रक्षसामपहत्यै प्रजापतेर्हृदयमपिपक्षे गायते तस्मादिदमपिपक्षे आत्मनो हृदयमनृचं गायते तस्मादनस्थक॰ हृदयमꣳ३क्यैः सामभिरर्कं परिष्टुवन्ति सतनूरर्कौ निधीयते ॥ ५ ॥

Vgl. 2, 10, 1. — TS 5, 4, 4 (parishecaṇam, vikarshaṇam); Kâṭh. 21, 7.

वरुणमेनिर्वा एष एतर्ह्यभीड्डस्तिष्ठति स एनं तर्ह्यधीयात्तस्य प्राणेन वीयान्मण्डूकेनाध्येति तस्यैव प्राणेन व्येति न याम्यान्पशून्हिनस्ति नारण्यानवकया विकर्षत्यपा॰ वा एषा योनिर्यदवकापा॰ वा एतद्योनिनाग्नेः स्रुच॰ शमयत्यपा॰ वा एतद्रूप॰ यदवकापा॰ वा एतद्रूपेणाग्नेः स्रुच॰ शमयति वेतसेनाध्येत्यपा॰ वा एतत्पुष्प॰ यद्वेतꣳसो ऽपा॰ वा एतत्पुष्पेणाग्नेः स्रुच॰ शमयति सप्तभिर्विकर्षति सप्त वै छन्दा॰सि छन्दोभिर्वा एतदग्नेः स्रुच॰ शममत्यघो ब्रह्म वै छन्दा॰सि ब्रह्मणा वा एतदग्नेः स्रुच॰ शमयत्यग्निर्वै सृष्टो भागधेयमैच्छत्स प्रजापतिमेवोपाधावत्त-

1) In den Mss. das Verb ohne Accent. 2) B पक्षौ 3) So corrigirt; die Mss. प्रजापतेर्हृदयम॰; cf. TS 5, 3, 4, 2. 4) Die Mss. एतर्ह्यभीधस्; cf. Kâṭh. 21, 7 वरुणमेनिर्वा एष संचितः 5) B वीर्यान् 6) H u. Bb वतसेना॰ 7) B यद्वेतꣳसो

स्मा अन्नं प्रायच्छत्कंत्वाय तदस्मै कमभवद्यद्वै कमन्नेन वा एतदग्निमुपचरति कंत्वाय कꣳ हास्मा अग्निं चिक्यानाय भवति पराञ्चमध्येति पराङ् हि पशुः शान्तरथो[1] पराङ् हि पशुः रेतो दधात्यन्याꣳस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भवेत्यन्नꣳ वै पावकमन्नेन वा एतदग्नेः शुचमन्तर्धत्ते हिरण्यशकलैर्व्याघारयत्यमृतꣳ वै हिरण्यं तेजो ऽग्निरमृतेन वा एतत्तेजो व्याघारयति पञ्चभिर्व्याघारयति पाङ्क्तो यज्ञो यावानेव यज्ञस्तमालब्ध्वा वै देवा यजमानस्य गृहमागच्छन्ति यद्घृतं मधुसꣳसृष्टेन व्यवोक्षति तानेव प्रीणाति सर्वमनु व्यवोक्षति सर्वानेवैनान्प्रीणाति तिसृभिर्व्यवोक्षति त्रिवृ३द्यज्ञस्त्रिष्टुब्भिर्व्यवोक्षतीन्द्रियस्यावरुद्ध्या[2] अन्नवतीभिर्व्यवोक्षत्यन्नाद्यस्यावरुद्ध्यै दर्भगुरुमुष्टिना व्यवोक्षति सꣳ हि प्राजापत्यः प्राणैर्वा एष व्यृध्यते ३यो ऽग्निमध्येति यदाह प्राणदा अपानदा इति प्राणानेवात्मन्धत्ते प्रजया च वा एष पशुभिश्च व्यृध्यते ३यो ऽग्निमध्येति प्रजां वै वचः पशवो वरिवो यदाह वर्चोधा[3] वरिवोधा इति प्रजां चैव पशूꣳश्चात्मन्धित्वावरोहति ॥ ६ ॥

Vgl. 2, 10, 1. — TS 5, 4, 4 (parishecaṇaṃ, vikarshaṇaṃ) u. 5 (vyâghâraṇaṃ vâiçvakarmaṇâhutiç ca); Kâṭh. 21, 7.

इन्द्रो वै वृत्रमहन्त्स प्राङ्पद्यत स पद्यमाना इन्द्रꣳ षोडशभिर्भोगैः पर्यगृह्णात्स वा अग्निनैव वृत्रस्य भोगानपिदध्य वैश्वकर्मणाभ्यां पाप्मनस्तमसो निरमुच्यतायस्तिग्मेन शोचिषेति यज्जुहोत्यग्निना वा एतत्पाप्मनो भोगानपिदध्य वैश्वकर्मणाभ्यां पाप्मनस्तमसो निर्मुच्यते नाना जुहोति सूक्तयोर्नानावीर्यत्वाय षोडशगृहीतेन जुहोति

1) Die Mss. शान्तरथो 2) In den Mss. fehlt die ३; auch schreiben die Mss. चिष्टुभि° 3) H u. Bb वर्चोदा; desgl. Kâṭh. 21, 7.

षोडशभिर्हि स तं भोगैः पर्यगृह्णादेतेन वै स वृचस्य भोगेभ्यो निरमुच्यत तत्पापमन एवैतेन भोगेभ्यो निर्मुच्यते ऽथैतदप्रतिरथमेतेन वै देवा असुरान्प्रत्यूजयꣳस्तदप्रतिरथस्याप्रतिरथत्वं तदप्र३त्येवैतेन यजमानो भ्रातृव्यं जयत्येतेनैव याजयेत्संयामे जयति[1] संयाममेतेनैव याजयेद्भ्रातृव्यवन्तꣳ यो वास्य प्रियः स्यात्तं भवत्यात्मना परास्य भ्रातृव्यो भवत्येतेन वै भरद्वाजः प्रतर्दनं दैवोदासिꣳ समनह्यत्स राष्ट्रमभवद्यं कामयेत राष्ट्रियमयꣳ राष्ट्रꣳ स्यादिति तमेतेन सन्नह्येद्राष्ट्रꣳ ह भवत्येतेन वै देवा विराजमभ्यूजयन्दशान्वाह[2] दशाक्षरा विराड् विराजमेवैतेनाभिजयति दक्षिणतो वै देवानाꣳ यज्ञꣳ रक्षाꣳस्यजिघाꣳसꣳस्तानि वा अप्रतिरथेनैवापाघ्नत यद्ब्रह्माप्रतिरथं दक्षिणतो वदन्नेति[3] रक्षसामपहत्यै ॥ ७ ॥

Vgl. 2, 10, 2 u. 3. — TS 5, 4, 5 (vyâghâraṇam vâiçvakarmaṇâhutiç ca); Kâṭh. 21, 8.

उदेनमुत्तरं नयेति समिधा आदधाति प्रह्रियमाणायैवास्मै भागमकस्तित्त आदधाति चिवृ३द्यग्निरुदु[4] त्वा विश्वे देवा इति विश्वे ३हीदं देवाः स्मो यन्मनु३षा अग्ने भरन्त[5] चित्तिभिरिति यस्मा एवं चित्तायाग्निराधीयते तेनैनं चित्तेन समर्धयति पञ्च दिशो दैवीर्यज्ञमवन्तु[6] देवीरितीमा एवैनं पञ्च दिशो ऽनु तेजस्विनं करोत्युत्थपवा ईड्यो गृभीत इत्युत्थपवो ३हेष परिगृह्य यज्ञमायन्निति परिगृह्य ३हेतꣳ यन्ति हरिकेशः सूर्यरश्मिः पुरस्तादित्यसौ वा आदित्यो हरिकेशः सूर्यरश्मिः पुरस्तात्सविता ज्योतिरुदयꣳ अजस्रमित्याह प्रसूत्या

1) H u. Bb betonen जयति (so also die einzigen betonten Mss.). 2) B वैराजमꣳ; auch betonen die Mss. दशान्वाह 3) So B (ohne Accent); in H वदन्नेति; Bb वदन्नेति 4) Die ३ fehlt in den Mss. 5) H u. Bb भरंत; B भरंतु; cf. 2, 7, 10 u. 3, 2, 2. 6) B देवीर्यꣳ; vgl. aber auch 2, 10, 5. a. A.

एवं तस्य पूषा प्रसवे याति विद्वानिति पशवो वै पूषा पशूनेवावरुन्द्धे ततो वाका आशिषो नो जुषन्तामित्याशिषा वा एष दोह आशिष एव दुहा इन्द्र विश्वा अवीवृधन्निति वृधद्वत्या यन्ति वृद्धिमेवोपयन्त्यनुष्टुभा यन्ति वाग्वा अनुष्टुब्वैश्वदेवी वाग्वैश्वदेवो ऽग्निस्तस्मादनुष्टुभा यन्ति षड्भिराग्नीध्राद्यन्ति षड्वा ऋतव ऋतुभिरेव यन्ति विमान एष दिवो मध्य आस्ता इत्यश्मान सादयति विमानो ह्यसा आदित्यः स्वर्गस्य लोकस्य सुम्नहूर्यज्ञ आ च वक्षद्यक्षदग्निर्देवो देव आ च वक्षदित्याशीरेवैषा देवहूर्यज्ञ आ च वक्षद्यक्षदग्निर्देवो देव आ च वक्षदित्याशिष एवैष परिग्रहो वाजस्य मा प्रसवेनोद्नाभेणोदजिग्यभदित्यसौ वा आदित्य उद्नाभ एष नियाभ उद्यन्वा एतद्यजमानमुद्गृह्णाति निम्रोचन्नस्य भ्रातृव्यं निगृह्णात्युद्नाभश्च नियाभश्चेति ब्रह्म वा उद्नाभो ब्रह्म नियाभो ब्रह्मणा वा एतद्यजमानमुद्गृह्णाति ब्रह्मणास्य भ्रातृव्यं निगृह्णात्यथा सपत्नानिन्द्राग्नी मे विषूचीनान्व्यस्यतामित्योजो वै वीर्यमिन्द्राग्नी ओजसा वा एतद्वीर्येण यजमानो भ्रातृव्य विष्वञ्च विनुदते चतुर्भिराहवनीयाद्यन्ति चत्वारि वै छन्दाꣳसि छन्दोभिरेव यन्त्यथो ब्रह्म वै छन्दाꣳसि ब्रह्मणैव यन्ति ॥ ८ ॥

Vgl. 2, 10, 4 u. 5. — TS 5, 4, 6 (samidâdhânam agnipraṇayanam tathâ | hotâṇvâhâpratiratham daçarcam savikalpakam); Kâṭh. 21, 8.

क्रमध्वमग्निना नाकमित्याह स्वर्गस्य लोकस्य समष्ट्यै दिवः पृष्ठꣳ स्वर्गत्वेति पृष्ठेन हि यन्त्यूर्जं नो धेहि द्विपदे चतुष्पदा इति द्विपात्सु चैव चतुष्पात्सु च पशुषूर्जं दधातीयक्षमाणा भृगुभिः सहेति भृ-

1) Die Mss. आ च चक्षत्; vgl. aber das Folgende, sowie 2, 10, 5. 2) Die Mss. schreiben वक्षत् ॥ इत्याशीरेवैषा ॥; vgl. aber das Folgende. 3) Die Mss. वक्षत् इत्य°

गवो ह्यग्ने यज्ञेनाध्रुवन्नृद्ध्यै पृथिव्या अहमुदन्तरिक्षमारुहमन्तरिक्षा-
द्दिवमारुहमित्येषा वा एष लोकाना समारोहः पञ्चभिराक्रमते
पाङ्क्तो यज्ञो यज्ञेन वा एतद्यज्ञमभ्यारोहत्यप्रतिनोदाय कृष्णायाः श्वे-
तवत्सायाः पयसा जुहोत्यहर्वै वत्सो रात्रिर्मातोह्ने वा एतद्रात्रीं
प्रदापयति प्रत्ते ह वा अहोरात्रे दुहे य एवं वेद सर्वे वै पशवो
नानारूपाः सन्तः पय एव प्रत्येकरूपा यदेव प्रत्येकरूपास्तदेनान्प्रत्य-
वरुन्द्धे नक्तोषासामे सहसाक्ष सुपर्णोऽसि गरुत्मान्पृष्ठे पृथिव्याः
सीदेत्येषु वा एतं लोकेषु ज्योतिष्मन्तमग्निं निधत्तेऽथो प्राणाना
विधृत्यै द्वाभ्या सादयति द्विपाद्यजमानः प्रतिष्ठित्या आजुह्वानः
सुप्रतीकः पुरस्तादित्याह स्वर्गस्य लोकस्य समष्ट्यै ता सवितुर्वरे-
ण्यस्य चित्रामि३त्येतं वै कण्वः श्रावय३सो ऽग्नेर्दोह विदांचकारा-
ग्नेर्वा एष दोहो ऽग्निं वा एतेनाग्निचिद्दुहे सर्वान्ह वा अस्मा अग्नि-
र्दोहान्सर्वान्कामान्दुहे य एवं वेद विधेम ते परमे जन्मन्नग्न
इत्याह ऋद्ध्या एवैनं प्रेद्धो अग्ने दीदिहि पुरो ना इत्येषा वै कर्णकवती
सूर्म्यजस्रं ज्योतिरजस्रं वावास्मा एतज्ज्योतिरप्यधादेता वै वा-
सिष्ठः सात्यहव्यः सत्त्रेण आसीनान्पप्रच्छ विद कर्णकवतीं सूर्मी-
मिति विद्मेति होतुर्या वनेषु ता विद्मेति पशवो वा एतस्याः
कर्णाः पशुमान्भवत्येता वै वज्रं शतघ्नीं विघ्नीं देवा असुरेभ्य
उपप्रावर्तयंस्तेषा शततर्हमहꣳहस्तदेतामेव वज्रं शतघ्नीं विघ्नीं
यजमानो भ्रातृव्यायोपप्रावर्तयति शततर्हꣳ ह हꣳहत्यग्ने तमद्येति
पङ्क्त्या जुहोति यजमानो वै पङ्क्तिर्यजमानं वा एतद्विराजि प्रति-
ष्ठापयामकरयो पङ्क्त्यै वाहुत्या यज्ञमालभते सप्त ते अग्ने समिधः

1) Die Mss. अग्निर्दोहान्सर्वान् 2) So B (ohne Accent); in H u. Bb कर्णवती

सप्त जिह्वा इत्येतावतीर्वा अग्नेस्तन्वः षोढा सप्त सप्त यो वा अस्यैता अग्निं चिक्यानो वितर्षयति वि ह तृषति ता एवास्य तर्पयति चितिं जुहोमि मनसेत्येषा वा अग्नेरदाभ्याहुतिर्वैश्वकर्मणी नैनं भ्रातृव्यो दभ्नोत्यग्निं चिक्यानं प्र समानानां ज्यैष्ठ्यमाप्नोति य एवं वेदाग्निर्वा अमन्यत न वा अहमिदमभागधेयस्तेजो यꣳस्यामीति तदेतेन भागधेयेनायछदेतेडा अग्निरग्निहोत्रमग्निꣳ वा एतेनाग्निचिद्यछति सर्वान्ह वा अस्मा अग्निर्दोहान्सर्वान्कामान्दुहे य एवं वेद सꣳ वा एतदग्निमिन्धे यच्चिनोति तं दीपयत्येवाग्निरग्निहोत्रेण ॥ ९ ॥

Vgl. 2, 10, 6. — TS 5, 4, 7 (citim âruhya vahnim tatra vinikshipet); Kâth. 21, 9.

अथै३षो ऽग्नये वैश्वानराय द्वादशकपालः सꣳवत्सरो वा अग्निर्वैश्वानरः सꣳवत्सरमेव प्रीणात्यथो प्राहृतायैवास्मै[1] भागमकराहुतीनाꣳ वै प्रतिष्ठित्या यजमानः प्रतितिष्ठत्याहुतीनामप्रतिष्ठित्या न प्रतितिष्ठति यदेतं जुहोत्याहुतीनां प्रतिष्ठित्यै ताः प्रतितिष्ठन्तीर्यज्ञो ऽनुप्रतितिष्ठति यज्ञꣳ यजमानो[2] ऽथो कामो वै वैश्वानरो यत्कामो भवति सꣳ हास्मै स कामो नमति यत्प्राङ् पर्यावर्तेत दैवीर्विशो मुह्येयुर्यदृक्षिणा यमदेवत्या स्याद्यत्प्रत्यङ्[3] सौ३म्यो यदुदङ् रौद्रं ऋजु होत३व्यः प्रतिष्ठित्यै सर्वहुतं करोति प्रतिष्ठित्यै क्षत्रꣳ वै वैश्वानरो विण्मारुता यदेतꣳ हुत्वा मारुतान्जुहोति विशꣳ वा एतत्क्षत्राय नियुनक्त्यथो विशमेव क्षत्रायानुकां करोत्यग्निमुखान्वै प्रजापतिः पशूनसृजत पशवो मारुता यदेतꣳ हुत्वा मारुतान्जुहोत्यग्निमुखाने-

1) So schreibe ich; die Mss. schwanken; H u. Bb प्राहृताय वास्मै; B प्राहृतायैवादेये 2) So corrigirt; die Mss. यजमानो थो 3) Hier scheint B eine kleine Lücke anzudeuten durch Freilassung eines Zwischenraumes, wo mehrere Silben Platz hätten. 4) So meine Correctur; die Mss. सू३र्यो

वास्मै प्रजापतिः पशून्प्रजनयति सप्तकपाला भवन्ति सप्त सप्त मारुता गणास्तस्मात्सप्तकपाला गणेन गणेन जुहोति गणश[1] एव मरुतः प्रीणाति यो ऽरण्येऽनुवाक्यो गणस्तन्मध्यतो जुहुयात्क्षत्रं वा एष मरुतां विड्डितरे विशो वा एतत्क्षत्रं मध्यमेष्ठं करोति यदि कामयेत विशा क्षत्रं हन्यामिति यो ऽरण्येऽनुवाक्यो गणस्तमितरैर्गणैर्मोहयेद्विशा वा एतत्क्षत्रं हन्ति यदि कामयेत क्षत्रेण विशं हन्यामिति यो ऽरण्येऽनुवाक्यो गणस्तेनेतरान्गणान्मोहयेत्क्षत्रेण[2] वा एतद्विशं हन्ति तस्य चिष्टुभौ याज्यानुवाक्ये स्यातामोजो वै वीर्यं चिष्टुबोजो वा एतद्वीर्यं विशं आदाय क्षत्रायापिदधाति यदि कामयेत क्षत्रेणास्य क्षत्रं हन्यां[3] प्र स्वादायतनाच्च्यवेतेति[4] यो ऽरण्येऽनुवाक्यो गणस्तेनाग्निष्टं रथवाहनं व्यूहयेत्क्षत्रं वा एष मरुतामग्निष्टं रथवाहनं क्षत्रियस्य क्षत्रं बिभर्ति क्षत्रेणैवास्य क्षत्रं हन्ति प्र स्वादायतनाच्च्यवता इन्द्रं दैवीर्विशो मरुतो ऽनुवर्त्माना इत्येतद्वै देवानामनुवर्त्म दैवीं च वावास्मा एतद्विशं मानुषीं चानुवर्त्मानौ करोति सं वा एतदग्निमिन्द्धे यच्चिनोति तं दीपयत्येव मारुतैः ॥ १० ॥

Vgl. Kâṭh. 21, 10.

॥ इत्युपरिकाण्डे[5] स्तोमभागो नाम तृतीयः प्रपाठकः ॥

---

1) So corrigirt; die Mss. गणेश 2) Die Mss. तेनेतरान् 3) Die Mss. हन्या
4) Die Mss. स्वादायतनाच्य 5) Das इति fehlt in den Mss.

वसोर्धारां जुहोत्यकॢप्तस्य कॢप्त्या अशान्तस्य शान्त्या अनभिजितस्याभिजित्या अनवरुद्धस्यावरुद्ध्यै संततं जुहोति प्राणाना॰ संतत्या एषां लोकाना॰ संतत्या अन्नाद्यस्य संतत्या अविछिन्नं जुहोत्यन्नाद्यस्याविछेदाय यद्विछिन्द्यात्प्राणान्विछिन्द्याद्यं द्विष्यात्तस्य विछिन्द्यादेन्नाद्यमस्य विछिनत्त्यक्षुच्चान्नं चेत्येतानि वा अन्नस्य रूपाणि रूपैरेवान्नमवरुन्द्धे ऽग्निश्चापश्चेत्येषा वा अन्नस्य योनिः सयोन्येवान्नमवरुन्द्धे वसोर्मे धारासदिति वसोर्धारां जुहोति घृतस्य वा एषा धारा यजमानममुष्मिंल्लोक उपतिष्ठन्ते द्वादश द्वादशाति जुहोति द्वादश मासाः सं॰वत्सरः सं॰वत्सरमेवावरुन्द्धे ऽर्धेन्द्राणि जुहोत्यर्धेन्द्रैर्वै देवा इन्द्रिय॰ वी३र्यमसुराणामवृञ्जतेन्द्रियमेवैतैर्वी३र्य॰ यजमानो भ्रातृव्यस्य वृङ्क्ते देवाश्च वा असुराश्चास्पर्धन्त ते देवा इन्द्रमब्रुव॰स्त्वया मुखेनेमान्जयामेति सो ऽब्रवीद्वागो मे ऽस्त्विति वृणीष्वेत्यब्रुवन्सो ऽब्रवीद॰३र्ध्यो वा अहं[1] देवतानामसानीति ततो वा अजय॰स्तस्मादेषो ऽर्धभाग्देवताना॰[2] यदर्धेन्द्राणि हूयन्ते विजित्या इन्द्रोत्तमानि भवन्तीन्द्रिय॰ वै वी३र्यमिन्द्र इन्द्रिये वा एतद्वीर्ये ततो यज्ञस्य यजमानः प्रतितिष्ठत्य॰ष्णुश्च रश्मिश्चेति यज्ञमुख॰ वा अ॰ष्णुश्च रश्मिश्च यज्ञमुखमेवावरुन्द्धे ऽधिपतिश्चादाभ्यश्चेति नैनं भ्रातृव्यो दभ्नोत्यग्निं चिक्यानं प्र समानानां ज्यैष्ठ्यमाप्नोति य एव॰ वेदैते ग्रहा भवन्त्येतानि वै यज्ञस्य रूपाणि रूपैरेव यज्ञमवरुन्द्धे स्रुचश्च चमसाश्चेति यज्ञायुधानि संभरति यज्ञायुधान्येव संभृत्य यज्ञं प्रयुङ्क्ते

---

1) So meine Vermuthung; H u. Bb °द्३र्ध्वो वाहं; B °द्३र्द्धे वाहं; cf. TS 5, 4, 8, 3 यत्सर्वेषामर्धमिन्द्रः प्रति तस्मादिन्द्रो देवतानां भूयिष्ठभाक्तमः; Kâṭh. 21, 11 यदर्धेन्द्राणि जुहोति तस्मादिन्द्रो देवतानां भूयिष्ठभाक् 2) So corrigirt; die Mss. °देषो र्ऽभाग्

पाचाणि जुहोति पाचैवैनं अन्नमद्यते ऽनुरूपणवान्नाद्यमवरुन्द्वे बर्हिश्च वेदिश्चेत्याशीरेवैषावभृथश्च स्वगाकारश्चेति प्रतिष्ठित्यै ॥ १ ॥

Vgl. 2, 11, 5. — TS 5, 4, 8 (vasor dhârâ); Kâṭh. 21, 11.

अग्निश्च घर्मश्चेत्येतद्वा अग्नेर्ब्रह्मवर्चस्यं[1] रूचं चैवैतेन ब्रह्मवर्चसं चावरुन्द्वे तेजस्वी ब्रह्मवर्चसी भवत्यृतुश्च व्रतं चेत्यहोरात्रे वा ऋतुश्च व्रतं चाहोरात्रे एवास्यैतेनाभीष्टे प्रीते भवता एका च तिस्रश्चेति देवछन्दस्यं वा एका च तिस्रश्च देवछन्दसमेवावरुन्द्वे चतस्रश्चाष्टौ चेति मनुष्यछन्दस्यं वै चतस्रश्चाष्टौ च मनुष्यछन्दसमेवावरुन्द्वे देवलोक एव देवछन्दसेन ऋध्नोति मनुष्यलोके मनुष्यछन्दसेनैका च तिस्रश्च चतस्रश्चाष्टौ चेति रोहो वा एष एषां लोकानां संक्रान्तिः[2] स्वर्गस्य लोकस्य द्युत्तरेण वै स्तोमेनादित्याः स्वर्गं लोकमायंश्चतुरुत्तरेणाङ्गिरसो यदेतौ स्तोमौ जुहोति स्वर्गस्य लोकस्य समष्ट्यै युग्मदयुजौ वा एतौ स्तोमौ मिथुनौ प्रजननाय रेत एव द्युत्तरेण दधाति रेतो हितं चतुरुत्तरेण प्रजनयत्येका च तिस्रश्चेत्या चयस्त्रिंशतस्त्रयस्त्रिंशद्देवतास्ता एवास्यैतेनाभीष्टाः प्रीता भवन्ति चतस्रश्चाष्टौ चेत्यष्टाचत्वारिंशतो ऽष्टाचत्वारिंशदक्षरा जगती जागताः पशवः पशूनेवावरुन्द्वे अविश्च अवी चेत्येतानि वै वयांसि पशूनां पशव एव पशूनवरुन्द्वा आयुर्यज्ञेन कल्पते प्राणो यज्ञेन कल्पता इति यज्ञस्य वा एषा कॢप्तिर्यज्ञमेवैतदचीकॢपद्वाजाय स्वाहा प्रसवाय स्वाहेति चयोदश वा एता आहुतयस्त्रयोदश मासाः संवत्सरः संवत्सरं वावासा एतदुपदधाति स्वर्गे लोके तस्मिन्नेव प्रतितिष्ठति स्तोमश्च यजुश्चेत्यन्नं वै स्तोमश्च यजुश्चान्नं वा एतदात्मन्धित्वान्नादो

1) So corrigirt; die Mss. अग्नेर्ब्र॰ 2) So corrigirt; die Mss. संक्रांतिः

भूत्वा देवक्षेत्रमन्ततः प्रावसत्यग्निर्वै वसुस्तस्य वा एषा धारा सर्वान्ह वा अस्मा अग्निर्दोहान्त्सर्वान्कामान्दुहे य एवꣳ वेद सꣳ वा एतदग्निरन्नाद्यमिन्द्रे यच्चिनोति तं दीपयत्येव वसोर्धारया ॥ २ ॥

Vgl. 2, 11, 6. — TS 5, 4, 8 (vasor dhârâ); Kâṭh. 21, 11.

वाजप्रसव्यं जुहोति वाजꣳ वा एतेनाग्निरन्नाद्यमुदजयद्वाजमेवैतेनान्नाद्यꣳ यजमाना उज्जयत्यन्नस्यान्नस्य जुहोति वाजप्रसव्याभिरन्नꣳ वै वाजोऽन्नाद्यस्यावरुद्ध्या उभयं ग्राम्यं चारण्यं च जुहोत्युभयस्यान्नाद्यस्यावरुद्ध्या औदुम्बरेण स्रुवेण जुहोत्यूर्ग्वा उदुम्बर ऊर्जोऽवरुद्ध्यै देवस्य त्वा सवितुः प्रस३वेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्या वाचा यन्तुर्यन्त्रेण बृहस्पतिꣳ साम्राज्यायाभिषिञ्चामीत्यभिषिञ्चेद्यदि ब्राह्मणो यजेत बृहस्पतिसवो ३ह्येष इन्द्रꣳ साम्राज्यायाभिषिञ्चामीत्यभिषिञ्चेद्यदि राज३न्यो यजेतेन्द्रसवो ३ह्येष कृष्णाजिने ब्रह्मवर्चसकाममभिषिञ्चेद्ब्राह्मणो वा एतद्दक्सामयो रूपमृक्सामे ब्रह्मवर्चसं ब्रह्मवर्चसमेवावरुन्द्धे बस्ताजिने पशुकामं पशवो वै बस्ताजिनं पशूनेवावरुन्द्धे सूयते वा एषोऽमीनाꣳ यश्चीयते स्वेनैवैनꣳ सवेन समर्धयति देवा ओषधीषु पक्वास्वाजीमयुस्ता अग्निरुदजयदग्नेर्वा एषोऽभिषेकोऽन्नस्य वा एतत्सूयते सवानाꣳ वा एष एको बृहस्पतिसवो वा एष बार्हस्पत्यो ब्राह्मणो देवतया स्वेनैव सवेन सूयते तदाहुर्होतव्यमेव न हि सुषुवाणः कं चन प्रत्यवरोहतीति सुषुवाणो वा एष देवतया यो ऽग्निचिद्दतवो वै सुषुवाणस्य

1) So H u. Bb; in B °मेधे 2) In den Mss. das Verb ohne Accent. 3) In den Mss. das Verb ohne Accent. 2) So H, desgl. B (ohne Accent); in Bb °स्वाजिम°; vgl. aber 2, 1, 11. 5) न हि in den Mss. ohne Accent. 6) In den Mss. कं ohne Accent. 7) So wohl zu schreiben; die Mss. schwanken; Bb प्रत्यवरोहतीति; H प्रत्यवरोहतीति

राष्ट्रमनुबिभ्रति ष॒ड्वा ऋ॒तव॑ ऋ॒तवो॑ राष्ट्रभृतो॑ यत्ष॒ड्भिर्जु॒होत्यृ॒तुष्वे॒वास्य राष्ट्रं॑ प्रतिष्ठापयति॑ तू॒ ऽस्मै राष्ट्रमनुबिभ्रति॑ द्वादशगृहीतेन॑ जुहोति॑ द्वादश॑ मा॒साः स॑ंवत्स॒रः॑ स॑ंवत्स॒रमे॒वाप्नो॒वरु॑न्धे॑ मिथुना॑ वा॑ एता॑ आहुतय॒स्ता॒सु स्वाहा॑ वट्॒[2] ता॑भ्यः स्वाहा॑ वडिति॒[3] ता॑सि॒ 5 न्ने॒वं मिथुने॑ रे॒तो द॑धाति॑ रथशी॒र्षे॒[4] स॒प्तमं॑ जुहोति॑ दि॒शाम॑भिजि॒त्यै॑ दिश॒ एवा॑भिजिता॑ रथेन॑ जीयन्ते॒[5] ऽथै॒ते वात॑होमा॑ अ॒ग्निचि॑तो॒ वा अ॒मुष्या॒हो॒रात्रे॑ अ॒ग्निचि॑ते ऽय॑ꣳ वा॒युः प॑वते॑ प्रा॒णो वै॑ वा॒युः॑ प्रा॒ णमे॒वाव॑रुन्धे॑ ऽञ्जलि॑ना जुहोति॑ न॒ ३ ह्ये॒तस्या॒वदा॑नमस्त्य॒थो प॑रिगृ॒ हीत्या॒ एव॑ प्रा॒णो वै॑ वा॒यु॒र्ह॒स्तः प्रा॒णायो॑पकॢ॒प्तम॑स्त॒स्मादञ्ज॑लिना 10 जुहोति॑ चि॒र्जु॒होति॒[6] च॒यो वा इमे लो॒का॑ इ॒म एवा॑स्मै लो॒का वा॑तं धुन्वन्ति॑ स॒मु॒द्रो ऽसि॑ नभस्वा॒नार्द्रदा॑नु॒रित्ये॒तानि॑ वै वा॒यो रू॒पाणि॑ रू॒पैरे॒व वा॒युम॒वरु॑न्धे॑ मारु॒तो ऽसि॑ म॒रु॒तां ग॒ण इति॑ मारु॒तो॑ हि वा॒युः॑ स॑ꣳ वा॑[7] एत॒द॒ग्निम॑िन्धे॒ यच्चि॑नोति॑ तं दी॒पय॑त्येव वात॒ होमैः॑ ॥ ३ ॥

Vgl. 2, 12, 1—3. — TS 5, 4, 9 (vâjaprasavîyaḥ); Kâṭh. 21, 12.

15 प्रा॒णो वै गा॑य॒त्री॑ गाय॒त्यै॑ꣳ ह॒वि॒र्धा॒न॒मु॒पा॒नो॒ जग॑ती॑ जाग॒त॑ꣳ स॒दो॑ ब्रा॒ न॒स्त्रि॒ष्टुप्॑ चै॒ष्टु॒भमा॑ग्नी॒ध्र॒मꣳसुः॑ पृ॒श्नि॒र्म॒ध्ये दि॒व्यो॑ नि॒हि॒तः॑ पृ॒श्नि॒र॒श्मेत्य॒मु॑ꣳ वा॒वास्यै॒त॒न्म॒ध्यतः॑ प्रा॒णापा॑नानाꣳ व्यव॒दधा॑ति प्रा॒णाना॑ं धृ॒त्या॑ अश्मन॒ वमा॒[8] आ॑ग्नी॒ध्रे॒[9] सा॒द॒य॒ति॑ न॒व वै॑ प्रा॒णाः॑ प्रा॒णान्वा॒वास्यै॒त॒द्य॒ज॒मा॒न॒लो॒के॑ दधात्ये॒क॒वि॒ꣳ॒श॒ति॒ꣳ होत्रि॑ये प्रतिष्ठि॒त्यै॑ प्रति॒ष्ठा ह्ये॑क॒वि॒ꣳ॒शः॑ एकादश

1) Die Mss. द्वादशगृहीतेन 2) H u. Bb वट् 3) H u. Bb वडिति 4) H. रथ-शीर्षे; Bb रथशीर्षे 5) So corrigirt; die Mss. रथेनेजियते 6) Diese beiden Worte fehlen in H u. Bb. 7) Diese beiden Worte in den Mss. ohne Accent. 8) So B (ohne Accent); H u. Bb अश्मनमा; cf. aber das Folgende. 9) H u. Bb आग्नीध्रे

ब्राह्मणाꣳश्ꣳस्या[1] एकादशाक्षरा त्रिष्टुब्वैीर्यं त्रिष्टुब्वैीर्य एव प्रतितिष्ठत्यष्टाष्टा[2] इतरेष्वेष्टाक्षरा गायत्री ब्रह्म गायत्री ब्रह्मण्येव प्रतितिष्ठति षण्माजालीये षड्वा ऋतव ऋतवो वा एतं दक्षिणतः पर्यहरन्त[3] पितरो वा ऋतवो ऽथो षड्वै छन्दाꣳसि छन्दाꣳसि वावास्यैतद्यज्ञमुखे युनक्ति सजूरृष्टो आयवोभिरित्येता वा अग्नेर्देवताः पुरस्ताद्भागास्ता एव प्रीणात्यथो अत्र वै देवानां प्रियास्तꣳअन्वस्ता एवावरुन्द्धे सजूरृष्टो आयवोभिरिति सꣳवत्सरो वा अर्ह्[4] ऋतवा आयवानः सꣳवत्सर एवास्यैतेना[5] ऋतवो ऽभीष्टाः प्रीता भवन्ति सजूरुषा आरुणीभिरित्युषसमेव प्रीणाति सजोषा अश्विना दꣳसोभिरित्यहोरात्रे वा अश्विनाहोरात्रे[6] एवास्यैतेनाभीष्टे प्रीते भवतः सजूः सूरा एतशेनेति सूर्यमेव प्रीणाति सजूर्वैश्वानरं इडया घृतेन स्वाहेति सꣳवत्सरो वै वैश्वानरः पशवा इडा पशवो घृतꣳ सꣳवत्सरा एवास्यैतेन पशवो ऽभीष्टाः प्रीता भवन्ति दर्भस्तबे जुहोत्येषा वा अस्यामृतचित्तनूरमृते वा एतदग्निश्चीयते हिरण्यं निधाय जुहोत्यग्निमत्येव जुहोत्यायतनवत्यन्धो ऽध्वर्युः स्याद्यदनायतने जुहुयात्स्वर्गाय वै लोकाय देवरथो युज्यते कामाय मनुषरꣳथो ऽग्निꣳ युनज्मि शवसा घृतेनेत्यग्निꣳ वा एतद्युनक्ति तेन युक्तेन स्वर्गं लोकं गछति यत्सर्वाभिर्युञ्ज्याद्युक्तो ऽस्य यज्ञः स्यादप्रतिष्ठिता आहुतयो द्वाभ्यां नापियुनक्त्याहुतीनां प्रतिष्ठित्यै ताः प्रतितिष्ठन्तीर्यज्ञो ऽनुप्रतितिष्ठति यज्ञꣳ यजमानस्तिसृभिर्युनक्ति त्रिवृꣳद्यज्ञो यावानेवाग्निस्तꣳ[7]

1) Die Mss. ब्राह्मणाः शꣳस्याः; Kâṭh. 21, 12 ब्रह्मणाꣳक्ꣳस्य 2) So die Mss., nur schieben sie einen Avagraha ein °त्यष्टा ऽष्टा; ebenso ist zu schreiben 1, 11, 10; cf. 2, 8, 1 अश्विनाध्वर्यू 3) Die Mss. पर्यहरंतः 4) In den Mss. अर्ह् ohne Accent. 5) So die Mss.; vgl. Bd. I, p. 71 Anm. 5 u. p. 110 Anm. 4. 6) So corrigirt; die Mss. °होरात्रे 7) In den Mss. fehlt die ३

युनक्ति तस्मिन्युक्ते सर्वꣳ हव्यꣳ समाधीयते पञ्चभिर्युनक्ति पाङ्क्तो यज्ञो यावानेव यज्ञस्तमालब्ध्वꣳ सꣳ वा एतमेतौ तपतो यश्चीयो यश्च वैश्वानरो यदप्सुमतीभ्यां पुरस्ताद्यज्ञायज्ञियस्य संमृशति शान्त्या एषा वै यज्ञस्य मात्रा यदग्निष्टोमो भूम ३त्वेवास्यात[1] ऊर्ध्व क्रियते ॥ ४ ॥

Vgl. 2, 12, 3. — TS 5, 4, 10 (vahniyogaç ca, punaççitiḥ); Kâṭh. 21, 12 u. 22, 1.

यो वा अग्निꣳ योगा आगते न युङ्क्ते न युञ्जानेषु युङ्क्तेऽग्ने युक्ष्वा हि येतवेत्यग्निꣳ[2] वा एतद्योगा आगते युङ्क्ते युङ्क्ते युञ्जानेषु यो वा अग्निꣳ विमोक आगते न विमुञ्चते न विमुञ्चमानेषु विमुञ्चते वि ते मुञ्चामि रशनाꣳ वि रश्मीनित्यग्निꣳ वा एतद्विमोक आगते विमुञ्चते वि मुञ्चमानेषु मुञ्चते यथा वै पुनराधेयमेवं पुनश्चितिर्यो वा आधेयेन ऋध्नोति पुनः स आधत्ते ३यो ऽग्निं चिक्यानो मन्येत वि स्या ऋध्यता इति स एतां पुनश्चितिमुपदधीतापि प्रथमं चिन्वानश्चिन्वीता[4] ऋद्ध्या ऋध्नोत्येवाथो मिथुनत्वाय या वा अग्निचिदनिष्टका आहुतिं जुहोति स्रवति सा ता स्रवन्ती यज्ञो ऽनुस्रवति यज्ञꣳ यजमानो यदेतां पुनश्चितिमुपदधात्याहुतीनां प्रतिष्ठित्यै ताः प्रतितिष्ठन्तीर्यज्ञो ऽनु प्रतितिष्ठति यज्ञꣳ यजमानो ऽष्टोपदधात्यष्टाक्षरा गायत्री गाय ३त्रो ऽग्नियावानेवाग्निस्तं चिनुते ऽष्टौ लोकंपृणा[5] उपधाय पुरीषेणाभ्यूहत्यष्टाक्षरा गायत्री ब्रह्म गायत्री गायत्रयैवैनं छन्दसा ब्रह्मणा चिनुता एकादश लोकंपृणा[5] उपधाय पुरीषेणाभ्यूहत्येकादशाक्षरा

1) In den Mss. भूम त्वेवास्यात 2) In den Mss. हि ये नꣳ ohne Accent. 3) So corrigirt; H u. Bb lesen वित्स्या ऋधता; B वित्स्यान्मधता; für die Dehnung des स्या in स्या vgl. Bd. I, p. 110, Z. 8; oben 3, 4, 4 °तेना ऋतवो; desgl. Bd. I, p. 71 Anm. 5; vgl. auch das folg. चिन्वीता 4) S. die vorhergehende Anmerkung. 5) Die Mss. लोकंपृणा

त्रिष्टुब्वीर्यं त्रिष्टुभैवैनं छन्दसा वीर्येण चिनुते द्वादश लोकंपृणा उपधाय पुरीषेणाभ्यूहति द्वादशाक्षरा जगती जागताः पशवो जगत्यैवैनं छन्दसा पशुभिश्चिनुत एषा वा अग्नेरुत्तरवेदिरेतदग्निरुत्तरवेदिमाꣳश्रीयते[1] यो ऽस्याग्निः पुरा चितः स्यात्तमन्ववसाय यजेत यथा वा इदं दीप्यमाने भूयो ऽभ्यादधात्येवꣳ वावास्मिन्नेतदभिपूर्वं भूयस्तेजो दधाति तदाहुः कः श्रेयाꣳस विषुप्तं बोधयिष्यतीति यद्यजता आहुत्यैवैनꣳ वृधयति[2] गृहान्वा एष कुरुते ३यो ऽग्निं चिनुते यद्वा अन्यतो विन्दते गृहाꣳस्तदाहरति य इष्ट्या वा पशुना वा सोमेन वा यजेत यो ऽस्याग्निः पुरा चितः स्यात्तमन्ववसाय यजेत यथा वा इदमन्यतो वित्त्वा गृहानाहरत्येवं तत्तदाहुः पुनर्वा सुवा एतद्यज्ञे क्रियते यत्रैव क्रु च यजेत तदेता एकविꣳशतिमुपधाय यजेत प्रतिष्ठित्यै प्रतिष्ठा ह्येकविꣳश इति ॥ ५ ॥

Vgl. TS 5, 4, 10 (vahniyogaç ca, punaççitiḥ); Kâṭh. 22, 2; Kap. S. 34 a. E.

समास्त्वाग्ना ऋतवो वर्धयन्विति समाभिश्चैवैनमृतुभिश्च समिन्द्धे सं दिव्येन दीदिहि रोचनेनेति ज्योतिष्मन्तमेवैनं चिनुते विश्वा आभाहि प्रदिशश्चतस्रा इति तस्मादग्निः सर्वा दिश आभात्यमुचभूयादध यद्यमस्य बृहस्पते[3] अभिशस्तेरमुञ्चा इत्यामयाविनः कुर्यान्मृत्युर्वै यमो ब्रह्म बृहस्पतिर्यावदेव ब्रह्म तेनैनं भिषज्यति प्रत्यूहतामश्विना मृत्युमस्मादित्यश्विनौ वै देवानां भिषजौ तौ अस्मान्मृत्युं प्रत्यूहता उद्वयं तमसस्परीति पाप्मानमेव तमो ऽपहत्य स्वर्गं लोकमभ्यारोहत्याहतो वै हैतनामनः सर्वतेरापाष्टरमेश्वित्यस्य होता-

1) In den Mss. °रुत्तरवेदिमाꣳ° 2) In den Mss. das Verb ohne Accent.
3) Die Mss. बृहस्पते

सीत्तमब्रुवन्या अप्सुमतीस्ता इष्टेति तस्मै वा एता गन्धर्वाप्सरस
प्राब्रुवन्यदप्सुमतीः सामिधेनीर्भवन्ति शान्त्यै चतुर्विꣳशतिमन्वाह
चतुर्विꣳशत्यक्षरा वै गायत्री गायत्री यज्ञमुखꣳ यज्ञमुखमेवालभ्यो
थो चतुर्विꣳशतिर्वा अर्धमासाः सꣳवत्सर एषा वा अस्थिता श्रीय
5 त्सꣳवत्सरो न वा एष म्रियेलयति न हास्य श्रीरिलयति गायत्रीन्वाह
तेजो वै गायत्री ब्रह्मवर्चसं तेज एव ब्रह्मवर्चसमवरुन्द्धे त्रिष्टुभो ऽन्वाहौजो वै वीर्यं त्रिष्टुबोज एव वीर्यमवरुन्द्धे यन्नायत्रश्च त्रिष्टुभश्च भवन्ति तेनैव तदुभयमवरुन्द्धे या आग्नेयीरनिरुक्तास्ताः
का३र्या अनिरुक्तमिव ३ह्येतद्व्यावृत्तꣳ व्यावृतं पाप्मना भ्रातृव्येण
10 गच्छति ता अग्नीषोमीयस्य पशोः कुर्यात्को हि देवक्षेत्रं द्विरभ्यारोक्ष्यतीति तिस्रो रात्रीर्भूत्वाग्निश्चेत३व्या इत्याहुस्त्रिपदा विराड् विराजमेवाप्नोति षड्रात्रीर्भूत्वाग्निश्चेत३व्या इत्याहुः षडा ऋतवः सꣳवत्सरः सꣳवत्सरमनु विराडायत्ता विराजमेवाप्नोति दश रात्रीर्भूत्वाग्निश्चेत३व्या इत्याहुर्दशाक्षरा विराड् विराजमेवाप्नोति द्वादश रात्री
15 र्भूत्वाग्निश्चेत३व्या इत्याहुर्द्वादश मासाः सꣳवत्सरः सꣳवत्सरमनु विराडायत्ता विराजमेवाप्नोति चतुर्विꣳशतिꣳ रात्रीर्भूत्वाग्निश्चेत३व्या इत्याहुश्चतुर्विꣳशतिर्वा अर्धमासाः सꣳवत्सरः सꣳवत्सरमनु विराडायत्ता विराजमेवाप्नोति मासं भूत्वाग्निश्चेत३व्या इत्याहुर्मासश एव सꣳवत्सरमाप्नोत्यष्टौ वा एतन्मासो वसवो ऽबिभ्रुस्त इमं लोकमा
20 जयन्गायत्रीं छन्दा एकादश रुद्रा३स्ते ऽन्तरिक्षं लोकमाजयꣳ-

---

1) Das Verb in den Mss. ohne Accent. 2) So H u. Bb; B श्रीरेलयति; Kâṭh. 22, 1 नास्य श्रोत्रिष्टते यत्रैताः क्रियंते 3) Die Mss. त्रिष्टुभो 4) Die Mss. त्रिष्टुभश्च 5) Die Mss. व्यावृत्तं 6) Von hier bis zum folgenden इत्याहु° in H u. Bb fehlend; die Accente daher ergänzt. 7) Die Mss. एतं मासो 8) Die ३ fehlt in den Mss.

स्त्रिष्टुभं छन्दो द्वादशादित्याꣳस्ते ऽमुं लोकमाजयन्जगतीं छन्दस्ते आप्नुवन्नृभ्नोति य एवꣳ विद्वान्सꣳवत्सरमग्निं बिभर्ति तस्मादाहुः सꣳवत्सरभृत एवाग्निरित्यथैता आप्रियः प्रजापतिः प्रजाः सृष्ट्वा रिरिचानो ऽमन्यत स एता आप्रीरपश्यत्ताभिरात्मानमाप्रीणीताग्निर्वै प्रजापतिर्यदेता आप्रियो भवन्त्यग्निमेवैताभिर्यजमाना आप्रीणीते लोमशꣳ वा एतच्छन्दः पशव्यूमूनातिरिक्तं प्रजननाय विराजो भवन्ति विराड्वै सर्वाणि छन्दाꣳसि सर्वाण्येवास्य छन्दाꣳस्युपहितानि भवन्ति ता विश्वचितः कुर्यात्प्राणा वा एता ज्यायसीरिव च कनीयसीरिव च भवन्ति ज्यायाꣳस इव च ह्येमे कनीयाꣳस इव च प्राणाः प्राणानेवात्मन्धत्ते ॥ ६ ॥

Vgl. 2, 12, 5 u. 6. — Kâṭh. 22, 1.

यस्याग्निरुख्यो ऽनुगच्छति यथा पुत्रो जातः प्रमीयत एवं तद्यद्यनुगच्छेत्तामेवोषां पुनः परीन्धीतैषां वा अग्नेर्योनिः स्वादेवैनाꣳ योनेः प्रजनयतीश्वरो वा एषो प्रजनितोऽर्यो ऽग्निं चिनुते ॥

यास्ते अग्न आदर्यो योनयो याः कुलायिनीर्ये ते अग्ना इन्दवो या उ नाभयः ।

ताभिष्ट्वमुभयीभिः सꣳविदानः प्रजानꣳस्त्रन्वेह निषीद ॥

इति यदेषादर्यो योनिमति शान्त्यै प्रजा वै कुलायं पशवः कुलायꣳ यत्कुलायिनीः प्रजात्यै हविर्भूतो वा एष ऽयो ऽग्निं चिनुते ऽयो ऽग्निं चित्वान्यस्य स्त्रियमुपैति यथा हविः स्कन्नमेवꣳ स्याद्यथा हविषे

1) Die Mss. ते ohne ३ 2) So corrigirt; B ऋचृचानो; Bb ऋचानो; H ऋचानो 3) Die Mss. एतच्छंदः 4) So corrigirt; H u. Bb °रचो; B °रचो. 5) So corrigirt; H u. Bb पुरींधीतै°; B परीधीतै° 6) So corrigirt; die Mss. ३यो 7) Die Mss. हविर्भूतो s. 3, 8, 7 u. a. 8) Die ३ fehlt in den Mss. 9) Die Mss. चित्वान्यस्य

स्कन्नाय प्रायश्चित्तिमिच्छन्त्येवमस्मै प्रायश्चित्तिमिच्छेयुर्यद्युपेयान्मैत्रावरुण्यामिक्षया यजेत मैत्रावरुणतामेवोपैत्यात्मनो ऽस्कन्नत्वाय पशुर्वा अग्नियों वै पशुं पुरस्तादुपचरति हिनस्ति वा एनꣳ स तस्मात्पुरस्तात्प्रत्यञ्चं नाक्रामति तस्मादु पश्चात्प्राञ्चमुपचरत्यात्मनो ऽहिꣳसायै यो वै यथावृत्तमग्निं चिनुते यथारूपं प्रजाश्च ऋतवश्च कल्पन्ते या दक्षिणावृतस्ता दक्षिणत उपदधाति याः सव्यावृतस्ता उत्तरतस्त्र्यालिखिताः पश्चात्प्राचीरुपदधाति यथावृत्तꣳ वा एतदग्निं चिनुते यथारूपं प्रजाश्च ऋतवश्च कल्पन्ते ससत्यो ऽग्निश्चेत३व्या इत्याहुः ॥ भूर्भुवः स्वः ॥ इति पुरस्तात्स्वयमातृण्णा यावदेतद्वै वाचः सत्यꣳ ससत्यमेवाग्निं चिनुते प्राणो वै स्वयमातृण्णामृतꣳ हिरण्यꣳ यद्धिरण्येष्टकामुपधाय स्वयमातृण्णामुपदधात्यमृत एवास्य प्राणान्दधाति तेजो ऽसि तेजो मे यच्छेति हिरण्येष्टका उपदधात्येताभिर्वा इमे लोका विधृता अथो एताभिरेवाग्निं चिनुत इमे लोकाः प्रभान्ति[3] देवा असुरान्हत्वा मृत्योरबिभयुस्ते छन्दाꣳस्यपश्यꣳस्तानि प्राविशꣳस्तेभ्यो यद्यदछदयन्तेनात्मानमछादयन्त तच्छन्दसां छन्दस्त्वं चितिं चितिमुपधायाग्नेय्या धाम छन्दो ऽभिमृशति स्वामेव देवतामुपप्रविशत्यात्मनो ऽहिꣳसायै ॥ श्येनचितिं चिन्वीत स्वर्गकामः श्येनो वै भूत्वा गाय३त्र्यमुं लोकमपतत्स्वर्गस्य लोकस्य समष्ट्यै रथचक्रचितिं चिन्वीत भ्रातृव्यवान् रथचक्रꣳ वै वज्रं कृत्वा देवा असुरेभ्य उपप्रावर्तयꣳस्तेषाꣳ शततर्हमहꣳहꣳस्तदेतामेव वज्रं कृत्वा यजमानो भ्रातृव्यायोपप्रवर्तयति शततर्हꣳ ह हꣳहति प्रौगचितिं चिन्वीत

---

1)) प्राञ्च° in den Mss. ohne Accent. 2) In den Mss. ससत्यम° ohne Accent; cf. oben. 3) H u. Bb प्र भांति; B प्रभाति

भ्रातृव्यवानुभयतो वै देवानसुराः परीयत्ता आसन्पुरस्तादन्ये पश्चादन्ये तान्वा एतेन व्यूनुदन्त तद्भ्रातृव्यस्य वा एष विनोदो द्रोणचितिं चिन्वीतान्नकामो द्रोणेन वा अन्नमद्यतेऽनुरूपेणैवान्नाद्यमवरुन्द्धे पश्चाच्चरुर्भवत्यनुरूपत्वाय श्मशानचितिं चिन्वीत यः कामयेताञ्जसा पितृलोकमुपेयामित्यञ्जसा पितृलोकमुपैत्युप चान्यं चिन्वीत यामकामो यथैवैतमुपचिनोत्येवमस्मै याममुपचिनोति समूहां चिन्वीत पशुकामो यथैवैतꣳ समूहत्येवमस्मै दिग्भ्यः पशून्समूहति ॥ ७ ॥

Vgl. TS 5, 4, 11 (kâmyâni vihavyâç ca).

प्रजापतिर्वा एतमग्ये ऽग्निमचिनुत ऋतुभिः सꣳवत्सरं वसन्तेन पुरस्तादचिनुत ग्रीष्मेण दक्षिणं पक्षꣳ वर्षाभिरुत्तरꣳ शरदा पुच्छꣳ हेमन्तेन मध्यं ब्रह्मणैव पुरस्तादचिनुत क्षत्रेण दक्षिणं पक्षꣳ विशोत्तरं पशुभिः पुच्छमाशया मध्यमेतावद्वा अस्ति यावदेवास्ति तत्स्पृणोति तदवरुन्द्धे स्वर्गाय वै लोकायाग्निश्चीयते वज्र एकादशिनी यदेकादशिनीं मिनुयाद्वज्रः पुरस्तादवगृह्णीयादस्वर्ग्यः स्याद्यन्न मिनुयादपशुः स्यादेकयूपं एकादश पशवो नियुज्यास्तेन पशव्यास्तेन स्वर्गं यत्पक्षसंमितां मिनुयात्कनीयाꣳस यज्ञक्रतुमुपेयात्कनीयसीं प्रजां कनीयसः पशून्कनीयो ऽन्नाद्यं पापीयान्स्यादथ यद्वेदिसंमितां मिनोति ज्यायाꣳसं चिनुते ज्यायाꣳसमेव यज्ञक्रतुमुपैति भूयसीं प्रजां भूयसः पशून्भूयो ऽन्नाद्यꣳ वसीयान्भवत्येषा वा अग्नेरुत्तरवती नाम चितिरुत्तरमुत्तरꣳ ह्यः ह्यः श्रेयान्भवति य एवꣳ वेद

---

1) So corrigirt; die Mss. पश्चादन्ये 2) °त्युप in den Mss. ohne Accent. 3) So B, ohne Accent; in H u. Bb चाऽन्यं; beachte den Accent. 4) Die Mss. नियुंज्या° 5) Die Mss. पापीयान् स्या°; cf. Einleitung zum ersten Buch, p. XLIII.

द्वेधा वा अग्निं चिक्यानस्य यश इन्द्रियं गच्छत्यग्निꣳ वा गच्छत्यात्मानꣳ वा ॥

रुचं नो धेहि ब्राह्मणेषु रुचꣳ राजसु धारय।
रुचꣳ विश्येषु शूद्रेषु मयि धेहि रुचा रुचम[1] ॥

इति यज्जुहोत्यात्मानꣳ वा एतदग्नेर्यशसार्पयतीश्वरो वा एष दुश्चर्मा भवितोऽर्यो[2] ऽग्निमध्येति ॥

तꣳत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः।
अहेडमानो वरुणेह बोध्युरुशꣳसमा ना आयुः प्र मोषीः ॥

इति यज्जुहोति शान्तिर्वा एषाग्नेर्गुप्तिरात्मनो वयो वा अग्निस्तस्मादग्निचिता पक्षिणो नाश्नीत्यं नो अग्निर्विदा यदश्नीयात्तमेवाग्नीयात्स एनमादत्ते निनयेत्प्रजापतिर्वा एतमग्ने ऽग्निमचिनुत ज्यैष्ठ्यकामः स ज्यैष्ठ्यं महिमानमगच्छज्ज्यैष्ठ्यं महिमानं गच्छति य एवꣳ विद्वानग्निं चिनुते प्रजापतिः प्रजाः सृष्ट्वा ता अनुप्राविशत्सो ऽब्रवीद्यो मेतः संचिनवदध्रुवत्स इति तं देवाः समचिन्वꣳस्त आध्रुवꣳस्त्यस्य चित्यत्वं तद्य एवꣳ विद्वानग्निं चिनोति प्रजापतिमेव संचिनोत्यृध्नोति तस्मादाहुः प्रजापतिचित एवाग्निरिति ॥ ८ ॥

Vgl. TS 5, 5, 7 (ekayûpâdhividhayaḥ); Kâṭh. 22, 4; Kap. S. 35, 1 u. 2.

देवेभ्यो वा अग्निं चिक्यानेभ्यो न व्यौछत्ते ऽमा आहुतिमजुहवुस्तुभ्यमग्ने व्युछ तथास्मभ्यꣳ विवत्स्यतीति तयाग्नये व्यौछद्यमया औछन्नाहुत्यै व्युछत्तस्या आहुत्यै यज्ञेन व्यौछद्याहुत्या औछन्न यज्ञाय व्यौछत्तस्मै यज्ञाय दक्षिणया व्यौछद्यज्ञायौछन्न दक्षिणायै व्यौ-

1) Dies Wort in den Mss. ohne Accent. 2) So corrigirt; B भविती ३यो; H u. Bb भवितोऽयो

छत्तस्यै दक्षिणायै ब्राह्मणेन व्यौछद्वि दक्षिणाया औछन्न ब्राह्मणाय व्यौछत्तस्मै ब्राह्मणाय ब्रह्मणा व्यौछद्वि ब्राह्मणायौछन्न ब्रह्मणे व्यौछत्तस्मै ब्रह्मणे तपसा व्यौछदेतां वै तपःपरार्धा व्युष्टयः श्रोवसीयस्यूस्मै व्युछति य एवं विद्वान्व्युष्टीरुपधत्ते यो वै यथापूर्वं व्युष्टीर्वेद यथापूर्वमस्मै व्युछत्यौषसी वाव प्रथमा व्युष्टिर्व्यैवाडिति वा आहुर्यदौषस्युदेति यद्व्युछति यदग्निराधीयते यत्सूर्य उदेति यद्वस्ना अवनेनिक्ते यदश्नाति यत्पिबत्येतां वै यथापूर्वं व्युष्टयो यथापूर्वमस्मै व्युछति य एवं विद्वान्व्युष्टीरुपधत्ते ॥ ९ ॥

यो वा अग्निमयोनिमनायतनं चिनुते ऽयोनिरनायतनो भवत्यापो वा अग्नेर्योनिर्यत्कुम्भेष्टका उपदधाति योनिमन्तमेवायतनवन्तमग्निं चिनुते योनिमानायतनवान्भवत्यधरसपत्नो ऽग्निश्चेत३व्या इत्याहुरापो वा अग्नेः सपत्नो यत्कुम्भेष्टका उपदधात्यधरसपत्नमेवाग्निं चिनुते ऽधरो ऽस्मात्पाप्मा भवत्यधरः सपत्नः शुग्वा अग्नेरापः शान्त्यै यत्कुम्भेष्टका उपदधाति शान्त्यै यत्कुम्भाश्च कुम्भ्यूश्च तन्मिथुनं यद्व द्वन्द्वं प्रजात्यै द्वादशोपदधाति द्वादश मासाः सं वत्सरः सं वत्सरमेवाप्नोवरुन्द्धे नैवारश्चरुस्त्रयोदशो भवत्यस्ति मासस्त्रयोदशस्तमेवैतेनाप्नोवरुन्द्धे पयसि भवति यत्पयो ग्राम्यं तेनान्नाद्यमवरुन्द्धे यन्नीवारा आरण्यं तेन तेनैव तदुभयमवरुन्द्धे ॥ १० ॥

॥ इत्युपरिकाण्डे वसोर्धारीयः चतुर्थः प्रपाठकः ॥

---

1) B प्रथ प्रथमा 2) Die Mss. °राधीयते 3) पिबत्य° ohne Accent in den Mss. 4) Die Mss. व्युष्टयो 5) Die Mss. व्युष्टीर° 6) Die Mss. चिनुते 7) Die Mss. कुम्भ्यश्च 8) भवत्य° in H betont; in Bb zweifelhaft. 9) H u. Bb चरण्यं 10) Das इति fehlt in den Mss.

आ वा एष प्रजापतये वृश्चते यः शिर उपदधाति नेतराण्यङ्गान्य-स्थिचिदस्य श्मशानचिद्भवति[1] यदेतां पुरुषचितिमुपदधाति न प्रजा-पतया आवृश्चते ऽनास्थिचिदस्याश्मशानचिद्भवति षट्चि॰शतमेता उपदधाति षट्चि॰शदक्षरा बृहती बार्हताः पशवो बार्हतः पुरुषः पुरुषस्य प्रतिमोपधीयते स ३ह्येष[2] धीयत एष ह ३त्वेव यजमानो ऽमुं लोकं नाति प्रमीयते यस्यैता उपधीयन्ते ॥ १ ॥

अथैताः पञ्चापञ्चीनाः शिथिर इव वा अग्निश्चित्यो यत्पञ्चाप-ञ्चीना उपदधात्यग्नेर्धृत्या[3] अशिथिरत्वाय पञ्चोपदधाति पाङ्क्तो यज्ञो यावानेव यज्ञस्तमालब्ध भूयस्कृदसि वरिवस्कृदसीत्येवा एव भूमानं दधाति भूयान्प्रजया पशुभिर्भवत्यप्सुषदसि गृध्रसदसीति वयो वा अग्निः समिक्ष्यमेवैन॰ वयः करोति वयो भूत्वा स्वर्गं लोकमेति यस्यैता उपधीयन्ते ॥ २ ॥

चितः स्थ परिचितः स्थेति शर्कराः परिश्रयति यच्छर्करा अपरि-श्रित्य सिकता निवपेद्रेतः सिक्तं[4] परासिच्येताथ यच्छर्करा अपरि-श्रित्य सिकता निवपति रेतसः सिक्तस्य परिगृहीत्यै ॥ ३ ॥

वि वा एष यज्ञश्छिद्यते यदस्थितं पशुमुत्सृजन्ति स॰ ह स्म वा एतमाशोकेयः[5] स्थापयत्याज्येन स॰स्थाय॰ यज्ञस्य संतत्या अ-विच्छेदाय ॥ ४ ॥

---

1) Die Mss. °स्याश्मशानचिद्भवति; vgl. das Folgende. 2) Die ३ fehlt in den Mss. 3) धृत्या in den Mss. ohne Accent. 4) So B, ohne Accent; in H u. Bb °द्रेतमेवैन सिक्तं 5) So corrigirt; die Mss. °शोकेय; bisher nur gaṇa शुभ्रादि zu P 4, 1, 123 belegt.

स्वर्गꣳ वा एष लोकमन्वारोहति ३यो ऽग्निं चिनुते यदन्वारोहान्जुहोति स्वर्गमेवैनं लोकं गमयित्वाथ कामं चरति ॥ ५ ॥

॥ इत्युपरिकाण्डे[1] पञ्चमः प्रपाठकः ॥

[illegible] देवताश्चैव यज्ञं चालब्धाग्निर्वै यज्ञस्या३न्तो ऽवस्ताद्विष्णुः[2] पुरस्तादुभयत एव यज्ञस्यान्ता आलब्ध तदाहुर्न ऋतं इन्द्राद्य३ज्ञो[3] ऽस्त्विति[4] यदष्टाकपालस्तेनाग्नेयो यत्त्रिकपालस्तेन वैष्णवो यदेकादशकपालः संपद्यते तेनै३न्द्रो ऽग्निर्वै यज्ञस्य पवित्रꣳ विष्णुर्यज्ञः पवित्रपूतमेव यज्ञमालब्ध मेधस्य वा एतद्यज्ञस्य रूपꣳ यत्पुरोडाशस्तस्मात्पुरोडाश एव कार्यश्चरू[5] कुर्वन्ति धेन्वा वै घृतं पयो ऽनड्वाहस्तण्डुलास्तान्मिथुनं मिथुनमेवास्य[6] यज्ञमुखे दधाति तेजो वै घृतं तेजस एव प्रजायते पुरुषो वा एष मेधायालभ्यते पुरुषस्येव ३ह्येषा प्रतिमा यत इव हि रूपं तस्माच्चरुरेव का३र्यो वेदिमिति दीक्षते विन्दा इति वै वेदिमिति दीक्षते[8] विन्दते ह वै यो वेदिमिति दीक्षते ऽथो यज्ञपथ एवादीक्षिष्ट[9] वेद्या वै देवा इममसुराणामविन्दतेमामेव विन्दते यो वेदिमिति दीक्षते ऽथो यज्ञपथमेवालब्ध प्राचीनवꣳशं कुर्व-

1) Das इति fehlt in den Mss. 2) So corrigirt; die Mss. °न्तो °वस्ताद्, was nicht richtig sein kann; man vgl. अवस्तात् unten 3, 9, 4. 3) So corrigirt; die Mss. ऋतं इंद्रो य३ज्ञो 4) So corrigirt; die Mss. स्वीति 5) So H u. Bb; in B चरुः 6) B तन्मिथुनमेवास्य 7) So B (ohne Accent); in H u. Bb प्रजापतेर्यं 8) So B (ohne Accent); H u. Bb दीचिते 9) Die Mss. एवादीचिष्ट

न्ति दिशो[1] यदिमा॰[2] व्यकल्पयन्निमामेव देवेभ्यो ऽकल्पयन्निमां पितृभ्य इमाममुरेभ्य इमां मनुष्येभ्यो देवतामेष उपैति यो दीक्षते देवानामेव दिशमुपावर्तते प्राचीनामेव दिशमुपावर्तते ऽथो देवक्षेत्रमेव प्रावस्यति परिश्रयन्त्यन्तर्हितो वै देवात्क्षयान्मानुषः[3] क्षयो मानुषादेवैनं क्षयादन्तर्दधत्यथो रक्षसामनन्ववायायेति[4] वा एऽषो ऽस्माल्लोकाद्यो[5] दीक्षते जन॰ ह्येति देवलोकमभ्यारोहति परिश्रयन्तोऽतिरोकान्कुर्वन्ति तेनास्माल्लोकान्नैति तेनामुंल्लोकं धृतः पुरस्तात्प्रायणं कुर्यात्स्वर्गकामस्यासौ वा आदित्यः स्वर्गो लोऽको ऽमुष्यैनमादित्यस्य सामप्सं गमयति दक्षिणतः प्रायणं कुर्याद्यं कामयेत पितृलोकं ऋध्नुयादित्येषा वै पितॄणां दिक् पितृलोक एवं ऋध्नोति पश्चात्प्रायणं कुर्यात्प्रजाकामस्य पश्चाद्वै रेतो धीयते रेतो दीक्षितो रेतो ऽस्मिन्दधात्युत्तरतः प्रायणं कुर्याद्यं कामयेत मनुष्यलोकं ऋध्नुयादित्येषा वै मनुष्याणां दिङ् मनुष्यलोक एवं ऋध्नोत्युत्तरतः पुरस्तात्प्रायणं कुर्याद्यं कामयेतोभयोर्लोकयोर्ऋध्नुयादित्युभयोर्वा एतल्लोकयोरुभयोरेव लोकयोर्ऋध्नोति सर्वतः प्रायणं कुर्याद्यं कामयेत सर्वासु दिक्ष्वित्यृध्नुयादिति[6] सर्वासु दिक्ष्वित्यृध्नोति ॥ १ ॥

Vgl. Kâṭh. 22, 13.

केशश्मश्रु[7] वपते दतो धावते नखान्निकृन्तते[8] स्नाति मृता वा एषा त्वगमेध्य॰[9] वा अस्यैतदात्मनि शमलं तदेवापहते मेध्य एव

1) Die Mss. schwanken; H u. Bb कुर्वति शिशो; B कुर्व दिशो 2) So corrigirt; die Mss. यदिमा 3) So corrigirt; die Mss. देवा त्वयान् 4) So corrigirt; die Mss. °यैति 5) So corrigirt; die Mss. स्मान् लोकान् यो 6) So H u. Bb; in B दिक्ष्वि ऋध्नुयादिति 7) Die Mss. केशश्मश्रु 8) Die Mss. नखां नि॰ 9) So H u. Bb; in B त्वग् मेध्य॰

मेधमुपैत्यप्सु दीक्षां प्रवेशयित्वा देवाः स्वर्गं लोकमायन्यदप्सु स्नाति तामेव दीक्षामालभते ऽथ यदपो ऽवभृथमभ्यवैति ता वा एता दीक्षां पुनरप्सु प्रवेशयत्योषधे चायस्वैनमित्याह चात्या एवं स्वधिते मैनꣳ हिꣳसीरिति वज्रो वै स्वधितिः स ईश्वरो ऽशान्तो यजमानꣳ हिꣳसितोर्यꣳ तृणमन्तर्दधाति यजमानस्याहिꣳसायै देवश्रुदिमान्प्रवपा इति देवश्रु३द्येतान्प्रवपते स्वस्त्युत्तरं अशीयेति स्व३स्त्यस्य यज्ञस्योदृचमशीयेति वा एतदाहापो मा मातरः सूदयन्त्वित्यापो हि यज्ञो घृतेन मा घृतप्वः पुनन्त्विति देवताभिरेवात्मानं पावयते विश्वꣳ हि रिप्रं प्रवहन्तु देवीरिति यदेवास्य रिप्रममेध्यमात्मनि शमलं तदस्मादधि प्रवहन्त्युदिदाभ्यः शुचिरा पूत एमीति शुचिरेवाभ्यो यज्ञियो मेध्यः पूत उदेति हविर्वै दीक्षितो यदा वै हवियंजुषा प्रोक्षत्यथ हविर्भवति यद्यजुषा स्रुपयति हविरेवैनमकरश्नाति प्राणा वा अशनं प्राणानेवात्मन्धित्वा दीक्षते सुषिरो वै पुरुषः स वै तर्ह्येव सर्वो यर्ह्याशितो यदाशितो भवति मेध्य एव मेधमुपैति यथा वा इह दीक्षित एवꣳ वा ए३ष ऽमुष्मिंल्लोक एव वा अत्याशितस्य तिष्ठति तस्मान्नात्याशितेन भवित३व्यं तन्न सूक्ष्ममाशितेनैव भवित३व्यꣳ यथैव कनीयः कनीयो ऽश्नीयादेवमश्नीयाद्यद्धि दीक्षितः सन्कनीयो ऽश्नाति तेन दीक्षित आक्ते ऽभ्यक्ते वासः परिधत्त एता वै पुरुषस्य त३न्वः सतनूरेव मेध्यमुपैति नवनीतेनाभ्यक्ते घृतं देवानामायुतं मनुष्याणां निष्पक्वं गन्धर्वाणाꣳ स्वयꣳविलीनं पितॄणाꣳ सर्वदेव-

1) Die Mss. ईश्वरो शांतो 2) B यग्णम°; H u. Bb यत्तृणम° 3) So B, ohne Accent; in H u. Bb स्वस्त्युत्तर; vgl. 1, 2, 1. 4) So corrigirt; die Mss. दीक्षिते 5) So H u. Bb; in B सुश्चिरो 6) Die Mss. तिष्ठति 7) B °तेनैवा 8) In den Mss. ohne Accent. 9) Die Mss. निःपक्वं

३त्य॰[1] वा एतत्तसान्नवनीतेनाभ्यूङ्क्ते दर्भपिञ्जूलाभ्या॰ समायौति तस्त्वदभ्यञ्जनमकरथो अ३भ्येवैतद् घारयति मेध्यत्वाय महीनां पयो ऽसीत्याह महीना॰ ३ह्येतत्पयो ऽपामोषधीना॰ रसा इत्यपा॰ ३ह्येष ओषधीना॰ रसो वर्चोधा असि वर्चो मे धेहीत्याशिषमेवाशास्ते ॥ २ ॥

Vgl. 1, 2, 1. — TS 6, 1, 1 (adhvarâdînâm trayâṇâm vidhiḥ; prâgvaṃçaṃ kshurakarmâdisaṃskṛtaḥ praviçet); Kâṭh. 22, 13 u. 23, 1; Kap. S. 35, 7.

प्रस्वाङ्क्ते प्रजात्या ईषीकयाङ्क्ते[3] शल३ल्या हि मनुष्या आञ्जते सतूलयाङ्क्ते ऽपतूलया हि मनुष्या आञ्जते दक्षिणं पूर्वमाङ्क्ते सव्य॰ हि पूर्वं मनुष्या आञ्जते चिरन्यक्तिरन्यदाङ्क्ते ऽपरिमित॰ हि मनुष्या आञ्जते न पुनर्निषेवयति पुनरावर्त॰ हि मनुष्या आञ्जता इन्द्रो वै वृत्रमह॰स्तस्य कनीनिका परापतत्सा चिकुभमगच्छत्तदाञ्जनं चैककुभमाङ्क्ते सत्य॰ वै चक्षुर्नैव[4] वाचं श्रद्दधाति सत्यमेवालभ्य दीक्षामुपैत्यन्तरहं त्वया द्वेषो अन्तरारातीर्दधे[5] महता पर्वतेनेति पर्वतेन वा एतद् द्वेषो ऽरातीरन्तर्धत्ते चक्षुःपा असि चक्षुर्मे पाहीत्याशिषमेवाशास्ते ऊर्ध्वं चावाञ्चं च पावयत्यूर्ध्वश्च ३ह्ययमवाङ् च प्राणो यँ द्विषात्तमक्ष्णया पावयेत्प्राणानस्य मोहयति प्रमायुको भवति चित्पतिस्त्वा पुनात्विति यज्ञो वै चित्पतिर्वाचस्पतिस्त्वा पुनात्विति वाचस्पतिरेवैन॰ यज्ञाय पावयति देवस्त्वा सविता पुनात्विति सवितृप्रसूत एवैताभिर्देवताभिर्मेधायात्मानं पावयते ऽछिद्रेण पवित्रेणेत्येतद्वा अछिद्रं पवित्र॰ यत्सूर्यस्य रश्मयो ऽछिद्रेणैवैनं पवित्रेण

1) Die Mss. सर्वदेव३त्य॰ 2) Die ३ fehlt in den Mss. 3) So H; in B ईषिकया॰, welche Form ebenso berechtigt wäre (cf. das Pet. W. s. v.); Bb इषीकया॰; so auch Kap. S. 35, 7 u. Kâṭh. 23, 1. 4) B ॰नैव 5) Diese Lesart ist wohl auch oben 1, 2, 1 mit M 1 in den Text zu setzen. Die Mss. unserer Stelle schreiben अंतरारातीं॰

पुनाति तस्य ते पवित्रपते पवित्रेणेति यज्ञो वै पवित्रपतिर्यज्ञाय खलु वा एष कमात्मानं पावयते ॥ यज्ञꣳ शकेयम् ॥ इतीन्द्रो वै वृत्रमप्स्वध्यहꣳस्तासा꣣ꣳ यद्यज्ञियं मेध्यमासीत्तदुदक्रामत्तो इमा ओषधयोऽभवꣳस्तासा꣣ꣳ[1] वा एतत्तेजो[2] यद्दर्भा एता वै शुष्का आपो यदेवासाꣳस्तेजस्तदवरुन्द्धे त्रयीर्वा आपो दिव्याः पार्थिवाः समुद्रिया- 5
स्ताः सर्वा दर्भो विवस्थैतस्माद्दर्भैः[3] पवित्रं द्वाभ्यां पावयति द्वे पवित्रे द्विपाद्यजमानो यावानेवास्यात्मा तं[4] पावयति त्रिः पावयति त्रिषत्या हि देवा अथो त्रयो वा इमे प्राणाः प्राणो[5] ऽपानो व्यानो यावानेवास्यात्मा तं[6] पावयति सप्तभिः पावयति सप्त वै छन्दाꣳसि छन्दोभिरेवैनं पावयत्यथो ब्रह्म वै छन्दाꣳसि ब्रह्मणैवैनं पावयत्येक- 10
विꣳशत्या पावयति दश हस्त्या अङ्गुलयो दश पाद्या आत्मैकविꣳशो यावानेवास्यात्मा तं[6] पावयति त्रया वै नैर्ऋता अक्षाः स्त्रियः[7] स्वप्नो यद्दीक्षते[8] तेनाक्षैश्च स्त्रीभिश्च व्यावर्तते यां प्रथमां दीक्षितो रात्रीं जागर्ति तया स्वप्नेन व्यावर्तते यां प्रथमां दीक्षितो वसति यज्ञं तयावरुन्द्धे यां सोमे क्रीते प्रजां तया यां श्वःसुत्यया पशूꣳ- 15
स्तया ॥ ३ ॥

Vgl. 1, 2, 1. — TS 6, 1, 1 (s. oben); Kâṭh. 23, 1; Kap. S. 35, 7.

आकूत्यै प्रयुजे अग्नये स्वाहेत्याकूत्या वा आकूतिर्यज्ञꣳ यज्ञमेति प्रयुजः खलु वा एनꣳ यज्ञाय प्रयुञ्जते मेधायै मनसे अग्नये स्वाहेति मेधया हि मनसा यज्ञमश्नुते दीक्षायै तपसे अग्नये स्वाहेति दीक्षया

---

1) Die Mss. भवꣳ 2) Die Mss. तेजो ohne Accent. 3) So H u. Bb!! In B विवस्थे तस्माꣳ 4) So corrigirt; die Mss. ꣳस्वात्मानं 5) So corrigirt; H u. Bb प्राणा; B प्राणो 6) So corrigirt; die Mss. ꣳस्वात्मानं 7) In den Mss. ohne Accent. 8) Das Verb in den Mss. ohne Accent; B यदीहीक्षते

हि तपसा यज्ञमश्नुते ᵛ सरस्वत्यै पूष्णे अग्नये स्वाहेति ᵛ वाग्वै सरस्वती ᵛ वाचा व्याहरति ᵛ यक्ष्यते[1] स्य इति ᵛ पूषा खलु वा एनꣳ यज्ञं प्रापिबद्[2] एनमपूपुषदापो देवीर्बृहतीर्विश्वशंभुवा इत्यापो हि यज्ञो ᵛ द्यावापृथिवी उरो अन्तरिक्षेति ᵛ द्यावापृथिवी वा अन्वन्तरिक्षꣳ यज्ञ उपश्रितस्तत एव यज्ञमालब्ध ᵛ बृहस्पतिर्नो हविषा वृधातु स्वाहेति ᵛ ब्रह्म वै बृहस्पतिर्ब्रह्मणा वा एतत्पुरस्तात्सर्वान्कामानाप्नोति दीक्षामालभते ᵛ यच्च वा अस्य यज्ञः श्रितो[3] यच्च यज्ञोपश्रितस्तत्स्ततो वा एतत्सर्वं ब्रह्मणा यज्ञꣳ संभृत्यालब्ध[4] ᵛ न वा एकाहुतिर्दीक्षितं करोति ᵛ यदेतानि जुहोति द्वितीयत्वाय ᵛ प्रजापतिर्वै यत्किंच मनसादीधेत्तदाधीतयजुर्भिरेवाप्नोत्तदाधीतयजुषामाधीतयजुष्ट्वं ᵛ तद्व एवꣳ विद्वानाधीतयजूꣳषि जुहोति यदेव किंच मनसा दीध्यज्जुहोति तदाप्नोत्येते वै यज्ञस्य संभारा ᵛ एष ह ३त्वेव संभृतसंभारेण यज्ञेन यजते यस्यैतानि हूयन्त ᵛ एतद्ध स्म वा आहारुणं औपवेशिः ᵛ किमु स यज्ञेन यजेत यो यज्ञस्य संभारान्व विद्यादिति ᵛ पञ्चभिर्जुहोति ᵛ पाङ्क्तो यज्ञो ᵛ यावानेव यज्ञस्तमालब्ध ᵛ षड्भिर्जुहोति ᵛ षड्वा ऋतव ऋतुष्वेव प्रतितिष्ठति ᵛ यज्ञो वै सृष्टः ᵛ प्र सामाविन्नात्प्र[5] यजुस्तꣳ वा ऋगेवायछदेका[6] वा एनमृगयछद् ᵛ द्वादश यजूꣳषि ᵛ नव सामानि तस्मान्नवभिर्बहिष्पवमाने स्तुवते ᵛ नव ह्येनꣳ सामान्ययछꣳस्तस्माद्वात्संबन्धविदो[7] द्वादशभिरौन्नभणं जुह्वति ᵛ द्वादश ह्येनꣳ यजूꣳष्ययछन्नेतर्हि खलु वा एष सृज्यते यर्हि दीक्षते[8] ᵛ यदचौन्नभणं जुहोति यज्ञꣳ

1) So B, ohne Accent; H u. Bb यक्षते 2) In den Mss. प्रापिबद् ohne Accent. 3) So corrigirt; H u. Bb यज्ञ श्रितो; B यज्ञा श्रितो 4) B संभूत्वाꣳ 5) So corrigirt; die Mss. प्र सामाक्षिना प्रं; s. TS 6, 1, 2, 4. 6) H u. Bb °यक्षेद् 7) H u. Bb वात्संबधविदो; in B तस्माद्वादात्संबंधविदो; cf. übrigens TS 6, 1, 2, 5. 8) So corrigirt; die Mss. दीक्षिते

वा एतत्सृष्टमृचायछति तस्मादारुणिविंद[1] ऋचौङ्भणं जुह्वत्येका ह्येनमृगयछत् ॥ ४ ॥

Vgl. 1, 2, 2. — TS 6, 1, 2 (dîkshâhutayaḥ); Kâṭh. 23, 2; Kap. S. 35, 8.

यज्ञो वै प्रजापतिः प्राजापत्यमेतच्छन्दो यदनुष्टुब्यदनुष्टुभा जुहोति स्वेनैवैनं छन्दसावरुन्द्धा एकया जुहोत्येको हि प्रजापतिररनिरुक्तया जुहोत्यनिरुक्तो हि प्रजापतिः पूर्णया जुहोति पूर्णो हि प्रजापतिर्यदूनया जुहुयाद्भ्रातृव्याय[2] लोकमुञ्शेषेदथ यत्पूर्णया जुहोति न भ्रातृव्याय लोकमुञ्शेषत्यूर्जो वा एतदूपꣳ यत्पूर्णꣳ यत्पूर्णया जुहोति यज्ञे वा एतदूर्जं दधाति विश्वो देवस्य नेतुरिति सावित्रं मतो वुरीत सख्यमिति पितृदेव३त्यꣳ विश्वो राय इषुध्यतीति वैश्वदेवं द्युम्नꣳ वृणीतेति बार्हस्पत्यं पुष्यसा इति पौष्णꣳ[3] सारस्वतः स्वाहाकारः सर्वदेव३त्या[4] वा एषा ऋक्तस्मादेषैका सत्यौङ्भणं परिबभूव सर्वाभ्यो देवताभ्यो यज्ञ आलभ्या इत्याहुः सर्वदेव३त्या वा एषा ऋग्यदेतया ऋचौङ्भणं जुहोति सर्वाभ्यो वा एतद्देवताभ्यो यज्ञमालभते ऽनुष्टुभो वा एतस्याः सत्यास्त्रीण्यष्टाक्षराणि पदान्येकꣳसप्ताक्षरꣳ यत्सप्ताक्षरं तस्य चत्वार्येकाक्षराण्येकस्मिन्पद उपयन्ति त्रीण्येकस्मिन्येव चत्वार्युपयन्ति सा जगती यच्च त्रीणि सा त्रिष्टुब्यदष्टाक्षरं तेन गायत्री यदनुष्टुभानानुष्टुप्सर्वैरेवास्य छन्दोभिर्हुतं भवति छन्दःप्रतिष्ठानो[5] वै यज्ञश्छन्दःसु वावास्यैतद्यज्ञं प्रतिष्ठापयामकः[6] स्वाहा-

1) So corrigirt; B °दारुणिविंद; H u. Bb °दाणिविंद 2) Von hier an bis zum folgenden लोकम° in B fehlend. 3) B पौष्णꣳ 4) Die Mss. betonen सर्वदेव३त्या 5) So corrigirt; die Mss. betonen छन्दः प्रतिष्ठानो; es liegt aber doch jedenfalls ein Compositum vor: „auf die Metra gegründet, seine Grundlage in den M. habend.“ 6) Die Mss. betonen प्रतिष्ठापयामकः, was offenbar ein Versehen ist.

कारेण खलु वा एषा पङ्क्तिः पाङ्क्तो यज्ञः पङ्क्तिप्रायणः[1] पङ्क्त्युदयनः[2] पङ्क्तिप्रायणमेवास्य[3] यज्ञं पङ्क्त्युदयनमकरथो वाग्वै छन्दा॰सि वाच॰ वा एतन्मध्यत आप्नावरुन्द्धे तस्मादिय॰ वाङ् मध्यतो वदति मध्यतो ३हीय॰ वाक् प्रजापतिर्वै स्वां दुहितरमध्येदुषसं तस्य रेतः परापतत्ते देवा अभिसमगछन्त तस्माद्दीक्षितो न ददाति न पचत्यथैनमभिसंगछन्ते[4] तदुदगृह्णा॰स्तदौद्गभणस्यौद्गभणत्वं तेन यज्ञमतन्वन्त यज्ञो यदग्ने व्यभवत्स चेधा व्यभवत्स वा ऋ३क्ष्वेव तृतीयेनाश्रयत सामसु तृतीयेन यजुःषु[5] तृतीयेन या वा अस्य प्रिया तनूरासीत्तया[6] यजुरश्नयतो ह्यैर्ऋचा क्रियत उच्चैः सान्नोपा॰शु यजुषा यज्ञस्य ह्यच प्रिया तनूर्यद्यजुषोच्चैः कुर्याद्यज्ञस्य प्रियां तन्वमुद्धृतां कुर्यादब्रह्मवर्चसी[7] स्यान्नगंभावुकः[8] ॥ ५ ॥

Vgl. 1, 2, 2. — TS 6, 1, 2 (dîkshâhutayaḥ; s. oben); Kâṭh. 23, 2; Kap. S. 35, 8.

आहिताग्निर्वा एष[9] सन्नाग्निहोत्रं जुहोति न दर्शपूर्णमासौ यजते तद्या आहुतिभाजो देवतास्ता अनुध्यायिनीः करोति कर्शयत आत्मानं तेनैवास्य तद्धुतं भवति देवा असुरान्हत्वैभ्यो लोकेभ्यः प्राणुदन्त[10] तेषामसवो मनु३ष्यान्प्राविश॰स्तदिदं रिप्रं पुरुषे ऽन्तरथो[11] कृष्णमिव चक्षुष्यन्तस्तन्नाप्नीयादसूर्यमेवापहते[12] यदा वै पुरुषे न किंचनान्तर्भवति यदास्य कृष्णं चक्षुषोर्नश्यत्यथ मेध्यो यदि कुर्यान्नक्तं कुर्यादसु३र्यो[13] वै रात्रिरसूर्यमेवासूर्यं[14] क्रियते वाच॰ वा एतद्दीक्षयन्ती-

1) So corrigirt; die Mss. पंक्तिः प्रायणः 2) H u. Bb पंक्त्युदयः 3) H u. Bb पंक्तिः प्राय॰ 4) Die Mss. पचत्व॰ 5) Die Mss. यंजुष 6) Das Verbum in den Mss. ohne Accent. 7) Die Mss. betonen °दंब्रह्मवर्चसी 8) Die Mss. betonen स्यान् 9) वा in den Mss. ohne Accent. Auch schreiben die Mss. एषा(!) 10) So corrigirt; die Mss. प्रंणुदंत 11) In den Mss. °रथो ohne Accent. 12) So H u. Bb; in B °दसूर्यम॰ 13) H u. Bb °दसु३यो; B °दसू३र्यो 14) So die Mss.

ति ह स्माहारुणिरौपवेशिर्यं उताज्ञानो ऽभ्यज्ञानो ऽथ दीक्षित-
वाद॰ वदति स वाव दीक्षित इति सायं प्रातर्वै मनुष्याणां देवहि-
तमशनमतिनीय सायमशनमतिनीय[1] प्रातरशन॰ व्रत॰ व्रतयति
मानुषस्य व्यावृत्या अदन्तीति वै गा[2] आहुरश्नन्तीति मनुष्यान्जु-
हुधीति देवेभ्यो ऽथवा एतमाहुः ॥ व्रतमुपेहि व्रत्य ॥ इति व्रत॰
३ह्येतस्य व्रतेन यज्ञः संततो व्रतेनैव यज्ञ॰ संतनोत्यभ्यर्धो वा ऋ-
क्सामे यज्ञादास्तां तयोर्यौ[3] महिमाना आस्तां तावपिनिधाय यज्ञ-
मुपावर्तेतां तौ महिमाना अहोरात्रे अभवतां तयोर्वा एतद्रूप॰
यत्कृष्णाजिनस्य यज्शुक्लं तदहो रूप॰ यत्कृष्णं तद्रात्रेस्तौ वा एतन्म-
हिमाना अन्वारभते संपारणाय सं मा पारयता इत्यहोरात्रे मिथुन॰
समभवतां तयोस्तेजो ऽपाक्रामत्तत्कृष्णं प्राविशत्तद्वा एतदन्वारभते
द्यावापृथिवी मिथुन॰ समभवतां तयोर्द्यौर्यमपाक्रामत्तत्कृष्णं प्रा-
विशत्तद्वा एतदन्वारभते यथा वा इदं नावं पारं तरिष्यन्नारोहत्येव॰
वा एतदृक्सामे आरुक्षत्ते[4] एनमा यज्ञस्योदृचः संपारयतो यतो वै
लोमानि कृष्णाजिनस्य ततो यज्ञो यतो यज्ञस्ततो देवता यद्बहिर्लोमं
पर्यूर्णुवीतान्तर्हितो दीक्षितो यज्ञात्स्याद्यदन्तर्लोममन्तर्हितो[5] यज्ञो
देवताभ्यो द्वे विषूची प्रतिमुच्ये अनन्तर्हितो दीक्षितो यज्ञाद्भवत्य-
नन्तर्हितो यज्ञो देवताभ्यो यद्वेक॰[6] स्यादन्तं[7] प्रतिभुजे त्तेनैव तदुभ-
यमाप्नोति हविर्वै दीक्षितो यदन्यच्च कृष्णाजिनादासीत यथा हविः
स्कन्नमेव॰ स्याद्यथा हविषे स्कन्नाय प्रायश्चित्तिमिच्छत्येवमस्मै प्रायश्चि-
त्तिमिच्छेयुश्छन्दा॰सि च वा एष देवताश्चाभ्यारोहति तान्येनमीश्वरा-

1) Die Mss. betonen °मतिनीय 2) So H; desgl. Bb, ohne Accent; in B गाव
3) So corrigirt; die Mss. °र्यौ 4) Die Mss. आरुक्षते 5) So corrigirt; H u. Bb
schreiben यज्ञ स्याद्; B यज्ञः स्याद् 6) Die Mss. यद्वेक॰ 7) So H u. Bb; in B °दंत

णि प्रतिनुदो यदाह नमस्ते अस्तु मा मा हिꣳसीरिति नमस्कारो वा एषोऽप्रतिनोदाय देवता वै यज्ञस्य शर्म यज्ञो यजमानस्य यदाह विष्णोः शर्मासि शर्म मे यच्छेति देवता वा एतद्यज्ञस्य शर्मा-कर्यज्ञꣳ यजमानस्य प्रोर्णुते प्रावृत इव हि दीक्षितोऽथो एतदिव हि दीक्षितस्य रूपꣳ यत्प्रावृतं[2] तस्मात्प्रोर्णुते वासः परिधत्ते सर्वदेव-ꣳत्यꣳ वै वासः सर्वाभिर्वा एतद्देवताभिरात्मानं परिश्रयन्ति ॥ ६ ॥

Vgl. 1, 2, 2. — TS 6, 1, 3 (kṛshṇâjinena vastreṇa dîkshâ mekhalayâ, tathâ kṛshṇavishâṇayâ); Kâṭh. 23, 3; Kap. S. 35, 8 a. E.

यज्ञस्य वै सृष्टस्योल्बमन्वलम्बत तद्वासः क्षौममभवत्तस्मात्क्षौमेण दीक्षयन्ति यज्ञस्य सयोनित्वाय प्राचीनमाचा पत्नी दीक्षयन्तीन्द्रस्य वै प्राचीनमाचेन्द्रियꣳ[3] स्त्रियाः प्रजा यत्प्राचीनमाचा पत्नी दीक्षयन्तीन्द्रियमस्यां दधाति योनिर्वै दीक्षितस्य दीक्षितविमितं जरायु[5] कृष्णाजिनमुल्बं दीक्षितवासो नाभिर्मेखला गर्भो दीक्षितः स्वꣳ वा एतद्योनिं दीक्षित आशयेत्तस्माद्दीक्षितेन दीक्षितविमितान्नानृतुभिः[6] क्रम्यमेष ३ह्येतस्य योनिरतो ३ह्येषोऽधि प्रजायते गर्भो दीक्षितो यदेतं आविःकुर्वीत दत्वन्तो गर्भो जायेरन्यदनृतु स्येत तेजोऽस्य परापातुकꣳ स्यात्तस्मान्नानृतु स्येत३व्यं तेजसोऽपरापातायाजातो[7] वै पुरुषः स वै यज्ञेनैव ज़ायते स वै तर्ह्येव जायते यर्ह्येदः सोमे क्रीते[8] प्रोर्णुता इतोऽन्ये[9] प्रोर्णुतेऽथो ह्यये पुरुषो जायते स वै तर्ह्येव सर्वो जायते यर्ह्य३दोऽपोऽवभृथमभ्यवैति

1) So corrigirt; die Mss. betonen नमस्कारो 2) So ist wohl zu lesen; die Mss. schwanken; H प्रावृतं; desgl. B, ohne Accent; Bb प्रावृते 3) Die Mss. प्राचीनमाते° 4) In den Mss. यत् ohne Accent. 5) H u. Bb जरायुः 6) So corrigirt; die Mss, °मितां ना° 7) Die Mss. °याजातो 8) B क्रीयते 9) Die Mss. ग्रे

तर्हि स तस्मात्सर्वो निर्मुच्यते त्रिवृता वै स्तोमेन प्रजापतिः प्रजा असृजत त्रिवृन्मेखला भवति प्रजननाय त्रिवृद्वै वज्र उदरꣳ वृत्रः पाप्मा क्षुद् भ्रातृव्यः पुरुषस्य यन्मेखलां पर्यस्यते वज्रमेव सपत्नाय भ्रातृव्याय प्रहरति यं द्विष्यात्तं तर्हि मनसा ध्यायेद् वज्रमेवास्मै प्रहरति स्तृणुत एवाङ्गिरसो वै सत्रमासतꣳ यत्र मेखलाः संन्यास्यꣳस्तताः शरो ऽजायत तस्माच्छरमय्यूर्वा ओषधया ऊर्जꣳ वा एतन्मध्यत आत्मनो धत्ते प्रजानां च योक्त्रेण पत्नी संनह्यते मेखलया दीक्षितो ऽथो मिथुनत्वायोर्ध्वꣳ वै पुरुषस्य नाभेर्मेध्यमवाचीनममेध्यꣳ यन्मेखलां पर्यस्यते मेध्यस्य चामेध्यस्य च विधृत्यै देवताभ्यो वा एष मेधायात्मानमालभते यो दीक्षते बध्नीत इव वा एतदात्मानꣳ यन्मेखलां पर्यस्यते तस्माद्वा एतस्यान्नमन्नाद्यमीत इव ३ह्येष बद्धस्तस्मादु बद्धस्यान्नमन्नाद्यꣳ यथा वा इह गर्गी रेवꣳ वा ए३षो ऽमुष्मिंल्लोके यो दीक्षितस्यान्नमत्ति यज्ञेन ३त्वेवास्य तता उन्मुक्तिर्हविर्वै दीक्षितो यदस्य जुहुयात्तमेव जुहुयात्प्रमायुकः स्यात्सर्वाभ्यो वा एष देवताभ्य आप्यायते यो दीक्षते यदस्य जुहुयाद्यज्ञमस्य विदुह्यादुपधीतो ऽस्य यज्ञः स्यात्तꣳ वा एतदागते काले सर्वꣳ सꣳस्फीतꣳ यज्ञं देवताभ्यो दुहेत्त्रेधा वा एतस्य पाप्मानꣳ विभजन्ते यो दीक्षते ३यो ऽस्यान्नमत्ति स तृतीयꣳ यो ऽस्याशीलं कीर्तयति स तृतीयꣳ या एनं पिपीलिका दशन्ति तास्तृतीयं तस्माद्वा एतस्या-

---

1) In den Mss. क्षुद् ohne Accent; cf. TS 6, 1, 3, 5. 2) B °मेवास्मि 3) So die Mss.; cf. 1, 9, 5; 3, 3, 4; 3, 9, 6. 4) So corrigirt; B सन्यास्यꣳस्तः; H u. Bb सन्यासꣳस्तः 5) So corrigirt; die Mss. पत्नीꣳ सं नह्यते 6) In den Mss. das letztere Wort ohne Accent. 7) So corrigirt; die Mss. दीक्षिते 8) So corrigirt; die Mss. betonen °मन्नाद्यम° 9) Die Mss. betonen °मन्नाद्यꣳ. 10) So B (ohne Accent); H u. Bb संꣳस्फीनꣳ 11) In den Mss. das Verb ohne Accent.

न्नमन्नाद्यं[1] तस्मादस्याश्नीलं न कीर्तयितव्यं तस्मादीक्षितवासो ऽभक्तव्यमेव हि ताः पिपीलिका या एनं दशन्ति ॥ ७ ॥

Vgl. TS 6, 1, 3 (s. am Schluss des vor. Cap.); Kâṭh. 23, 2—4; Kap. S. 36, 1.

दक्षिणा वै देवेष्वासीद्यज्ञो ऽसुरेषु तां दक्षिणा यज्ञो ऽभ्यकामयत तामभिपर्यावर्तत ता समभवत्स इन्द्रो ऽवेद्यो वा अस्माद्योनेः संभविष्यति स इदं भविष्यतीति तामिन्द्रः[3] प्राविशत्तता इन्द्रः समभवत्तता इन्द्रो ऽजायत स जायमानो ऽवेद्यो वा अस्माद्योनेरन्यो मत्संभविष्यति माहक्संभविष्यतीति तया सहोपवेष्टयन्नजायत[4] यन्न्यवेष्टयत्तस्मान्निवेष्टिता[5. 6] यन्निवेष्ट्यमाना[7. 8] श्यावाभवत्तस्मात्कृष्णेन्द्रं च वा एष प्रेप्सति दक्षिणां चेन्द्रस्य[9] च खलु वा एतद्योनिमालब्ध दक्षिणायाश्चात्मानमथो सयोनिमेव यज्ञमालभते कृषि सुसस्यामुत्कृषा इति विषाणया भूम्यामुपहन्ति कृषिमेवास्य सस्येन समर्धयति यजुषा कराडूयते यजुषा[10] हि मनुष्याः कराडूयन्ते व्यावृत्त्यै यजुषा कराडूयते तस्मात्प्रजा अपामंभविष्णवः पामंभविष्णवः प्रजाः स्युर्यदयजुषा कराडूयेत सुपिप्पला ओषधीस्कृधीति शिरः कराडूयता ओषधीरेव फलं ग्राहयति तस्मादोषधयः शीर्षन्फलं गृह्णन्ति वाग्वै सृष्टा चतुर्धा व्यभवत्ततो या अत्यरिच्यत सा वनस्पतीन्प्राविशत्तैषा यांक्षे या दुन्दुभौ[11] या तूणवे या वीणायां दराडं प्रयछति तामेवास्मै वाचं प्रयछत्यथो वज्रमेवास्मै प्रयछति गोपीथायास्यदघ्नं[12] प्रयछत्ये-

---

1) Die Mss. betonen °मन्नाद्यं 2) So H; Bb दीक्षितवासो; vgl. aber auch oben zu Anfang dieses Cap. 3) So corrigirt; H u. Bb तामिंद्रं; B तानिंद्रं 4) Die Mss. सहोपवेष्टय° 5) So corrigirt; B यन्यवे°; H u. Bb यं न्यवे° 6) H u. Bb °ष्ठिता 7) H u. Bb यां नि° 8) Die Mss. °माना: 9) So corrigirt; die Mss. चंद्रस्य 10) So corrigirt; die Mss. यजुषा; vgl. für den Sinn auch Màitr. S. 3, 6, 9 यजुषा हस्ता अवनेनिक्ते यजुषा हि मनुष्या अवनेनिजते व्यावृत्त्यै 11) H u. Bb दुंदुभौ 12) So corrigirt; H u. Bb °दघ्नं; B °दघं

तावती ३हीयꣳ वाग्वदत्यथो[1] एतावती हि वाचा वीर्यं क्रियते यदेषीयाꣳसं प्रयच्छेत्स्वाꣳ वाचं मैत्रावरुणो विभजेत्तꣳ श्वःसुत्यायां मैत्रावरुणाय प्रयच्छति तांꣳ श्वो भूते मैत्रावरुण ऋत्विग्भ्यो विभजति ॥ होतर्यज पोतर्यज नेष्टर्यज॥ इति सां सह वषट्कारेणाहवनीयं गच्छति तां पुरोऽध्वर्यूर्विभजति ॥ होतर्यज पोतर्यज नेष्टर्यज ॥ इत्यध्वर्युः पुरो वाचꣳ विभजति मैत्रावरुणः पश्चात् ॥ स्वाहा[2] यज्ञं मनसा[3] ॥ इति मनसा[4] यज्ञमभिगच्छन्ति तत एवं यज्ञमालब्ध स्वाहा दिवः स्वाहा पृथिव्या इति द्यावापृथिवी वा अन्वन्तरिक्षꣳ यज्ञ उपश्रितस्तत[5] एवं यज्ञमालब्ध स्वाहोरोरन्तरिक्षादित्यन्तरिक्षꣳ वै यज्ञो यदि वातो यदि वा पशवस्तत एवं यज्ञमालब्ध स्वाहा वातात्परिगृह्णामि स्वाहेत्ययꣳ वाव यः पवत एष यज्ञस्तमेवालब्ध वाचꣳ यच्छति यज्ञꣳ वा एतद्यच्छति यद्वाचꣳ विसृजेद्यज्ञꣳ विसृजेत्तदाहुः पुनर्दीक्षयित्वा वाग्यन्तव्येति यत्पुनर्दीक्षयेदाहुतीरतिरेचयेद्[6] वैष्णवीमनूच्य वाग्यन्त३व्या विष्णुर्वै यज्ञो यज्ञमेवालब्धाग्नावैष्णवीमनूच्य वाग्यन्त३व्याग्निर्वै सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं चालब्ध सारस्वतीमनूच्य वाग्यन्त३व्या वाग्वै सरस्वती वाचा यज्ञः संततो वाचैव यज्ञꣳ संतनोति बार्हस्पत्यामनूच्य वाग्यन्त३व्या ब्रह्म वै बृहस्पतिर्ब्रह्मणा यज्ञः सꣳहितो ब्रह्मणैव यज्ञꣳ संदधाति ॥ ८ ॥

Vgl. 1, 2, 2. — TS 6, 1, 3 (s. oben) u. 4 (daṇḍam âdâya mushṭikaraṇavâgyamâu | kṛtvâsâu dîkshito bhûtvâ niyamân anutishṭhati); Kâth. 23, 4 u. 5; Kap. S. 36, 1 u. 2.

1) H u. Bb वाग्वादत्यथो 2) In den Mss. ohne Accent. 3) Die Interpunktion, die der Hiatus fordert, ist von mir ergänzt; dem entsprechend auch zu Anfang dieses Satzes. 4) इति मनसा fehlt in H u. Bb. 5) So B (ohne Accent); in H u. Bb यज्ञमुपश्रितस् 6) Die Mss. schwanken; H u. Bb °दाहुतीरतिरेचयेद्; B °दाहुतिरिति रेचयद्; Kap. S. 36, 1 °दाहुतीरिति रेचयेद; auch in Bb, wie es scheint aus °दाहुतीरिति corrigirt; Kâṭh. 23, 5 यत्पुनर्दीक्षयेदाहुतीरभिरेचयेत्

दीक्षि३तो ऽयमसा आमुष्यायणः ॥ इत्युद्वदति वा आह प्रियो वै देवानां दीक्षितो देवेभ्य एवैनं प्राह चिराह चिषत्या हि देवा अथो चयो वा इमे लोका एभ्य एवैनं लोकेभ्या आवेदयति तस्माद्दीक्षितं दूराज्ज्ञपयन्त्येभ्यो ह्येनं लोकेभ्या आवेदयति नक्षत्रं दृष्ट्वा वाच विसृजते द्यौ वा ऋतू अहश्च रात्रिश्चान्यमेव ऋतु संप्राप्य वाच विसृजते व्रतं चरते ति वाच विसृजते व्रत ३ह्येतस्य व्रतेन यज्ञः संतनो व्रतेनैव यज्ञ संतनोति दैवीं धियं मनामहा इति यजुषा हस्ता अवनेनिक्ते यजुषा हि मनुष्या अवनेनिजते व्यावृत्त्यै ब्रह्मणः सदेवत्वायाथो आपो मे दीक्षां नेत्प्रमुष्णानित्यन्न वै मनुष्येभ्या[5] उदबीभत्सत तद्देवा मनुष्येष्वदिधीर्षन्स्तदापो[6] ऽब्रुवन्वय व[7] एता स्रुन्धामाथोपावर्तस्येति ततो ऽन्नं मनुष्यानुपावर्तन्त त इदमन्नं मनुष्येषु धृतं तस्माद्ब्राह्मण आहा३र्या आहृते हस्ता अवनेनिजीताच्चाद्यस्यावरुद्ध्या अथो अन्नाय वा एतदात्मानं पावयते ये देवा मनुजाता[8] मनोयुजा इति व्रत व्रतयत्येते वै देवा मनुजाता[8] मनोयुजो यदिमे प्राणा एषा वा अस्मिन्नेतर्हि देवता तां प्रीणाति तस्या हुत व्रतयति यदेतो ऽन्यथा व्रतयेत्प्राणैरेन व्यृधयेत्प्रमायुकः स्यात्त्वमग्ने व्रतपा असी ति वदेत्स्वप्स्यन्त्सुप्त्वा[9] वा प्रबुध्य यदि वा[10] दीक्षितवाद[11] वदेदग्निर्वै देवाना व्रतपतिस्तस्मादेवाधि व्रतमालभते नोत्तानः शयीत[12] यदुत्तानः शयीतेमे लोका यययुर्नोग्नेरधि प-

1) So corrigirt; die Mss. प्रियो 2) So corrigirt; die Mss. ऋतू 3) Die ३ fehlt in den Mss. 4) So H u. Bb, nur dass अन्न ohne Accent ist; B नेप्रमुदसानित्यन्न 5) Die Mss. मनुर्थेभ्या 6) Die Mss. मनुर्थेष्वदिधी 7) So die Mss. 8) So die Mss. S. 1, 2, 3. Auch Kâṭh. 23, 5 देवा मनुजाताः 9) Die Mss. °प्स्यन्त्सु°; cf. Einleitung zum ersten Buch, p. XLIII. 10) H, Bb वी 11) In den Mss. ohne Accent. 12) Die Mss. betonen शयीत

राड् पर्यावर्तेत यत्पर्यावर्तेत यज्ञात्पर्यावर्तेत नान्यत्रदीक्षितं दीक्षित-
विमितान्त्सूर्यो ऽभिनिम्रोचेन्नाभ्युदियाद्दीक्षितव्रतमेव[1] तद्यज्ञो वै देवा-
नां न समभवत्ते भृत्या[2] समभावयन्यज्ञकृतिं[3] वनुते यज्ञस्य संभूत्यै रास्वेय-
त्सोमे ति यद्ब्रूयादेतावदस्य स्यान्न भूयो यदाहा भूयो भरेत्यपरिमितस्या-
वरुद्ध्यै देवः सविता वसोर्वसुदावे ति सवितृप्रसूत एवैताभिर्देवताभिरुप
प्रतिगृह्णात्यात्मनो ऽहिꣳसायै वायुर्गोपास्त्वष्टाधिपतिः पूषा प्रतियही-
ते ति वायुमेवासां गोपारमकस्त्वष्टारमधिपतिं पूषणं प्रतियहीता-
रमापो वै यज्ञो यदपो दीक्षितो[4] ऽवगाहेत यज्ञमवकृन्तीयाद्यदाह
देवीरापो अपां नपादि ति यदेवासा यज्ञियं मेध्यं तन्नाक्रामति
यदपो दीक्षितो ऽवगाहेत विहृदिनीः[5] स्युस्तस्मान्नावगाहेत[6] यद्यव-
गाहेत लोष्ट[7] विमृणꣳस्तरेत्तमेव[8] सेतुमनुसंतरति न वै दीक्षितं तरन्तं
देवता अनुतरन्त्यरणिभ्या सह तरति सहैव देवताभिस्तरति न वै
दीक्षितं तरन्त यज्ञो ऽनुतरति रथाङ्गेन सह तरति सहैव यज्ञेन
तरति[9] ॥ ९ ॥

Vgl. 1, 2, 3. — TS 6, 1, 4 (s. a. E. des vor. Cap.); Kâṭh. 23, 5 u. 6.

अमु वा आदित्य सर्वा वाचो गच्छन्ति ता उद्यति[10] सर्वाः सृ-
ज्यन्ते यदाह याः पशूनामृषभे वाचा इति सृज्यमाना वा एतद्वाचं
पुनरालभते वायवे त्वेति नष्टामनुदिशति वरुणाय त्वेत्यप्सु मग्ना

1) Die Mss. नाभ्युदियाद् 2) So H u. Bb; in B भूत्या 3) So H u. Bb; auch Kâṭh. 23, 6 भूतिं; B भूति; vgl. unten 3, 6, 10. 4) So corrigirt; die Mss. दीक्षितो; s. d. Folgende. 5) So corrigirt; cf. Kâṭh. 23, 6 विहृदिनीरापस्स्युः; Bb विहृदिनी desgl. B, ohne Accent; H विहृदीनी 6) So corrigirt; B °न्नावगाहेत्; H u. Bb °न्नावगाहेद् 7) H u. Bb लोष्टः 8) So corrigirt; in H u. Bb विमृत; B wohl विमृत्त°; aber Kâṭh. 23, 6 लोष्टं विमृणन्नासीत 9) H u. Bb चरति 10) So corrigirt; die Mss. उद्यंति

रुद्राय त्वेति महादेवाहतां निर्ऋत्यै त्वेत्यवसन्नामन्द्राय त्वेति व्रेष्कहता॰[1] यां वा स॰शीर्यत[2] मरुद्भस्त्वेति[3] ह्रादुनिहतामे ते[4] वै देवा भृत्या स्कन्नभागास्तानेव[5] प्रीणाति देवेभ्यो वा अन्या दक्षिणा दीयन्ते मनुष्येभ्यो ऽन्या एता वै देवेभ्यः प्रत्यक्षं दक्षिणा दीयन्त एताभिर्वै भूयो[6] ऽवरुन्द्धे यदु चैतराभिर्देवाश्च वा असुराश्चास्पर्धन्तैतावान्वै तर्हि यज्ञ आसीदग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यानि ते देवा यज्ञमपश्य॰स्तेनादीक्षन्त[7] तेषा॰ यदग्निहोत्रमासीत्तद्व्रतमुपाय॰स्तस्माद्व्रतेन[8] भवित३व्यं द्विर्ह्यग्निहोत्र॰ हूयते यदग्नीषोमीयं पूर्णमासे हविरासीत्तमग्नीषोमीयं[8] पूर्वेद्युः पशुमालभन्त यदैन्द्राग्नममावास्यायां तमाग्नेय॰ श्वो भूते पशुमालभन्त वैश्वदेवं प्रातःसवनमकुर्वत वरुणप्रघासान्माध्यंदिन॰ सवन॰ साकमेधान्पितृयज्ञं शुन्धकास्तृतीयसवनं तस्मात्तृतीयसवने विश्व॰ रूप॰ शस्यते विश्व॰३ह्येतद्रूप॰[9] तमेषा॰ यज्ञमसुरा णान्ववाय॰स्तेन वा एनानपानुदन्त ततो देवा अभवन्परासुरास्तद्य एव॰ वेद भवत्यात्मना परास्य भ्रातृव्यो भवति ते ऽध्वृतो[10] ऽयमभूदित्यपाक्राम॰स्तदध्वरस्याध्वरत्वं तस्मादेकव्रतेन भवितव्यं[11] सकृद्ध्यग्निहोत्र॰ हूयते ॥ १० ॥

Vgl. 1, 2, 3. — Kâṭh. 23, 7; Kap. S. 36, 4.

॥ इति तृतीयकाण्ड[12] आग्नावैष्णवं[13] नाम षष्ठः[14] प्रपाठकः ॥

---

1) So H u. Bb; in B व्रेष्कहता॰; Kâṭh. 23, 6; 37, 13 u. 14 zeigt die Form व्रेष्क 2) H u. Bb शीर्यैति 3) Die Mss. त्वेतिति 4) So corrigirt; B ह्रादुनिहिताम॰; H u. Bb ह्रादुर्निहिताम॰ 5) So corrigirt; die Mss. तामेव 6) Die Mss. भूयो 7) So corrigirt; die Mss. तेन दीक्षंत 8) In den Mss. ist आसीत् ohne Accent. 9) Die ३ fehlt in den Mss. 10) So meine Vermuthung; die Mss. schreiben, wie es scheint तेऽवृतो 11) Die Mss. भवितव्य॰ vgl. oben Z. 8. 12) Die Mss. °काण्डे 13) Die Mss. °ष्णव 14) Die Mss. षष्टमः

अकूप्रꣳ वा इदमासीद्दिशो वा इमानप्रजानꣳस्तद्देवा अ३न्यो ऽन्यस्मिन्नैछꣳस्तन्नाविन्दꣳस्ते देवा अदितिमब्रुवꣳस्त्वया मुखेनेमा दिशः प्रजानामेति साब्रवीद्भागो मे ऽस्त्विति वृणीष्वेत्यब्रुवन्सो ऽब्रवीन्मद्देवत्यमेव प्रायणीयमसन्मद्देवत्यमुदयनीयं मामेवानुप्रायाथ मामनूदयाथेति स एष आदित्यश्चरुरदितिꣳ वा एतदनुप्रयन्त्यदितिमनूद्यन्ति ततो वा इमा दिशः प्राजानन्पथ्याꣳ यजतीमामेव तेन दिशः प्राजानन्यदग्निमिमां तेन यत्सोममिमां तेन यत्सवितारमिमां तेन यददितिमियꣳ वा अदितिरूर्ध्वा वा अस्या दिगूर्ध्वामेव तेन दिशं प्राजानꣳस्ततो वा अकल्पतां कूप्रस्य वै कूप्यै प्रायणीयस्तद्य एवꣳ विद्वान्प्रायणीयेन चरति कल्पते कल्पन्ते हास्मा ऋतवस्ततो वा इमा दिशो ऽन्वपश्यन्यत्पथ्याꣳ यजतीमामेव तेन दिशमन्वपश्यन्यदग्नीषोमौ चक्षुषी वा अग्नीषोमा अनु ताभ्याꣳ समपश्यन्यत्सवितारꣳ सवितृप्रसूता एवेमा दिशो ऽन्वपश्यन्यददितिमियꣳ वा अदितिरस्याꣳ वै प्रतिष्ठाय देवा यज्ञमतन्वत यत्पथ्याꣳ यजति वाग्वै पथ्या वाचमेवावरुन्द्धे यदग्निं देवतास्तेन यत्सोमꣳ यज्ञं तेन यत्सवितारं प्रसूत्यै यददितिमादित्या वा इमाः प्रजास्ता एवावरुद्ध ता आद्या अकृत यद्वै यज्ञस्यान्तर्यन्ति तच्छिद्रं तेन यज्ञः स्रवति तेन यजमानो ऽग्नये समवद्यत्यग्निर्वै समिष्टिरग्निः प्रतिष्ठितिः समिष्ट्या एव प्रतिष्ठित्या अग्निं प्रथमꣳ यजत्यग्निमुत्तमꣳ समानी वा एषा देवता पाङ्क्त्वाय पाङ्क्तो यज्ञो यावानेव यज्ञस्त-

1) So corrigirt; die Mss. betonen °प्रायाथ; es ist Conjunctiv des Präsens-Stammes अय 2) So corrigirt; die Mss. schreiben मामनूदयायेति; vgl. das Vorhergehende. 3) In den Mss. तेन ohne Accent. 4) कूप्यै in den Mss. ohne Accent; B वै म कप्यै 5) Bb यज्ञस्यांतर्यति; B यज्ञस्यांतर्यति 6) Die Mss. तच्छिद्र

मालब्धᵛ स्वस्तिᵕ यजति यज्ञस्य स्वस्त्यैᵛ पथ्याᵕ यजतिᵛ वाग्वै पथ्याᵛ वाचमेवानुप्रयन्तिᵛ तामुत्तमामुदयनीये यजतिᵛ वाग्वै पथ्याᵛ वाचमेवानूद्यन्तिᵛ मरुत्वतीः पथ्याया ऋचोᵛ भवन्तिᵛ देवविशा वै मरुतोᵛ देवविशामेवाचीकॢपत्ताᵕ शान्तां कॢप्तां मनुष्यविशा[4] अनुकल्पन्तेᵛ स्तेनभविष्णुर्हविर्भवति[5] ॥ १ ॥

Vgl. TS 6, 1, 5 (prâyaṇîyâ); Kâṭh. 23, 8 u. 9; Kap. S. 36, 5—6.

जुषाणोनान्य आज्यभागा इज्यन्तेᵛ ऽथाच ऋचोभयतो यजति दृढिम्ने ऽशिथिरत्वायᵛ सप्तदश सामिधेनीः काᵓ३र्याः ᵛ पञ्च ऋतवोᵛ द्वादश मासाᵛ एष सᵕवत्सरः ᵛ सᵕवत्सरादेवाधि यज्ञमुखं प्रतनुतेᵛ तदाहुः ᵛ पञ्चदश सामिधेनीः काᵓ३र्याᵛ न सप्तदशᵛ सᵕवत्सरीयस्यैवायनस्यᵛ सप्तदश कार्याः सᵕवत्सरस्या ऋद्धा इतिᵛ तन्न सूर्क्ष्यᵕ ᵛ सप्तदशैव कार्याः ᵛ प्रयाजवत्स्यात्प्रायणीयमननुयाजमनुयाजवत्स्यादुदयनीयम-प्रयाजमुभयतो वा एतत्प्रयाजानुयाजा यज्ञमभिसंधीयते समानो ᵓ३ह्येष यज्ञोᵛ निष्कार्षं च मेक्षणं च निदधातिᵛ तेन यज्ञः संततᵛ आत्मा वै प्रयाजाः ᵛ प्रयाजानुयाजा देवक्षेचᵕ ᵛ यज्ञो देवक्षेचमाक्रममाणः प्रजामन्तरियाद्यदनुयाजानन्तरियात्प्रयाजवत्स्यात्प्रायणीयमनुयाजवदनुयाजवत्स्यादुदयनीयं प्रयाजवत्पर्यसि प्रायणीयः स्यात्पयस्युदयनीयोᵛ ऽपाᵕ वा एतऊर्ग्यदुक्रियमपामेवं ऊर्जमवरुन्द्धेᵛ पशवो वै ऊर्क्पयः पशूनेवावरुन्द्धेᵛ ऽथो प्रायणे च वावास्मा एतदुदयने च पशून्दधात्यादित्यः प्रायणीयः स्यादादित्य उदयनीयᵛ इयᵕ वा अदितिरस्याᵕ वा

1) Die Mss. °मेवानूवंति 2) B रचो 3) In den Mss. ताᵕ ohne Accent. 4) So H u. Bb, nur ohne Accent; B मानुष्यविशा; cf. TS 6, 1, 5, 3; Kâṭh. 23, 8 देवविशामेव क्लृपयति तां कल्पमाना मनुष्यविशानुकल्पते 5) So die Mss. 6) Die ३ fehlt in den Mss. 7) So corrigirt; die Mss. प्रजामंतरीयाद्यदनुयाजानंतरीयात्

एतद्यज्ञमुखेन प्रतितिष्ठत्यस्यामुपरिष्टाद्यच्च वै यज्ञस्यार्धे[1] ऽग्ने. समृद्धं क्रियते क्रियमाणं क्रियमाण॰ ह वा अस्य समृध्यते स॰स्थाप्यं प्रायणीय॰ यज्ञस्य समृद्ध्यै याः प्रायणीये ऽनुवा३क्यास्ता उदयनीये याज्याः स्युर्या उदयनीये ऽनुवा३क्यास्ताः प्रायणीये याज्याः स्युः पथः प्रतिप्रज्ञात्या अथो अनुसंतत्यै[2] यदतो ऽन्यथा कुर्युश्छम्बट्कुर्युः ॥ २ ॥

Vgl. TS 6, 1, 5 (prâyaṇîyâ); Kâṭh. 23, 9; Kap. S. 36, 6.

त्येवेदमहꣳ[1] रक्षसो ग्रीवा अपिकृन्तामीत्याह रक्षसां ध्रराये रक्षसामन्तरित्या इदमहꣳ सोमे समानो यो ऽसमानो ऽरातीयति[2] तस्य ग्रीवा अपिकृन्तामीति समानो वा ह्यसमानो वारातीयति[3] सर्वमेवैतया पर्यापत्प्राणा वा उपरवाः शिरो हविर्धानꣳ शीर्षन्वा इमे प्राणास्तस्माद्धविर्धाने ऽन्तर्वा इमे शीर्षन्प्राणास्तस्मादन्तश्चत्वारो वा इमे शीर्षन्प्राणास्तस्माच्चत्वारः संतृणाः[4] परः संतृणा[5] हि परः प्राणा विधृता उपरिष्टाद्विधृता ३हीमे उपरिष्टात्प्राणाः पूर्वार्धो वा इमे मुखस्य[6] प्राणा एतत्खलु[7] वै हविर्धानस्य पूर्वार्धꣳ यद्दक्षिणꣳ हविर्धानं तस्माद्दक्षिणे हविर्धाने बृहन्नसि बृहद्रायाः[8] इति देवा ३ह्येव[9] बृहद्बृहतीमिन्द्राय वाचꣳ वदेत्यैन्द्रो[10] हि यज्ञो रक्षोहणꣳ वलगहनमित्याह रक्षसां ध्रराये रक्षसामन्तरित्ये वैष्णवीमिति विष्णुर्हि यज्ञो ऽसुरा वा एतान्वलगान्देवेभ्यः प्राणेषु न्यखनꣳस्तान्बाहुमात्रे ऽन्वविन्दꣳस्तस्माद्बाहुमात्रं खेयꣳ यद्वावं कृत्वा यज्ञशफꣳ यदभिचरितं तदेतदुद्वपति प्राणा वा उपरवा यदवसिञ्चति तस्मादिमे उदन्वन्तः प्राणाः प्राणा वा उपरवा यदवस्तृणाति तस्मादिमे लोमशाः प्राणा अथ यदवसिञ्चत्यव च स्तृणाति मस्तिष्को[11] वा एष क्रियते हनू अधिषवणे शिरो हविर्धानꣳ शीर्षन्वा इमे हनू तस्माद्धविर्धाने ऽन्तर्वा[12] इमे शीर्षन्हनू तस्मादन्तरिमे वा एते यत्संतृन्द्यादिमे एव संतृन्द्यात्तत्सं-

---

1) So corrigirt; die Mss. betonen °त्वेवेदम° 2) So corrigirt; Bb रातीयती; desgl. B, ohne Accent; H रातीपती 3) So corrigirt; H u. Bb रातीपती; B रातीयती 4) So corrigirt; die Mss. संतृणाः; cf. Çat. Br. 3, 5, 4, 14. 5) So corrigirt; die Mss. संहृणा 6) B सुखस्य 7) In den Mss. खलु ohne Accent. 8) cf. 1, 2, 10. 9) So meine Correctur; die Mss. bloss ह्यव 10) So meine Correctur; die Mss. वदैत्यैन्द्रो 11) Die Mss. schreiben मस्तिःको 12) In den Mss. वा ohne Accent.

पात्र एवं द्व्यङ्गुलमन्तरा कार्यं द्व्यङ्गुलꣳ ३हीदमन्तरा वै नासाकेव शिरो हविर्धानं पृष्ठमाग्नीध्रमुदरꣳ सदः प्राङ् हि यज्ञः सꣳहितो हनू अधिषवणे जिह्वाधिषवणं ग्रावाणो दन्ता मुखतो वा एतत्प्रजापतेः सोमं पिबन्तीन्द्रो वै वृत्रमहन्स इमां प्राविशत्ते देवताः प्रैषमैछꣳस्तन्नाविदꣳस्ते भूतान्युपारवन्त यो नो ऽधिपतिरभूत्तन्न विन्दामा इति तदुपरवाणामुपरवत्वꣳ यत्तदुपारवन्त तच्चतुर्धावस्तादेवैछन्नेकधा परो ऽन्वविन्दꣳस्तस्माच्चतुर्धावस्तादेकधा परो यदुपरवाननुमृशतीन्द्रियस्यावरुद्ध्यै ॥ ८ ॥

Vgl. 1, 2, 10. — TS 6, 2, 10 (sadaḥ) u. 11 (uparavâḥ); Kâṭh. 25, 9; Kap. S. 40, 2.

पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वेति प्रोक्षत्येषा ३ह्येषां लोकानाꣳ विधृत्यै मीयते चिः प्रोक्षति चिषत्या हि देवा अथो चयो वा इमे लोका एभ्य एवैनां लोकेभ्यः प्रौक्षीदन्नꣳ वै यवा ऊर्गुदुम्बरो यद्यवमतीभिः प्रोक्षत्यूर्जो वा एतदन्नꣳ समर्धयत्यृक्षꣳ वा अमेध्यमापो हविर्यदवसिञ्चति मेध्यमेवैनत्करोत्यृक्षꣳ वा अमेध्यꣳ यदवस्तृणाति मेध्यमेवैनत्करोति पितृदेव३त्यꣳ वै निखातममेध्यमन्यदेवत्यमस्याः खलु वा इमा उत्तमार्धा ओषधयो यदवस्तृणात्यस्या एवैनामुत्तमार्धा मिनोत्यनिखातेवाभूदन्नꣳ वै यवा ऊर्गुदुम्बरो यद्यवमवास्यत्यन्ने वा एतदूर्जं दधाति न ह्यन्नमृत ऊर्जो धिनोति नो ह्यूर्गृते

1) So die Mss.; Kâṭh. 25, 9 द्व्यङ्गुलमन्तराधिषवणे भवति तस्मादियमन्तरा हनू रासाकेव; Kap. S. 40, 2 तस्मादिदमंतराग्निके च oder °ग्निके च 2) Die Mss. °हत्स 3) Die Mss. देवाताः 4) Die Mss. °रंवत; auch Bb eigentlich so; dann corrigirt in °रवंत 5) H तंचतु°; Bb eigentlich ebenso, dann corrigirt in तंच्चतु°; B तं चतु° 6) So meine Correctur; H u. Bb मोचत्वेषा°; B सोचत्वेषा° 7) Die Mss. °मन्यदेवत्वम° 8) So B, ohne Accent; in H u. Bb °मार्द्धा 9) So meine Correctur; H u. Bb ह्यूर्धृते; B ह्यूर्धृते

ऽन्वाङ्निनोति तानस्त्वा मारुतो निंहन्त्विति मनो वै तानः प्राणा मारुता मित्रावरुणौ ध्रुवेण धर्मणेति मित्रमेवैनां दाधार वरुणः कल्पयति विधृत्यै च खलु वा एषां प्रजानां क्लृप्त्यै च मीयते मित्रावरुणौ वै देवानां धर्मधारयौ[1] दैव्यं[2] वा एतद्धममदीधरता यदौदुम्बरी[3] ब्रह्मवनिं त्वा क्षत्रवनिं पर्यूहामीत्याशीरेवैषा ब्रह्म हꣳह क्षत्रं हꣳहेत्याशिष[4] एवैष[5] परिग्रहो घृतेन द्यावापृथिवी आपृणेति घृतेनैव द्यावापृथिवी व्युनत्त्युदꣳ वै सदा ऊर्गुदुम्बरो यदौदुम्बरीयूर्ज्ञꣳ वा एतन्मध्यत आत्मनो धत्ते प्रजानां च प्रजापतेर्वा एतदुदꣳ यत्सदः प्राजापत्य उन्नाता तस्मादुन्नातान्वारभते यजमानो वा[6] औदुम्बरी वर्षिष्ठा काऽर्यो वर्ष्मैनꣳ समानानां गमयति विश्वजनस्य छायासीति छदिराभनिदधाति गोचान्नोचाङ्गि प्रसर्पेन्युदरꣳ वै सदो यदन्येनान्येन संमिनोति तस्मादुदरमन्येनान्येनामेन[7] संतत उदरꣳ वै सदो यदनूचीनं मिनुयात्पराचीनं जग्धमतीयादर्थ[8] यत्तिरश्चीनं मिनोति तस्माज्जग्धꣳ सर्वाण्यङ्गान्यनुवेति प्रजा वा एतत्समीचीनं मिनोति समीचीरेनं प्रजा अभिसमावर्तते सꣳयात इव स[9] भवति समानꣳ सांकाशिनं[10] कार्यꣳ समाना ३हीमे प्राणा यं द्विष्यात्तस्याक्ष्णया मिनुयात्प्राणानस्य मोहयति प्रमायुको भवति यदि कामयेत[11] वर्षेत्पर्जन्या इति नोचैः सदो[12] मिनुयाद्वृष्टिमेव नियच्छति

1) So meine Vermuthung; die Mss. schreiben धर्मधारयौ; cf. Pâ. 3, 1, 138. 2) So B, aber ohne Accent; H u. Bb दैवꣳ 3) So H u. Bb; in B °बरीं 4) So corrigirt; die Mss. हृꣳहेत्य° 5) So corrigirt; die Mss. एवैष 6) So die Mss. 7) So B, ohne Accent; H u. Bb °नामेन; dürfte hierin das von einigen Grammatikern überlieferte ग्रम oder ग्राम „Krankheit" stecken? 8) So corrigirt; die Mss. जग्धंम°; vgl. das Folgende. 9) So corrigirt; die Mss. उं 10) So H u. Bb; in B साकाशिनं 11) B कामयते 12) Von hier bis zum folgenden सदो in H u. Bb fehlend; die Accente mussten daher ergänzt werden.

यदि कामयेत न वर्षेत्पर्जन्या इत्युच्चैः[1] सदो मिनुयाद् वृष्टिमेवापाग्रहीन्नवछदिरग्निष्टोमे स्यात्तेजसा चिवृता संमितं पञ्चदशछदिरुक्थ्ये[2] पञ्चदशेन वज्रेण संमितꣳ सप्तदशछदिरतिरात्रे सप्तदशो वै प्रजापतिः प्राजापत्या रात्रिरानुष्टुभी यज्ञक्रतूनामेवैषा व्यावृत्तिः प्राचीनवꣳशꣳ हविर्धानं मिनोत्यूर्ध्वा हि द्यौः प्राचीनवꣳशमाग्नीध्रमूर्ध्वꣳ ३ह्यन्तरिक्षं[3] तिरश्चीनवꣳशꣳ सदस्तिरश्ची[4] ३हीयꣳ यजुषा हविर्धानं मिनोति निरुक्ता हि द्यौर्यजुषा सदो निरुक्ता ३हीयमयजुषाग्नीध्रमनिरुक्तमिव ३ह्यन्तरिक्षमर्धमाग्नीध्रस्यान्तर्वेदि मिनोत्यर्धं बहिर्वे ३द्यर्धꣳ ३ह्यन्तरिक्षस्यास्मिंल्लो ३के[5] ऽर्धममुष्मिन् ॥ ९ ॥

Vgl. 1, 2, 11. — TS 6, 2, 11 (uparavâḥ); Kâṭh. 25, 10; Kap. 40, 3.

सुवाङ्भ्राडङ्कारे[6] बभ्रारा इत्येते वै देवानाꣳ सोमरक्षय एतेभ्यो वा अधि छन्दाꣳसि सोममाहरꣳस्ते सोमपीथेन व्यार्ध्यत त एतानि द्वितीयानि नामान्यधत्तमङ्गलेछायै[7] सोमपीथो[8] ना उपनमादिति[9] तस्मादेते द्विनामानस्ते वा अन्वायꣳस्ते न प्राप्नुवꣳस्तस्मादेते ऽतिहाय षट्क्रियन्ते[10] न हि प्राप्नुवꣳस्तेषाꣳ वा एष लोको यावदग्नि न्युप्यते तद्यो ऽविद्वानाक्रामत्यार्त्तिमार्छत्यथ य एवꣳ विद्वानाक्रामति न सद ३स्यामार्त्तिमार्छति तेषाꣳ वा एष भागो यद्ग्राघार्यन्ते त एवास्मै[11] तेनाभीष्टाः प्रीता भवन्ति यज्ञमुखꣳ वै पवमानो यत्पवमाने

1) So meine Correctur; die einzige Hdschr., in welcher sich diese Partie findet, B, liest: इति नीचैः त्युच्चैः cf. Kâṭh. 25, 10 यदि कामयेत न वर्षेदित्युच्चैरिव हि द्यौरवर्षिष्यन्ती भवति 2) So B, ohne Accent.; in H u. Bb °रुक्थ्ये 3) B °तारिचे 4) So corrigirt; in den Mss. तिरश्ची ohne Accent. 5) Die ३ vor ह्यंत° fehlt in den Mss. 6) So corrigirt; die Mss. सुवाङ् भ्राडधारे; s. 1, 2, 5; 3, 7, 7. 7) Mir ganz unverständlich; so Bb; in H °धतमंगलेछाये; B धत्तमंगछाये 8) So corrigirt; die Mss. सौमपीथो 9) So B, ohne Accent; H u. Bb उनमा° 10) So corrigirt; die Mss. क्रीयंते 11) H u. Bb एवास्मै

स्तु३ते ३मयो विहियन्ते यज्ञमुखादेवाधिविहियन्ते जम्भो वै नामासुर आसीत्स यज्ञमगिरत्स[1] आग्नीध्रं न प्राप्नोत्तमाग्नीध्रात्पुनर्व्यूरुजदेत[2]द्वै जीवं तस्मादाग्नीध्राद्विहियन्ते दक्षिणतो वै देवानसुरा यज्ञमजय्यꣳस्ते उदञ्चो आग्नीध्रꣳ समातिष्ठꣳस्तमाग्नीध्रात्पुनरभ्यूजयन्नेतद्वा[3] अनभिजितं तस्मादाग्नीध्राद्विहियन्त एतत्प्रति वै देवानसुरा यज्ञमजय्यꣳस्ते आग्नीध्रादधि बर्हिष्पवमानेन[4] यज्ञमभिजित्याग्नीनाधाय बर्हिरस्तृणत पराजिज्ञाना वा एतत्सर्पन्ति यद्बर्हिष्पवमानꣳ[6] स्तोषन्तः सर्पन्ति यद्बर्हिष्पवमाने[7] स्तुत आह[8] ॥ अग्नीदग्नीन्विहर बर्हिः स्तृणाति ॥ इत्याग्नीध्राद्वा एतदधि बर्हिष्पवमानेन यज्ञमभिजित्याग्नीनाधाय बर्हिः स्तृणते ऽव वा एतर्हि यज्ञो यवास्तुत स्तोत्रꣳ यदेव यज्ञस्तदभिपर्यावृत्य जुहोति शुक्रवती वै पूर्वं सवने अशुक्रं तृतीयꣳ सवनꣳ यज्ज्योतिष्मतीस्तृतीयसवने[9] व्याघारयन्ति तेन तृतीयसवनꣳ शुक्रवत्सꣳवत्सरो वा अग्निष्टोमस्तस्य वा एतास्त३न्वो यद्विष्णयास्ता[10] वा अस्यैतत्समुद्वर्षयित्वा[11] ज्योतिष्मतीः कृत्वाथाग्निष्टोमेन स्तुवते सꣳवत्सरो वा अग्निष्टोमो द्वादश मासाः सꣳवत्सरो यत्प्राचीराहुतयो हूयन्ते[12] प्रत्यञ्चो धिष्ण्या[13] व्याघार्यन्ते सꣳवत्सरस्य विधृत्या उभयतो वै देवानसुराः परीयत्ता[14] आसन्पुरस्तादन्ये पश्चादन्ये यत्प्राचीराहुतयो हूयन्ते ये पुरस्तादासꣳस्तानेनापानुदन्त यत्प्रत्यञ्चो धिष्ण्या व्या-

---

1) So corrigirt; die Mss. यज्ञमंगिरत् 2) So ist wohl die Schreibung der Mss. zu bessern; H u. Bb तमाग्नीध्रापुरनर्व्यूरुजदे°; B तमाग्नीध्रापुरनर्व्यरुजदे° 3) Die Mss. तमाग्नीध्रात् 4) Die Mss. schreiben बर्हिः पव° 5) In den Mss. °मभिजित्या° ohne Accent. 6) Die Mss. बर्हिः पवमानꣳ 7) Die Mss. बर्हिः पवमाने 8) So corrigirt; in den Mss. आह ohne Accent. 9) So corrigirt; B यज्ज्योतिष्मतिस्तृतीयसवने; H यज्ज्योतिष्मतिसृतीयं सवनें; B यज्ज्योतिष्मति तृतीयं सवने 10) So corrigirt; H u. Bb यद्विष्या°; desgl. B, ohne Accent. 11) Die Mss. betonen समुद्वर्षयित्वा 12) B हूयंते 13) So corrigirt; die Mss. धिष्या 14) So B, ohne Accent; in H u. Bb परीयता

घार्यन्ते ऽ ये पश्वादास॰स्ता॰स्तेनापानुदन्त[1] ऽ तद्भ्रातृव्यस्य वा एष विनोदो[2] ऽध्वर्युणा वै यज्ञो विधृत ऽ इदमिव वा एतद्यज्ञस्य यद्विष्णया[3] ऽ यद्ध्वर्युः प्रत्यङ् धिष्ण्यानतीयात्प्राणात्संकर्षेत[4] ऽ प्रमायुकः स्याद्यद्यतीयाद्यज्ञपरुष्यतीयादैन्द्रीमनुब्रूयादैन्द्र॰ हि सदः ऽ स्वयैवैनद्देवतयोपचरत्यात्मनो[5] ऽहि॰साये ऽ प्राचीन॰ वै धिष्ण्येभ्यो ऽध्वर्योर्लोको ऽ यद्ध्वर्युः प्रत्यङ् धिष्ण्यानतीयादन्यजनतास्य क्षेत्रमभ्यारोहुका[6] स्या॰३न्न्यन्य[7] उप्यन्ते[8] ऽ नान्ये[9] ऽ तदेषां मिथुनं प्रजायै[10] ऽ निरुक्ता अन्ये ऽ अनिरुक्ता[11] अन्ये ऽ ये निरुक्ता३स्ते ऽस्मै लोकाय ऽ ये ऽनिरुक्ता३स्ते ऽमुष्मै क्षयाय ऽ यथा वा इदं मेखलां पर्यस्यते मेध्यस्य चामेध्यस्य च विधृत्या ऽ एव॰ वा एते न्युप्यन्ते यज्ञस्य विधृत्यै ऽ यत्प्राचीनं धिष्ण्येभ्यस्तद्देवानां॰ ऽ यत्प्रतीचीनं तन्मनुष्याणां ऽ तस्मात्सोमं पिबते[12] प्राञ्चो धिष्ण्या नातिसृपे ऽ जन॰ ह्येति ऽ देवलोकमभ्यारोहति ऽ चात्वालाद्विहियन्त ऽ एष वा अग्नीना॰ योनिः ऽ स्वादेव योनेर्विहियन्ते[13] ऽ स्कन्नत्वाय ऽ तेषा॰ वा एतदभ्यवायनं[14] चोदयनं च ऽ यदन्तरा चात्वालं चाग्नीध्रं चैतद्वै यज्ञस्य तीर्थं ऽ तस्मादेतेन संचरति ऽ तेन यो ऽविद्वान्संचरत्यार्तिमार्छे-
त्यथ[15] य एव॰ विद्वान्संचरति[16] न सद३स्यामार्तिमार्छति ॥ १० ॥

Vgl. TS 6, 3, 1 (dhishṇiyâḥ); Kâṭh. 26, 1; Kap. S. 40, 4.

॥ इत्युपरिकाण्डे[17] असुराणां नाम अष्टमः प्रपाठकः समाप्तः ॥

---

1) In den Mss. °दास॰ ohne Accent. 2) So corrigirt; in Bb ohne Accent; in H विनोदो 3) So B, ohne Accent; Bb यज्ञिष्णा; H यज्ञिष्या 4) H u. Bb धिष्णान° 5) B देवतयापचर° 6) So B, ohne Accent; in H u. Bb क्षेत्रम° 7) Die Mss. schreiben स्यांऽन्यन्य 8) H u. Bb उप्यंते 9) Die Mss. schreiben नान्ये 10) Die Mss. betonen प्रजाये 11) Die Mss. betonen निरुक्ता 12) H u. Bb पिबत 13) So corrigirt; die Mss. योने विहियंते 14) So corrigirt; die Mss. °वायन 15) So Bb; in H विद्वांन्सचं°; desgl. B, ohne Accent. 16) So corrigirt; d. Mss. विद्वान्संचं°; s. Einl. z. I. Th. p. XLIII. 17) So corrigirt; in Bb fehlt das इति; in H u. B इति उपरि°

यज्ञो वा एष संक्रामन्नेति प्रायणीयादध्यातिथ्यमातिथ्यादध्युपसदः सं उपसद्भ्यो[1] ऽधि प्राङ् प्रणीयते यदगृहीत्वाज्यानि प्रणयेयुरपगीत यजमानमथ यद्गृहीत्वाज्यानि प्रणयन्ति यज्ञं वा एतद्यजमानो ऽन्वारभते प्राञ्चः सोमेन प्रयन्ति प्राची पत्नी पूर्वमग्निमभ्युदैति[2] सोमेन वा एतद्राज्ञाभिजयन्तो यन्ति यस्य[3] वै मनुष्यराजो गृहमागच्छति तस्य वै तर्हि तदैश्वर्यं यदा वै स ततः प्रायते ऽथ तेषां तत्पुनर्भवति तस्मादाहुरपिव्रता इत्यपि ह्येषां तस्मिन्व्रतं सोमो वा एतद्राजा गृहं प्राप तस्य वै तर्हि तदैश्वर्यं यदा वै स ततः प्रच्यवते ऽथ स तत्तेभ्यो विसृजते तद्विसर्जनानां वै विसर्जनत्वं त्वं सोम तनूकृद्भ्य इति यदेव तनूकृतं चान्यकृतं चैनस्तदेतेनावयजति द्वाभ्यां गार्हपत्ये जुहोति द्विपाद्यजमानः प्रतिष्ठित्या आग्नेय्याग्नीध्रे ऽन्तरिक्षमेव प्रीणात्यन्यदेव रूपमकर्वैष्णव्या हविर्धाने ऽद एव प्रीणाति विष्णुर्वै यज्ञो विष्णुमेव यज्ञमकरसुरा वा एतं देवानामादित्सन्त तं देवा अग्नौ कृत्वामुं लोकमहरन्यदग्नुमत्या जुहोत्यग्नुमेवैनं कृत्वामुं लोकं हरन्ति सर्वेभ्यो वा एष भूतेभ्य आहियते यत्सौम्या जुहोति मनुष्येभ्यस्तेनाहियते यदग्नुमत्या पितृभ्यस्तेन यदाग्नेय्या देवेभ्यस्तेन यद्वैष्णव्या यज्ञाय तेन सर्वा वा एतत्प्रजा वरुणो गृह्णाति यत्सौम्या जुहोति

---

1) So corrigirt; die Mss. उपसद्भ्यो 2) So H u. Bb; in B °मभ्युदैवते (doch reicht das Zeichen des ए im Ms. innormal bis an den oberen Theil des व hinüber). 3) B यस्यै 4) So schreiben hier alle vorliegenden Mss. (nur ohne Accent); aber 1, 2, 13 hatten die alten Mss. तनूकृद्भ्यो, was wir darum dort in den Text nehmen mussten; H, Bb u. B lasen auch dort तनु°; im Hinblick auf die älteren Mss. für 1, 2, 13 möchte man auch in unserer Stelle तनूकृद्भ्या lesen; es würde daraus aber wohl die Aenderung des gleich folgenden तनूकृतं in तनूकृतं sich ergeben, was uns hier doch zuweit von den vorliegenden Mss. abführt. 5) So die Mss. 6) So B, ohne Accent; H u. Bb यज्ञपतेन

मनु३ष्या॰स्तेन वरुणान्मुञ्चति यदग्नुमत्या पितृ॰स्तेन यदाग्नेय्या दे-
वा॰स्तेन यद्वैष्णव्या यज्ञं तेन सर्वा वा एतत्प्रजा वरुणान्मुञ्चत्यग्नि-
ना वै मुखेन देवा इमांल्लोकानभ्यूजनयन्गार्हपत्येनामुं लोकमाग्नीध्रे-
णान्तरिक्षमाहवनीयेनामुं लोकं तस्मात्त्रेधा अग्नया आधीयन्त एषां
लोकानामभिजित्या इन्द्राग्नी वा अपरा अग्नी अग्निरपरा इन्द्रः पूर्वः 5
प्रजापतिराहवनीयस्तस्मादेष उपोप्ने[1] साद्यता उत्तरो हि पिता पु-
त्रादुत्तरो भ्रातृव्याद्भवति य एव॰ वेदाग्नेय प्रणयेदनश्रीः श्रिय एव
परिगृहीत्यै सौम्यो वै ब्राह्मणो देवतया स्वयैव देवतया प्रजा वै
पशवो ऽ॰शवो रुद्र आहवनीयो यदग्नेय प्रणयेद्रुद्रायास्य पशूनपि-
दध्यात्पश्चादेव प्राङ् प्रणीयः पशूनां गोपीथायो३र्वन्तरिक्ष॰ ३वी- 10
हीत्यन्तरिक्षदेव३त्यो वा एष एतर्हि प्रच्युत इतो ऽप्राप्तो[2] ऽमुचादि-
त्याः सदा आसीदित्यादित्यो वै यज्ञो ऽदितिः सोमस्य योनिः स्व
एवैन॰ योनौ दधाति देव सवितरेष ते सोमा इति मनुष्येषु वा एष
पुराभूद्देवेभ्य एवैन॰ संप्रादादेतत्त्वं देव सोम देवानुपावृता[3] इति
देवो ३ह्येष देवानुपावर्तत इदमहं मनुष्यानसहा[4] रायस्पोषेण प्रजया[5] 15
चोपावर्तता इत्याशिषमेवाशास्ते नमो देवेभ्यः स्वधा पितृभ्या इति
नमस्कारो देवाना॰ स्वधाकारः पितृणां निर्वरुणस्य पाशादमुक्षीति
वरुणपाशादेव निर्मुच्यत आत्मनो ऽहि॰साये स्वरभिव्यृक्शमिति[6]
यज्ञो वै स्वर्यज्ञमेवाभिविपश्यति ज्योतिर्वैश्वानरमित्यसौ वा आ-
दित्यो ज्योतिर्वैश्वानरमग्निना वा एष तन्वृ॰ विपरिधत्ते यो दीक्षते 20

---

1) H u. Bb so, oder उपोत्ये; B उपोप्नो 2) So corr.; die Mss. इतो प्राप्नो! Kap. S. 40, 6 प्रच्युतमितो प्राप्त सदस्त्वं सोमेति; s. 3, 9, 7 u. 3, 10, 1; 3, 7, 8. 3) B °पावृति 4) B °ष्यात्सह; H u. Bb ष्ट्वा सह 5) H प्रजाया; Bb प्रजायां; desgl. B, ohne Accent. 6) So corrigirt; H स्वरभिर्व्रृच्यमिति; Bb स्वरभिर्व्रृच्यमिति; desgl. B, ohne Accent.

ऽग्नी रुद्रो[1] यदग्निना पुनर्यथायथं त३न्वं नः[2] विपरिदधीत रुद्र एनमभिमानुकः स्याद्यदाहाग्ने व्रतपते या तव तनूर्मय्यभूदेषा[3] सा त्वय्ये व्रतपते या मम तनूस्त्वय्यभूदियं[4] सा मयीत्यग्निना वा एतत्पुनर्यथायथं तन्वं विपरिधत्त आत्मनो ऽहिंसाये ॥ १ ॥

Vgl. 1, 2, 13. — TS 6, 3, 2 (agnîshomapraṇayanam); Kâṭh. 26, 2; Kap. S. 40, 6.

न यूपमछैष्यता[5] होत३व्यं[6] न हि दीक्षितस्याग्नौ जुह्वति वैष्णवीमनूच्याछैत्यो वैष्णवो हि यूपस्तदाहुर्हौतव्यूमेव परुष्येव जुहोत्यायतना इति तन्न सूर्ष्यं यूपस्यैवान्ते ऽग्निं मथित्वाथ होत३व्यं तत्सिदुभयमकर्जुहोत्याह[7] न दीक्षितस्याग्नौ जुहोत्यत्यन्यानगां[8] नान्यानुपागामित्यती३ह्यन्यानेति नान्यानुपैत्यवीक्[10] त्वा परेभ्यः परो ऽवरेभ्यो ऽविदमित्यवाग्घ्येनं[11] परेभ्यः परो ऽवरेभ्यो विन्दति तं त्वा जुषामहे देवयज्याया इत्येत३ह्येष[12] जुषते जुष्टं विष्णवा इति यज्ञायैवैनं जुष्टं विष्णवे ऽकर्विष्णवे त्वेति[13] पर्यनक्ति हविर्भूतमेवैनं वृश्चत्यथो अभिघृतमेव य इत्थं[14] वेत्थंबाहुर्णो[15] मेधा३त्सो ऽपावृत्तो य ऋजुरूर्ध्वशल्कः स वाव मेधमुपस्थितो य ऋजुरुपरिष्टादुपावनतो यो ऽधिशाख्यो[16] योनिः स[17] यो वा अस्या अधिजायते स योनिमानियं हि वनस्पतीनां योनिः परुषि व्र३श्चो[18] यदपरुषि[19] वृश्चेद्यथा

1) So corrigirt; die Mss. चिद्रो 2) Die Mss. त्वन्न 3) So corrigirt; die Mss. मर्य्यभू॰ 4) Die Mss. त्वय्यभू॰ 5) So corrigirt; H u. Bb °मछैष्यत; desgl. B, ohne Accent; Kâṭh. 26, 3 न दीक्षितेन होतव्यं. 6) So corrigirt; B ३व्य; H u. Bb ३व्वे 7) So die Mss. 8) Die Mss. °नंगान्ना 9) So die Mss. 10) So corrigirt; die Mss. नान्यामु॰ 11) Die Mss. °र्वाक् ह्येनं 12) Die ३ fehlt in den Mss. 13) So corrigirt. H u. Bb त्वति; B त्विति 14) In den Mss. wie es scheint इक्ष॰ वेक्ष geschrieben; 15) H u. Bb वाहुर्णो; B बाहुर्णो 16) So corrigirt; die Mss. धिशाख्या 17) So corrigirt; die Mss. betonen योनिः स 18) Die Mss. व्र३ख्यो 19) H u. Bb °पुरुषि

परुष्यवकृत्तमेव[1] स्यादनक्षसङ्ग स्थाणुरुज्शिर्षो यदक्षसङ्ग स्थाणुमुज्शिर्षेद्वज्रो भूत्वा यजमानस्य पशून्प्रतिहन्यात्पञ्चारत्निः कार्यः षड्भ्यां संमितः षडरत्निः कार्यो ऋतुभिः संमितः सप्तारत्निः कार्यः सप्तपदया शक्वर्या संमितो ऽष्टारत्निः कार्यो गायत्र्या संमितो नवारत्निः का३र्यस्तेजसा चिवृता संमितो दशारत्निः कार्यो विराजा संमिता एकादशारत्निः कार्यः चिष्टुभा संमितो द्वादशारत्निः का३र्यो जगत्या संमितस्त्रयोदशारत्निः कार्यस्त्रयोदशेन प्रजापतिना संमितः पञ्चदशारत्निः कार्यः पञ्चदशेन वज्रेण संमितः सप्तदशारत्निः कार्यः सप्तदशेन प्रजापतिना संमिता एकवि॰शत्यरत्निः[2] कार्य एकवि॰शेन संमितस्त्रयोवि॰शत्यरत्निः कार्यस्त्रयोवि॰शेन संमितः पञ्चवि॰शत्यरत्निः कार्यः पञ्चवि॰शेन संमितः सप्तवि॰शत्यरत्निः कार्यस्त्रिणवेन संमिता एकचि॰शदरत्निः कार्य एकचि॰शेन संमितस्त्रयस्त्रि॰शदरत्निः कार्यस्त्रयस्त्रि॰शेन संमितो यावान्पुरुष ऊर्ध्वबाहुस्तावान्का३र्यो यदि वा यावान्मृत्थे तिष्ठन्यावान्वै पुरुष ऊर्ध्वबाहुः सैतस्यावमा मात्रा[3] ततो वर्षीयान्वर्षीयानेव का३र्यो यो बहुशाखो बहुपर्णः सु कार्यो भूम्न एव भूमान॰ ३ह्येष एतस्य जयति भूमानमस्य गृह्णाति भूमानमस्य पशवो ऽनूपतिष्ठन्ते ॥ २ ॥

Vgl. 1, 2, 14. — TS 6, 3, 3 (yûpakhaṇḍanam); Kâṭh. 26, 3 u. 4; Kap. S. 41, 1 u. 2.

ओषधे त्रायस्वैनमित्याह त्रात्या एव स्वधिते मैन॰ हि॰सीरिति वज्रो वै स्वधितिर्वज्रादेवास्मा एतदन्तर्दधात्यहि॰साये यो वा एतस्याभिहतस्याग्रे[4] शकलः परापतति तमस्य तेजो ऽन्वपक्रामति

1) H °पुरुष्य° 2) Die Mss. °वि॰शतत्यरत्निः 3) Die Mss. मात्राथ 4) °स्याग्रे in den Mss. ohne Accent.

यत्तं पुनराहरति सतेजस्त्वाय[1] प्राञ्चं प्रहापयति मेधमेवैनमनुपर्यावर्तयति वज्रो वै यूपस्तस्माद्वा इमे लोका नीयमाणाद्बिभ्यतीश्वरा३ह्येषो ऽशान्तो नीयमाण[2] इमांल्लोकान्हिंसितोर्यदाह दिवमग्रेण मा हिंसीरन्तरिक्षं मध्येन पृथिव्याः संभव भ्राजं गच्छेति शमयत्येव शान्त एव नीयत एषां लोकानामहिंसायै सर्वस्य वा एष मिश्रो यो दीक्षितः स एतमहिंसीदीश्वरा वनस्पतयो ऽपिधिष्णयं भविता यदाव्रश्चने जुहोति पुनरेवैनं प्रजनयति तस्मादाव्रश्चनाङ्गूया३सः प्रजायन्ते पशुना संमितः का३र्यो दश वै पशोः प्राणा आत्मैकाद३शो ऽष्टाश्रयो ब्रह्मणी[3] दशमी आत्मैकादशस्तथा पशुना संमितो ऽष्टाश्रिः कार्यो[4] गायत्र्या रूपं गायत्रो हि यूपो गायत्र्या वै पतन्त्या यत्र[5] पर्ण परापतत्ततः पर्णो ऽजायत तस्मात्पर्णमय एतत्खलु वै पर्णस्य सार यत्खदिरस्तस्मात्खादिर इह वा असा आदित्य आसीत्तमितो ऽध्यमुं लोकमहर[6]स्तद्यतो ऽध्यमुं लोकमहरस्तस्माज्ज्योतिषो बिल्वो ऽजायत तस्माद्बैल्वो ब्रह्मवर्चसकामेन कार्यो ब्रह्मवर्चसस्य समष्ट्या अथो ज्योतिषैव तमस्तरतीन्द्रो वै यतीन्सालावृकेयेभ्यः[10] प्रायच्छत्तेषा वा एष ब्रह्मचारी चमसाध्वर्युरासी३द्यो[11] ऽय हरिणस्तस्य यः सोमपीथ आसीत्स स्वजो[12] ऽभवत्तस्माद्धरिणः[13] स्वजं खादति सोमपीथो ह्यस्येष स यत्र चमसं न्यौब्जत्ततो[14] रोहितको[15] ऽजायत

---

1) Die Mss. संतेजस्त्वाय 2) B °माणा 3) B °अथोर्ब्रह्मणी 4) So meine Correctur; cf. unten; H आर्यो; desgl. B, ohne Accent; Bb आर्यो गा° 5) So corrigirt; die Mss. यत्रं 6) So corrigirt; H u. Bb तर्यतो; desgl. B, ohne Accent. 7) B विल्वो 8) B °द्वैल्वो 9) So corrigirt; H u. Bb तमनस्तर°; B तमानस्तर° 10) Die Mss. यतीत्सा° 11) So corrigirt; die Mss. betonen चमसाध्वर्यु° 12) आसीत् in den Mss. ohne Accent; H u. Bb स ऽस्वज्रो; desgl. B, ohne Accent. 13) So corrigirt; die Mss. भवत्सा° 14) Die Mss. न्यौब्जत् 15) So die Mss.

तस्माद्रौहीतकस्तस्माद्रोहीतके[1] रोहितके[2] स्वजः पृथिव्यै[3] त्वान्तरिक्षाय त्वा दिवे त्वेति प्रोक्षत्येषा३ह्येष लोकानां विधृत्यै मीयते चिः प्रोक्षति चिषत्या हि देवा अथो चिपदयैवैनं गायत्र्या प्रौक्षीद्वज्रो वै यूपो[5] ऽन्नं यवो यद्यवमीभिः प्रोक्षति वज्रेण वा एतदन्नं जयति तेजो वै यूप एष खलु वा ओषधीनां तेजो यद्यवस्तस्मादेतं शि- 5
शिरा ओषधयो ऽनुप्राणन्ति यद्यवमवास्यति तेजसि वा एतत्तेजो दधात्यृक्षं वा अमेध्यमापो हविर्यदवसिञ्चति मेध्यमेवैनत्करोत्यृक्षं वा अमेध्यं यदवस्तृणाति मेध्यमेवैनत्करोति तक्षितो वा एष नग्नो यज्ञकमवास्यत्यनग्नमेवैनमकः स्व एवैनं स्थाने[6] दधात्यवृक्ण[7] एवाभूद् घृतेन[8] द्यावापृथिवी आपृणेति तेनैव द्यावापृथिवी आपूरयति 10
यजमानो वा अग्निष्टास्तेजो[9] घृतमान्तमविछिन्नमनक्ति[10] यजमानमेव[11] तेजसानक्ति देवस्त्वा सविता मध्वानक्त्वित्येतद्वै देवानां मधु यद् घृतं सवितृप्रसूत एवैनं मध्वानक्तीन्द्रस्य चषालमसीत्यैन्द्रं हि चषालं सुपिप्पला[13] ओषधीस्कृधीत्योषधीरेव[14] फलं ग्राहयति तस्मादोषधयः शीर्षन्फलं गृह्णन्ति दिवमग्नेणोत्तभानान्तरिक्षं मध्येना- 15
पृण पृथिवीमुपरेण दꣳहेत्येषा३ह्येष लोकानां विधृत्यै मीयते ता

1) So corrigirt; H u. Bb °द्रौहीतकस्त°; desgl. B, ohne Accent. 2) So die Mss. 3) Die Mss. पृथिव्यौ 4) Die Mss. प्रैची° 5) So corrigirt; die Mss. यूपो 6) So meine Correctur; die Mss. स्थानं 7) So vielleicht zu lesen; H u. Bb °वृक्; B etwa वृकच 8) So meine Correctur; H u. Bb एवाभूद्घृतेन; desgl B, ohne Accent. 9) So corrigirt; in B अग्निष्ठात्तेजो; H u. Bb अग्निष्टा तेजो; cf. 3, 9, 4; vgl. aber Kâṭh. 26, 5 घृतेनाग्निष्टामनक्ति तेजो वै घृतं यजमानो ऽग्निष्टास्तेजसैव यजमानꣳ समर्धयति; ähnlich in demselben Capitel noch einmal; ferner Kap. S. 41, 3 तेनाग्निष्टामनक्ति तेजो वै घृतं यजमानो ऽग्निष्टास्तेजसो वै यजमानं समर्धयत्यांतं संतमनक्ति; ähnlich weiter unten noch einmal. 10) So B, nur ohne Accent (घृतमांतमवि°); in H u. Bb घृतमांमंतवि° 11) So corrigirt; die Mss. °मेवं 12) So corrigirt; H u. Bb यदंघृतं°; desgl. B, ohne Accent. 13) So corrigirt; Bb सुपिःप्पला; H सुपिःपला; desgl. B, ohne Accent; Kap. S. 41, 3 सुपिप्पला; Kâṭh. 26, 5 सुपिप्पला 14) Die Mss. °धीस्कृधी°

ते धामान्युश्मसि गमध्या इत्यवदधाति वैष्णव्या वैष्णवो हि यूपः स्वयैव देवतया विष्णोः कर्माणि पश्यतीति संकल्पयति संमितत्वाय ब्रह्मवनिं त्वा क्षत्रवनिं पर्यूहामीत्याशीरेवैषा ब्रह्म ह्य्ह क्षत्रं ह्य्हैत्याशिष एवैष[1] परिग्रहो ऽपो ऽनुपरिषिञ्चति धृत्यै ॥ ३ ॥

Vgl. 1, 2, 14. — TS 6, 3, 3 (yûpakhaṇḍanam); Kâṭh. 26, 5; Kap. S. 41, 3.

वज्रो वै यूपो यदन्तर्वेदि मिनुयान्निर्दहेद्यद्बहिर्वेद्यनवरुद्धः स्याद्धर्मन्तर्वेदि मिनोत्यर्धं बहिर्वेद्यवरुद्धो ह भवति न निर्दहति नोपरस्याविः कर्तवै यदुपरस्याविः[2] कुर्याद्रथेष्ठाः[3] स्यात्प्रमायुको[4] यजमानो नातिस्थूलः का३र्यः क्षुधं प्रजा नीयुर्नो अत्यणुरुभयमेवान्तरा यज्ञेन वै देवाः स्वर्गं लोकमाय्ँस्ते ऽमन्यन्तानेन वै नो ऽन्ये लोकमन्वारोक्ष्यन्तीति त्ँ यूपेनायोपय्ँस्तद्यूपस्य यूपत्वं यद्यूपः पुरस्तान्मीयेत[5] स्वर्गस्य लोकस्यानुकशायै तद्विष्णोः परमं पदमिति समुन्माष्टि स्वर्गस्य लोकस्य समष्ट्यै नाभिदघ्ने परिव्ययत्यूर्ग्वा ओषधय ऊर्जं वा एतन्मध्यत आत्मनो धत्ते प्रजानां च यदि कामयेत क्षुधं प्रजा नीयुरित्यरश्नान्यूपान्मिनुयात्क्षुधं प्रजा नियन्ति[6] यदि कामयेत वर्षेत्पर्जन्य ऊर्जा यजमान्ँ समर्धयेयमिति परिवीयोर्ध्वामुदूहेद्वृष्ट्या एवैमां[7] न्यूहत्यूर्जा यजमान्ँ समर्धयति यदि कामयेत न वर्षेत्पर्जन्य ऊर्जा यजमान्ँ व्यृधेयेयमिति परिवीयावाचीमवोहेद्वृ-

---

1) Die Mss. एवैष 2) So corrigirt; Bb यदुपरस्याविः; H यदुपरः स्याविः; desgl. B, ohne Accent; Kâṭh. 25, 6 यदाविरुपरस्य कुर्यान्नर्तमित्स्यात् 3) So meine Vermuthung; Bb कुर्याद्रतेष्ठा; H कुर्याद्रतेष्ठा; B कुर्याद्रत्तेष्ठा; Kâṭh. 25, 6 गर्तमित्; s. die vor. Anm. 4) So corrigirt; die Mss. प्रमायुका 5) So B, nur ohne Accent; in H u. Bb मीयते 6) So corrigirt; die Mss. नीयंति 7) So corrigirt; die Mss. एवैमां

ष्ठ्यैवेमां न्यूहत्यूर्जो यजमानꣳ वृधयति सर्वदेव३त्यो वै यूपो यन्नि-
खातं तत्पितृणाꣳ यदूर्ध्वं तन्मनुष्याणाꣳ यत्र रशना तदोषधीनाꣳ
यदूर्ध्वꣳ रशनायास्तद्विश्वेषां देवानामिन्द्रस्य चषालꣳ ये वै देवाः
साध्या यज्ञमत्यमन्यन्त तेषाꣳ वा एतद्यदुपरिष्टाच्चषालस्याङ्गुलिमात्रं
कार्यमङ्गुलिमात्रꣳ हि तदग्रा आसीद्यत्ततो वर्षीयः कुर्याज्जो भूत्वा
यजमानस्य पशूनवतिष्ठेदिन्द्रो वै वृत्राय वज्रमुदयच्छत्सोऽबीयत
तस्य वा एतदनुनद्धं यच्चषालं पृथुमात्रं कार्यं पृथुमात्रꣳ हि तदग्रा
आसीद्यदणिमतोऽगृह्णात्तस्मादणिमतो यदिन्द्र उदयच्छत्तस्मादिन्द्रꣳ
यदि कामयेतान्येऽस्य लोकमन्वारोहयेयुरित्यन्यस्य वृक्षस्य स्वरुं कुर्या-
दन्येऽस्य लोकमन्वारोहन्ति यदि कामयेत प्रजामनुसंतनुयादिति
यूपस्य स्वरुं कुर्यात्प्रजामेवानुसंतनोति यजमानो वा अग्निष्टोमस्तेजो
ऽग्नियदित्थꣳ वेत्थ वा मिनुयाद्यजमानं तेजसा व्यृधयेदग्निना स-
दृशं मेत३व्या यजमानस्य सतेजस्त्वायावृह्य ह स्म वै पुरा संस्थिते
य३ज्ञे ऽग्नौ यूपं प्रास्यति संभज्य सुचस्ते देवा अमन्यन्त यज्ञवेशस-
मिदं कुर्या इति ते ऽब्रुवन्परिधिभिरेव नः सुचः स्वगाकृताः सन्तु
स्वरुणा यूपः प्रस्तरेण सदा इति तेषाꣳ वा एष स्वगाकारो न ह
स्म वै पुरा पुरुषं महादेवो हन्ति तत इदꣳ रु३द्रो ऽन्ववातिष्ठत्ते
देवा एताꣳ रुद्रस्यावेष्टिमपश्यꣳस्तैः परस्तादनक्ति तिरवस्तात्तत्षट्
षड्वा ऋतव ऋतुभ्यो वा एतद्रुद्रमवयजत्याहुतिभाजो वा ऋतवो
ऽस्तोमभाजस्ते एवास्यैतेनाभीष्टाः प्रीता भवन्ति यद्यूपाज्जुहोति व-

1) H u. Bb °द्रस्या 2) So corrigirt; die Mss. °दनुनद्धे 3) So corrigirt; die Mss. अग्निष्टा तेजो; vgl. aber oben 3, 9, 3. 4) So corrigirt; die Mss. °यदित्थꣳ वेत्थꣳ 5) In B Lücke von °वयजत्या bis zum folgenden (ओष) धोभ्यस्तेन 6) So corrigirt; die Mss. ऋतवो स्तोमभाजस्ते

नस्पतिभ्यस्तेनावयजति यद्दर्शनाया ओषधीभ्यस्तेन यदात्मनो मनुष्येभ्यस्तेन यदाह दिवं ते धूमो गच्छत्विति हविर्धानात्तेनान्तरिक्षं ज्योतिरित्यामीध्रात्तेन पृथिवीं भस्म स्याहेति सदस्तेन सर्वतो वा एतद्रक्षसामवयजत्यो वा एतꣳ वनस्पतिभ्यः प्रच्यावयन्त्युपयज्य मनुष्याः प्रयन्ति तस्मायै[1] देवतायै अन्तर्धीयते[2] यूपो[3] वै यज्ञस्य दुरिष्टमामुच्यते यद्यूपमुपस्पृशेद्यज्ञस्य दुरिष्टमामुच्येत[4] तस्माद्यूपो नोपस्पृश्यः स्रुग्वा एष मीयते स ईश्वरो ऽशान्त इमांल्लोकाञ्शुचार्पयितोर्यद्येकः स्यात् ॥ एष ते वायो ॥ इति ब्रूयाद्यदि बहवः ॥ एते ते वायो ॥ इति ब्रूयाद्वायूगोपा[5] वै वनस्पतयः स्वामेवैभ्यो देवतामपिसृजत्येषां लोकानामहिꣳसायै यथा वै प्रौग[6] रज्जुभिर्युक्तमेवमिमे लोका यूपैर्युक्तास्त एनमाप्तिं[7] निनयन्ति यदाह ॥ नमः स्वरुभ्यः ॥ इति तेभ्य एव[8] नमो ऽकस्तेऽस्मै विजिहते तेऽस्मै लोकꣳ विन्दन्ये ते वै देवानामुडयाता[9] अस्मिंल्लोके सन्नाः[10] स्वरवो[11] ऽभिरोडारो यान्न पश्यति ते सन्नाः अथ यान्पश्यति ते बृहन्त ऊर्जा यदाह ॥ नमः स्वरुभ्यो बृहद्भ्यो मारुतेभ्यः सन्नान्मावगाम् ॥ इति तानेव परिवृणक्त्येते वा अमुष्मिंल्लोके ऽन्नस्य प्रदातारस्ते ऽस्मा अन्नं प्रयच्छन्ति ॥ अपश्चाद्घान्नं[12] भूयासम् ॥ इत्यपश्चाद्घान्नं[13] भवति ॥ ४ ॥

Vgl. 1, 2, 14. — TS 6, 3, 4 (sthâpayed yûpam); Kâṭh. 26, 6; Kap. S. 41, 4.

---

1) So corrigirt; die Mss. स्वया 2) So corrigirt; die Mss. अंतर्ङचिते 3) In den Mss. ohne Accent. 4) So corrigirt; in den Mss. °मुचेत 5) Die Mss. betonen वायुगोपा . 6) So H; Bb प्रौगꣳ; desgl. B, ohne Accent; wohl in प्रउगꣳ zu corrigiren. 7) Die Mss. betonen एनंम° 8) So corrigirt; die Mss. एवैं 9) So die Mss., mir unverständlich. 10) So corrigirt; die Mss. सन्ना 11) So corrigirt; die Mss. स्वरावो 12) So corrigirt; B अपश्चाद्ध्वान्नं; H u. Bb आपश्चाद्ध्वान्नं 13) So meine Correctur; H u. Bb इति पश्चाद्ध्वानं; desgl. B, ohne Accent.

साध्या वै देवा आसन्नथ वै तर्हि नान्याहुतिरासीत्ते देवा अग्निं मथित्वाग्रा अजुहवुस्ते वै तयैवाहुत्या पशून्त्सृष्ट्वाथ पशुमालभन्त यदग्निं मथित्वागौ जुहोति तया वा एतदाहुत्या पशून्त्सृष्ट्वाथ[2] पशुमालभन्ते ऽथो पशवो वा एतदालब्धा यद्देवतां जनयन्त्यथो[3] तेज एवास्मै जनयन्त्यग्नेर्जनित्रमसीत्यायतनमिव वा एतत्क्रियते वृषणौ स्थ इति रेत एवैतद्दधाति न हि तस्य रेतो धीयते यस्यैतौ न भवत उर्वश्यसीति वाग्वा उर्वशी पुरूरवा[4] असीति प्राण एव तन्मिथुनमायुरसीति समनक्ति तस्मिन्नेव मिथुने रेतो दधाति गायत्रमसि त्रिष्टुबसि जगदसीति छन्दोभिरेवैनं प्रजनयति सावित्रीं प्रथमामन्वाह प्रसूत्यै सवितृप्रसूता हि प्रजाः प्रजायन्ते ऽथ द्यावापृथिवीयामपि हि द्यावापृथिव्योः पशुषु द्यावापृथिवी हि पशवोऽनुप्रजायन्ते गायत्रीरन्वाह[5] गायत्रो ३ह्यग्निर्गायत्रं छन्दा[6] अपरिमिता अन्वाहापरिमिता ३ह्यग्नेस्त३न्वो[7] ऽग्निना वा अनोकेनेन्द्रो वृत्रमहꣳस्तस्य समासृप्तस्य भीतस्य यत्र व्यार्ध्यत ततो भूस्नो[8] ऽसृज्यत तस्माद्बर्मवती[9] नानूच्या व्यृद्धा[10] हि सा रक्षसामनन्ववजयाय[11] परिधयः परिधीयन्ते यत्समर्या[12] परिधीन्प्रहरेत्तदनु रक्षाꣳसि यज्ञमवजयेयुरग्नेय परिधयः प्रहृत्या[13] रक्षसामनन्ववजयाय क्रूरमिव वा एतद्यज्ञे क्रियते[14]

---

1) Die Mss. schreiben पशूꣳ सृष्ट्वाथ; cf. weiter unten, sowie die Einleitung zum 1. Buch p. XLIII. — Von hier an bis zum folgenden सृष्ट्वाथ incl. ist in H u. Bb eine Lücke; die Accente mussten daher ergänzt werden. 2) B, die einzige für diese Stelle vorhandene Handschrift, schreibt पशून् सृष्ट्वाथ 3) Das Verb in den Mss. ohne Acc. 4) Die Mss. betonen पुरूरवा 5) So corrigirt die Mss. गायत्रीर० 6) Dies Wort in den Mss. ohne Accent. 7) So corrigirt; die Mss. ह्यग्नेर० 8) So corrigirt; H u. Bb मूस्नो; desgl. B, ohne Accent. 9) Die Mss. तस्माद्बर्मवती 10) So B, ohne Accent; in H u. Bb व्यूद्धा 11) So corrigirt; die Mss. ०न्ववजया 12) So die Mss. 13) So meine Correctur; die Mss. परिधीन्प्रहृत्यो; s. übrigens Whitney, Ind. Gramm. § 1213, a. 14) Die Mss. क्रीयते

यदग्ना अग्निं जुह्वति यदाह भवतं नः समनसौ समोकसौ सचेतसा अरेपसा इति शमयत्येव शान्त एव प्रह्रियते यजमानस्याहिꣳसायै स्रुवेणाभिजुहोति संजग्मानाभ्यामेवाभ्यां भागधेयमपिदधाति यः कूटो वाकर्णो वा काणो वा शुष्को वावर्तत[1] तस्य यातयामा स यो ऽपन्नदन्मलं तत्पशूनामाग्नेयः[2] पशुरग्निष्टोम आलभ्य आग्नेयो ह्यग्निष्टोम ऐन्द्राग्नः पशुरुक्थ्यः[3] आलभ्य ऐन्द्राग्नानि ३ह्युक्थ्यान्यैन्द्रो वृष्णिः षोडशिन्यालभ्य[4] ऐन्द्रो वै वृष्णिरैन्द्रः षोडशी सारस्वती मेषूतिराज्य आलभ्या वाग्वै सरस्वती वागनुष्टुबनुष्टुभी रात्रियेज्ञक्रतूनामेवैषा व्यावृत्तिर्यथा वै मत्स्यो ऽविचितो जनमवधूनुत एवꣳ वा एते प्रजायमाना जनमवधून्वते यस्त्वा एतानेवꣳ वेद तमेतेनावधून्वते कथꣳ सवनानि पशुमन्ति वेद्धेति पृच्छेद्यद्वपया प्रातःसवने चरन्ति तेन प्रातःसवनं पशुमद्यत्पुरोडाशैर्माध्यंदिने सवने तेन माध्यंदिनꣳ सवनं पशुमद्यदृभुक्षस्तृतीयसवने तेन तृतीयसवनं पशुमत्कियता तत्पशोश्चरन्ति यद्वपया चरन्ति कियता तद्यत्पुरोडाशैः कियता तद्यदवदानै रूपेण तत्पशोश्चरन्ति यद्वपया चरन्त्यात्मना तद्यत्पुरोडाशैः शरीरेण तद्यदवदानैः कस्मै पशुः प्रत्यङ् नियुज्यता उदङ् प्रणीयते दक्षिणत उपसाद्यते प्राङ् हूयता इति पृच्छेद्यत्प्रत्यङ् नियुज्यत इमां तेन दिशमभिजयति यद्दक्षिणत उपसाद्यत इमां तेन यत्प्राङ् हूयत इमां तेन यदुदङ् प्रणीयते मनुष्यलोकं तेनाभिजयति यद्दक्षिणत उपसाद्यते पितृलोकं तेन यत्प्राङ् हूयते देवलोकं तेन यदाहुत्या ऊर्ध्वो धूम उदयते स्वर्गं तेन[10]

1) Die Mss. वावर्त्तत 2) So corrigirt; H u. Bb तत्पशुनाम°; desgl. B, ohne Accent. 3) So corrigirt; H u. Bb °ह्थ्यः; B °रूक्थ्य 4) So corrigirt; die Mss. °क्थ्यान्यै° 5) So meine Correctur; die Mss. षोडषीन्य° 6) H u. Bb °नाग्वधून्वते 7) Die Mss. °डाशिमा° 8) In den Mss. ohne Accentbezeichnung. 9) So corrigirt; die Mss. कीयता 10) In den Mss. ohne Accent.

लोकꣳ यदिडोपहूतं प्रत्यङ् हरन्तीमं तेन लोकꣳ सर्वा वा इमा दिशः पशुया३ज्यभिजयति सर्वाँल्लोकान्त्सर्वा[1] एवास्येमा दिशो ऽभिजिता भवन्ति सर्वे लोकाः ॥ ५ ॥

Vgl. 1, 2, 7. — TS 6, 3, 5 (vahnim mathnâti); Kâṭh. 26, 7 u. 8; Kap. S. 41, 5.

अथैता आप्रियः प्रजापतिः प्रजाः सृष्ट्वा रिरिचानो[2] ऽमन्यत स एता आप्रीरपश्यत्ताभिरात्मानमाप्रीणीत यज्ञो वै प्रजापतिर्यदेता आप्रियो भवन्ति यज्ञमेवैताभिर्यजमाना आप्रीणीते वपया वै पशोर्देवाः प्रातःसवने स्वर्गं लोकमायन्यद्वपया प्रातःसवने चरन्ति वपया वा एतत्पशोर्यजमानः प्रातःसवने स्वर्गं लोकमेति[3] ते वै स्वर्यन्तो[4] ऽस्थानि शरीराण्यधून्वत यदङ्गैस्तृतीयसवने चरन्त्यस्थाꣳशरीराणां निष्क्रीत्यै[5] पशुꣳ स्नपयन्ति यदेवास्याभिनिषण्ण[6]ꣳ शमलमेध्यं तदप्नुन्धन्ति पशुमुपाकृत्याग्निं मन्थन्ति पशूनामवरुद्ध्यै द्वौ वै वज्रौ घोरो ऽन्यः शिवो ऽन्यो यः शुष्कः स घोरो य आर्द्रः स शिवो वज्रेण खलु वै वीर्यं क्रियते[8] वज्रꣳ वा एतदादत्ते वीर्यायेषे त्वेतीषꣳ एवैनमुपाविरसीत्युप ३ह्वयो ऽवित्युपो देवान्दैवीर्विशः प्रागुरित्येता वै दैवीर्विशो यत्पशवो वहूय उशिजा इत्येते वै वहूय उशिजो यदत्विजश्च धिष्ण्याश्च बृहस्पते धारया वसूनीति ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैना[9]ꣳ यच्छति हव्या ते स्वदन्निति स्वदितमेवैनमालभते[10] देव त्वष्टर्वसु रणा[11] इति त्वष्टा हि रूपाणि विकरोति रेवतीरमेध्यमिति[12]

---

1) Die Mss. °कान् सर्वा; s. Einl. z. 1. Buch, p. XLIII. 2) Die Mss. schreiben ऋचानो 3) So B; in H °मेति betont. 4) So die Mss. 5) So die Mss.; cf. सिरा 6) Die Mss. निःक्रीत्वै 7) So corrigirt; H u. Bb °निषण्ण°; B °निषणा° 8) Die Mss. क्रीयते 9) So meine Vermuthung; die Mss. त्वेतीवृ (sic). 10) Die Mss. schwanken; H u. Bb °नमालभते; B °नलभते 11) S. 1, 2, 15. 12) So corrigirt; die Mss.; रेवतीरमध्यमिति

पशवो वै रेवती यँछत्येवैनां देवस्य त्वा सवितुः प्रसव इति सवितृ-
प्रसूत एवैनामादत्ते ऽश्विनोर्बाहुभ्यामित्यश्विनौ[1] वै देवानामध्वर्यू
पूष्णो हस्ताभ्यामिति देवताभिरेव द्वौ वै पाशौ घो३रो ऽन्यः शि३वो
ऽन्यो यो यज्ञियः स घोरो यो ऽयज्ञियः स शिवं ऋतस्य त्वा देव-
हविः पाशेनेति य एवं यज्ञियः पाशस्तेनैनमालभते प्रतिमुञ्चामी-
त्यभि हि मनु३षा दधत्यमुष्मै त्वा जुष्टमिति यस्या एव देवतायै
पशुरालभ्यते तस्या एनं जुष्टमकर्धर्षा मानुषा इति मनु३षा हि धार-
यन्ति शुष्को[3] वा एषो ऽमेध्यो यत्पशुं नियुनक्त्युभा एवैनौ मेध्यौ
करोति प्रत्यञ्चं नियुनक्ति प्रत्यञ्चो हि पशवो मेधमुपतिष्ठन्ते[5] प्रा-
णेषु वा एतस्य देवता उपस्थिता यत्पशुं नियुनक्ति प्रतीचीरेवासै
देवता नियुनक्त्यङ्गस्त्वौषधीभ्या इत्यङ्गो[6] ३ह्येष ओषधीभ्यो जुष्टं[7] प्रो-
क्षामीति यस्या एव देवतायै पशुरालभ्यते तस्या एनं जुष्टमकरनु
त्वा माता मन्यतामनु पितेत्यनुमत एवैनं माचा पिचा भाचा[8] संज्ञा-
लभते ऽनुमानावह देवान्देवायते यजमानायेति देवताभ्य एवैनं
निर्दिशत्यपां पेरुरसीत्यपा॰ ३ह्येष पेरुः स्वात्त॰ सन्नविरापो देवीः
स्वदन्त्विति[10] स्वदितमेवैनमालभते ऽथ यदुप गृह्णात्युप च सिञ्चति
सवित एवैनं मेध्येन समर्धयति सं ते वायुर्वातेन गच्छतामिति वातमे-
वास्य प्राणमन्ववार्छति स॰ यजत्रैरङ्गानीति यज्ञियमेवैनमकः स॰

---

1) Die Mss. °श्विनो 2) So die Mss.; cf. oben 3, 8, 8; TS 6, 3, 6, 3. 3) Dies Wort in den Mss. ohne Accent. 4) So corrigirt; die Mss. एवैनो 5) So H u. B; in B प्रत्यंची हि पशवो मेध्य यत्पशुं नियुनक्त्युभा एवैमुपतिष्ठते; cf. Kap. 41, 6 पुरस्ताद् पशवो मेधमुपतिष्ठते 6) So corrigirt; H u. Bb इतिज्ञो; desgl. B, ohne Accent. 7) In den Mss. ist जुष्टं ohne Accent. 8) In den Mss. भाचा ohne Accent. 9) In den Mss. fehlt die ३. 10) In den Mss. स्वद° betont; cf. aber 1, 2, 15.

यज्ञपतिराशिषेति यजमानमेव यज्ञस्याशिषा समर्धयति शिरो वा आघारः आत्मा हविर्यदाघारमाघार्य पशुना समनक्त्यात्मन्वा एतच्छिरो यज्ञस्य प्रतिदधाति वज्रो वै स्वरुर्वज्रः स्वधितिर्यत्स्वधितिनानक्ति वज्रेणैवैनꣳ स्तृणुते याक्का तया घृतस्यावद्यति हविर्भूता वा एषा हविषैव हविषोऽवद्यति ॥ ६ ॥

Vgl. 1, 2, 15. — TS 6, 3, 6 (niyunakti paçum) u. 7, 2—4 (âghârâu); Kâṭh. 26, 3; Kap. S. 41, 6 u. 7.

अग्निना वै मुखेन देवा इमाँल्लोकानभ्यजयन्यत्पर्यग्निं करोत्यग्निना वा एतन्मुखेन यजमान इमाँल्लोकानभिजयति रक्षाꣳसि वा एतं जिघाꣳसन्ति यत्पर्यग्निं करोति रक्षसामपहत्यै चितः पर्यग्निं करोति चयो वा इमे लोका एभ्यो वा एतल्लोकेभ्यो यज्ञाद्रक्षाꣳस्यपहन्ति चात्वालमपि पर्येत्येषां वा अग्नीनाꣳ योनिः स्कन्दति वा एतद्धविर्यद्विष्यन्दति यद्विलिप्यते ऽग्निर्वै सर्वा देवता अथ वै सापि देवता यस्या आलभ्यते यत्पर्यग्निं करोति तामेवैनन्नमयति कियद्वाहैतत्पशोः कियद्वा यत्प्रयाजा एतर्हि खलु वै सर्वो यज्ञोऽप्रीतस्तस्मादाश्राव्यो ऽपप्रेष्यति देवताभ्यो वै पूर्वमाश्रुश्रवदेव वा अथ पशोराश्रावयति तस्मादाश्राव्यो ऽपप्रेष्यत्युभये वा एतं बध्यमानमनुबध्नन्ते ये ग्राम्याः पशवो ये चारण्या ये बध्यमानमनु बध्यमाना अन्वैक्षन्त मनसेति

---

1) So B, ohne Accent; in H u. Bb शिवो; auch Kap. S. 41, 6 liest शिवो वा एत यज्ञस्य यदाघार, weiter unten aber auch शिर एव यज्ञस्यात्म प्रतिदधाति; Kâṭh. 26, 8 शिरो वा एतद्यज्ञस्य यदाघारः 2) So die Mss.; dagegen Kap. S. 41, 6 यदाघारमाघार्य पशु समनक्ति शिर एव यज्ञस्यात्म प्रतिदधाति 3) So corrigirt; H समनक्त्यात्म वा; Bb समनक्त्यात्म वा; B समनक्त्योत्मन्वा 4) So corrigirt; die Mss. schreiben eigentlich याक्का 5) So corrigirt; die Mss. एतं लोकेभ्यो 6) In den Mss. °द्रक्षाꣳ° ohne Accent. 7) So corrigirt; die Mss. यद्धि लिप्यते 8) So corrigirt; H u. Bb °ष्यो प्रपप्रेष्यति; B °ष्यो प्रपप्रेष्यति; s. d. Folgende.

यज्जुहोति[1] तेषा॰ वा एषोन्मोक्षा॑ यन्न[2] जुहुयादनुन्मुक्ताः स्युरु३वैना॑-
रिक्ष॰ ३वीहीत्यन्तरिक्षदेव३त्यो वा[3] एष एतर्हि॑ रक्षा॰सि वा एत॑
जिघा॰सन्ति॑ प्रच्युतमितो[4] ऽप्राप्तममुचोग्नि॑[5] पुरस्ताद्धरन्ति रक्षसां प॑-
राणुत्त्यै रक्षसामपहत्या॑ अथो हव्याय वा एतत्प्रणीयमानाय देवताः
पुरस्ताद्धरन्त्यग्नि॑ पुरस्तान्निदधात्यस्कन्नत्वाय॑ पशोर्वै मारणायानीयमा-
नस्याहवनीय॑[6] मेध्यो ऽभ्युपक्रामति॑[7] यो वै तर्हि॑ पशुमन्वारभते त॑
यज्ञस्याशीर्गच्छति॑ यदाह॑ रेवति प्रेधा यज्ञपतिमाविशेति॑ यच्च वा
एतत्कृच्च यजमान॰ सन्त॰ यज्ञस्याशीर्गच्छति॑ वपाश्रपणीभ्यामन्वा-
रभते[8]॑ तत्स्विदुभयमकरुरो अन्तरिक्ष सजूर्देवेन वातेनेत्यन्तरिक्ष॰ वै
पशवो॑ वातः प्राणः॑ प्राणानस्मिन्दधाति॑ त्मनास्य हविषो यजेति॑
देवता एव प्रीणाति॑ समस्य तन्वा भवेति॑ पुनरेवैन॰ संभावयति॑
वर्षीयो वर्षीयसा इति॑ तेन यजमानो वसीयान्भवति॑ यद्यज्ञं पशुमाहु-
र्यत्तमभिमन्यन्ते३क्[9] तर्हि यज्ञो भवतीति॑ यदाह॑ यज्ञ॰ यज्ञपतौ धा इति॑
यज्ञपतौ वा एतद्यज्ञं प्रतिष्ठापयाथ पशुमालभन्ते॑ स्कन्दति वा एतद्व-
र्यद्विस्रोतति यद्विलिप्यते यत्तृणमुपास्यत्यस्कन्नत्वाय॑ प्रत्यञ्च॰ संज्ञ-
पयन्ति॑ प्रत्यञ्चो हि पशवो मेधमुपतिष्ठन्त उदीचीनपाद॰ व्या-
वृत्त्यै ॥ ७ ॥

Vgl. 1, 2, 15. — TS 6, 3, 8 (himsanam paçoḥ).

ऋत्विजो वृणीते॑ छन्दा॰सि वा ऋत्विज॰ छन्दा॰सि वा एतद्-

1) So corrigirt; die Mss. युज्जुहोति 2) So corrigirt; die Mss. यंवु 3) So corrigirt; die Mss. schwanken; B या; H u. Bb षा; vgl. aber unten 3, 10, 1. 4) So corrigirt; H u. Bb प्रज्युतमितो; B प्रज्युतमितो cf. 3, 10, 1 u. 3, 9, 1. 5) So corrigirt; die Mss. प्राप्तम॰; s. 3, 10, 1 u. 3, 9, 1. 6) So corrigirt; die Mss. मारणया॰ 7) Die Mss. schwanken; B मध्यो भ्युपक्रामति; H u. Bb मेध्या भ्युपक्रामंति 8) So corrigirt; die Mss. वपाश्रवणीभ्याम॰ 9) In den Mss. ohne Accent (d. h. ohne die ३).

णीते यज्ञोतारꣳ वृणीते जगतीं तद्वृणीते यद्ध्वर्यु[1] पङ्क्ति[2] तद्यदग्नी-
धमनिछन्दसं[3] तद्यन्मैत्रावरुणं गायत्रीं तद्ब्राह्मणाच्छꣳसिनं त्रिष्टुभं
तद्यत्पोतारमुष्णिहं तद्यन्नेष्टारं ककुभं तद्यदाह ॥ अग्निर्देवीनाꣳ वि-
शां पुरएता[4] ॥ इति यजमानꣳ वा एतद्वृणीते सं वृतो वषट्करोति
नाछावाकꣳ वृणीते पश्चाजेव[5] वा एषा होचाः स्व३ग्र्या यदछावा- 5
क्या द्विदेवत्याः[6] शꣳसति द्विपाद्यजमानः प्रतिष्ठित्या अथ यदग्नीधं
मध्यतो वृणीते तस्मादयमग्निमध्यत[7] ओषधीनाꣳ यदुत्तमः सꣳयज-
ताꣳ सꣳयजति तस्मादुपरिष्टान्मथ्यमानः प्रजायत एतद्वा अस्य छ-
न्दाꣳसि वृतानि युक्तान्यभूवन्यदवृता वषट्कुर्युर्भ्रातृव्यꣳ यज्ञस्याशी-
र्गच्छेदथ यद्वृता[8] वषट्कुर्वन्त्येकधा वा एतद्यजमाने यज्ञस्याशीः प्रति- 10
तिष्ठति तस्मादेकः पशोर्वषट्करोत्येकꣳ हि वृणुते दश वै पशोर्दैव-
ता दशास्मिन्प्राणा यद्दश प्रयाजा या एवास्मिन्देवतास्ता एतद्यज-
त्यथ य एष एकादशो यस्या एव देवतायै पशुरालभ्यते तामेवैतद्य-
जत्यथ यदेकादशानुयाजा या एवैतद्देवता अयाक्षीत्ता एतैरनुप्रीणा-
ति हतो वा एष मृ३तो ऽमुच भूतो दश वै पशोर्दैवता दशास्मिन्प्रा- 15
णाः प्राणाः खलु वै पशोर्दैवता यद्दश प्रयाजाः प्राणानेवास्य प्रय-
जत्यात्मा वै प्राणानामेकादशः आत्मा वपा पशोर्यदेष एकादशः प-

---

1) So corrigirt; die Mss. °ध्वर्यु: 2) B पंक्तीं 3) In den Mss. तद्यद° ohne Accent 4) Das Zeichen ॥ fehlt in den Mss., ist aber durch den Hiatus sowie das erste ॥ schon gefordert. 5) So die Mss.; Kâṭh. 26, 9 पश्चाजमिव वा एतच्छंदो यदनुष्टुप्पश्चा-जेवैषा होता यदꣳछावाक्या; Kap. S. 41, 7 पश्चाजमिव वा एतच्छंदो यदनुष्टुप्पश्चाजे येवैषा होचा यदच्छावक्या 6) So stand ursprünglich in H, dann corrigirt in त्याः; in Bb °त्याः 7) So corrigirt; die Mss. तस्मादपम° 8) So corrigirt; die Mss. यंवृत्ता; 9) So corrigirt; die Mss. वृणुते

रिश्य आत्मा वा एतदात्मानं परिशये ऽथ यदेकादशानुयाजाः प्राणानस्मिन्दधाति ॥ ८ ॥

Vgl. TS 6, 3, 7, 5 (prayâjâḥ); Kâṭh. 26, 9; Kap. S. 41, 7.

॥ इति तृतीयकाण्डे[1] नवमः प्रपाठकः ॥

पत्नी वै प्रच्यवमानामुषादित्यस्य लोकमभिप्रच्यवेत[2] हिनस्ति खलु वा एष तꣳ यो ऽस्य लोकमभिप्रच्यवते यदाह नमस्त आताने[3]मुष्मा एवैनं नमो ऽकरन्वाक्प्रेहीत्यनेनाः प्रेहीति वा एतदाह यजमानाय घृतस्य कुल्यामनु सह रायस्पोषेणेत्याशिषमेवाशास्ते देवीरापः शुद्धा यूय देवान्युयुध्वमित्यपो वा एतद्दूषयन्ति पूताभिराभिः पूताश्चरन्ति तस्माद्वा एतां बहु रिप्रममेध्यं चरन्तीमापो न हिꣳसन्ति हतो वा एष मृ३तो ऽमुच भू३तो ऽङ्गो वै प्रजाः प्रजायन्ते पत्नी प्रजनयति यदद्भिरभिषिञ्चति पुनरेवैनं प्रजनयति सर्वान्प्राणान्त्समृशति[4] सर्वाण्यङ्गान्येतावान्हि पशुः पशोर्वै मार्यमाणस्य प्राणाञ्शुगृच्छति यदाह वाचमस्य मा हिꣳसीः प्राणमस्य मा हिꣳसीरित्यङ्गिर्वावास्यैतत्प्राणाञ्शुचो मुञ्चति यन्ते क्रूरꣳ यदास्थितं तदेतेन शुन्धस्व देवेभ्यः शुम्भस्वेति यदेवास्य गमयन्तः क्रूरमक्रꣳस्तदकूरमकस्तञ्शमयति ये वा एते स्तोका अवपद्यन्ते त इमामशान्ता ऋच्छन्ति तत इमाञ्शुगृच्छति यदाह शमह्न इति शमयत्येव

1) Das इति fehlt in den Mss. 2) So H u. Bb; in B °च्यवते 3) So die Mss. 4) Die Mss. प्राणान्त्संमृशति; s. Einl. z. I. Buch, p. XLIII.

शान्ता एवैमामृछन्त्यहि॑सायाऽओषधे चायस्वैनमित्याह चात्या एवऽ स्वधिते मैनꣳ हि॑ꣳसीरिति वज्रो वै स्वधितिर्वज्राद्वावास्मा एतद॑न्तर्दधात्यहि॑सायै सर्वाभ्यो वै देवताभ्यः पशुरालभ्यते यदाह रक्ष॑सां भा३गो ऽसीत्येतेन वा एतद्भागधेयेन रक्षाꣳसि पशोर्निभजतीद॑महꣳ रक्षो ऽवबाधऽ इदमहꣳ रक्षो ऽधमं तमो नयामीत्याह रक्षसां ध्वरायै रक्षसामन्तरित्यै पशवो वै वपा यदुपतृन्द्यात्पशून्हि॑ꣳस्याद्यन्नोपतृन्द्यादयताः स्युर्यैच तन्निष्ठं तदुपतृन्द्यात्पशूनाꣳ यत्या इषे त्वोर्जे त्वेती॑षे ३ह्येषोर्जे ३ह्येषा देवेभ्यः शुन्धस्व देवेभ्यः शुम्भस्वेति देवे॑भ्य एवैनाꣳ शुन्धति देवेभ्यः शुम्भति घृतेन द्यावापृथिवी प्रोर्णुवा॑तामिति घृतेनैव द्यावापृथिवी प्रोर्णोत्यमुष्मै त्वा जुष्टमिति यस्या एव देवताये पशुरालभ्यते तस्या एनं जुष्टमकर्नमः सूर्यस्य संदृशे इ॑त्यमुष्मा एव नमो ऽकरित्थं पर्यावर्तत एवꣳ हि यज्ञः पर्यावर्तते ऽथो अमुष्य वा एतदादित्यस्यावृतमनु पर्यावर्तत उ३वन्तरिक्षꣳ ३वीहीत्यन्तरिक्षदेव३त्यो वा एष एतर्हि रक्षाꣳसि वा एतं जिघाꣳ॑सन्ति प्रच्युतमितो ऽप्राप्तममुच कार्ष्मर्यमयी वपाश्रपणी भवतो र॑क्षसामपहत्यै यस्मा एवामुतो ऽग्निं पुरस्ताद्धरन्ति तस्मा इतो देवता वा एतद्धव्यमनुपर्यावर्तमानमेति चरमत उपप्रतिगृह्णात्यछिद्रद्वाराय यदतिहरेदेतमेवातिहरेद्विश्वतोमुखो ३ह्यग्निः प्रत्युष्टꣳ रक्षः प्रत्युष्टारा॑तिरित्याह रक्षसां ध्वरायै रक्षसामन्तरित्यै वायोः स्तोकानामिति

1) In den Mss. das Verbum ohne Accent. 2) So meine Vermuthung; in Bb रंचो ववा; in H ebenso oder ववा; in B ववा (vielleicht auch वबा). 3) So die Mss. 4) So corrigirt; die Mss. betonen तदुपतृंद्या॰ 5) Die Mss. ॰र्जे 6) Die ३ fehlt in den Mss. 7) So B, ohne Accent; in Bb शुंधंति; H शुंधति; vgl. das Folgende. 8) So corrigirt; H u. Bb प्रोर्णोत्य॰: B प्रोर्णीत्य॰ 9) Die Mss. एनं 10) ॰मितो प्राप्तम॰; cf. oben 3, 9, 7; 3, 9, 1; 3, 7, 8. 11) So corrigirt; die Mss. एवामुतो

तृणमुपास्यति स्तोकाना॰ विधृत्यै वायु३र्ह्येतानमुतो[1] विसृजति प्रजानां कॢप्त्या अय॰ वा एतद्ध्व्यस्याग्नमोषधीनामग्रेणैवाय॰[2] समर्धयत्यथो अयाय वा एतद्ध्व्यस्याग्नमोषधीनामिध्मं चिनोति हविषो वा एते स्तोकाः स्कन्दति वा एतद्धविर्यद्विस्रोतति यद्विलिष्यते यदाह ॥

जुषस्व सप्रथस्तम॰ वचो देवप्सरस्तमम् ।
हव्या जुह्वान आसनि ॥

इति तेनैवास्य तं हुता अस्कन्ना वषट्कृता भवन्ति नानादेव३त्या वा एकादशिन्यां[3] पशवा आलभ्यन्ते ऽथ्याचाग्नेयी प्रथमानूच्यते ऽग्निर्वै सर्वा देवता अथ वै सापि देवता यस्या आलभ्यते तामेवैनन्नमयति यर्हि लोहिनीव भृता[4] तर्हि रौद्री यत्तर्हि जुहुयाद्रुद्रायास्य पशूनपिदध्याद्यर्हि श्येनीव भृता तर्ह्याग्नेयी तर्हि होत३व्या तथास्य रुद्रः पशूननभिमानुको भवति क्रव्य॰ वा एतर्हि पशुर्यर्ह्यभृतो यद्वपामभिघार्य पृषदाज्यमभिघारयेद्रुद्रायास्य पशूनपिदध्यादथ यत्पृषदाज्यमभिघार्य वपामभिघारयति यथापूर्व॰ वा एतत्पशुमुपैत्यथो एवमस्य रुद्रः पशूननभिमानुको भवति पुरस्तात्स्वाहाकारा वा अन्ये देवा उपरिष्टात्स्वाहाकारा अन्ये त उभये ऽश्ये[5] मेध्ये ऽवरुध्यन्ते[6] ॥ स्वाहा देवेभ्यः ॥ इति पुरस्ताद्वपाया जुहुयात् ॥ विश्वेभ्यो देवेभ्यः स्वाहा ॥ इत्युपरिष्टात्तथास्य त उभये ऽवरुद्धा भवन्ति पशोर्वै मायमाणस्य प्राणाञ्जिगृक्षति प्राणान्संगृह्य वपामुपविसृजेदात्मा वपा प-

1) Die ३ fehlt in den Mss. 2) So corrigirt, die Mss. betonen °ध्व्यस्याग्नम° 3) Die Mss. एकादशिन्यां 4) Die Mss. सृता, vgl. aber das Folgende. 5) So die Mss. (उभयेश्ये) 6) So B; desgl. in H durch Correctur, wo ursprünglich वरुधे stand; in Bb वरुधेते 7) Bb °मुपविसृजेद°

शोरात्मन्नेवास्य प्राणान्दधाति दक्षिणस्य पूर्वपदस्यावदेयमिति ह स्माहुर्दाक्षायणास्तथास्य सर्वस्य पशोरवत्तं भवतीति स्वाहोर्ध्वनभसं मारुतं देवं गच्छतमिति वपाश्रपणी अनुप्रास्यत्यूर्ध्वनभसो वा एते मारुतस्य भागधेयं तमेवैनेन गमयतीमे वा एते विषूची अनुप्रास्यत्येनयोर्विधृत्यै ॥ १ ॥

Vgl. 1, 2, 16. — TS 6, 3, 8 a. E. (s. oben) und 9 (vapâhomaḥ).

पुरुषꣳ वै देवा मेधायालभन्त तस्य मेधोऽपाक्रामत्सोऽश्वं प्राविशत्तेऽश्वमालभन्त तस्य मेधोऽपाक्रामत्स गां प्राविशꣳत्ते गामालभन्त तस्य मेधोऽपाक्रामत्सोऽविं प्राविशत्तेऽविमालभन्त तस्य मेधोऽपाक्राम३त्सोऽजं प्राविश३त्ते३ऽजमालभन्त तस्य मेधोऽपाक्रामत्स यवं प्राविशꣳत्ते यवमालभन्त तस्य मेधोऽपाक्रामत्स व्रीहिꣳ प्राविशꣳत्ते व्रीहिमालभन्त तꣳ व्रीहा आप्नुवन्यद्व्रीहिमयः पुरोडाशो भवति मध्यतो वा एतत्पशोर्मेधो धीयते सुषिरो वै तर्हि पशुर्यर्हि वपामुत्खिदन्ति यद्व्रीहिमयः पुरोडाशो भवत्यपिहित्या असुषिरत्वाय द्वादशकपालो भवति द्वादश मासाः सꣳवत्सरः सꣳवत्सरमनु पशवः प्रजायन्ते प्रजननायैकादशकपालः का३र्यो एकादशाक्षरा त्रिष्टुबैन्द्रमेतच्छन्दो यत्त्रिष्टुबैन्द्राः पशवः पशुष्वेवास्य पशून्दधाति देवा अ३न्योन्यस्मै पशुमालभꣳ स्वर्गं लोकमायꣳस्ते ऽमन्यन्तानेन वै नो ऽन्ये

1) So corrigirt; die Mss. °नमसं; cf das Folgende u. oben 1, 2, 16. 2) Die Mss. betonen मारुतस्य 3) So corrigirt; H u. Bb ३त्सो श्वं; desgl. B, ohne Accent. 4) So corrigirt; H u. Bb ते श्वमालभंत desgl. B, ohne Accent. 5) So corrigirt; H u. Bb ३त्सोविं desgl. B, ohne Accent. 6) So corrigirt; H u. Bb ते विम°; desgl. B, ohne Accent. 7) So corrigirt; H u. Bb. °श्ते जम°; desgl. B, ohne Accent. 8) So B, ohne Acc.; Bb व्रीहिं; H व्रीही; 9) So corrigirt; die Mss. मध्यतो; 10) So wohl in Bb durch Correctur; H °मुत्स्विदंति; desgl. B, ohne Accent. 11) So corrigirt; die Mss. अशुषि° 12) So corrigirt; die Mss. °त्तरात्रिष्टु° 13) So corrigirt; die Mss. तच्छंदो 14) So corrigirt; H °यꣳ स्व मन्यता°; Bb °यꣳ स्व मंन्यता°; B यꣳ स्ते मन्यता

लोकमन्वारोक्ष्यन्तीति तस्य मेधं प्राक्षारयन्त्स प्रक्षो ऽभवत्त प्रक्षस्य प्रक्षत्वं क्लोमो वै तꣳ हृदयात् प्राक्षारयꣳस्तस्मादेतत्सुषिरꣳ यत् प्रक्षशाखाया अवद्यति मेधादेवाध्यवद्यति पृषदाज्यस्योपहत्य परैति ॥ घृतꣳ हविः शमिता ॥ इति घृतत्वाय चिराह चिषत्या हि देवा अथो यथेदं ब्राह्मणेभ्य ओदनं पक्वं प्राहैवꣳ वा एतद्देवेभ्यो हविः घृतं प्राहोत्तरतः परीत्याभिघारयति पशूनामवरुद्ध्यै प्राणापानौ वै पृषदाज्यमात्मा हृदयꣳ यत्पृषदाज्येन हृदयमनक्ति मध्यतो वा एतत्पशोः प्राणापानौ दधाति सोमस्य वा एतद्ब्रह्महविर्ब्रह्महविरेव वा एतत्पशोर्यदुत्तरवेदिर्बर्हिः अङ्गा एतद्व्यमकरस्कन्नमविक्षुब्धं मे हव्यं देवता गच्छदिति देवानाꣳ वै सर्वेषां मनाꣳसि गच्छन्ति पशा आलभ्यमाने मनो वै मनोता यन्मनोताया अन्वाह मनाꣳस्येवैषाꣳ संभावयति हतो वा एष मृ३तो ऽमुच्च भूतो मनो वै मनोता यन्मनोताया अन्वाह पुनरेवैनꣳ संभावयति ॥ २ ॥

Vgl. TS 6, 3, 9 (s. oben) u. 10 (avadânâni).

हृदयस्यावद्यति मनस एव तेनावद्यत्यथो यावानेव पशुस्तस्यावत्तं भवति जिह्वाया अवद्यति वाच एव तेनावद्यत्यथो एतया ह्यया ओषधीनाꣳ रसं प्राश्नाति श्येनस्यावद्यति वक्षस एव तेनावद्यत्यथो अत्र हि स रसः प्रतितिष्ठति दोष्णो ऽवदाय पार्श्वयोरवद्यति यज्ञस्य परि-

---

1) Die Mss. °चन्स. 2) So corrigirt; Bb क्लचो भव°; H क्लचो भ°; 3) B वा 4) So corrigirt; die Mss. हृदयान् 5) So corrigirt; die Mss. क्लचशाखया 6) Das ॥ fehlt in den Mss. 7) B चदेयं 8) In den Mss. fehlt der Visarga. 9) So die Mss. 10) So die Mss. 11) So corrigirt; die Mss. मनोता; 12) So corrigirt; die Mss. मतीताया 13) So corrigirt; die Mss. दोष्णो

गृहीत्यै यक्नो ऽवद्यति मध्यस्यैव तेनावद्यति मतस्नयोरवद्यति रूपस्यैव तेनावद्यति श्रोण्या अवदाय गुदस्यावद्यति तदुत्तमस्यावद्यत्युत्तमꣳ ह्या-
यु र्यदन्यस्योत्तरस्यावद्येत्प्राणमस्यापिदध्यात्प्रमायुकः स्यात्तस्मात्तस्योत्त-
मस्यावद्यत्युत्तमꣳ ह्यायुर्हृदयस्यावदाय जिह्वाया अवद्यति यथापूर्वꣳ वा
एतत्पशुमुपैत्यथो[3] एवमस्य सर्वस्य पशोरवत्तं भवत्येकादश कृत्वो ऽवद्य- 5
ति दश वै पशोः प्राणा आत्मैकादशस्तथास्य सर्वस्य पशोरवत्तं भवत्ये-
कादश वा एतान्यवदानानि तानि द्विर्द्विरवद्यति तद्द्वाविꣳशतिस्त्रीणि
च्यङ्गानि तत्पञ्चविꣳशतिः पञ्चविꣳशेन वै स्तोमेन मनुः प्रजा असृजत
तन्मनुस्तोमो[4] वा एष प्रजननायैतद्वै सर्वस्य पशोरवत्तमथ वै प्राण-
स्यापानस्य व्यानस्य तेषामनवत्तꣳ यत्यङ्गाणामवद्यति तेनैव प्राण- 10
स्यापानस्य व्यानस्य तेषामवत्तं भवति विश्वरूपो वै त्वाष्ट्रः पशूनभ्यू-
वमत्तꣳ स्मात्पशवो विश्वरूपा अभिवान्तो वै पशुः पूयितꣳस्तस्मात्पृष्टीनां[6]
मज्जा नाद्यः[7] स वा[8] अधस्तान्न प्राप्नोदेतद्वै[9] जीवं तस्मादतो ऽवद्यत्य-
क्ष्णयाङ्गानामवद्यति पशुꣳ[10] वा एतदाशुमयति[11] तस्मात्पशवो ऽक्ष्ण-
याङ्गानि प्रहरन्तो यन्त्यामेयो वै सर्वः पशुरथ वा उतान्यस्यै देव- 15
ताया आलभ्यते यद्दोष्णः पूर्वार्धादग्नये ऽवद्यति गुदस्य मध्यतः
श्रोण्या जघानतस्तथास्य सर्वस्य पशोरग्नये ऽवत्तं भवति मेधा
गुदं करोति मेधा ३ह्येतर्हि[12] पशु३स्त्र्यङ्गाणि समवत्तमवदानानि[13] या-
वानेव पशुस्तस्मिन्नायुर्दधाति मेधा मेदः करोति मेदोरूपा[14] हि पशवः

1) So corrigirt; H. u. Bb. मतस्नयोरवद्यति; B मतस्नयोरत्त्वद्यति; 2) So corrigirt; H u. Bb °द्यत्क्रित्तमꣳ°; B °द्यत्क्रित्तमꣳ 3) In den Mss. °मुपै ohne Accent. 4) B °जत ततन्मनु° 5) So B, ohne Accent; in H u. Bb °मंथैव 6) Die Mss. पृष्टीनां; 7) So corrigirt; die Mss. नादः, 8) So corrigirt; die Mss. सर्वो 9) So corrigirt; H u. Bb प्राप्नोदेतद्वै; B प्राप्नोदेद्वै od. द्वै; 10) So B, ohne Accent; H u. Bb पशूꣳ 11) So die Mss! 12) Die ३ fehlt in den Mss. 13) Die Mss. समवत्तम° 14) So corrigirt; die Mss. मेदोरूपो;

सर्वाणि वै पशोर्मेद्यतोऽङ्गानि मेद्यन्ति यावानेव पशुस्तासन्मेदो रूपं दधाति बहुमर्या[1] यज्ञकुणपीति ह स्माह यज्ञवचा राजस्तम्बायनः प्र वा इतो मनुष्याः[2] पशुं च्यावयन्ति नामुत्र गच्छन्तीति यद्धिरण्यमवधाय जुहोति हिरण्यज्योतिषमेवैनꣳ स्वर्गं लोकं गमयति ॥ ३ ॥

Vgl. Ts 6,3,10 (avadânâni).

वसाहोमं प्रयौति रसꣳ वा एतत्प्रयौति स्वधितिना प्रयौत्येतेन हीतरेषामङ्गानामवद्यति तस्मिदवदानमकरथो वज्रेणैवाहुतिमवरुन्द्धे यूषꣳ एतयान्वितꣳ[3] शमयत्यूग्वै[4] रसो यूरूर्जो वा एतद्रसेन पशुꣳ समर्धयत्यथो यावानेव पशुस्तस्मिन्त्संदधाति[5] पार्श्वेनापिदधात्यूर्जः परिगृहीत्यै हतो वा एष मृ३तो ऽमुं च भूतो यत्पशुꣳ संमृशति पुनरेवैनꣳ संभावयति हव्यं पूर्वं देवता गमयित्वाथ शरीरमन्वारोहयित३व्यमित्याहुर्यदाहुतीर्हुत्वा[6] पशुꣳ संमृशति हव्यꣳ वा एतत्पूर्वं देवता गमयित्वाथ शरीरमन्वारोहयत्यर्धर्चे जुहोतीयꣳ वा अर्धर्च३चो ऽसा अर्धर्चूचो ऽन्तरेमे अन्तरिक्षमन्तरिक्षमिमाः प्रजाः प्रजास्वेव रसं दधाति वनस्पतिꣳ यजति सोमो वै वनस्पतिः सौमीरिमाः प्रजाः प्रजास्वेव रसं दधाति प्राणापानौ वै पृषदाज्यमात्मा हविर्यत्पृषदाज्यं जुहोत्यात्मन्वा एतत्पशोः प्राणापानौ दधाति दिग्भ्यो जुहोतीमा एव दिशो रसेन व्युनत्ति[7] प्राचीमुत्तमां[8] जुहोति प्राचीमेव दिशं पुनरुपावर्तन्ते[9]

---

1) Die Mss. बहुर्मर्या 2) Dies Wort in den Mss. ohne Accent. 3) So ist vielleicht zu lesen; H schreibt यूषꣳ एवंयान्वितꣳ; Bb यूषꣳ एवंयान्वितꣳ; in B यूषत्वान्वितꣳ; (das त्व aber undeutlich). 4) Die Mss. शमयत्यूꣳ 5) Die Mss. तस्मिन्त्सꣳ 6) So die Mss. (०न्वारोहयित३व्य०) 7) So corrigirt; die Mss. व्युनत्ति 8) B प्राचीमुत्तमाः 9) So corrigirt; die Mss. पुनरूपा

ऽध्यूधी[1] होत्रे हरन्ति वैश्वदेवो वै होता वैश्वदेवीरिमाः प्रजा ऊधः खलु वै प्रजा अनूपजीवन्ति सर्वा एवैनाः[2] पयस्विनीः करोति गुदेनोपयजति प्राणा वै गुदः प्राणादधि प्रजाः प्रजायन्ते प्रजननाय[3] स्थविमत उपयजति[4] स्थविमतो हि प्रजाः प्रजायन्ते यदणिमत उपयजेत्प्रजननमपिहन्यान्नस्मात्स्थविमत उपयजत्यसंभिन्दन्नुपयजति प्राणानामसंभेदाय यत्संभिन्द्यात्प्राणान्त्संभिन्द्याद्द्विषात्तस्य संभिन्द्यात्प्राणानस्य[5] संभिनत्तिनोपयज्य[6] यदुपयजेत्प्राणानुपयजेत्प्रमायुकः स्यात्तदाहुरुपयज्यमेव प्रजनन वा उपयजोऽपि ह स प्रजायते य उपयजतीत्याभारद्वाजेति ह स्माह शुचिवृक्षो गौपालायनः किं तर्हि प्रजा आसन्यर्हि यज्ञो नानोपयड्भिरासीन्न[7] प्रजाः प्राजायन्त[8] नौषधयः फलमगृह्णन्यदा वाव यज्ञ उपयड्भिः[9] समभवदथ प्रजाः प्राजायन्ताथौषधयः[10] फलमगृह्णन्नेकादश प्रयाजा एकादशानुयाजा एकादशोपयजस्त्रय स्त्रिश्शत्त्रयस्त्रिश्शद्देवतास्ता एवास्यैताभिरभीष्टाः[11] प्रीता[12] भवन्त्येतद्वा अस्य पशोरनर्वागिष्टोऽनभीष्टोऽभूद्यास्य माचा तामेनं[13] गमयति स्वऽग्र्यो वै सर्वः[14] पशुर्यदन्यचाहवनीयाज्जुहुयादस्वग्र्यः स्यात्पशुश्चपणादग्निमाहरन्ति तेन स्वऽग्र्यः सर्वः पशुर्यत एव पूर्वमवादात्ततोऽपरमवद्यति तस्मात्समानाद्योनेर्नानारूपाः पशवः प्रजायन्ते यज्ञो वै देवानामत्यनेदत्तं देवा उपयड्भिरप्यवपन्नन्तिनेदाय[15] यदेता उपयजो भ-

1) B ध्युधी 2) So B, ohne Accent; H u. Bb एवैना 3) So corrigirt; die Mss. प्रजननमाय 4) B उपजयति 5) Die Mss. °णानस्य 6) Die Mss. नोप° 7) So corrigirt; die Mss. नानोपयड्भिर° 8) So corrigirt; die Mss. प्रजायंत 9) So corrigirt; die Mss. उपयड्भिः° 10) So corrigirt; die Mss. प्रजायंता° 11) So corrigirt; die Mss. °रभीष्टा 12) So corrigirt; die Mss. चीता 13) So B, ohne Accent; H u. Bb माचोतामेनं 14) Von hier bis zum folgenden सर्वः (incl.) in B fehlend. 15) Die Mss. schreiben उपयड्भि°

वन्ति यज्ञमेवैताभिरपिवपन्त्यनतिनेदाय[1] यदाथा[2] वै पुरुषः प्रत्यङ् छिद्र एव॰ यज्ञः प्रत्यङ् छिद्रस्तं देवा उपयड्भिरयदधुरछिद्रत्वाय[3] यदेता उपयजो भवन्ति यज्ञमेवैताभिरपिदधात्यछिद्रत्वाय॥ ४॥

Vgl. 1, 2, 17. — TS 6, 3, 11 (anûyâjâḥ).

ये केचार्वाचीनमेकादशिन्याः पशवस्तानुत्तरमधे॰ यूपस्य नियुञ्ज्यादौद्वा वै पशवो ऽग्निर्विधृतिर्दक्षिणे[4] हविर्धाने सोममासादयन्ति तथास्य रुद्रः पशूननभिमानुको भवति पाचेषु वा अहमध्वर्यु चानध्वर्यु[5] च विजानामीति ह स्माहारुण औपवेशिः कति पाचाणीति पृछेद्वादश[6] पाचाण्युपा॰प्नुसवनस्त्रयोदश॰ यन्नमीमा॰सन्ते पाचा३न्न पाचा३मिति[7] मीमा॰सन्ते हि त्रयोदशं मासं मासा३न्न[8] मासा इति[9] पञ्च प्रातःसवने पुरोडाशाश्चत्वारो माध्यंदिने सवने चत्वारस्तृतीयसवने इतो वा एतां निरमिमीत प्रजापतिरात्मन एव यत एवैतां निरमिमीत तदेतैरपिधीयते देवाश्च वा असुराश्चास्पर्धन्तायतनवन्तो ऽसुरा आसञ्चनयतना देवा इमे लोका असुराणामायतनमास॰स्ते देवाः स॰स्तभ॰ स॰स्तभं पराजयन्तानायतना ह्यास॰स्ते वै सवनान्येवायतनमचाय॰स्तानि प्राविश॰स्तानि नाध्रियन्त ते वै पुरोडाशानेव सवनानामायतनमचाय॰स्तान्निरवप॰स्तान्यध्रियन्त ततो देवा अभवन्परासुरास्तेद्य एव॰ वेदायतनवान्भवति भवत्यात्मना परास्य भ्रातृव्यो भवति तस्मादनुसवनं पुरोडाश निरुप्याः सवनानां धृत्यै तस्मादनुसवनं पुरोडाशः प्राश्यः सोमपीथस्य धृत्यै घृत॰ वै

1) So corrigirt; H °त्यनेतिनेदाय; desgl. B, ohne Accent; Bb °त्यनेतिनेदाय 2) So die Mss. 3) So corrigirt; die Mss. उपर्यञ्जि° 4) So B, ohne Accent; in Hu. Bb दक्षिणो 5) Die Mss. चानध्वर्यु 6) Die Mss. पृछेद्वा° 7) So die Mss.; wohl पाचा३न्न zu accentuiren. 8) So die Mss.; wohl पाचा३मिति zu schreiben. 9) So die Mss. 10) So die Mss.

देवा वज्रं कृत्वा सोममघ्नन्नभि[1] खलु वा एतं घारयन्ति यत्प्राश्नीयात्सोमपीथꣳ हन्याद्यन्न प्राश्नीयात्सोमपीथेन व्यृध्येत यद्वानभिघृतं तत्प्राश्यः सोमपीथस्य धृत्यै तन्न सूक्ष्मं प्राश्य एवेन्द्रो[2] वै वृत्रमहꣳस्तन्न किं चनाधिनोत्तं पुरोडाश एवाधिनोत्तस्मात्पुरोडाशः प्राश्यः सोमपीथस्य धृत्यै पञ्च प्रातःसवने पुरोडाशाः पुरोडाशः परिवापो धानाः करम्भः पय३स्या सा पुरोडाशपङ्क्तिर्द्विनाराशꣳसाः[3] प्रातःसवने द्विनाराशꣳसा माध्यंदिने सवना एकनाराशꣳसास्तृतीयसवने सा नराशꣳसपङ्क्तिस्त्रीणि सवनान्यवभृथो[4] ऽनुब३न्ध्या सवनानां पञ्चमी सा सवनपङ्क्तिरेषा वै सा पङ्क्तिर्यामाहुर्ब्रह्मवादिनो वेत्थ[5] तां पङ्क्तिꣳ यया न स्तुवते[7] न शꣳसन्त्यथ यत्ꣳ वदन्त्यथ यत्ꣳ सꣳस्थापयन्ता[9] इति ॥ ५ ॥

Vgl. Kâṭh. 29, 1.

देवाश्च वा असुराश्चास्पर्धन्त[10] तेषाꣳ वा इन्द्रियाणि वीर्याण्यपाक्रामन्नृक्सामे वा एभ्यस्तदपाक्रामतां[11] पशवो वागिन्द्रियं प्राणापानौ तैर्वा इन्द्रो ऽकामयत सायुज्यं गच्छेयमिति ॥ हरिवं इन्द्रो धाना अत्तु ॥ इत्यृक्सामे वा इन्द्रस्य हरी ऋक्सामाभ्यामेव सायुज्यमगच्छत् ॥ पूषण्वान्करम्भः[12] ॥ इति पशवो वै पूषा पशुभिरेव सायुज्यमगच्छत् ॥ सरस्वतीवान्भारतीवान्यरिवापः ॥ इति वाग्वै सर-

---

1) So corrigirt; H u. Bb सोममघ्नन्नभि; B सोममभन्नभि 2) So B, ohne Accent in H u. Bb एवैन्द्रो 3) In den Mss. ohne Visarga; Kâṭh. 29, 1 द्विनाराशꣳसाः 4) So corrigirt; in den Mss. °वभृथो ohne Accent (dagegen नुबंउध्या) 5) So meine Vermuthung; H u. Bb lesen वेथ्य°; in B वेथ्यं 6) B ता (also वेथ्यंता, während H u. Bb वेथ्य तां) 7) स्तुवते in den Mss. ohne Accent. 8) Das Verbum in den Mss. ohne Accent. 9) So corrigirt; die Mss. °पयता 10) Die Mss. °ऋास्य° 11) Die Mss. betonen एंभ्य° 12) So meine Correctur; H u. Bb करंक; B करंण्यं

स्वतीवाचैव सायुज्यमगच्छत् ॥ इन्द्रस्यापूपः ॥ इतीन्द्रियꣳ वा इन्द्र इन्द्रियेणैव सायुज्यमगच्छत् ॥ मित्रावरुणयोः पयस्या ॥ इति प्राणापानौ वै मित्रावरुणौ प्राणापानाभ्यामेव सायुज्यमगच्छत्ततो देवा अभवन्परासुरास्त्रय एवꣳ वेदैतैरेवेन्द्रियैर्वीर्यैरेतैर्महिमभिः सायुज्यं गच्छति भवत्यात्मना परास्य भ्रातृव्यो भवति दीर्घजिह्वी[1] वै देवानां प्रातःसवनमवालेट्[2] तज्झूमाद्यत्सा पयस्याभवत्तत्साम्नः पयस्या विमदितरूपेव मैत्रावरुणी प्रातःसवने स्यात् प्राणापानौ वै मित्रावरुणौ प्राणापानौ वा एतन्मुखतो यज्ञस्य धीयते न गुदः पर्याकर्तवै[3] यद्गुदं पर्याकुर्यादुदावर्तः प्रजा हन्याद्रक्षसामनन्ववजयाय यूपः पुरस्तान्मीयते यदग्रेण[4] यूपं पशुꣳ हरेयुस्तदनु रक्षाꣳसि यज्ञमवजयेयुरन्तराग्निं च[5] यूपं च[6] हत्यो रक्षसामनन्ववजयाय ॥ ६ ॥

Vgl. Kâṭh 29, 1 u. 2.

समुद्रं गच्छ स्वाहेत्यपस्थꣳ वा एतद्यजत्यन्तरिक्षं गच्छ स्वाहेति रेत एवैतद्दधाति देवꣳ सवितारं गच्छ स्वाहेत्याह प्रसूत्या एवाहोरात्रे गच्छ स्वाहेत्यहोरात्रे ह्यनु प्रजाः प्रजायन्ते मित्रावरुणौ गच्छ स्वाहेति प्राणापानौ वै मित्रावरुणौ प्राणापाना एवासु दधाति द्यावापृथिवी गच्छ स्वाहेत्याभ्यामेवैनाः सृष्टाः परिगृह्णाति छन्दाꣳसि गच्छ स्वाहेति वाग्वै छन्दाꣳसि वाचमेवासु दधाति सोमं गच्छ स्वाहेत्यन्नꣳ वै सोमो

1) So meine Vermuthung; H u. Bb lesen दीर्घजिह्वी; B दीर्घाजीह्वी; aber auf unsere Stelle bezieht sich aller Wahrscheinlichkeit nach das ved. Citat beim Schol. zu Pâ. 4, 1, 59 दीर्घजिह्वी वै देवानां हव्यमलेट्; vgl. auch Ait. Br. 22, 2; das Femininum wird auch durch das Folgende सा पयस्याभवत् cet. gefordert. 2) So corrigirt; die Mss. प्रातःसवनेमवालेट्; vgl. die vorige Anm. sowie bes. Ait. Br. 22, 2. 3) So corrigirt; B यद्गुरं; H u. Bb यद्गुरुं; 4) So B, ohne Accent; in H u. Bb यदग्रेण 5) So corrigirt; H °रंतरामि; Bb °रंतरामि; desgl. B, ohne Acc. 6) So corrigirt; die Mss. च; 7) Statt dessen schreibt B स्वाहेति रेत एवैराचे 8) In den Mss. °त्वन्नꣳ ohne Accent.

ऽन्नमेवास्मु दधाति यज्ञं गछ स्वाहेति यज्ञिया एवैना[1] अकर्दिव्यं नभो गछ स्वाहेति वृष्टिमेवाभ्यो निनयन्त्यग्निꣳ वैश्वानरं गछ स्वाहेति सꣳवत्सरो वा अग्निर्वैश्वानरः सꣳवत्सर एवैनाः प्रतिष्ठापयति सꣳवत्सरायुषमेनाः करोति मनो हार्दिꣳ यछेत्याह प्राणानां गोपीथायौषधीभ्यस्त्वेत्योषधीष्वेव रसं दधाति यो वै विद्वान्वाविद्वान्वोप- 5
यजो मिथुनयोप यजति प्राणान्वा एतन्मिथुनयाकुरुते यदाह मनो हार्दिꣳ यछेति प्राणान्वा एतद्दतुशः[2] कल्पयते[3] पशुर्वा आलब्धः शोचति तस्य मध्यꣳ श्रुगभिसमेति सा हृदयेष्वागछति यत्पुरुषमुपस्पृशेन्मनुꣳष्याञ्श्रुगृछेद्यन्नामुपस्पृशेत्यभ्रूञ्श्रुगृछेद्यद्दारूपस्पृशेद्वनस्पतीꣳ[4] श्रुगृछेद्यत्तृणमुपस्पृशेदोषधीः[5] श्रुगृछेद्यदुदकमुपस्पृशेदपः[6] श्रुगृछेद्यदाद्रेम- 10
नूदकं तञ्शान्तं तचोपोयं तद्देवता ꣳ श्रुचमवयजति ॥ ७ ॥

Vgl. 1, 2; 18. — TS 6, 4, 1 (gudayâgaḥ).

॥ इति तृतीयकाण्डे पात्नीवन्ता[7] नाम दशमः प्रपाठकः ॥

समिद्धा इन्द्र उषसामनीके पुरोरुचा पूर्वकृद्धावृधानः ।
चिभिर्दे[8]वैस्त्रिꣳशता वज्रबाहुर्जघान वृत्रꣳ वि[9] दुरो ववार ॥
नराशꣳसः प्रति श्रूरो मिमानस्तनूनपात्प्रति यज्ञस्य धाम ।
गोभिर्वपावान्मधुना समञ्जन्हिरण्ययैश्चन्द्री[10] यजति प्रचेताः ॥ 15
इडितो[11] देवैर्हरिवां[12] अभिष्टिरा जुह्वानो हविषा शꣳमानः ।

1) Die Mss. एवैना 2) So meine Correctur; die Mss. एतद्दनुनꣳ 3) die Mss. कल्पयते; 4) So corrigirt; die Mss. पशुञ् 5) So corrigirt; die Mss. यत्तृण° und °षधी; 6) So corrigirt; die Mss. षृगृछे°; 7) So die Mss. (पात्नीवंता) 8) So corrigirt; die Mss. देवैत् त्रि°° 9) In den Mss. ohne Accent; s. VS. 20, 36. 10) So B, ohne Accent, in H u. Bb हिरण्ययीश्चंद्री; Kâṭh. 38, 6 हिरण्ये श्चन्द्री 11) So die Mss. auch Kâṭh. इडितो 12) So B, ohne Accent; H u. Bb हरिवा; wohl हरिवं z. l.

पुरंदरो गोचभृद्वज्रबाहुरायातु[1] यज्ञमुप नो जुषाणः ॥
जुषाणो बर्हिरिवान्ना इन्द्रः प्राचीनꣳ सीदात्प्रदिशा पृथिव्याः।
उरुप्रथाः प्रथमानꣳ स्योनमादित्यैरक्तꣳ वसुभिः संजोषाः ॥
इन्द्रं दुरः कवꣳयो धावमाना वृषाणꣳ यन्ति जनयः सुपत्नीः।
द्वारो देवीरभितो विश्रयन्ताꣳ सुवीरा वीरं प्रथमाना महोभिः ॥
उषासानक्ता बृहती बृहन्तं पयस्वती सुदुघे शूरमिन्द्रम्।
पेशस्वती[2] तन्तुना सꣳवयन्ती[3] देवानां देवꣳ यजतः सुरुक्मे ॥
दैव्या भिमाना मनसा पुरुचा होतारा इन्द्रं प्रथमा सुवाचा।
मूर्धन्यज्ञस्य मधुना दधाना प्राचीनं ज्योतिर्हविषा वृधातः[4] ॥
तिस्रो देवीर्हविषा वर्धमाना इन्द्रं जुषाणा वृषणं न पत्नीः।
अच्छिन्नं तन्तुं[5] पयसा सरस्वतीडा[6] देवी भारती विश्वतूर्तिः ॥
त्वष्टा दधदिन्द्राय शुष्ममपाको ऽचिष्टुर्यशसे पुरूणि[7]।
वृषा यजन्वृषणं भूरिरेता मूर्धन्यज्ञस्य समनक्तु देवान् ॥
वनस्पतिरवसृष्टो न पाशैरत्मन्या[8] समञ्जञ्शमिता न देवः।
इन्द्रस्य हव्यैर्जठरं पृणानः स्वदातु हव्यं मधुना घृतेन ॥
स्तोकानामिन्दुं प्रति शूरा[9] इन्दो वृषायमाणो वृषभस्तुराषाट्।

---

1) So die Mss.! (गोचभृद्); ich habe diese var. lectio für गोचभिद् nicht zu ändern gewagt; Kâṭh. 38, 6 गोचभिद् 2) So corrigirt; die Mss. पेशस्वती; Kâṭh. 38, 6 पेशस्वती 3) So corrigirt; die Mss. सꣳवयंति; Kâṭh. 38, 6 संव्ययंती 4) So B; desgl. Kâṭh. 38, 6; vgl. VS 20, 42; in H urspргl. धावृतः geschrieben, dann am Anfang über der Zeile वा eingefügt und bei वृ Umstellung angemerkt, so dass wir वावृधातः erhalten; in Bb वावृधानः oder वावृधातः 5) So H; in Bb तंतु; desgl. B, ohne Accent. 6) So corrigirt; die Mss. °तीडी; cf. RV 2, 3, 8 u. a.; Kâṭh. 38, 6. 7) Die Mss. पुरूणी 8) So der P; die Samh. Mss. त्वन्या (sic)! auch Kâṭh. 38, 6 त्वन्या 9) P शूरः।

घृतप्रुषा[1] मनसा हव्यमुन्दन्त्स्वाहाकृतं जुषताꣳ हव्यमिन्द्रः ॥ १ ॥

Vgl. Kâṭh. 38, 6; VS 20, 36—46; TBr 2, 6, 8.

होता यक्षत्समिधाग्निमिडस्प३दे ऽश्विनेन्द्रꣳ सरस्वतीमजो धूम्रो न गोधूमैः कुवलैर्भेषजं[2] मधुशष्पैर्न[3] तेज इन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यजꣳ होता यक्षत्तनूनपात्सरस्वतीमविर्मेषो[4] न भेषजं पथा मधुमदाभरन्नश्विनेन्द्राय वी३यै बदरैरुपवाकाभिर्भेषजं तोक्मभिः[5] पयः सोमः परिस्रुता घृतं मधु वेत्वाज्यस्य होतर्यजꣳ होता यक्षन्नराशꣳसं न नग्नहुं पतिꣳ सुराया[6] भेषजं मेषः सरस्वती भिषग्यथो[7] न च३न्द्राश्विनोर्वपा इन्द्रस्य[8] वी३यै बदरैरुपवाकाभिर्भेषजं तोक्मभिः पयः सोमः परिस्रुता घृतं मधु वेत्वाज्यस्य[9] होतर्यजꣳ होता यक्षदिडेडित[10] आजुह्वानः सरस्वतीमिन्द्रं बलेन वर्धयन्नृषभेण गवेन्द्रियमश्विनेन्द्राय[11] भेषजꣳ यवैः कर्कन्धुभिर्मधु लाजैर्न मासरं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य[12] होतर्यजꣳ होता यक्षद्बर्हिरूर्णम्रदा[13] भिषङ् नासत्या[14] भिषजाश्विनाश्वा[15] भिष्णुमती भिषग्धेनुः सरस्वती भिषगिन्द्राय दुह[16] इन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य[17] होतर्यजꣳ होता यक्षद्दुरो दिशः कव३ष्यो न व्यच-

1) So corrigirt; die Mss. घृतप्रुषा 2) So Bb; in B कुकलै°; in H eigentlich कुकलै° geschrieben, später in कुवलै° corrigirt; P कुबलैः। cf. VS 21, 29. 3) So betonen Hu. Bb; dagegen P मधु। शष्पैः। न।; cf. VS. 4) Hu. Bb मेषो. 5) B तोकाति 6) P सुरायाः। VS 21, 31 सुरया 7) Die Mss. भिषक्थो 8) So die Samh. Mss.; aber P वपा। इद्रस्य। demgemäss वपेन्द्रस्य zu schreiben. 9) In den Mss. वेत्वाज्यस्य ohne Accent, aber cf. dasselbe oben und unten. 10) P इडा। ईडितः। cf. dagegen 1, 1, 12. 11) P गवा। इन्द्रियं। अश्विना। इन्द्राय। 12) So corrigirt; die Mss. व्रूंत्वाज्यस्य; P व्रंतु।; cf. oben. 13) P ऊर्णम्रदाः। 14) So ist wohl zu lesen; B भिषक् णासत्या; Bb भिषणासत्या; in H hat zwischen भिष und णा° noch etwas gestanden, was aber durch einen grossen Klex ausgemerzt ist; P भिषक्। नासत्या; cf. übrigens VS 21, 33. 15) P भिषजा। अश्विना। अश्वा। 16) Bb दुहं 17) Die Mss. व्रुंत्वाज्यस्य

स्वतीरश्विभ्यां नं दुरो दिशा[1] इन्द्रो नं रोदसी दुघे[2] दुहे धेनुः सरस्वती शुक्रं नं ज्योतिरिन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्वाज्यस्य[3] होतर्यज॰ होता यक्षत्सुपेशसोषे[4] नक्तं दिवाश्विना[5] संजानाने[6] सुपेशसा समञ्जाते[7] सरस्वत्या त्विषिमिन्द्रेण[8] भेषज॰ श्येनो नं रजसा हृदा पयः सोमः परिस्रुता घृतं मधु वीतामाज्यस्य होतर्यज॰ होता यक्षद् दैव्या होतारा भिषजाश्विनेन्द्रं[9] नं जागृवि दिवा[10] नक्तं नं भेषजैः शूष॰[11] सरस्वती भिषक्सीसेन दुह[12] इन्द्रियं पयः सोमः परिस्रुता घृतं मधु वीतामाज्यस्य होतर्यज॰ होता यक्षत्तिस्रो देवीर्नं भेषजं त्रयस्त्रिधातवो ऽपसो[13] रूपमिन्द्रो[14] हिरण्ययमश्विनेडा नं भारती वाचा सरस्वती महा[15] इन्द्राय दुह[16] इन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्वाज्यस्य[17] होतर्यज॰ होता यक्षत्त्वष्टार॰ रूपकृत॰ सुपेशस॰ वृषभं नर्यापसं[18] त्वष्टारमिन्द्रमश्विना भिषजं नः सरस्वतीमोजो[19] नं जूतिरिन्द्रिय॰ वृको नं रभसो भिषग्यशः सुराया[20] भेषज॰ श्रिया नं मासं पयः[21] सोमः परिस्रुता घृतं मधु वेत्वाज्यस्य होतर्यज॰ होता यक्षदनस्पति॰ शमितार॰ शतक्रतुं भीमं नं मन्यु॰ राजान॰ व्याघ्रं[22] नमसाश्विना भाम॰ सरस्वती भिषगिन्द्राय दुह इन्द्रियं पयः सोमः परिस्रुता घृतं

---

1) P दिशः। 2) P दुघे इति दुघे। 3) Die Mss. व्वंत्वाज्यस्य; P व्यंतु। 4) P सुपेशसा। उषे इत्युषे। 5) P दिवा। अश्विना। 6) Die Samh. Mss. संजानानें; P संजानानेति सं.जानानें। 7) Hu.Bb समंजातें; B समंजात; P सं। अंजाते इत्यंजाते। 8) P इंद्रे। नं। (!) 9) Hu.Bb भिषज्याश्वि॰ 10) So P; in Hu.Bb दिवा 11) So corrigirt; P शूषं।; Hu.Bb शुष॰; desgl. B, ohne Accent. S. VS 21, 36. 12) P दुहे। 13) So corrigirt; Hu.Bb यंसो; desgl. B, ohne Accent; P अपसः। 14) So H, Bb u. P; in B °मिंद्रो 15) So corrigirt; Hu.Bb महा; P महः। 16) Bb दुहं; P दुहे। 17) Die Mss. व्वंत्वाज्यस्य; aber P व्यंतु। 18) P नंर्यापसमिति नंर्य.अपसं। 19) Die Mss. °मोजो; P ओजः। 20) P सुराया:।; cf. oben; VS 21, 38 सुरया 21) In den Samh. Mss. ohne Accent; in P nicht vorhanden. 22) So nur P (व्याघ्रं। नमसा।); in den Samh. Mss. व्याघ्रन्॰; s. VS 21, 39.

मधु वाताज्यस्य होतर्यज होता यक्षदग्निꣳ स्वाहाज्यस्य स्तोकानाꣳ स्वाहा मेदसां पृथक् स्वाहा[1] छागमश्विभ्याꣳ स्वाहा मेषꣳ सरस्वत्यै स्वाहा ऋषभमिन्द्राय सिꣳहाय सहस[2] इन्द्रियꣳ स्वाहाग्निं[3] न भेषजै- स्वाहा सोममिन्द्रियैः स्वाहेन्द्रꣳ सुत्रामाणꣳ सवितारꣳ वरुणं भिष- जां पतिꣳ स्वाहा वनस्पतिं प्रियं पाथो न भेषजैः स्वाहा देवा आ- ज्यपा जुषाणो अग्निर्भेषजं पयः सोमः परिस्रुता घृतं मधु व्यन्वाः ज्यस्य[4] होतर्यज ॥ २ ॥

Vgl. VS 21, 29—39; TBr 2, 6, 11.

समिद्धो अग्निरश्विना[5] तप्तो घर्मो विराट् सुतः।
दुहे धेनुः सरस्वती सोमꣳ शुक्रमिहेन्द्रियम्।
तनूपा[6] भिषजा सुꣳते ऽश्विनोभा सरस्वती।
मध्वा रजाꣳसीन्द्रियमिन्द्राय पयसिभर्वह ॥
इन्द्रायेन्दुꣳ सरस्वती नराशꣳसेन नग्महुम्।
अधातामश्विना[7] मधु भेषजं भिषजा सुते ॥
आजुह्वाना[8] सरस्वतीन्द्रायेन्द्रियाणि वीर्यम्।
इडाभिरश्विना[9] इषꣳ समूर्जꣳ सꣳ रयिं दधुः[10] ॥
अश्विना नमुचेः[11] सुतꣳ सोमꣳ शुक्रं परिस्रुता।
सरस्वती तमाभरद्बर्हिषेन्द्राय पातवे ॥

---

1) Die Samh. Mss. स्वाहाछागꣳ; P पृथक्। छागं। 2) P संहसे। 3) Die Mss. (Hu. Bb) स्वाहाग्निं 4) Hu. Bb व्यंत्वाज्यस्य; P व्यंतु। 5) So P; in Hu. Bb अश्विना 6) So corrigirt; Hu. Bb तननपा; desgl. B, ohne Accent; P तनूपेति तनूपा। cf. VS 20, 56; auch Kâṭh. 38, 8 तनूपा 7) In B hier noch सीन्द्रियमिन्द्राय eingeschoben. 8) P आजुह्वानेत्या. जुह्वाना। 9) P अश्विनौ। 10) So P; in Hu. Bb दधुः 11) So P अश्विना। नमुचेः।; in Hu. Bb अश्विना भं नमुचेः; desgl. B, ohne Accent; Kâṭh. 38, 8 अश्विना नमुचेसुतꣳ

कव३यो न व्यचस्वतीरश्विभ्यां[1] न दुरो दिशः।
इन्द्रो न रोदसी उभे दुहे[2] कामान्त्सरस्वती[3] ॥
उषासा[4] नक्तमश्विना[5] दिवेन्द्रꣳ[6] सायमिन्द्रियैः।
संजानाने[7] सुपेशसा समञ्जाते सरस्वत्या ॥
पातं नो अश्विना दिवा[8] पाहि[9] नक्तꣳ सरस्वति[10]।
दैव्या होतारा भिषजा[11] पातमिन्द्रꣳ सचा सुते ॥
तिस्रस्त्वेधा सरस्वत्यश्विना[12] भारतीडा[13]।
तीव्रं परिस्रुता सोममिन्द्रायासुषुवुर्मदम्[14] ॥
अश्विना भेषजं[15] मधु भेषजं नः सरस्वती।
इन्द्रे त्वष्टा यशः श्रियꣳ रूपꣳ रूपमधुः[16] सुते ॥
ऋतुथेन्द्रो[17] वनस्पतिः शशमानः परिस्रुता[18]।
कीलालमश्विभ्यां मधु दुहे धेनुः[19] सरस्वती ॥
गोभिर्न सोममश्विना[20] मासरेण परिस्रुता[21]।
समधाताꣳ सरस्वत्या स्वाहेन्द्रे[22] सुतं मधु[23] ॥ ३ ॥

Vgl. Kâṭh. 38, 8; VS 20, 55—66; TBr. 2, 6, 12.

1) So Bb; B वचस्वती°; auch H eigentlich वचस्वती°, dann corrigirt in व्यच°; P व्यचस्वतीः। Kâṭh. 38, 8 व्यचचस्वती° 2) So P; in Hu. Bb दुहे 3) Die Mss. कामान्स° 4) So P; desgl. B, ohne Accent; in Hu. Bb उषसा 5) So Hu. Bb; P अश्विना। 6) Hu. Bb दिवेंद्र°; aber P दिवा। इंद्रं। 7) Hu. Bb संजानानें; P संजानानेति स.जानानें। 8) So P; in Hu. Bb दिवा 9) So P; in Hu. Bb पाहि 10) So P; in H u. Bb सरस्वति 11) P दैव्या। होतारा। भिषजा।; dagegen in Hu. Bb दैव्या होतारा भिषजा 12) B सरस्वत्यमश्विना 13) P भारती। इंडा। 14) H u. Bb °मिंद्रायासुषुवु°; desgl. B, ohne Accent; P इंद्राय। सुषुवुः। सुषुवुरिति सुसुवुः। 15) Hu. Bb भिषजं 16) So das Verb ohne Accent in P अधुः।; dagegen H u. Bb °मधुः 17) Hu. Bb ऋतुथेंद्रो; aber P ऋतुथेत्यृतु.था। इंद्रः। 18) So corrigirt; die Mss. परिस्रुता; P परिस्रुतेति परि.स्रुता। 19) So P; in H u. Bb धेनुः 20) So Hu. Bb; in P अश्विना। 21) So corrigirt; die Mss. परिस्रुता; P परिस्रुतेति परि.स्रुता। 22) So corrigirt; Hu. Bb स्वाहेंद्रं; B स्वहेंद्रे; P स्वाहा। इंद्रे। 23) So P सुतं। मधु।; in Hu. Bb सुतं मधु; B नुतमधु

अश्विना हविरिन्द्रियं नमुचेर्धिया सरस्वती।
आ शुक्रमासुरादसु मद्यमिन्द्राय[1] जभ्रिरे॥
यमश्विना सरस्वती हविषेन्द्रमवर्धयन्।
स बिभेद बलं[2] मद्यं[3] नमुचा[4] आसुरे सचा॥
तमिन्द्रं[5] पशवः सचाश्विनोभा सरस्वती।
दधाना[6] अभ्यूनूषत हविषा यज्ञं[7] इन्द्रियम्॥
यं इन्द्र[8] इन्द्रियं दधुः सविता वरुणो भगः।
स सुत्रामा हविष्पतिर्यजमानाय सश्चत॥
सविता वरुणो दधद्यजमानाय दाशुषे।
आदत्त[9] नमुचेर्वसु सुत्रामा बलमिन्द्रियम्[10]॥
वरुणः क्षत्रमिन्द्रियं भगेन सविता श्रियम्।
सुत्रामा यशसा बलं दधाना[11] यज्ञमाशत॥
युवं[ष] सुराममश्विना नमुचा[12] आसुरे सचा।
विपिपाना[13] सरस्वतीन्द्रं कर्मस्वावत[14]॥

होता यक्षदश्विनौ सरस्वतीमिन्द्रमिमे सोमाः सुरामाण[ष]श्छागैर्न[15] मेषैर्ऋषभैः सुताः शष्पैर्न तोक्मभिर्लाजैर्महस्वन्तो मदा[15] मांसरेण[16] परिस्रुता[17] शुक्राः पयस्वन्तो ऽमृताः प्रस्थिता वो मधुश्चुतस्तान-

1) So die Mss.; auch P मद्यं। (cf. unten); S. VS 20,67 मधम्° Desgl. Kâṭh. 38, 8, nur ohne Accent. Vielleicht darnach zu corrigiren. 2) So die Mss.; auch P बलं। 3) So die Mss; auch P (s. oben). S. dagegen VS. 20,68; Kâṭh. 38,8. 4) P नमुचौ।; 5) So B, ohne Accent und P तं। इंद्रं।; in H u. Bb संमिंद्रं; 6) P दधानाः। 7) P यज्ञे।; 8) P यं। इंद्रे। 9) P आ। अदत्त।; 10) So mit P बलं।; in H u. Bb बलमि° 11) P दधानाः। 12) P नमुचौ। 13) So im Anschluss an P विपिपानेति वि · पिपाना।; ebenso RV 10, 131, 4; auch Kâṭh. 38,9 विपिपाना; in H u. Bb व्यपिवाना; B व्यपिबाना; 14) P कर्मस्विति कर्म · सु। आवतं। 15) So B, ohne Accent; P मदाः।; aber H u. Bb मंदा; 16) H u. Bb मांसरे · 17) So corrigirt; H u. Bb परिस्रुताः; desgl. B, ohne Accent . P परिस्रुतेति परि · स्रुता। परिस्कृता इति परिः · कृताः।; s. VS 21, 42.

श्विना[1] सरस्वतीन्द्रो जुषन्ता॰[2] सोम्यं मधु॰ पिबन्तु[3] मदन्ता॰ व्यन्तु॰ होतर्यज॥

पुत्रमिव पितरा अश्विनोभेन्द्रावथुः[4] काव्यैर्॰ सनाभिः।
यत्सुरामं॰ व्यपिबः[5] शचीभिः सरस्वती त्वा मघवन्नभिष्णक्[6] ॥
अश्विना[7] गोभिरिन्द्रियमश्वेभिर्वी३र्यं बलम्।
हविषेन्द्रं॰ सरस्वती यजमानमवर्धयन् ॥
ता नासत्या सुपेशसा हिरण्यवर्त्तनी[8] नरा[9]।
सरस्वती हविष्मतीन्द्रं कर्मस्ववतु[10] ॥
ता भिषजा सुकर्मणा सा सुदुघा सरस्वती।
स वृत्रहा शतक्रतुरिन्द्राय दधुरिन्द्रियम् ॥
अहाय्यग्ने हविरास्ये[11] ते स्रुचीव[12] घृतं चम्वीव[13] सोमः।
वाजसनिं॰ रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तम् ॥
यस्मिन्नश्वास ऋषभास[14] उक्षणो[15] वशा मेषा अवसृष्टासो[16] आहुताः[17]।
कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनये चारुमग्नये ॥

॥ ४ ॥ Vgl. Kâṭh. 38, 8 u. 9; VS 20, 67—79; TBr. 2, 6, 13.

---

1) So im Anschluss an P मधुश्च्युत इति मधु · श्च्युतः।; H मधुश्चुत॰; desgl. B, ohne Accent; cf. 3, 3, 4. Bb मधश्चुत॰ 2) Die Samh. Mss. जुषता॰; aber P जुषता। 3) So P; in H u. Bb पिबंत; desgl. B, ohne Accent. 4) P पितरौ। अश्विना। उभा। इंद्र। आवथुः। 5) P वि। अपिबत्। 6) Die Samh. Mss. °भिष्णक् P अधिष्णक्। 7) So P; in H u. Bb अश्विना 8) So P हिरण्यवर्त्तनी इति हिरण्य · वर्त्तनी।; H u. Bb हिरण्यवर्त्मनि; desgl. B, ohne Accent. 9) So P; in H u. Bb नरा:; desgl. B, ohne Accent. 10) So corrigirt; H u. Bb कर्मास्ववतु; desgl B, ohne Accent; P कर्मस्विति कर्म · सु। आवतु। 11) H u. B °स्ये; P आस्ये।; 12) P स्रुचीवेति स्रुचि · इव।; 13) H u. Bb चाचूमीव; desgl. B, ohne Accent; P चम्वीवेति चम्वि · इव।; 14) P अश्वासः। ऋषभासः। 15) So Bb; in H उचाणो; desgl. B, ohne Accent; P उचाणः।; s. RV 10, 90, 14; VS 20, 78; Kâṭh. 38,9 तचाणो 16) P वशाः। मेषाः। अवसृष्टास इत्यव · सृष्टासः। 17) H u. Bb आहुतः; desgl. B, ohne Accent; aber P आहुता इत्या · हुताः।

देवं बर्हिः सरस्वती सुदेवमिन्द्रायाश्विना तेजो न चक्षुरक्षोर्बर्हिषा[1] दधुरिन्द्रियꣳ वसुवने वसुधेयस्य वेतु यज देवीर्द्वारो अश्विना भिषजेन्द्रꣳ[2] सरस्वती प्राणान्न[3] वीर्यं नसि[4] द्वारो[5] दधुरिन्द्रियꣳ वसुवने वसुधेयस्य व्यन्तु यज देवी उषासा[6] अश्विना सुचामेन्द्रꣳ सरस्वती बलं[7] न वाचमास्यꣳ[8] उषाभ्यां दधुरिन्द्रियꣳ[9] वसुवने वसुधेयस्य वीताꣳ यज देवी ज्ञोष्ट्री सरस्त्यश्विनेन्द्रमवधयन्[10] श्रोत्रं न कर्णयोर्यशो जोष्ट्रीभ्यां दधुरिन्द्रियꣳ वसुवने वसुधेयस्य वीताꣳ यज देवी ऊर्जाहुती दुघे[11] सुदुघेन्द्रꣳ[12] सरस्त्यश्विना भिषजावतꣳ[13] भ्रक्षं न ज्योतिः स्तनयोराहुती[14] धत्त[15] इन्द्रियꣳ वसुवने वसुधेयस्य वीताꣳ यज देवा देवानां[16] भिषजा होतारा इन्द्रमश्विना वषट्कारैः सरस्वती त्विषिं न हृदये मतिꣳ होतृभ्यां दधुरिन्द्रियꣳ वसुवने वसुधेयस्य वीताꣳ यज देवीस्तिस्रस्तिस्रो देवीरश्विनेडा सरस्वती भूषं[17] न मध्ये नाभ्या[18] इन्द्राय दधुरिन्द्रियꣳ वसुवने वसुधेयस्य व्यन्तु यज देव इन्द्रो नराशꣳ सत्पतिवरूथः सरस्त्यार्श्विभ्यामीयते रथो रेतो न रूपममृतं जनित्रमिन्द्राय त्वष्टा दधदिन्द्रियाणिꣳ वसुवने वसुधेयस्य वेतु यज देवो देवैर्वनस्पतिर्हिरण्यपर्णो अश्विभ्याꣳ सरस्त्या सुपिप्पल[19] इन्द्राय पच्यते मध्वोजो[20] न जूतिर्वृषभो न भामꣳ[21] वनस्पतिर्नो[22]

1) So im Anschluss an P चक्षुः । अक्षोः ।; H u. Bb चक्षुरक्षोर्बर्हिषा; B चक्षुरक्षो बर्षिषा; s. VS 21, 48 °क्ष्योर्ब° 2) P भिषजा । इंद्रं ।; cf. VS 21, 49. 3) P प्राणं । नं । 4) So P; in H u. Bb ohne Accent; 5) So B, ohne Accent; P द्वारः ।; in H u. Bb द्वारो; 6) P उषासौ । उषसावित्युषसौ । 7) So P; in H u. Bb ohne Accent. 8) H u. Bb °मास्यं; aber P आस्ये ।; 9) P दधुः । 10) So das Verb ohne Accent in P अवर्धयन् ।; dagegen H u. Bb °मंवर्धयन् 11) So P दुघे इति दुघे ।; aber H u. Bb दुघें; 12) H u. Bb सुदुघेंद्रꣳ; desgl. B, ohne Accent; P सुदुघा । इंद्रे । 13) P भिषजा । अवतं । 14) P ज्योतिः । स्तनयोः । 15) P धत्तः ।; 16) So Bb; in B देवानां देवा; in H eigentlich देवानां देवा geschrieben, dann corrigirt wie in Bb; P देवा । देवानां । 17) So P (भूषं । नं ।); H u. Bb भुषन्न; desgl. B, ohne Accent; s. VS 21, 53. 18) So corrigirt; H u. Bb नाभ्या; P नाभ्याः । 19) So corrigirt; H u. Bb सुपिःपला; desgl. B, ohne Accent; P सुपिप्पलं इति सु · पिप्पलः । (20 P मधु । ओजः । 21) So in Uebereinstimmung mit P भामं ।; in H u. Bb भामꣳ; 22) P वनस्पतिः । नं ।

दधदिन्द्रियाणि[v] वसुवने वसुधेयस्य वेतु[v] यज देवं बर्हिर्वारितीना-
मध्वरे स्तीर्णमश्विभ्यामूर्णम्रदाः सरस्वत्या[2] स्योनमिन्द्र ते सद[3] ईशाया
मनु[v] राजानं बर्हिषा दधुरिन्द्रिय[v] वसुवने वसुधेयस्य वेतु[v] यज देवो
अग्निः स्विष्टकृद्देवान्यक्षद्यथायथ[v] होतारा इन्द्रमश्विना वाचा वाच[v]
5 सरस्वतीमग्नि[v] सोम[v][5] स्विष्टकृत्स्विष्टा[6] इन्द्रः सुत्रामा सविता वरुणो
भिषगिष्टो देवो वनस्पतिः[v] स्विष्टा देवा[7] आज्यपाः[v] स्विष्टो अग्निरग्निना
होता होचे स्विष्टकृत्सहो न दधदिन्द्रियमूर्जमपचिति[v] स्वधा[v] वसुवने
वसुधेयस्य वेतु[v] यज ॥ ५ ॥

Vgl. VS 21, 48—58; TBr 2, 6, 14.

सोमो राजामृत[v][8] सुत[9] ओषधीनामपा[v] रसः।
10 ऋतेन सत्यमिन्द्रिय[v] विपान[v] शुक्रमन्धसः।
इन्द्रस्येन्द्रियमिदं पयो ऽमृतं मधु॥
अज्रः क्षीर[v] व्यपिबत्कुङ्ङाङ्गिरसो[10] धिया।
ऋतेन सत्यमिन्द्रिय[v] विपान[v] शुक्रमन्धसः।
इन्द्रस्येन्द्रियमिदं पयो ऽमृतं मधु॥
15 अज्रः सोम[v] व्यपिबच्छन्दोभिर्ह[v]सः शुचिषत्।
ऋतेन सत्यमिन्द्रिय[v] विपान[v] शुक्रमन्धसः।
इन्द्रस्येन्द्रियमिदं पयो ऽमृतं मधु॥

---

1) Hu.Bb °तीनम° 2) So P; cf. VS 21, 57; in Hu.Bb सरस्वत्याः; desgl. B, ohne Accent. 3) P सदः। 4) So Hu.Bb; P ईशाये।; B ईशाना 5) So corrigirt; Hu.Bb °मग्नि° सोम° 6) P स्विष्ट इति सु.इष्टः। 7) P स्विष्टा इति सु.इष्टाः। देवाः। 8) P राजा। अमृतं।; in Hu.Bb °मृत° 9) P सुतः।; Kâṭh. 38, 1 सुतं 10) So im Anschluss an P (cf. auch VS 19, 73); P वि। अपिवत्। कुङ्। आंगिरसः।; H व्यपिबत्कुंगांनिरसो (doch scheint कुं getilgt zu sein); desgl. B, ohne Accent; Bb व्यपिबगांभिरसो; Kâṭh. 38, 1 व्यपिबत्क्रङ्ङागिरसो

अन्नात्परिस्रुतो रसं ब्रह्मणा क्षत्रꣳ व्यपिबत्।
ऋतेन सत्यमिन्द्रियꣳ विपानꣳ शुक्रमन्धसः।
इन्द्रस्येन्द्रियमिदं पयो ऽमृतं मधु॥
रेतो मूत्रꣳ विजहाति योनिं प्रविशदिन्द्रियम्।
गर्भो जरायुणावृता[1] उल्बं जहाति जन्मना[2]॥
ऋतेन सत्यमिन्द्रियꣳ विपानꣳ शुक्रमन्धसः।
इन्द्रस्येन्द्रियमिदं पयो ऽमृतं मधु॥
दृष्ट्वा रूपे व्याकरोत्सत्यानृते[3] प्रजापतिः।
अश्रद्धामनृते ऽदधाच्छ्रद्धाꣳ[4] सत्ये प्रजापतिः॥
ऋतेन सत्यमिन्द्रियꣳ विपानꣳ शुक्रमन्धसः।
इन्द्रस्येन्द्रियमिदं पयो ऽमृतं मधु॥
वेदेन रूपे व्यपिबत्सुतासुतौ[5] प्रजापतिः।
ऋतेन सत्यमिन्द्रियꣳ विपानꣳ शुक्रमन्धसः।
इन्द्रस्येन्द्रियमिदं पयो ऽमृतं मधु॥
दृष्ट्वा परिस्रुतो रसꣳ शुक्रेण शुक्रꣳ व्यपिबत्पयः सोमं प्रजापतिः।
ऋतेन सत्यमिन्द्रियꣳ विपानꣳ शुक्रमन्धसः।
इन्द्रस्येन्द्रियमिदं पयो ऽमृतं मधु॥ ६॥

Vgl. Kâṭh. 38, 1; VS 19, 72—79; TBr. 2, 6, 2.

परीतो[6] षिञ्चता सुतꣳ सोमो य[7] उत्तमꣳ हविः।

---

1) P गर्भः। जरायुण (!)। आवृत इत्या. वृतः।; H u. Bb गोभिर्ज° Kâṭh. 38, 1 गर्भो जरायुणा 2) B जन्मना 3) P वि। आ। अकरोत्। सत्यानृते इति सत्यानृते।; H u. Bb सत्यानृते 4) Die Mss. schreiben दधात्; P अनृते। अदधात्। 5) So P; in H u. Bb सुतासुतौ 6) So corrigirt (s. RV 9, 107, 1; VS 19, 2); H u. Bb परितो; in H eigentlich परिनो; B परि नो; P परि। इतः। 7) P सिंचत। श्रुतं। सोमं। यः।

दधन्वान्यो[1] नर्यो अ३प्स्वन्तरा[2] सुषाव सोममद्रिभिः ॥
सोमो ऽस्यश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे प-
च्यस्व ॥
पुनातु ते परिस्रुत॰ सोम॰ सूर्यस्य दुहिता।
वारेण शश्वता तना ॥
वायुः[3] पूतः पवित्रेण प्राक्[4] सोमो अतिद्रुतः।
इन्द्रस्य युज्यः सखा ॥
वायोः पूतः पवित्रेण प्रत्यक्[5] सोमो अतिसुतः।
इन्द्रस्य युज्यः सखा ॥
ब्रह्म क्षत्रं पवते तेज इन्द्रिय॰ सुरायाः[6] सोमः सुत[7] आसुतो[8]
मदाय।
शुक्रेण देव देवताः पिपृग्धि रसेनान्न॰ यजमानाय धेहि ॥
कुविदङ्ग[9] नाना हि वाम् ॥
या व्याघ्र॰ विषूचिकोभौ[9] वृकं च रक्षाति।
श्येनं पतत्रिण॰ सि॰ह॰ सेमं[10] पात्व॰हसः ॥
सुरावन्तं बर्हिषद॰ सुवीर॰ यज्ञ॰ हिन्वन्ति महिषा[11] नमोभिः।
दधानाः सोमं दिवि देवतासु मदेनेन्द्र॰ यजमानाः स्वर्काः ॥
यस्ते रसः संभृता[12] ओषधीषु सोमस्य शुष्मः सुराया॰ सुतस्य।

---

1) Die Samh. Mss. दधन्वन्यो; aber P दधन्वान् । यः ।; s. RV 9, 107, 1. 2) So im Anschluss an P अप्स्वत्यप् . सु । अंतः । आ ।; Hu. Bb °तरा; s. RV 9, 107, 1. 3) So die Mss., auch P. 4) P प्राङ् । 5) So B, ohne Accent; Hu. Bb प्रत्यक्; P प्रत्यङ् । 6) Hu. Bb सुरायाः 7) P सुतः । 8) H आसुतो; in Bb ohne Accent; aber P आसुत इत्या . सुतः । 9) So Bb; P विषूचिका । उभौ ।; H विषुचि°; desgl. B, ohne Accent. 10) So im Anschluss an P सो । इमं ।; Hu. Bb सोमं; desgl. B, ohne Accent; cf. VS 19, 10. 11) P महिषाः । 12) P संभृत इति सं . भृतः ।

तेन जिन्व यजमानं मदेन सरस्वतीमश्विना इन्द्रमग्निम् ॥
यमश्विना नमुचेरासुरादधि सरस्त्यसुनोदिन्द्रियाय[1] ।
इमं तꣳ शुक्रं मधुमन्तमिन्दुꣳ सोमꣳ राजानमिह भक्षयामि ॥
यदद्य शिष्टꣳ रसिनः सुतस्य यमस्येन्दो[2] अपिबञ्शचीभिः[3] ।
अहं तमस्य मनसा शिवेन सोमꣳ राजानमिह भक्षयामि ॥ ७ ॥

Vgl. Kâṭh. 38, 2; VS 19, 2—7. 10. 32—35; TBr 2, 6, 1 u. 3.

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ॥
चया देवा[4] एकादश चयस्त्रिꣳशाः सुराधसः ।
बृहस्पतिपुरोहिता[5] देवस्य सवितुः सवे देवा देवैरवन्तु त्वा ॥
प्रथमास्त्वा द्वितीयैरभिषिञ्चन्तु द्वितीयास्त्वा तृतीयैस्तृतीयास्त्वा सत्येन सत्यं त्वा ब्रह्मणा ब्रह्म त्वा यजुर्भिर्यजूꣳषि त्वा सामभिः सामानि त्वा ऋग्भिर्ऋचस्त्वा पुरोनुवाक्याभिः पुरोनुवाक्यास्त्वा याज्याभिर्याज्यास्त्वा वषट्कारैर्वषट्कारास्त्वाहुतिभिरभिषिञ्चन्त्वाहुतयस्ते[6] कामान्त्समर्धयन्त्वसा[7. 8] अश्विनोस्त्वा तेजसा ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यास्त्वा वीर्येण यशसे ऽन्नाद्यायाभिषिञ्चामीन्द्रस्य त्वेन्द्रियेणौजसे बलायाभिषिञ्चामि भूः स्वाहा ॥
शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि[9] ।
राजा मे प्राणो अमृतꣳ सम्राट् चक्षुर्विराट् श्रोत्रम् ॥

1) So corrigirt; die Mss. (H u. Bb) °त्यसुनोदिन्द्रियाय; B °त्यासुनो°; P सरस्वतो। असुनोत्। इंद्रियाय। 2) P चं। अस्य। इंद्रः। 3) P अपिबत्। 4) P चयाः। देवाः। 5) H u. Bb बृहस्पतिः पुरोहिता; aber P richtig बृहस्पतिपुरोहिता इति बृहस्पति-पुरोहिताः। 6) So im Anschluss an P आहुतिभिरित्या-हुतिभिः। अभि। सिंचंतु। Die Samh. Mss. त्वाहुतीभिरभिषिंचत्व° 7) Die Mss. कामान्सं° 8) P सं। अर्धयंतु। असौ।; in den Samh. Mss. ist nach °त्वसा das Zeichen ॥ gesetzt, das aber schon die Beobachtung des Saṃdhi als nicht hingehörig zeigt. Vielleicht wäre der Vocativ° त्वसा zu schreiben (cf. P). 9) P श्मश्रूणि

जिह्वा[1] मे भद्रं वाङ्मुहो[2] मनो मन्युः स्वराड् भामः[3]।
मोदाः प्रमोदा[4] अङ्गुलीरङ्गानि[5] मित्रं मे सहः ॥
बाहू मे बलमिन्द्रियं हस्तौ मे कर्म वीर्यम्।
आत्मा क्षत्रमुरो[6] मम ॥
पृष्टीर्मे[7] राष्ट्रमुदरमंसौ ग्रीवाश्च श्रोणी।
ऊरू अरत्नी जानुनी विशो मेऽङ्गानि[8] सर्वतः ॥
नाभिर्मे चित्तं विज्ञानं पायुर्मेऽपचितिर्भसत्।
आनन्दनन्दा[9] आशिषो मे भगः सौभाग्यं पसः ॥
लोमानि प्रयतिर्मम त्वङ् मा[10] आनतिरागतिः।
मांसं मा[11] उपनतिर्वस्वस्थि[12] मज्जा मा आनतिः ॥
जङ्घाभ्यां पद्भ्यां धीरोऽस्मि विशि राजा प्रतिष्ठितः।
प्रति ब्रह्मन्प्रतितिष्ठामि क्षत्रे प्रत्यश्वेषु प्रतितिष्ठामि गोषु ॥
प्रति प्रजायां प्रतितिष्ठामि पुष्टे[13v] प्रति प्राणेषु प्रतितिष्ठाम्यात्मन्द्यावापृथिव्योः[14] प्रतितिष्ठामि यज्ञे ॥ ८ ॥

Vgl. Kâṭh. 38, 4; VS 20, 3. 5—13; TBr. 2, 6, 5.

---

1) So P; die Saṃh. Mss. schreiben जुह्वा 2) So H u. Bb; P वाक् । मह: ।; B वाङ्मनहो; Kâṭh. 38, 4 वां महो 3) So H, Bb u. P; in B भास: 4) P प्रमोदा इति प्र. मोदा: । 5) So im Anschluss an P अंगुली: । Die Saṃh. Mss. अंगुलिर°; Kâṭh. 38, 4 अंगुलीर° 6) Im Anschluss an P क्षत्रं । उर: । H u. Bb क्षत्रमुरो 7) So im Anschluss an P पृष्टी: । मे ।; die Saṃh. Mss. पृष्टिर्मे; Kâṭh. 38, 4 पृष्टीर्मे 8) P मे । अंगानि । 9) H u. Bb आनंदनंदा; aber P आनंदनंदा । 10) P त्वक् । मे । 11) P मे । 12) So im Anschluss an P उपनतिरित्युप. नति: ।; H u. Bb उपनमतिर्व°; desgl. B, ohne Accent; Kâṭh. 38, 4 उपनति° 13) P पुष्टे । . 14) So P; in H u. Bb द्यावापृथिव्यो:

सीसेन तन्त्वं मनसा मनीषिण[1] ऊर्णासूत्रेण[2] कवयो वयन्ति।
अश्विना[3] यज्ञꣳ सविता सरस्वतीन्द्रस्य रूपꣳ वरुणो भिषज्यन्॥
तदस्य रूपममृतꣳ शचीभिस्त्रिधा दधुर्देवताः सꣳराणाः।
लोमानि शष्पैर्बहुधा न तोक्मभिस्त्वगस्य मासꣳसमभवन्न[4] लाजाः॥
तदश्विना भिषजा रुद्रवर्तनी सरस्वती[5] वयति पेशो अन्तरम्। 5
अस्थि[6] मज्जानं[7] मांसरं कारोतरेण[8] दधतो गवां त्वचि॥
सरस्वती मनसा पेशलꣳ वसु नासत्याभ्याꣳ वयति दर्शतꣳ वपुः।
रसं परिस्रुतो[9] न रोहितं नग्नहुधीरस्तसरं न वेम॥
पयसः शुक्रममृतं जनिꣳ च सुराया मूत्राज्जनयन्त[10] रेतः।
अपामतिं[11] दुर्मतिं बाधमाना[12] ऊर्वध्यꣳ वातात्स३ब्वं[13] तदारात[14]॥ 10
इन्द्रः सुत्रामा हृदयेन सत्यं पुरोडाशेन सविता जजान[15]।
यकृत्क्लोमानꣳ वरुणो भिषज्यन्मतस्ने[16] वाय३व्यैर्न मिनाति पित्तम्॥
आन्त्राणि स्थालीर्मधु पिन्वमाना[17] गुदाः पात्राणि सुदुघा न धेनुः।
श्येनस्य पत्त्रं न शरीरमासन्दी नाभिरुदरं न माता॥
कुम्भौ वनिष्टुर्जनिता[18] शचीभिर्यस्मिन्नग्रे[19] योन्यां गर्भो अन्तः। 15

---

1) P मनीषिणः 2) P ऊर्णासूत्रेणेत्यूर्णा-सूत्रेण।; Hu.Bb ऊर्णासूत्रेण 3) So P; in Hu.Bb अश्विना 4) P अभवत्। नं। 5) B सरखति 6) P अस्थिं। 7) So P; in Hu.Bb मज्जान; desgl. B, ohne Accent; Kâṭh. 38,3 मज्जानम् 8) So P; मांसरं। कारोतरेण।; Hu.Bb मांसꣳ स्कारोतरेण; desgl. B, ohne Accent; Kâṭh. 38,3 मासरैः करोतरेण 9) P परिस्रुत इति परिस्रुतः। 10) P सुराया:। मूत्रात्। जनयंत 11) P अप। अमतिं। 12) P बाधमानाः। 13) P सभ्वं। (!) Bb सश्वं; Kâṭh. 38,3 wohl सव्वं oder सघं 14) P तत्। आरात्।; die Samh. Mss. नं दारात् (cf. Kâṭh. 38,3 तदारात्). 15) So corrigirt; die Mss., auch P, schreiben जनान (!) Kâṭh. 38, 3 जजान 16) So P. मतस्ने इति मतस्ने।; die Samh. Mss. मतस्ने; Kâṭh. 38,3 मतस्ने 17) P स्थालीः। मधु। पिन्वमानाः। 18) So corrigirt; die Mss. वनिष्टु°; auch P वनिष्टुः।; Kâṭh. 38,3 वनिष्ट° 19) P यस्मिन्। अग्रे।

प्राशःसूक्तः शतधारा उत्सो[3] दुहे न कुम्भी[4] स्वधां पितृभ्यः ॥
मुखꣳ सदस्य[5] शिरा इत्सतेन[6] जिह्वा[7] पवित्रमश्विनासन्त्सरस्वती[8]
चषं न पायुर्भिषगस्य वालो[9] वस्तिर्न[10] शेपो[11] हरसा[12] तरस्वी ॥
अश्विभ्यां चक्षुरमृतं[13] ग्रहाभ्यां छागेन तेजो हविषा घृतेन ।
पक्ष्माणि गोधूमैः कुवलैरुतानि[14] पेशो न शुक्रमसितꣳ[15] वसाते ।
अविर्न मेषो नसि वीर्याय प्राणस्य पन्था[16] अमृतं ग्रहाभ्याम् ।
सरस्वत्युपवाकैर्व्यानं नस्यानि[17] बर्हिर्बदरैर्जजान[18] ॥
इन्द्रस्य रूपमृषभो[19] बलाय कर्णाभ्याꣳ श्रोत्रममृतं ग्रहाभ्याम् ।
यवैर्न बर्हिर्भुवि केसराणि कर्कन्धु जज्ञे मधु सारघं मुखे ॥
आत्मन्नुपस्थे न वृकस्य लोम[20] मुखे श्मश्रूणि न व्याघ्रलोम[21] ।
केशा[22] न शीर्षन्यशसे श्रियै शिखा[23] सिꣳहस्य[24] लोम त्विषिरिन्द्रियाणि
अङ्गैरात्मानं भिषजा तदश्विनात्मानमङ्गैः समधात्सरस्वती ।
इन्द्रस्य रूपꣳ शतमानमायुः शुक्रं न ज्योतिरमृतं दधाना[25] ॥

---

1) P प्राशिः । सूक्त इति वि.अक्तः । 2) P शतधार इति शत.धारः । 3) D Samh. Mss. schreiben उत्सो; aber P richtig उत्सः । 4) Bb नत्कुंभी; H नत्कुभी; P न कुभी; aber P नं । कुंभी । ; Kâṭh. 38, 3 न कुंभी 5) H u. Bb मुखꣳ सदस्य; aber P मुखं । सत् । अस्य । ; s. VS 19, 88. 6) So die Mss.; auch Kâṭh. 38, 3 इत्सतेन 7) So P; in H u. Bb जुह्वा; desgl. B, ohne Accent; Kâṭh. 38, 3 जिह्वा 8) P अश्विना । आसन् । सरस्वती । 9) So H u. Bb; P वाल: । ; B बालो; Kâṭh. 38, 3 वारो 10) P बस्ति । नं । 11) Dies Wort in den Samh. Mss. ohne Accent; P पेश: । Kâṭh. 38, 3 शेपो 12) So P; die Samh. Mss. हरस; Kâṭh. 38, 3 हरसा 13) P अमृतं । 14) P कुवलै: । उतानि । 15) So corrigirt gemäss P असितं । (s. VS 19, 89); die Samh. Mss. °मंशित; Kâṭh. 38, 3 शुक्रमसितं । 16) P पंथा: । 17) So P; die Samh. Mss. नस्यानि; s. VS 19, 90; Kâṭh. 38, 3 व्यानन्नस्यानि 18) P जनान । ; Kâṭh. 38, 3 जजान 19) So corrigirt; H u. Bb रूपमृषभो (desgl. B, ohne Accent); P रूपं । वृषभ: । ; Kâṭh. 38, 3 रूपमृषभो 20) In den Samh. Mss. dies Wort ohne Accent. 21) P व्याघ्रलोमेति व्याघ्र.लोम । ; Kâṭh. 38, 3 व्याघ्रलोमस् 22) P केशा: । 23) So P; die Samh. Mss. शिषा; Kâṭh. 38, 3 शिखा 24) P; in H u. Bb सिꣳहस्य . 25) P दधाना: । ; Kâṭh. 38, 3 दधाना

सरस्वती योन्यां गर्भमन्तरश्विभ्यां पत्नी सुकृतं बिभर्ति ।
अपाꣳ रसेन वरुणो न साम्नेन्द्रꣳ[1] श्रियै जनयन्नप्सु राजा ॥
तेजः पशूनाꣳ हविरिन्द्रियावत्परिस्रुता पयसा सारघं मधु ।
अश्विभ्यां दुग्धं भिषजा सरस्वती सुतासुताभ्याममृतः[2] सोमा[3]
इन्दुः ॥ ९ ॥ 5.

Vgl. Kâṭh. 38, 3; VS 19, 80—95; TBr. 2, 6, 4.

पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः ।
पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै[4] ॥
पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः ।
पवित्रेण शतायुषा सर्वमायुर्व्यश्नवै ॥ 10
अग्ना[5] आयूꣳषि पवसे ॥
पवमानः ३स्वर्जनः[6] पवित्रेण विचर्षणिः ।
यः पोता स पुनातु मा ॥
पुनन्तु मा देवजनाः पुनन्तु मनवो[7] धिया ।
पुनन्तु विश्वा भूता मा[8] जातवेदः पुनाहि मा ॥ 15
पवमानः पुनातु मा क्रत्वे दक्षाय जीवसे ।
ज्योक् च सूर्यं दृशे ॥
उभाभ्यां देव सवितः पवित्रेण सवेन च ।
मां पुनाहि विश्वतः ॥

---

1) P सोम्ना । इंद्रं ।; in H u. Bb साम्नेंद्रꣳ; 2) P सुतासुताभ्यां ।; in H u. Bb सुतासुताभ्याम° 3) P सोमः । 4) So H u. Bb; P विश्वं । आयुः ।; aber B सर्वमायु° 5) P अग्ने । 6) So H u. Bb; in B fehlt die ३; P स्वर्जन इति स्वः. जनः । (Accente fehlen). 7) P मनवः ।; anders VS 19, 39; Kâṭh. 38, 2 मनसा 8) Kâṭh. 38, 3 भूतानि

पवित्रेण पुनाहि मा शुक्रेण देव दीद्यत् ।
अग्ने क्रत्वा क्रतूँरनु ॥
यत्ते पवित्रमर्चिष्यग्ने वितततमन्तरा ।
ब्रह्म तेन पुनीमहे ॥
वैश्वदेवी पुनती देव्यागाद्यस्या बह्वीस्तन्वो वीतपृष्ठाः ।
तया मदन्तः सधमाद्येषु वयꣳ स्याम पतयो रयीणाम् ॥
वैश्वानरो रश्मिभिर्मा पुनातु वातः प्राणेनेषिरो मयोभूः ।
द्यावापृथिवी पयसा पयोभिर्ऋतावरी यज्ञिये मा पुनीताम् ॥
बृहद्भिः सवितस्त्रिभिर्वर्षिष्ठैर्देव मन्मभिः ।
अग्ने दक्षैः पुनीमहे ॥
ये समानाः समनसः पितरो यमराज्ये ।
तेषाꣳ लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥
ये समानाः समनसो जीवा जीवेषु मामकाः ।
तेषाꣳ श्रीर्मयि कल्पतामस्मिंल्लोके शतꣳ समाः ॥
द्वे सुती ॥
इदꣳ हविः प्रजननं मे अस्तु दशवीरꣳ सर्वगणꣳ स्वस्तये ।
आत्मसनि प्रजासनि क्षेत्रसनि पशुसनि लोकसन्यभयसनि ॥
अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो अस्मासु धेहि ॥

---

1) So P; in Bb पुनती; B पुनीत; in H eigentlich auch so, dann corrigirt in पुनती; Kâṭh. 38, 2 पुनती 2) P देवी । आ । अगात् । यस्याः । 3) So corrigirt (cf. VS 19, 44); Bb बह्वीस्; B बह्यम्; H बह्वीस् P बह्वीः ।; Kâṭh. 38, 2 इमास्तन्वो 4) P सधमादेष्विति सध. मादेषु ।: 5) P ऋतावरी । ऋतवरी इत्यृता. वरी । in B ऋतावरीर्यꣳ; 6) P सवितरिति सवितः । त्रिभिः ।; die Samh. Mss. ॰स्तृनभि॰ 7) P यज्ञः । देवेषु ।; die Samh. Mss. यज्ञीयदेवेषु; Kâṭh. 38, 2. यज्ञो देवेषु 8) P अस्मिन् । लोके । (Accente fehlen) 9) P सूती इति सूती । अश्रुणवं । (Accente fehlen); Kâṭh. 38, 2 द्वे सूती

यद्देवा देवहेडनं देवासश्चकृमा[1] वयम् ।
अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्व्ँहसः[2] ।
यदि स्वपन्यदि[3] जाग्रदेनाꣳसि चकृमा वयं
वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्व्ँहसः ॥
यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयं
सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्व्ँहसः ॥
धान्यो धान्यो[4] ॥ यद्ग्रामे[5] ॥
पवित्रमसि यज्ञस्य पवित्रꣳ यजमानस्य ।
तन्मा[6] पुनातु सर्वतो विश्वस्माद्देवकिल्बिषात्सर्वस्माद्देवकिल्बि-
षात् ॥ 1

द्रुपदादिवन्मुमुचानः[7] स्विन्नः स्नात्वी[8] मलादिव[9] ।
पूतं पवित्रेणेवाज्यꣳ[10] विश्वे मुञ्चन्तु मैनसः[11] ॥
समावृतत्पृथिवी[12] समुषाः[13] समु सूर्यः ।
वैश्वानरज्योतिर्भूयासꣳ विभुं कामꣳ व्यशीय भूः स्वाहा ॥ १० ॥

Vgl. Kâṭh. 38, 2 u. 5; VS 19, 37—48 u. 20, 14—23; TBr 2, 6, 3 u. 6.

समिद्धो अग्निः समिधा सुसमिद्धो वरेण्यः[14] ।
गायत्री छन्द इन्द्रियं त्रियविर्गौर्वयो[15] दधुः ॥

---

1) P चकृम । 2) P विश्वान् । मुंचतु । अꣳहसः । 3) P स्वपन् । 4) P धान्यो धान्यो इति धान्यः धान्यः । राजन् । 5) P यत् । ग्रामे । यत् । अरण्ये । 6) P तत् । मा । 7) So ist wohl zu lesen; H u. Bb द्रुपदादिवेमुमुंचानः; desgl. B, ohne Accent. P द्रुपदादिवेति द्रुपदात् । इव । इत् । मुमुचानः ।; Kâṭh 38, 5 द्रुपदादिवेन्मुमुचानस् 8) So P; in H u. Bb स्नात्वि; desgl. B, ohne Accent; Kâṭh. 38, 5 स्नात्वी 9) In den Saṃh. Mss. मलादिवः; aber P मलादिवेति मलात् । इव ।; Kâṭh. मलादिव 10 So im Anschluss an P पवित्रेणेवेति पवित्रेण । इव । आज्यं ।; (s. auch VS 20, 20); Die Saṃh. Mss. पवित्रेणेवाज्यꣳ; Kâṭh. 38, 5 पवित्रेणेवाज्यम् 11) P मा । एनसः । 12) So die Mss. P सं । आ । वृतत् । Kâṭh. 38, 5 समाववर्ति 13) P सं । उषाः ।; die Saṃh. Mss. समुषाः; Kâṭh. 38, 5 समुषास् 14) So P; die Saṃh. Mss. वरेण्यः 15) P त्रिविरिति त्रि । अविः ।; Kâṭh. 38, 10 त्रियवि°

उष्णिक्छन्द इन्द्रियं दित्यवाड्[1] गौर्वयो दधुः ॥
इडाभिरग्निरीड्यः सोमो देवो अमर्त्यः ।
अनुष्टुप्छन्द इन्द्रियं पञ्चाविर्गौर्वयो दधुः ॥
सुबर्हिरग्निः पूषण्वान्त्सीर्ण बर्हिरमर्त्यः ।
बृहती छन्द इन्द्रियं चिवत्सो गौर्वयो दधुः ॥
दुरो देवीर्दिशो महीर्ब्रह्मा[2] देवो बृहस्पतिः ।
पङ्क्तिश्छन्द इन्द्रियं तुर्यवाड् गौर्वयो दधुः ॥
उषे यह्वी[3] सुपेशसा विश्वे देवा अमर्त्याः ।
त्रिष्टुप्छन्द इन्द्रियं पृष्ठवाड्[4] गौर्वयो दधुः ॥
दैव्या होतारा भिषजेन्द्रेण सयुजा युजा ।
जगती छन्द इन्द्रियमनड्वान् गौर्वयो दधुः ॥
तिस्रो देवीरिडा मही भारती मरुतो विशः ।
विराट् छन्द इन्द्रियं धेनुर्गौर्न वयो दधुः ॥
त्वष्टा तुरीपो अद्भुत[5] इन्द्राग्नी पुष्टिवर्धना ।
द्विपदा छन्द इन्द्रियमुक्षा गौर्न वयो दधुः ॥
शमिता नो वनस्पतिः सविता प्रसुवन्भगम्[6]
ककुप्छन्द इहेन्द्रियमृषभो गौर्वयो दधुः ॥
स्वाहा यज्ञं वरुणः मुक्षचो भेषजं करत् ।
अतिछन्दा[7] इन्द्रियं बृहद्वशा वेहद्वयो दधुः ॥ ११ ॥

Vgl. Kâṭh. 38, 10; VS 21, 12—22; TBr. 2, 6, 18.

---

1) Die Samh. Mss. दित्यवाड्; aber P दित्यवाडिति दित्य-वाट्। 2) P महीः। ब्रह्मा ॥; die Samh. Mss. मही ब्रह्मा; s. VS 21, 16; Kâṭh. 38, 10 मही ब्रह्मा 3) So P यह्वी इति यह्वी ।; in B जिह्वी; Hu. Bb जिही; Kâṭh. 38, 10 उषी यह्वी 4) So die Samh. Mss.; P पष्टवाडिति पष्ट-वाट् ।: Kâṭh. 38, 10 पष्टवाड् 5) P अद्भुतः। 6) So P; die Samh. Mss. भगं; s. VS 21, 21; Kâṭh. 38, 10 भगम् 7) P अतिछंदा इत्यति-छंदाः।

वसन्तेन ऋतुना देवा वसवस्त्विवृता स्तुतम्[1]।
रथन्तरेण तेजसा हविरिन्द्रे वयो दधुः ॥
ग्रीष्मेण ऋतुना देवा रुद्राः पञ्चदशे स्तुतम्[2]।
बृहता यशसा बलꣳ हविरिन्द्रे वयो दधुः ॥
वर्षाभिर्ऋतुनादित्याः सोमे सप्तदशे स्तुतम्।
वैरूपेण विशौजसा[3] हविरिन्द्रे वयो दधुः ॥
शारदेन ऋतुना देवा एकविꣳशे ऋभवः स्तुतम्।
वैराजेन श्रिया श्रियꣳ हविरिन्द्रे वयो दधुः ॥
हेमन्तेन ऋतुना देवास्त्रिणवे मरुतः स्तुतम्।
बलेन शक्वरीः सहो हविरिन्द्रे वयो दधुः ॥
शैशिरेण ऋतुना देवास्त्रयस्त्रिꣳश ऽमृतꣳ स्तुतम्।
सत्येन रेवतीः क्षत्रꣳ हविरिन्द्रे वयो दधुः ॥ १२ ॥

Vgl. VS 21,23—28; TBr. 2,6,19.

॥ इति तृतीयकाण्डे सौत्रामणीयो नाम एकादशः प्रपाठकः ॥

इमामगृभ्णन्नशनामृतस्य पूर्वा[4] आयुनि[5] विदथेषु कव्या[6]।
सा नो अस्मिन्त्सुते[7] आबभूव ऋतस्य सामन्त्सरमारपन्ती[8] ॥

---

1) P स्तुतं ।; vgl. unten; VS 21, 23 स्तुताः und so auch in den folgenden Versen; Kâṭh. 38, 11 स्तुतम् 2) Auch P स्तुतं । 3) P विशा । ओजसा । 4) P पूर्वे । 5) So P; desgl. B, ohne Accent; H u. Bb आयुनि; Kâṭh. 5, 1, 2 आयुषि 6) So P; desgl. B, ohne Accent; cf. VS 22,2; in H u. Bb काव्या; Kâṭh. 5, 1, 2 कव्या 7) P मा । नः । अस्मिन् । सुते ।; die Samh. Mss. सा नो अस्मिन्सुतं; s. VS 22,2; Kâṭh. 5, 1, 2 सुतम° 8) P सामन् । सरं ।; die Samh. Mss. schreiben सामत्सरम°

अभिधा असि भुवनमसि यन्तासि धर्ता स त्वमग्निं वैश्वानरꣳ स-
प्रथसं गच्छ स्वाहाकृतः स्वगा त्वा देवेभ्यः प्रजापतये ब्रह्मन्नश्वं भन्त्स्या-
मि[1] देवेभ्यः प्रजापतये तेन राध्यासं तं बधान देवेभ्यः प्रजापतये तेन
राध्नुहि प्रजापतये त्वा जुष्टं प्रोक्षामि वायवे त्वा जुष्टं प्रोक्षामीन्द्राग्नि-
भ्यां[2] त्वा जुष्टं प्रोक्षामि विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि सर्वेभ्यस्त्वा
देवेभ्यो जुष्टं प्रोक्षामि ॥

यो अर्वन्तं जिघाꣳसति तमभ्यूमीति वरुणः ।
परो मर्तः परः श्वा[3] ॥ १ ॥

Vgl. TS 7, 1, 11 (açvamedhamantrâḥ); Kâṭh. 5, 1, 2 ff. 5, 4, 4; VS 22, 2—5.

अग्नये स्वाहा सोमाय स्वाहापां मोदाय स्वाहा वायवे स्वाहा
सवित्रे स्वाहा त्वष्ट्रे स्वाहा बृहस्पतये स्वाहेन्द्राय स्वाहा मित्राय
स्वाहा वरुणाय स्वाहा ॥ २ ॥

Vgl. TS 7, 1, 14 (pûrvahomaḥ); Kâṭh. 5, 1, 5; VS 22, 6.

हिंकाराय स्वाहा हिंकृताय स्वाहा क्रन्दते स्वाहावक्रन्दाय स्वाहा
प्रोथते स्वाहा प्रप्रोथाय स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा नि-
विष्टाय स्वाहोपविष्टाय स्वाहा संदिताय स्वाहा वल्गते स्वाहासी-
नाय[4] स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजते[5]
स्वाहा प्रबुद्धाय स्वाहा विचृत्ताय[6] स्वाहा विजृम्भमाणाय स्वाहा
जवाय स्वाहा बलाय[7] स्वाहायनाय[8] स्वाहा प्रायणाय स्वाहा यते

1) Hu. Bb भत्स्यामि; B भत्स्याभि; P भंत्स्यामि ।; s. VS 22, 4. 2) In P steht zuerst इंद्राग्निभ्यामितीन्द्राग्निभ्यां ।; dann वायवे । u. s. w. 3) So P परः । श्वा ।; H u. Bb परश्वा; desgl. B, ohne Accent; Kâṭh. 5, 4, 4 परश्वा 4) P आसीनाय । 5) So P; desgl. B, ohne Accent; in Hu. Bb कूजिते 6) P विचृत्तायेति वि. चृत्ताय ।; vgl. auch TS 7, 1, 19, 1; VS 22, 7; die Samh. Mss. विवृताय Vgl. noch weiter unten; Kâṭh. 5, 1, 10 विचृत्ताय 7) So P; in Hu. Bb बलाय 8) P आयनायेत्या अयनाय ।

स्वाहा धावते स्वाहोद्द्रावाय[1] स्वाहोद्द्रुताय[2] स्वाहा भूकाराय[3] स्वाहा भूकृताय[4] स्वाहोपस्थिताय स्वाहा सँहानाय स्वाहा निषण्णाय[5] स्वाहोत्थिताय[6] स्वाहा विष्ठिताय[7] स्वाहा विवर्तमानाय स्वाहा विवृत्ताय स्वाहा विधून्वानाय[8] स्वाहा विधूताय स्वाहा शृण्वते स्वाहा शुश्रूषमाणाय स्वाहेक्षिताय[9] स्वाहा वीक्षिताय स्वाहा वीक्षमाणाय स्वाहा निमेषाय[10] स्वाहा यदत्ति तस्मै स्वाहा यत्पिबति तस्मै स्वाहा यन्मेहति तस्मै स्वाहा कुर्वते स्वाहा कृताय स्वाहा ॥ ३ ॥

Vgl. TS 7, 1, 13 (uddrâvâḥ) u. 19 (açvacaritâni); Kâṭh. 5, 1, 10 u. 4; VS 22, 7. 8.

विभूर्मात्रा प्रभूः पित्रा[11] श्वोऽसि हयोऽस्यत्योऽसि मयोऽसि नरोऽस्यर्वासि सप्तिरसि वाज्यसि वृषासि नृमणा[12] असि ययुर्नामास्यादित्यानां[13] पत्वान्विहि[14] देवा आशापाला[15] एतं देवेभ्योऽश्वं मेधाय प्रोक्षित रक्षतेह धृतिरिह स्वधृतिरिह रम[16] इह रमन्ताम् ॥ ४ ॥

Vgl. TS 7, 1, 12 (açvanâmâni); Kâṭh. 5, 1, 3; VS 22, 19.

काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहा सवित्रे स्वाहा सवि-

---

1) H u. Bb स्वाहोद्द्रावाय ।; P उद्द्रावायेत्युत् . द्रावाय। 2) P उद्द्रुतायेत्युत् . द्रुताय। die Samh. Mss. स्वाहोद्भूताय; vgl. aber auch noch VS 22, 8. 3) H u. Bb भूकराय 4) So P, desgl. VS 22, 8; die Samh. Mss. सूकृताय 5) So corrigirt; die Samh. Mss. निषण्णाय; P भिषण्णाय(!)। निसन्नायेति नि. सन्नाय ।; s. VS 22, 8; Kâṭh. निषण्णाय 6) So corrigirt; die Samh. Mss. स्वाहोत्थिताय; P उत्थिताय ।; s. VS 22, 8. 7) So corrigirt; H u. Bb विधिताय; desgl. B, ohne Accent; in P fehlt dieses Wort. 8) So die Samh. Mss.; cf. TS 7, 1, 19, 3; P विवृतायेति वि. वृताय ।; Kâṭh. 5, 1, 10 विवृत्ताय 9) So corrigirt; vgl VS 22, 8; TS 7, 1, 19, 3; die Samh. Mss. schreiben विधून्मानाय; P विधुन्वानायेति वि. धुन्वानाय। Kâṭh. 5, 1, 10 विधून्वानाय 10) P ईक्षिताय ।; cf. VS 22, 8; die Samh. Mss. schreiben स्वाहेक्षिताय 11) B निमिषाय 12) P पित्रा। अश्वः। 13) P हायः। (!) 14) H u. B नृम्ण; Bb नृम्णा; P नृमना इति नृ. मनाः। 15) P यंयुः। नाम। 16) P पत्व। अनु। इहि। 17) P देवाः। आशापाला इत्याशा. पालाः। 18) P रमः।

चे प्रसवित्रे स्वाहा सवित्र आसवित्रे स्वाहा दित्यै स्वाहा दित्यै मह्यै स्वाहा दित्यै सुमृडीकायै स्वाहा सरस्वत्यै स्वाहा सरस्वत्यै बृहत्यै स्वाहा सरस्वत्यै पावकायै स्वाहा पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णे नरंधिषाय[1] स्वाहा त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा विष्णवे स्वाहा विष्णवे शिपिविष्टाय स्वाहा विष्णवे निभूयपाय स्वाहा ॥ ५ ॥

Vgl. Kâṭh. 5,3,5; VS 22,20; Mân. Çr. 9,2,2.

आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्य शूर इषव्यो महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरंधिर्योषा जिष्णू[2] रथेष्ठा[3] आस्य[4] यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवतीर्न[5] ओषधयः पच्यन्ता योगक्षेमो नः कल्पताम् ॥ ६ ॥

Vgl. TS 7,5,18 (annahomamantrâḥ); Kâṭh. 5,5,14; VS 22,22.

अग्नये स्वाहा सोमाय स्वाहेन्द्राय स्वाहा पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा दिग्भ्यः स्वाहाशाभ्यः स्वाहोर्व्यै[6] दिशे स्वाहा प्राच्यै दिशे स्वाहा नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहाहोरात्रेभ्यः स्वाहार्धमासेभ्यः स्वाहा मासेभ्यः[7] स्वाहा ऋतुभ्यः स्वाहार्तवेभ्यः स्वाहा संवत्सराय स्वाहा द्यावापृथिवीभ्या[8] स्वाहा चन्द्रमसे स्वाहा सूर्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहा-

---

1) P नरंधिषणाय (!); vgl. aber auch VS 22,20. 2) P जिष्णुः। 3) P रथेष्ठाः। रथेस्था इति रथे-स्थाः। 4) P आ। अस्य। 5) P फलवत्य इति फल-वत्यः। नः। 6) P उर्व्यै। 7) So P; Hu. Bb मासेभ्यः 8) P आर्त्तवेभ्यः। 9) Hu. Bb betonen द्यावापृथिवीभ्या; aber P द्यावापृथिवीभ्यां।

दित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा ॥ ७ ॥

Vgl. TS 7, 1, 15 (pûrvanâmakahomântaḥpâtitvenâiva hutvâ); 7, 3, 19 (oshadhibhomamantrâḥ) u. 20 (vṛkshamantrâḥ) Kâṭh. 5, 1, 5 und 6; 5, 3, 9 und 10; VS 22, 27 und 28.

प्राच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहार्वाच्यै दिशे स्वाहा ॥ ८ ॥

Vgl. TS 7, 1, 15. (s. oben); Kâṭh. 5, 1, 6; VS 22, 24.

आयुषे स्वाहा प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा समानाय स्वाहोदानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा मनसे स्वाहा वाचे स्वाहा ॥ ९ ॥

Vgl. (TS 7, 1, 19); Kâṭh. 5, 4, 10; VS 22, 23.

पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा परिप्लवेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा चराचरेभ्यः स्वाहा ॥ १० ॥

Vgl. TS 7, 1, 17 (ekavimçinî dîkshâ); VS 22, 29.

असवे स्वाहा वसवे स्वाहा वि३भ्वे स्वाहा विवस्वते स्वाहा गणश्रिये स्वाहा गणपतये स्वाहाभिषाहे स्वाहाभि३भ्वे स्वाहाधिपतये स्वाहा शूषाय स्वाहा सꣳसर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा ॥ ११ ॥

Vgl. VS 22, 30.

धर्णसाय स्वाहा ध्रुविणाय स्वाहा ध्रुवाय स्वाहोपयामाय स्वाहा सिन्धवे स्वाहा समुद्राय स्वाहा काटाय स्वाहार्णवाय स्वाहा सरस्वत्यै स्वाहा विश्वव्यचसे स्वाहा सुभूताय स्वाहान्तरिक्षाय स्वाहा ॥ १२ ॥

Vgl. (TS 7, 4, 13). VS 22, 25.

मधवे स्वाहा माधवाय स्वाहा शुक्राय स्वाहा शुचये स्वाहा नभसे स्वाहा नभस्याय स्वाहेषाय[1] स्वाहोर्जाय[2] स्वाहा सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहा सꣳसर्पो ऽस्यꣳहस्त्याय स्वाहा ॥ १३ ॥

Vgl. VS 22, 31.

संवयसे[3] स्वाहाभिवयसे[4] स्वाहोर्ध्ववयसे[5] स्वाहा बृहद्वयसे स्वाहा सहीयसे स्वाहा सहमानाय स्वाहा सासहये स्वाहा सहस्वते स्वाहाभीषाहे[6] स्वाहाभिꣳभ्वे स्वाहाभिमातिषाहे स्वाहाभिमातिघ्ने स्वाहा ॥ १४ ॥

एकस्मै स्वाहा द्वाभ्याꣳ स्वाहैकान्नशताय[7] स्वाहा शताय स्वाहैकशताय[8] स्वाहा व्युष्ट्यै स्वाहा स्वर्गाय स्वाहा ॥ १५ ॥

Vgl. VS 22, 34.

---

1) P इषाय। 2) P ऊर्जाय 3) Die Samb. Mss. संवयसे; aber P संवयस इति संवयसे। 4) P अभिवयस इत्यभि. वयसे। 5) P ऊर्ध्ववयसइत्यूर्ध्व. वयसे 6) P अभिषाहे। अभिसह इत्यभि. सहे। 7) So ist wohl zu lesen; B liest so, nur ohne Accent; H u. Bb स्वाहैकान्नशताय P एकान्नशतायेत्येकान्न. शताय। 8) P एकशतायेत्येक. शताय।

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक[1] आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥
उपयामगृहीतो ऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिः सूर्य-
स्ते महिमा॥ १६॥

Vgl. (TS 7, 5, 16); Kâṭh. 5, 5, 11; VS 23, 1 u. 2; Mân. Çr. 9, 2, 3.

यः प्राणतो निमिषतश्च राजा पतिर्विश्वस्य जगतो बभूव। 5
ईशे यो अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम[2]॥
उपयामगृहीतो ऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिश्च-
न्द्रमास्ते महिमा॥ १७॥

Vgl. TS 7, 5, 16 (pûrvasya mahimâkhyagrahasya mantraḥ); Kâṭh. 5, 5, 13; VS 23, 3 u. 4.

युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः।
रोचन्ते रोचना[3] दिवि॥ 10
यद्वातो ऽपो अगनीगन् प्रियामिन्द्रस्य तन्वम्।
एतꣳ स्तोतरनेन पथा पुनरश्वमावर्तयासि नः॥ १८॥

Vgl. TS 7, 4, 20 (jîvato Çvasyopacârah); VS 23, 5 u. 7; Mân. Çr. 9, 2, 4 u. 3.

वसवस्त्वाञ्जन्तु गायत्रेण छन्दसा रुद्रास्त्वाञ्जन्तु त्रैष्टुभेन छन्दसादित्या-
स्त्वाञ्जन्तु जागतेन छन्दसा भूर्भुवः ३स्वर्लाजी३[4] शाची३[5] यव्ये गव्य[6] 15
एतदन्नमत्त देवा[7] एतदन्नमद्धि प्रजापते[8]॥
कः स्विदेकाकी चरति क[9] उ स्विज्जायते पुनः।

1) In den Saṃh. Mss. पति° ohne Accent; in P nur das erste Wort des Verses angeführt. 2) H विधाम; in Bb eigentlich विधेम geschrieben, dann auch in विधाम corrigirt. 3) P रोचना:। 4) In Bb fehlt die ३; P लाजीन्।; cf. VS 23, 8; TS 7, 4, 20, 1. S. die folgende Anmerkung. 5) P शाची। Kâṭh. 5, 4, 9 लाजी३ञ्छातीन 6) P यव्ये। गव्ये। Kâṭh. 5, 4, 9 यव्याये गव्याया 7) P अन्नं। अत्त। देवाः। 8) So corrigirt; die Saṃh. Mss. प्रजापतेः; P प्रजापत इति प्रजा.पते। 9) P कः।

किꣳ स्विद्धिमस्य[1] भेषजं किमवावपनं[2] महत् ॥
सूर्य[3] एकाकी चरति चन्द्रमा[4] जायते पुनः ।
अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ॥
का स्विदासीत्पूर्वचित्तिः किꣳ स्विदासीद्बृहद्वयः[5] ।
का स्विदासीत्पिलिप्पिला[6] का स्विदासीत्पिशङ्गिला ॥
द्यौरासीत्पूर्वचित्तिरश्व आसीद्बृहद्वयः[7] ।
अविरासीत्पिलिप्पिला[8] रात्रिरासीत्पिशङ्गिला ॥ १९ ॥

Vgl. TS 7, 4, 20 (jîvato ṣoḍaçasyopacârah) u. 18 (brahmodyam); Kâṭh. 5, 4; 9 u. 7; VS 28, 8—12.

प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा ॥
अम्ब्यम्बिके अम्बालिके[9] न मा नयति कश्चन ।
ससस्त्यश्वकः[10] सुभद्रिकां काम्पीलवासिनीम्[11] ॥
गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे
निधीनां त्वा निधिपतिꣳ[12] हवामहे वसो[13] ममाहमजानि.[14] गर्भधमा
त्वमजासि गर्भधम् ॥

---

1) P स्वित् । हिमस्य । 2) So Hu.Bb; in P भेषजं । किं । ऊं इत्यु । आवपनमित्या-वपनं ।; B भूमिरावपनं; es ist wohl mit VS 23, 9, किमवावपनं zu lesen. 3) P सूर्यः । 4) P चंद्रमाः . 5) So im Anschluss an P बृहत् । वयः ।; cf. VS 23, 11; TS 7, 4, 18, 1; in Hu.Bb बृहद्वयः; Kâṭh. 5, 4, 7 वृहद्वयाः 6) So P; s. VS 23, 11; die Samh. Mss. पिलपिला 7) P अश्वः । आसोत् वृहत् । वयः ।; Hu Bb बृहद्वयः; s. oben Kâṭh. वृहद्वयः 8) So P; (s. VS 23, 12); die Samh. Mss. पिलपिला 9) P अंबे अंबिके । अंबालिके ।; Kâṭh. 5, 4, 8 अंबे अंबालांबिके 10) So im Anschluss an P संसस्ति । अश्वकः । (cf. VS 23, 18; TS 7, 4, 19, 1); die Samh. Mss. शस्त्यश्वकः; Kâṭh. 5, 4, 8 समस्त्यश्वकः 11) So im Anschluss an P सुभद्रिकामिति सु-भद्रिकां । कांपीलवासिनीमिति कांपील-वासिनीं ।; die Samh. Mss. सुभद्रिकांपिलवासिनीं; s. TS u. VS. In Kâṭh. 5, 4, 8 सुभगे काम्पीलवासिनि 12) So corrigirt; die Samh. Mss. निधीपतिꣳ; P निधिपतिमिति निधि-पतिं । 13) P वसो इति वसो ।; Hu.Bb वसो 14) P मम । आ । अहं । अ-जानि ।

तौ सह चतुरः पदः संप्रसारयावः स्वर्गे लोके प्रोर्णुवाताᵛ वृषा वामश्वो[1] रेतोधा रेतो दधातु ॥ २० ॥

Vgl. TS 7, 4, 19 (açvasya maraṇottarakâlîna upacârah); Kâṭh. 5, 4, 8; VS 23, 18—20; Mân. Çr. 9, 2, 4.

गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह।
बृह३त्युष्णिहा[2] ककुब्भिरेवानां पत्नयो विशः सूचीभिः[3] शमयन्तु त्वा॥
द्विपदा या चतुष्पदा त्रिपदा या च षट्पदा।
विच्छन्दा[4] या च सच्छन्दाः सूचीभिः[5] शमयन्तु त्वा ॥
रजताः सीसा[6] हरिणीर्युजो युञ्जन्तु कर्मभिः।
अश्वस्य वाजिनस्त्वचि स्यूमाः[7] कृण्वन्तु शाम्यन्तीः ॥
महानाम्नी रेवतयो दैव्या[8] आशाः प्रसूवरीः[9]।
मेघ्या[10] विद्युतो वाचः सूचीभिः[11] शमयन्तु त्वा ॥
योषास्ते पत्नयो लोम विचिन्वन्तु यथायथम्।
सुपत्नीः पत्नयो वाजिन्प्रजया भुक्षीमहि[12]॥
कुविदङ्ग ॥ २१ ॥

Vgl. TS 5, 2, 11 (sûcîbhir asipathaklptih); Kâṭh. 5, 10, 5; VS 23, 33—38.

॥ इति तृतीयकाण्डे द्वादशः प्रपाठकः ॥

---

1) So im Anschluss an P वां। अश्वः।; H u. Bb वामस्व; doch ist das स्व erst durch Correctur hineingebracht; B मास्व 2) So corrigirt im Anschluss an P बृहती। उष्णिहा।; cf. VS 23, 33; TS 5, 2, 11, 1; die Samh. Mss. बृहत्युष्णिहा 3) So P; die Samh. Mss. सुचीभिः 4) P विच्छंदा इति वि. छंदाः। 5) So corrigirt; die Samh. Mss. शूचीभिः; in P fehlend. 6) P सीसाः। 7) P त्वचि। स्यूमाः।; die Samh. Mss. त्वचिः स्युमा 8) P महानाम्नीरिति महा. नाम्नीः। रेवतयः। दैव्याः। 9) P प्रसूवरीरिति प्र. सूवरीः।; B प्रसुवरीः; Bb eigentlich प्रसूवरीः geschrieben, dann aber auch in प्रसु° corrigirt; H प्रसुवरीः 10) Die Samh. Mss. मेध्या; P मेध्याः। 11) So P; die Samh. Mss. शूचीभिः 12) So P; B भिक्षुषीमहि; Bb भिक्षसीमहि

ऊर्ध्वामेनामुच्छ्रापय[1] गिरौ भार्ꣳ हरन्निव[2]।
अथास्या[3] मध्यमेधतार्ꣳ शीते वाते पुनन्निव ॥
यासकौ[4] शकुन्तिकाहलगिति[5] वञ्चति।
आहतं पसो निचल्चलीति ॥
माता च ते पिता च तेऽग्र्ꣳ[6] वृक्षस्य रोहतः[7]।
प्रतिलामीति[8] ते पिता ॥
यद्धरिणौ[9] यवमत्ति न पुष्टं पशु मन्यते।
शूद्रा[10] यदर्यजारा न पोषाय धनायति ॥
दधिक्रांव्णो अकारिषम् ॥ १ ॥

Vgl. TS 7, 4, 19 (açvasya maraṇottarakâlîna upacârah); VS 23, 22—27. 30. 32.

अश्वस्तूपरौ[11] गोमृगस्ते प्राजापत्याः कृष्णग्रीव आग्नेयो ललाटे पुरस्तात्सारस्वती मेष्यधस्ताद्धन्वोः[12] श्यामः पौष्णो नाभ्यामाश्विना[13] अधोरामौ बाह्वोस्त्वाष्ट्रौ[14] लोमसक्थौ[15] सक्थ्योः[16] सौर्यौ[17] श्वेतश्च कृष्णश्च पार्श्वयोर्वायव्यः श्वेतः पुच्छा[18] इन्द्राय स्तृपस्थाय[19] वेहद्वैष्णवो वामनः ॥ २ ॥

Vgl. TS 5, 5, 22 u. 23 (grâmyâs trayah samghâh); Kâṭh. 5, 8, 2; VS 24, 1; Mân. Çr. 9, 2, 4.

---

1) P ऊर्ध्वा। एनां। उत्। आपय। 2) P हरन्निवेति हरन्. इव। 3) P अथ। अस्याः। 4) P या। असकौ। 5) Hu. Bb शकुंतिकाहलगिति; P शकुंतिका। अहलक्। इति।; cf. VS 23, 23. 6) P ते। अयं। 7) P रोहप्यः। (!) 8) P प्रं। तिलामि (!)। इति।; die Samh. Mss. प्रतिलामिति 9) P यत्। हरिणः। 10) P शूद्रान्। (!) 11) Die Samh. Mss. अश्वस्तुपरौ; P अश्वः। तूपरः। 12) So corrigirt; (cf. VS 24, 1); die Mss. मेष्यधस्ता; P मेषी। अधस्तात्। हन्वोः। 13) P आश्विनौ। 14) So corrigirt; H वाह्वोस्त्वाष्ट्रौ; Bb वाह्वौ त्वाष्ट्रौ; B बाहोस्त्वाष्ट्रो; P बाह्वोः। त्वाष्ट्रौ। 15) Die Samh. Mss. लोमशसथ्यौ; aber P लोमशसक्थाविति लोमश. सक्थौ।; Kâṭh. 5, 8, 2 लोमशसक्थौ 16) So P; in Hu. Bb सथ्थ्योः; B सथ्थोः 17) So P; die Samh. Mss. सौर्यायामौ 18) P fehlerhaft; पुच्छे। statt पुच्छे। 19) Die Samh. Mss. (Hu. Bb) स्तूपस्थाय P स्तूपस्थायेति सु. अपस्थाय।

बभ्रुररुणबभ्रुः शुकबभ्रुस्ते वारुणा[v] रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते सौम्याः[v] शितिबाहुरन्यतःशितिबाहुः समन्तशितिबाहुस्ते बार्हस्पत्याः[v] शितिरन्ध्रो ऽन्यतःशितिरन्ध्रः समन्तशितिरन्ध्रस्ते[2] सावित्राः[v] पृषती क्षुद्रपृषतो स्थूलपृषती ता मैत्रावरुण्यः ॥ ३ ॥

Vgl. TS 5, 6, 11—13 (ashṭâdaçinâmânaḥ paçavo ṣoḍaçamedhikâḥ); Kâṭh. 5, 9, 1—3; VS 24, 2.; Mân. Çr. 9, 2, 4.

शुङ्गवालः सर्वशुङ्गवालो मणिवालस्ते आश्विनाः[3v] श्येताः[4] श्येताक्षो[5] ऽरुणस्ते रुद्राय पशुपतये[v] कर्णी[6] यामा[7v] अवलिप्ता[8] रौद्रा[v] नभोरूपाः पार्जन्याः ॥ ४ ॥

Vgl. TS 5, 6, 13. 11. 15 (wie oben); Kâṭh. 5, 9, 3; VS 24, 3.

पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः[v] फल्गूर्लोहितोर्णी[9] बलक्षी ताः सारस्वत्यः[10v] श्रीहाकर्णीः शुण्ठाकर्णी ऽधिरूढाकर्णस्ते त्वाष्ट्राः[v] कृष्णग्रीवः शितिकक्षो ऽञ्जिषक्थस्ते ऐन्द्राग्नाः[v] कृष्णाञ्जिरल्पाञ्जिर्महाञ्जिस्ते उषस्याः ॥ ५ ॥

Vgl. TS 5, 6, 12 u. 16 (wie oben); Kâṭh. 5, 9, 2 u. 6; VS 24, 4.

शिल्पा वैश्वदेवी[11v] रोहिणीस्त्यवयो वाचे[v] ऽविज्ञाता[12] अदित्यै[v] संरूपा[13] धात्रे[v] वत्सतर्यो देवानां पत्नीभ्यः ॥ ६ ॥

Vgl. TS 5, 6, 13 flg. (s. oben); VS 24, 5.

---

1) Die Saṃh. Mss. समंतः शितिबाहु°; P समंतशितिबाहुरिति समंत-शितिबाहुः। 2) Die Saṃh. Mss. समंतःशितिरंध्र°; P समंतशितिरंध्र इति समंत-शितिरंध्रः। 3) Die Saṃh. Mss. आश्विनी; P आश्विनाः। 4) So corrigirt; die Saṃh. Mss. श्वेतः; P श्वेतः।; cf. VS 24, 3. 5) So corrigirt; die Saṃh. Mss. श्वेताक्षो 6) P कर्णाः। 7) Die Saṃh. Mss. यमा; P यामाः। 8) Die Betonung so im Anschluss an TS 5, 6, 23; VS 24, 3; P अवलिप्ता इत्यव-लिप्ताः। die Saṃh. Mss. अवलिप्ता 9) So corrigirt; die Saṃh. Mss. फल्गू लो°; P फल्गूः। 10) P सारस्वत्यः। 11) P शिल्पाः। वैश्वदेवीरिति वैश्व-देवीः। 12) P अविज्ञाता इत्यवि-ज्ञाताः। 13) P संरूपा इति सं-रूपाः।

कृष्णग्रीवा[1] आग्नेयाः शितिभ्रुवो वसूना रोहिता[2] रुद्राणा श्वेता अवरोकिण[3] आदित्यानां नभोरूपाः पार्जन्याः ॥ ७ ॥

Vgl. VS 24, 6.

उन्नतः शितिबाहुः शितिपृष्ठस्त ऐन्द्राबार्हस्पत्या उन्नत[4] ऋषभो वामनस्त[5] ऐन्द्रावैष्णवाः शुकरूपा[6] वाजिनाः कल्माषा[7] आग्निमारुताः श्यामाः पौष्णाः ॥ ८ ॥

Vgl. TS 5, 6, 14 (wie oben, cf. 3, 13, 3); VS 24, 7.

एता ऐन्द्राग्ना[8] द्विरूपा अग्नीषोमीया[9] वामना अनड्वाह आग्नावैष्णवा[10] अन्यतएनीमैत्रीवर्ण[11] मैत्रावरुणयूः ॥ ९ ॥

Vgl. TS (5, 6, 11—23; cf. oben); VS 24, 8.

कृष्णग्रीवा आग्नेया[12] बभ्रवः सौम्याः श्वेता[13] वायव्या[14] अविज्ञाता आदित्ये सरूपा[15] धात्रे वत्सतर्यो देवानां पत्नीभ्यः ॥ १० ॥

Vgl. TS (5, 6, 11—23); VS 24, 9.

कृष्णा भौमा[16] धूम्रा आन्तरिक्षा[17] बृहन्तो देवाः शबला[18] वैद्युताः सिध्मास्तारकाः ॥ ११ ॥

Vgl. TS (5, 6, 11—23); VS 24, 10.

कृष्णग्रीवा आग्नेया[19] बभ्रवः[20] सौम्या[21] उपध्वस्ताः सावित्रा[22] वत्स-

---

1) P कृष्णग्रीवा इति कृष्ण-ग्रीवाः। 2) P रोहिताः। 3) P श्वेताः। अवरोकिण इत्यव-रोकिणः। 4) P ते। ऐन्द्राबार्हस्त्याः। उन्नत इत्युत्-नतः। 5) P ते। 6) P शुकरूपा इति शुक-रूपाः। 7) P कल्माषाः। 8) P एताः। ऐन्द्राग्नाः। 9) P द्विरूपा इति द्वि-रूपाः। अग्नीषोमीयाः। 10) P वामनाः। अनड्वाहः। आग्नावैष्णवाः। 11) So B, ohne Accent; Hu. Bb अन्यतयेनी°; P अन्यतएना इत्यन्यतः-एनाः। मैत्रीः। श्यामाः। (!) 12) P कृष्णग्रीवा इति कृष्ण-ग्रीवाः। आग्नेयाः। 13) P श्वेताः। 14) P वायव्याः। अविज्ञाता इत्यवि-ज्ञाताः। 15) P सरूपा इति स-रूपाः। 16) P कृष्णाः। भौमाः। 17) P धूम्राः। आन्तरिक्षाः 18) P शबलाः। 19) P कृष्णग्रीवा इति कृष्ण-ग्रीवाः। आग्नेयाः। 20) Hu. Bb वभ्रवः 21) P सौम्याः। 22) P सावित्राः।

तर्यः सारस्वत्यः श्यामाः पौष्णाः पृश्नयो मारुताः पिशङ्गा वैश्वदेवा[1] वशा[2] द्यावापृथिवीयाः ॥ १२ ॥

Vgl. TS (5,6,11—23); VS 24,14.

कृष्णग्रीवा आग्नेया बभ्रवः सौम्या उपध्वस्ताः सावित्रा वत्सतर्यः सारस्वत्यः श्यामाः पौष्णा एता[3] ऐन्द्राग्नाः पृश्नयो मारुताः कृष्णा वारुणाः कायास्तूपराः ॥ १३ ॥

Vgl. TS (5,6,11—23); VS 24,15.

अग्नये ऽनीकवते प्रथमजानालभते मरुद्भ्यः सांतपनेभ्यः सवात्यान्मरुद्भ्यो[5] गृहमेधेभ्यो वष्किहान्मरुद्भ्यः क्रीडिभ्यः सꣳसृष्टान्मरुद्भ्यः स्वनवद्भ्यो ऽनुसृष्टान् ॥ १४ ॥

Vgl. TS (5,6,11—23); VS 24,16.

कृष्णग्रीवा आग्नेया बभ्रवः सौम्या उपध्वस्ताः सावित्रा वत्सतर्यः सारस्वत्यः श्यामाः पौष्णा एता[6] ऐन्द्राग्नाः प्राशृङ्गा[7] ऐन्द्रा[8] बहुरूपा[9] वैश्वकर्मणाः[10] ॥ १५ ॥

Vgl. TS (5,6,11—23); VS 24,17.

कृष्णग्रीवा आग्नेया बभ्रवः सौम्या उपध्वस्ताः सावित्रा वत्सतर्यः सारस्वत्यः श्यामाः पौष्णाः श्वेता वायव्याः प्राशृङ्गा[7] ऐन्द्राः सौर्याः श्वेताः ॥ १६ ॥

Vgl. TS (5,6,11—23).

---

1) P पिशंगाः । वैश्वदेवाः । 2) P वशाः । 3) P एताः । 4) P प्रथमाजानिति प्रथमाजान् । 5) H स्वावत्यान्; Bb स्वावत्यान्; desgl. B, ohne Accent; aber P सवात्यानिति स.वात्यान् । 6) P पौष्णाः । एताः । 7) P प्राशृंगा इति प्र.शृंगाः । 8) P ऐंद्राः । 9) P बहुरूपा इति बहु.रूपाः । 10) Die Samh. Mss. वैश्वकर्मणाः; aber P वैश्वकर्मणा इति वैश्व.कर्मणाः ।

अवयो गायत्रैᵛ पञ्चावयस्त्रिष्टुभेᵛ दित्यवाहो जगत्यैᵛ चिवत्सा[1] अनुष्टुभेᵛ तुर्यवाह[2] उष्णिहे ॥ १७ ॥

Vgl. TS (5,6,11—23); VS 24,12.

पष्ठवाहो विराज[3]ᵛ उक्षाणो बृहत्याᵛ[4] ऋषभाः ककुभेᵛ धेनवो जगत्याᵛ[5] अनड्वाहः पङ्क्त्यै[6] ॥ १८ ॥

Vgl. VS 24,13.

धूम्रा[7] वसन्तायᵛ श्वेता[8] ग्रीष्मायᵛ कृष्णा[9] वर्षाभ्यः ॥ १९ ॥

Vgl. VS 24,11.

अरुणाः शरदेᵛ पृषन्तो हेमन्तायᵛ पिशङ्गाः शिशिराय ॥ २० ॥

Vgl. VS 24,11.

॥ इति तृतीयकाण्डे चयोदशमः प्रपाठकः ॥

वसन्ताय कपिञ्जलानालभतेᵛ ग्रीष्माय कलविङ्कान्वर्षाभ्यस्तित्तिराञ्शरदेᵛ[10] वर्तिका[11]ᵛ हेमन्ताय ककरान् ॥ १ ॥

Vgl. VS 24,20; Mân. Çr. 9,2,4; hier wie beim Folgenden ist ferner im Allgemeinen zu vergleichen TS 5,5,11—24 (açvamedhaçeshabhûtâ âikâdaçinâḥ paçavaḥ): Kâṭh. 5, 10, 4.

---

1) P चिवत्सा इति चि.वत्साः। 2) P तुर्यवाह इति तुर्य.वाहः। 3) P विराज इति वि.राजे। 4) P बृहत्यै। 5) P जगत्यै। 6) P पंक्त्यै। 7) P धूम्राः। 8) P श्वेताः। 9) P कृष्णाः। 10) P तित्तिरीन्; aber die Saṃh. Mss. तित्तिरान्; Kâṭh. 5,10,4 तित्तिरीञ्. 11) P वर्तिकाः।

समुद्राय शिशुमारानालभते पर्जन्याय मण्डूकान्द्यौ मत्स्यान्मित्राय पुलीकयान्वरुणाय नाक्रान् ॥ २ ॥

Vgl. VS 24, 21.

सोमाय ह्सानालभते वायवे बलाका[1] इन्द्राग्निभ्यां क्रुञ्चान्मित्राय मद्गून्वरुणाय चक्रवाकान् ॥ ३ ॥

Vgl. VS 24, 22.

अग्नये कुटरूनालभते[2] वनस्पतया[3] उलूकानग्नीषोमाभ्यां चाषानश्विभ्यां मयूरान्मित्रावरुणाभ्यां कपोतान् ॥ ४ ॥

Vgl. VS 24, 23.

सोमाय लबानालभते[4] त्वष्ट्रे कौलीकान्गोषादी[5] देवानां पत्नीभ्यः पुलीका[6] अग्नये गृहपतये पारुष्णान् ॥ ५ ॥

Vgl. VS 24, 24.

अह्ने पारावतानालभते रात्र्यै सीचापूरुः[7] संधिभ्यां जतूः[8] संवत्सराय महतः सुपर्णान्मांसेभ्यो दात्यौहान्[9] ॥ ६ ॥

Vgl. VS 24, 25.

भूम्या[10] आखूनालभते ऽन्तरिक्षाय पाङ्क्तान्[11] दिवे कशान्दिग्भ्यो नकुलान्बभ्रुकानवान्तरदिशाभ्यः[12] ॥ ७ ॥

Vgl. VS 24, 26.

---

1) P बलाका: । 2) So B, ohne Accent; P कुटरून् ।; in H u. Bb कुठरून° 3) P वनस्पतये । 4) P लवान् । Hu. Bb लवान° 5) So im Anschluss an P गोषादीः । गोसादीरिति गो-सादीः । (cf. VS 24, 24); die Samh. Mss. घोषादी° 6) P पुलिकाः । 7) So im Anschluss an P सीचापूः । (s. VS 24, 25); die Samh. Mss. सीचाप्रूर° 8) So im Anschluss an P जतूः । (s. VS 24, 25; Pâ. 4, 1, 71, Vârtt.); die Samh. Mss. जंतूः 9) P दात्यूहान् । 10) P भूम्यै । 11) So P; s. VS 24, 26; die Samh. Mss. पंक्तान् 12) So P बभ्रुकान् ।; s. VS 24, 26; die Samh. Mss. वभ्रुकान°.

प्रजापतये पुरुषान्हस्तिना[1] आलभते वाचे ध्रुषीञ्श्वक्षुषे[2] मशका-ञ्श्रोत्राय[3] भृङ्गाः ॥ ८ ॥

Vgl. VS 24, 29.

वसुभ्यो ऋषभानालभते[4] रुद्रेभ्यो रुरूनादित्येभ्यो न्यङ्कून् विश्वेभ्यो देवेभ्यः पृषतान्त्साध्येभ्यः[5] कुलङ्गान्[6] ॥ ९ ॥

Vgl. VS 24, 27.

ईशानाय परस्वता[7] आलभते मित्राय गौरान्वरुणाय महिषान्बृह-स्पतये गवयाञ्त्वष्ट्रा[8] उष्ट्रान् ॥ १० ॥

Vgl. VS 24, 28.

प्रजापतये च वायवे च गोमृगो वरुणायारण्यो[9] मेषो यमाय कृष्णो मनुराजाय[10] मर्कटः[11] शार्दूलाय रोहिद्वृषभाय गवयी[12] क्षिप्रश्ये-नाय[13] वर्तिका[14] नीलङ्गवे[15] कृमिः समुद्राय शिशुमारो हिमवते हस्ती ॥ ११ ॥

TS 5, 5, 11 (prathamâ ekâdaçinî); Kâṭh. 5, 7, 1; VS 24, 30.

मयुः प्राजापत्य[16] उलो हलिक्ष्णो[17] वृषदञ्शल्ले धाचे दिशां कङ्को[18]

---

1) P हस्तिनः। 2) P ध्रुषीन्। चक्षुषे। 3) P मशकान्। 4) So Bb; in H eigentlich ऋषभान° geschrieben, dann पा corrigirt, aber undeutlich; B ऋषभान°; P ऋषभान्। 5) P साध्येभ्यः।; aber die Saṃh. Mss. साधेभ्यः; 6) P कुलुंगान् 7) P परस्वतः। 8) P गवयान्। त्वष्ट्रे। 9) P आरण्यः। 10) P मनुष्यराजायेति मनुष्य.रा-जाय।; diese Lesart vielleicht vorzuziehen; Kâṭh. 5, 7, 1 पुरुषराजाय 11) So P u. VS 24, 30; H u. Bb कर्मटः; B कर्म°; Kâṭh. 5, 7, 1 मर्कटः 12) So P; H u. Bb गवई; B गवइ; 13) H u. Bb क्षिप्रःश्येनाय; B क्षिपःश्येनाय; P क्षिप्रश्येनायेति क्षिप्र.श्येनाय। 14) P वर्त्तिका (!) 15) So P; die Saṃh. Mss. नीलांगवे; 16) P प्रा-जापत्य इति प्राजा.पत्यः। 17) P हलिक्ष्णः। 18) In den Saṃh. Mss. ohne Accent; P कंकः।;

धुङ्क्षाग्नेयी[1] कलविङ्कः पुष्करसादौ[2] लोहिताहिस्ते त्वाष्ट्रा[3] वाचे क्रौञ्चः ॥ १२ ॥

Vgl. TS 5, 5, 12 (daçinî); Kâṭh. 5, 7, 2: VS 24, 31.

सोमाय कुलङ्गः[4] आरण्यो ऽजो[5] नकुलः शका ते पौष्णाः क्रोष्टा मायोरिन्द्रस्य गौरमृगः पिङ्गो न्यङ्कुः ककुठस्ते ऽनुमत्यै[6] प्रतिश्रुत्काये चक्रवाकः[7] ॥ १३ ॥

Vgl. TS (5, 5, 11 flg; s. oben); VS 24, 32; Kâṭh. 5, 7, 7.

सौरी बलाका[8] शार्गः सृजयः[9] शयाण्डकस्ते[10] मैत्राः श्वाविद्गौमी सरस्वत्यै शारिः[11] पुरुषवाक् शार्दूलो वृकः पृदाकुस्ते[12] मन्यवे सरस्वते शुकः पुरुषवाक् ॥ १४ ॥

Vgl. VS 24, 33; Kâṭh. 5, 7, 4—6.

सुपर्णः पार्जन्य[13] आतिवाहसौ[14] दर्विदा ते वायवे कृकवाकुः सावित्रो हंसो वातस्य प्रवो मद्गुर्मत्स्यस्ते नदीपतये[15] द्यावापृथिवीयः कूर्मः ॥ १५ ॥

Vgl. VS 24, 34; Kâṭh. 5, 7, 3.

पुरुषमृगश्चन्द्रमसो गोधा कालका दार्वाघाटस्ते[16] वनस्पतीनां बृह-

---

1) die Saṃh. Mss. धुंक्त्वा°; aber P धुंक्षा । आग्नेयी । 2) P पुष्पसदा इति पुष्प-सदाः । 3) P लोहिताहिरिति लोहित-अहिः । ते । त्वाष्ट्राः । 4) P कुलुंगः । 5) P आरण्यः । अजः । 6) P कक्कटः । ते । अनुमत्या इत्यनु-मत्यै । 7) So betont P; in H u. Bb चक्रवाकः 8) P बलाकाः । (!) 9) So P; die Saṃh. Mss. सृजयाः; (cf. VS). 10) P शयाण्डक इति शय-आण्डकः ।; die Saṃh. Mss. शयाण्डक° 11) P शारिः । 12) H पिंदाकु°; desgl. B, ohne Accent; P पृदाकुः । 13) P पार्जन्यः । 14) So corrigirt; H u. Bb आतिवाहसो; B अतिवाहसो; P आतिः । वाहसः । (s. VS 24, 34); 15) So im Anschluss an P नदीपतय इति नदी-पतये ।; (s. VS 24, 34); die Saṃh. Mss. नदीपते 16) P दार्वाघाटः । दार्वाघाट इति दारु-आघाटः ।

स्पतये वाचस्पतये पैङ्गराजो᳚ऽलज[1] आन्तरिक्षो᳚नाक्रो मकरः पुली-कयस्ते ऽकूपारस्य[2]᳚ह्रियै[3] शल्यकः ॥ १६ ॥

Vgl. VS 24, 35 u. 34; Kâṭh. 5, 7, 5.

एण्यहो[4]᳚मण्डूको मूषिका तित्तिरस्ते[5] सर्पाणां᳚लोपाश[6] आश्विनः᳚ कृष्णो रात्र्या[7]᳚ऋक्षो जन्तूः[8] शुम्शुलूका[9] ते[10] .इतरजनानां᳚जहका[11] वैष्णवी ॥ १७ ॥

Vgl. VS 24, 36; Kâṭh. 5, 7, 5.

अन्यवापो[12]᳚ऽर्धमासानामृश्यो[13]मयूरः सुपर्णस्ते गन्धर्वाणामपामुद्रः[14]᳚ कश्यपो मासा᳚रोहित्कुण्डृणाची[15] गोलक्तिका[16] ता[17] अप्सरसां᳚मृत्यवे ऽसितः[18] ॥ १८ ॥

Vgl. VS 24, 37; Kâṭh. 5, 7, 6.

वर्षाहूर्ऋतूनामाखुः[19] कशो मान्थालवस्ते[20] पितॄणा᳚वसुभ्यः कपिञ्जलो[21]᳚बलायाजगरः[22]᳚ कपोता उलूकः[23] शशस्ते निर्ऋत्यै᳚रात्र्यै कृष्णः ॥ १९ ॥

Vgl. VS. 24, 38; Kâṭh. 5, 7, 8.

---

1) P अलजः। 2) P कुलीपयः। ते। अकूपारस्य। 3) So P; die Samh. Mss. ह्रयै; 4) P एणी। अहूः। 5) P तित्तिरिः। 6) P लोपाशः। 7) P रात्र्यै। 8) So P (cf. VS 24, 36); die Samh. Mss. जंतुः; 9) P सुषिलीकेति सुषि. लोका। 10) P ते। 11) P जहका। 12) So corrigirt; die Samh. Mss. अन्ययावापो; P अन्यवाप इत्यन्य. वापः। 13) P ऋष्यः। 14) P अपां। उद्रः। 15) So P; H कंडुणांची; desgl. B, ohne Accent; Bb कुंडुणांची 16) So P; die Samh. Mss. गोलक्तिका; Kâṭh. 5, 7, 6 गोलक्तिका 17) P ते।(!) 18) P अमितः। 19) P वर्षाहूरिति वर्ष. आहूः। 20) So im Anschluss an P मांथालवः।; die Samh. Mss. मातालवस्ते Kâṭh. 5, 7, 8 मंथीलवस् 21) P कपिंजलः।; die Samh. Mss. कीपंजलो 22) P बलाय। अजगरः। (s. VS); B बलाया अजगरः H u. Bb. वलाया अजगरः 23) P कपीताः। उलूकाः।

चित्र[1] आदित्यानामुष्ट्रो घृणावान्वाध्रीनसस्ते[2] मत्या[3] आरणाय[4] सृमरो रुरु[5] गौद्रः कुवयः[6] कुटरुर्दात्यौहस्ते वाजिनां कामाय[7] पिकः ॥ २० ॥

Vgl. VS 24, 39; Kâṭh. 5, 7, 9 u. a.

खड्गो वैश्वदेवस्तरक्षुः श्वा कृष्णः[8] कर्णो गर्दभस्ते रक्षसामिन्द्राय सूकरः सिंहो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्यायै[9] विभ्यो देवेभ्यः पृषतः ॥ २१ ॥

Vgl. VS 24, 40; Kâṭh. 5, 7.

॥ इति तृतीयकाण्डे चतुर्दशमः प्रपाठकः ॥

शर्दं दद्भिरवकान्दन्तमूलैर्मृदं[10] बस्त्रैस्तेगान्दंष्ट्राभ्यामवक्रन्देन[11. 12] तालु वाजꣳ हनुभ्याꣳ सरस्वत्या[13] अग्रजिह्वं जिह्वाया[14] उत्सादमप[15] आस्येन वृषणा[16] आण्डाभ्यामादित्याञ्श्मश्रुभिः[17] पन्थां[18] भूम्यां द्यावापृथिवी वर्तोभ्या[19] विद्युतं कनीनिकाभ्यां कर्णाभ्याꣳ श्रोत्रे श्रोत्राभ्यां 10

1) P चित्रः। 2) So ist wohl zu lesen; B घृणावार्ध्रानश्स्ते; H u. Bb घृणावार्धानश्स्ते P घृणावानिति घृणा.वान्। वाध्रीनसः। 3) P मत्यै। 4) P अरण्याय। 5) P रुरुः। 6) P कुवयिः। 7) H u. Bb कामाय 8) So im Anschluss an P तरक्षुः। श्वा। कृष्णः।; H u. Bb तरक्षुश्वाकृष्णः (in H aber erst durch Correctur so; eig. तरक्षुश्वाम्; so auch B, ohne Accent); s. VS. 9) P शरव्यायै। 10) P अवकां। 11) Die Samh. Mss. बरस्त्रैस्तेगान्; P बस्त्रैः। तेगां। 12) Die Samh. Mss. °मावक्रंदेन; P अवक्रंदेन। 13) P सरस्वत्यै। 14) P जिह्वायाः। 15) P अपः। 16) P वृषणा(!) 17) P आदित्यान्। श्मश्रुभिरिति श्मश्रु.भिः।; die Samh. Mss. श्मश्रूभिः; 18) P पंथानं। 19) So P वर्त्तोभ्यामिति वर्त्तः.भ्यां।; H u. Bb वर्त्तोभ्याꣳ; B वर्त्तोभ्या

कर्णौ[1] अवार्यौणि पक्ष्माणि[2] पार्यौ[3] इक्षवः पार्यौणि पक्ष्माण्यवार्यौ[4] इक्षवः ॥ १ ॥

Vgl. TS 5, 7, 11. 12 (açvamedhâṅgamantrâḥ; çarîrahomâḥ; dasselbe auch weiterhin im ganzen Prapâṭhaka); Kâṭh. 5, 13, 1 u. 2; VS 25, 1; Mân. Çr. 9, 2, 5.

वातं प्राणेनापानेन नासिकामुपयाममधरेणौष्ठेन सदुत्तरेण शुक्लाय स्वाहा कृष्णाय स्वाहा स्तनयित्नुं निर्बाधेन मूर्धानं निवेष्येणाशनिं[5] मस्तिष्केण विद्युतं कनीनिकाभ्यां प्रकाशेनान्तरमनुकाशेन[6] बाह्यं तेदनीमधरकण्ठेनापः[7] शुष्ककण्ठेन[8] चित्तं मन्याभिरिति शीर्षणी निर्ऋतिं निर्जल्पेन शीर्षणी प्राणान्त्संक्रोशैः[9] रेष्माणं स्तूपेन[10] ॥ २ ॥

Vgl. TS 5, 7, 12—14 (cf. oben); Kâṭh. 5, 13, 2; VS 25, 2.

मशकान्केशैरिन्द्रं स्तूपसा[11] वहेन बृहस्पतिं शकुनिमादेन[12] कूर्मं उशफैराक्रमणं[13] स्थूराभ्यां बलं कुष्ठाभ्यां[14] जवं जङ्घाभिरध्वानं बाहुभ्यां जाम्बिलेनारण्यमग्निमतीरुग्भ्यां[15] रुद्रं रोराभ्यां[16] पूषणं दोर्भ्यामश्विना साभ्याम्[17] ॥ ३ ॥

Vgl. TS 5, 7, 11 flg. (s. oben); VS 25, 3; Kâṭh. 5, 13, 3.

अग्नेः पक्षतिर्वायोर्निपक्षतिः सोमस्य तृतीयापां चतुर्थ्यदित्याः[18]

---

1) P कर्णौ। 2) So P; die Samh. Mss. पक्षाणि; 3) P पार्यूः। 4) P पक्षाणि। अवार्याः।; die Samh. Mss. पक्षाण्य° 5) Die Samh. Mss. निवेष्मेणाशनिं; P निवेष्णेण। अशनिं। 6) P प्रकाशेनेति प्र. काशेन। अंतरं। अनुकाशेनेत्यनु. काशेन। die Samh. Mss. प्रकाशे नांतरम° 7) Die Samh. Mss. तेदानीम°; P तेदनीं। अधर. कंठेनेत्यधर. कंठेन। 8) H u. Bb कंठेनाप शुष्ककंठेन; B °कंठेनप शु°; P अपः। शुष्क. कंठेन। 9) P संक्रोशैरिति सं. क्रोशैः। 10) P रेष्माणं। स्तूपेन। 11) P स्तूपसेति सु. अपसा। 12) H u. Bb शकुनिसादेन; B शकुनिसादयेन; P शकुनिसादेनेति शकुनि. सादेन। 13) P कूर्मान्। 14) Kâṭh. 5, 13, 3 कुष्टिकाभिर्जवं 15) P जांबीलेन। अरण्यं। अग्निं। अतिरुग्भ्यामित्यतिरुक्. भ्यां। 16) P रौद्राभ्यां। 17) So P; die Samh. Mss. अ°सोभ्यां; Kâṭh. अ°साभ्यां 18) So corrigirt; die Mss. चतुर्थी दित्याः; P चतुर्थी°। आदित्याः। (!)

पञ्चꣳम्यग्नीषोमयोः[1] षष्ठी मरुताꣳसप्तमी बृहस्पतेरष्टमी पूष्णो नवमी त्वष्टुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यमस्य त्रयोदशी ॥ ४ ॥

Vgl. TS 5, 7, 21; VS 25, 4.

इन्द्राग्न्योः पक्षतिः सरस्वत्या[2] निपक्षतिरिन्द्रस्य तृतीया बृहस्पतेश्चतुर्थी निर्ऋत्याः पञ्चमीन्द्राण्याः षष्ठी सर्पाणाꣳ सप्तमी विष्णोरष्टम्यर्यम्णो नवमी धातुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यम्यास्त्रयोदशी द्यावापृथिव्योर्दक्षिणं पार्श्वꣳ विश्वेषां देवानामुत्तरम् ॥ ५ ॥

Vgl. TS 5, 7, 22; VS 25, 5.

मरुताꣳ स्कन्धा विश्वेषां देवानां प्रथमा कीकसा रुद्राणां द्वितीयादित्यानां तृतीया वायोः पुच्छमग्नीषोमयोर्भासदौ क्रुञ्चौ श्रोणिभ्यां मित्रावरुणा ऊरुभ्यामिन्द्रावरुणा[6] अल्गाभ्यामाक्रमणं कुष्ठाभ्यामत्सराभिः[7] कपिञ्जलान् ॥ ६ ॥

Vgl. TS 5, 7, 15; Kâṭh. 5, 13, 5, VS 25, 6.

इन्द्रस्य क्रोडोऽदित्याः पाजस्यं दिशां जत्रवोऽदित्या भसज्जीमूतान्हृदयौपशाभ्यामन्तरिक्षं पुलीतता[10] नभ[11] उदर्येण वल्मीकान्क्लोम्ना[12] ग्लौभिर्गुल्माꣳश्चक्रवाकौ[13] मतस्नाभ्यां दिवꣳ वृक्काभ्याꣳ हिराभिः स्रवन्तीर्गिरीन्प्लाशिभ्यामुपलान्प्लीहा[14] हृदान्कुक्षिभ्याꣳ[15] समुद्रमुदरेण वैश्वानरं भस्मना ॥ ७ ॥

Vgl. TS 5, 7, 16; Kâṭh. 5, 13, 6; VS 25, 8.

1) So corrigirt; die Mss. पंचम्यग्नीषोमयोः 2) P सरस्वत्याः। 3) P याम्याः। 4) P स्कंधाः। 5) P मित्रावरुणौ। 6) P इंद्रावरुणौ। 7) P कुष्टाभ्यां। अत्सराभिः।; die Saṃh. Mss. कुष्टाभ्यां मत्सराभिः; cf. Kâṭh. 5, 13, 5 गुष्टाभ्याम् TS 5, 7, 13 अक्लाभिः; VS 25, 3 ऋक्षलाभिः; 8) H u. Bb जत्रयो; 9) P भसत्। जीमूतान्। हृदयौपाशाभ्यां।; H भसज्जीमूताꣳ हृदयोपाशाꣳ; Bb भसज्जीमूतोꣳ हृदयोपाशाꣳ; B भसज्जीमुताꣳ हृदयौपशाꣳ॥ 10) P पुलीतता। पुरितंतति पुरि-तता। Kâṭh. 5, 13, 6 पुलितता 11) P नभः। 12) So corrigirt; die Saṃh. Mss. वल्मीकां क्लोम्नां; P वल्मीकान्। क्लोमा। Kâṭh. 5, 13, 6 वल्मीकान्क्लोम्ना 13) ग्लौभिꣳ ohne Accente P ग्लौभिः। गुल्मान्। 14) Die Saṃh. Mss. स्रवंती गिꣳ; aber P स्रवंतीः।; 15) die Saṃh. Mss. हृदा; aber P हृदान्।

विधृतिं नाभ्या[1] घृतꣳ रसेनापो[2] यूष्णा[3] मरीचीर्विप्रुषा नीहारमूष्मणा शीनꣳ[4] वसया ह्रादुनीर्दूषीकाभिः[5] प्रुष्वा अश्रुभिरस्रा रक्षाꣳसि चिचाय[6] क्ष्णैनक्षत्राणि रूपैः पृथिवीं त्वचा जुम्बकाय स्वाहा ॥ ८ ॥

Vgl. TS 5, 7, 20; VS 25, 9.

पूषण्वनिष्ठुनान्धाहीन्स्थूरगुदया[6] सर्पाङ्गुदाभिर्विहुत[7] आन्त्रैरप[8] आस्येन वृषणा[9] आण्डाभ्याꣳ शेषो[10] वाजिनेन प्रजाꣳ रेतसा चाषान्पित्तेन[11] प्रदान्पायुना कूष्माञ्शकपिण्डैः[12] ॥ ९ ॥

Vgl. TS 5, 7, 17; VS 25, 7; Kâṭh. 5, 13, 7.

अग्नये गायत्राय त्रिवृते राथन्तराय वासन्तिकाय पुरोडाशमष्टाकपालं निर्वपतीन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हताय ग्रैष्माय पुरोडाशमेकादशकपालꣳ[13] विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो वार्षिकेभ्यः पुरोडाशं द्वादशकपालं मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविꣳशाभ्याꣳ[13] वैराजाभ्यां शारदाभ्यां पयꣳस्यां बृहस्पतये पाङ्क्ताय त्रिणवाय[14] शाक्कराय हैमन्तिकाय चरुꣳ सवित्रे[15] आतिछन्दसाय त्रयस्त्रिꣳशाय रैवताय शैशिराय पुरोडाशं द्वादशकपालमनुमत्यै चरुꣳ वैश्वानरं द्वादशकपालमदित्यै विष्णुपत्न्यै चरुं कायमेककपालम् ॥ १० ॥

Vgl. TS 7, 5, 14 (daçahaviḥ sarvapṛshṭhâ); VS 29, 60.

---

1) P नाभ्यां। 2) P रसेन। अपः। 3) So corrigirt; die Samh. Mss. यूष्णा; P पूष्णाः। 4) So P; die Samh. Mss. सीन् 5) So corrigirt; die Samh. Mss. दुषीकाभिः; in P die erste Silbe des Wortes ganz undeutlich. 6) Die Samh. Mss. वनिष्टनांधाहिꣳ स्थूरगुदया; P वनिष्ठुना। अंधाहीनित्यंध-अहीन्। स्थूलगुदयेति स्थूल-गुदया।; Kâṭh. 5, 13, 7 पूष्णो वनिष्ठुरंध्राहे स्थुरगुदान् 7) P विहुत इति वि-हुतः। 8) P अपः। 9) P वृषणौ। 10) P शेषः। 11) Die Samh. Mss. चषान् 12) P कूष्मान्। 13) Die Samh. Mss. °मनुष्टु°; P आनुष्टुभाभ्यां। आनुस्तुभाभ्यामित्यानु-स्तुभाभ्यां। 14) P त्रिणवाय। त्रिनवायेति त्रि-नवाय। 15) P सवित्रे।

अग्नये ऽग्होमुचे पुरोडाशमष्टाकपालं निर्वपतीन्द्रायाग्होमुचे पुरोडाशमेकादशकपालं मित्रावरुणाभ्यामागोमुग्भ्यां पयस्याग् वायुसवितृभ्यामागोमुग्भ्यां[1] पयो ऽश्विभ्यामागोमुग्भ्यां धानाग्[2] मरुद्भ्य[3] एनोमुग्भ्यः पुरोडाशग् सप्तकपालग् विश्वेभ्यो देवेभ्य एनोमुग्भ्यः पुरोडाशं द्वादशकपालमनुमत्यै चरुग् वैश्वानरं द्वादशकपालं द्यावापृथिवीभ्यामग्होमुग्भ्यां पुरोडाशं द्विकपालम् ॥ ११ ॥

Vgl. TS 7, 5, 22 (daçahavir mṛgâreshṭiḥ).

॥ इति तृतीयकाण्डे पञ्चदशमः प्रपाठकः ॥

मा नो मित्रो वरुणो अर्यमायुरिन्द्र[4] ऋभुक्षा[5] मरुतः परिख्यन्[6]।
यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥
यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति।
सुप्राङजो मेम्यद्विश्वरूपा[7] इन्द्रापूष्णोः[8] प्रियमप्येतु पाथः ॥
एष छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः।

---

1) P वायुसवितृभ्यामिति वायुसवितृ.भ्यां।; B वायुसवित्राभ्या° 2) P धानाः। 3) P मरुद्भ्य इति मरुत्.भ्यः। 4) So corrigirt; die Mss. (H u. Bb) betonen अर्यमायुरिंद्र; aber P अर्यमा। आयुः। इंद्रः। 5) P ऋभुक्षाः। 6) So corrigirt; die Samh. Mss. परिख्यान्; P परि। ख्यन्।; s. Einl. z. I. Bd. p. XLIII. 7) So corrigirt; H u. Bb विश्वरूपं; B विश्वरूपा; P विश्वरूप इति विश्व.रूपः। 8) So P; die Samh. Mss. इंद्रापूष्णो

अभिप्रियꣳ यत्पुरोडाशमर्वता[1] त्वष्टेदेनꣳ[2] सौश्रवसाय जिन्वति ॥
यद्ध विष्णुमृतुशो[3] देवयानं त्रिर्मानुषाः पर्यश्वं[4] नयन्ति ।
अचा[5] पूष्णः प्रथमो भाग[6] एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः ॥
उप प्रागात्सुमन्मे[7] ऽधायि[8] मन्म देवानामाशा[9] उप वीतपृष्ठः ।
अन्वेनꣳ विप्रा ऋषयो मदन्ति[10] देवानां पुष्टे चकृमा[11] सुबन्धुम् ॥
होताध्वर्युरावया[12] अग्निमिन्धो ग्रावयाभ[13] उत शꣳस्ता[14] सुविप्रः ।
तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा[15] आपृणध्वम् ॥
यूपव्रस्का[16] उत ये यूपवाहाश्चषालꣳ ये अश्वयूपाय तक्षति ।
ये चार्वते पचनꣳ[17] संभरन्त्युतो तेषामभिगूर्तिर्न इन्वतु ॥
यद्वाजिनो दाम[18] संदानमर्वतो या शीर्षण्या रशना रज्जुरस्य ।
यद्वा घास्य[19] प्रभृतमा३स्ये तृणꣳ सर्वा ता[20] ते अपि देवेष्वस्तु ॥
यदूवध्यमुदरस्यापवाति[21] यꣳ[22] आमस्य क्रविषो गन्धो अस्ति ।
सुकृता तञ्शमितारः[23] कृण्वन्तूत[24] मेधꣳ श्रृतपाकं पचन्तु ॥
यदश्वस्य क्रविषो मक्षिकाश[25] यद्वा स्वरौ[26] स्वधितौ रिप्रमस्ति ।
यद्धस्तयोः शमितुर्यन्नखेषु[27] सर्वा ता[28] ते अपि देवेष्वस्तु ॥
यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति[29] ।

---

1) So nach Anleitung von TS 4, 6, 8, 1 u. VS 25, 26; die Samh. Mss. °मर्वत; P अर्वतः । 2) P त्वष्टा । इत् । एनं । 3) Die Samh. Mss. °मृतशो; P ऋतुश इत्यृतु-शः । 4) So corrigirt; Bb पर्यश्वं; H पर्यश्वन्; desgl. B, ohne Accent; P परि । अश्वं । 5) P अच । 6) P भागः । 7) P सुमदिति सु-मत् । मे । 8) P अधायि 9) P आशाः । 10) P मदंतु । desgl. Kâṭh. 5, 6, 4. 11) P चकृम । 12) P आवया इत्या-वयाः । 13) P ग्रावयाभ इति ग्राव-याभः । 14) So P; in den Samh. Mss. ohne Accent. 15) P वक्षणाः । 16) P यूपव्रस्का इति यूप-व्रस्काः । 17) P चै । च । पचनं । 18) P मदा । (!) 19) P यत् । वाघ । अस्य । 20) P संर्वाता । (cf. aber unten) 21) P अप-वाति । 22) P यः । 23) P तत् । शमितारः । 24) P कृण्वंतु । उत । 25) P मक्षिका । आश । 26) So P (s. VS 25, 32); die Samh. Mss. स्वारौ; Kâṭh. 5, 6, 4 स्वरौ 27) P यत् । नखेषु । 28) P संर्वा । ता । 29) P अवधावतीत्यव-धावति ।

मा तं भूम्यामाश्रिषन्मा[1] तृणेषु देवेभ्यस्तदुशद्भो रातमस्तु ॥
ये वाजिनं परिपश्यन्ति पक्वं य[2] ईमाहुः सुरभिर्निर्हरेति[3] ।
ये चार्वतो मांसभिक्षामुपासते उतो तेषामभिगूर्तिर्न इन्वतु ॥
यन्नीक्षणं[4] मांस्पचन्या[5] उखाया[6] या पात्राणि यूष्णः[7] आसेचनानि ।
ऊष्मण्यापिधाना[8] चरूणामङ्काः सूनाः[9] परिभूषन्त्यश्वम् ॥ 5
यदश्वाय वासः[10] उपस्तृणन्त्यधिवासं[11] या हिरण्यान्यस्मै[12] ।
संदानमर्वन्तं पड्वीशं प्रिया देवेष्वायामयन्ति[13] ॥
निक्रमणं[14] निषदनं विवर्तनं[15] यच्च पड्वीशमर्वतः ।
यच्च पपौ यच्च घासिं[16] जघास सर्वा ता ते अपि देवेष्वस्तु ॥
मा त्वाग्निर्धनयीद्भूमगन्धिर्मोषा[17] भ्राजन्त्यभिविक्त[18] जघ्रिः[19] ।
इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रतिगृभ्णन्त्यश्वम् ॥ १ ॥

Vgl. TS 4, 6, 8 u. 9 (açvamedhaḥ); Kâṭh. 5, 6, 4 u. 5; VS 25, 24—39.

समिद्धो अञ्जन्कृदरं मतीनां घृतमग्ने मधुमत्पिन्वमानः ।
वाजी[20] वहन्वाजिनं जातवेदो देवानां वक्षि प्रियमा सधस्थम् ॥
तनूनपात्सं पथो देवयानान्प्रजानन्वाज्यप्येतु देवान् ।

---

1) P आ। श्रिषत्। मा। 2) P यं। 3) So corrigirt; die Samh. Mss. निर्हरेति; P निः। हर। इति।; Kâṭh. 5, 6, 5 निर्हरेति 4) P यत्। नीक्षमाणमिति नि-ईक्षमाणं। 5) P मा-स्पचन्याः। 6) P उखायाः। 7) P यूष्णः। 8) P ऊष्मण्या। अपिधानेत्यपि-धाना। 9) So P (cf. VS 25, 36); die Samh. Mss. सूनाः; Kâṭh. 5, 6, 4 सूनाः 10) P वासः। 11) P अधीवासं। अधिवासमित्यधि-वासं। 12) Die Samh. Mss. °न्यस्मै; P हिरण्यानि। अस्मै। 13) P देवेषु। आ। यामयंति। यमयंतीति यमयंति। 14) So P; die Samh. Mss. निः क्रमणं 15) P निवर्तनमिति नि-वर्तनं।; die Samh. Mss. विवर्तनं; s. aber auch RV 1, 162, 14. 16) So P; die Samh. Mss. घासं; s. RV 1, 162, 14. 17) So corrigirt; die Samh. Mss. त्वाग्निर्धनैर्ईमगंधिर्मोषा; aber P त्वा। अग्निः। धनयीत्। धू-मगंधिरिति धूम-गंधिः। मा। उखा।; Kâṭh. 5, 6, 5 त्वाग्निर्धनयेद् 18) In den Samh. Mss. das Verb ohne Accent; aber P भ्राजंति। अभि। विक्त। 19) So Bb; in H, B und auch P जिघ्रिः; Kâṭh. 5, 6, 5 जघ्रः 20) P; die Samh. Mss. वाजि

अनु त्वा सप्ते[1] प्रदिशः सचन्ता स्वधां देवेभ्यो यजमानाय धेहि ॥
ईड्यश्वासि[2] वन्द्यश्वासि वाजिन्ना शुश्वासि[3] मेध्यश्वासि सप्ते।
अभिष्टुता देवैर्वसुभिः सजोषाः प्रीतं वहिं वहतु जातवेदाः ॥
स्तीर्णं बर्हिः सुष्टरीमा[4] जुषाणो रु[5] पृथु प्रथमानं पृथिव्याम्।
देवेभिरक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु ॥
एता उ वः सुभगा विश्ववारा वि[7] पक्षोभिः[8] श्रयमाणा[9] उदातैः[10]
कृष्वाः सतीः कवषः शुम्भमाना[11] द्वारो देवीः सुप्रायणा[12] भवन्तु
अन्तरा मित्रावरुणा चरन्ती[13] मुखं यज्ञानामभि संविदाने।
उषासा वां सुहिरण्ये सुशिल्पे ऋतस्य योना[14] इह सादयामि ॥
प्रथमा वां सरथिना सुवर्णा[15] देवी पश्यन्ती भुवनानि विश्वा।
अपिप्रयं[16] चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता
आदित्यैर्नो भारती वष्टु यज्ञं सरस्वती सह रुद्रैर्न आवीत्[18]।
इडोपहूता[19] वसुभिः सजोषाः स्योनं कृण्वाना सुविते दधातु ॥
त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायत[20] आशुरश्वः।
त्वष्टेमा[21] विश्वा भुवना जजान बहोः कर्तारमिह यक्षि होतः ॥
अश्वो घृतेन त्मन्या समक्ता[22] उप देवं[23] ऋतुशः पाथ[24] एतु।

1) So P; die Samh. Mss. सप्तेः 2) P च। असि। (s. VS 29, 3; TS 5, 1, 11, 1). 3) P वाजिन्। आशुः। च। असि। 4) P सुष्टरोम। सुस्तरीमेति सु. स्तरोम। 5) P जुषा उरु। 6) P एताः। उ ईम्। वः। सुभगा इति सु. भगाः। विश्ववारा इति विश्व. वाः 7) Das वि fehlt in P. 8) In den Samh. Mss. ohne Accent पक्षोभि 9) P श्र माणाः। 10) Die Samh. Mss. उदातैः; aber P उत्। आतैः। 11) P शुभमा 12) P सुप्रायणाः। सुप्रायना इति सु. प्रायनाः। 13) P चरंती इति चरंती।; B चरं Hu. Bb चरंति 14) P योनौ। 15) So P सुवर्णेति सु. वर्णा। (s. VS 29, 7; TS 5, 1, 11 die Samh. Mss. सुपर्णा; Kâth. 5, 6, 2 सुवर्णा 16) So corrigirt; die Samh. M अपिप्रे; P अपिप्रयन्।; cf. VS 29, 7; TS 5, 1, 11, 3; Kâth. 5, 6, 2 अपिप्रयं 17) P शंता। 18) P नः। आवित्। 19) So mit P इडा। उपहूतेत्युप. हूता; die Samh. M इडोपहूता 20) P जायते। 21) P त्वष्टा। इमा। 22) Die Samh. Mss. समक्ता; a P समक्त इति सं. अक्तः। 23) P देवान्। 24) P पाथः।

वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् ॥
प्रजापतेस्तपसा वावृधानः[1] सद्यो जातो दधिषे यज्ञमग्ने ।
स्वाहाकृतेन हविषा पुरोगा[2] याहि[3] साध्या[4] हविरदन्तु देवाः ॥ २॥

Vgl. TS 5, 1, 11 (açvasyâpriyaḥ); Kâṭh. 5, 6, 2; VS 29, 1—11; Mân. Çr. 9, 2, 5.

युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः ।
रोचन्ते रोचना[5] दिवि ॥
युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे ।
शोणा धृष्णू नृवाहसा ॥
केतुं कृण्वन्नकेतवे[6] पेशो मर्या[7] अपेशसे ।
समुषद्भिरजायथाः[8] ॥
जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महिमा पिपर्तु ॥
धन्वना गा धन्वनाजिं[9] जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोतु धन्वना सर्वाः पृतना[10] जयेम ॥
वक्ष्यन्तीवेदागनीगन्ति[11] कर्णं प्रियं सखायं परिषस्वजाना ।
योषेव शिङ्क्ते वितताधि धन्वञ्ज्या इयं समने पारयन्ती ॥
ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।
अप शत्रून्विध्यतः[12] संविदाने आर्त्नी इमे विस्फुरन्ती अमित्रान् ॥

---

1) P वावृधानः । ववृधान इति ववृधानः । 2) P पुरोगा इति पुरः गाः । 3) So P; in den Saṃh. Mss ohne Accent. 4) H u. Bb स्वाध्या; P साध्याः ।; Kâṭh. 5, 6, 2 सख्या 5) P रोचनाः । 6) Die Saṃh. Mss कृण्वंतु केतवे; aber P कृण्वन् । अकेतवे । 7) P मर्याः । 8) H u. Bb समुषद्भिर°; B समुषद्भिर°; P सं । उषद्भिरित्यु-षत् भिः । (s. RV 1,6, 3). 9) P गाः । धन्वना । आजिं । 10) P पृतनाः । 11) P वक्ष्यंतीवेति वक्ष्यंती इव । इत् । 12) Die Saṃh. Mss विध्यतः; P विध्यतः ।

बहूनां[1] पिता बहुरस्य पुत्रः चिश्वा[2] कृणोति समनावगत्य ।
इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥
रथे तिष्ठन्नयति वाजिनः पुरो यत्र यत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनुयच्छन्ति रश्मयः ॥
तीव्रान्घोषान्कृणते वृषपाणयो ऽश्वा[3] रथेभिः सह वाजयन्तः ।
अवक्रामन्तः प्रपदैरमित्रान्क्षिणन्ति[4] शत्रून्ननपव्ययन्तः[5] ॥
वनस्पते वीड्वङ्गो हि भूया[6] अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः संनद्धो असि वीडयस्वास्थाता[7] ते जयतु जेत्वानि ॥
दिवस्पृथिव्याः पर्यन्तरिक्षाद्वनस्पतिभ्यः पर्याभृत[8] सहः ।
अपामोज्मानं परि गोभिरावृतमिन्द्रस्य[9] वज्रꣳ हविषा रथꣳ यज ॥
इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां[10] नो हव्यदातिं जुषाणो देव रथ[11] प्रति हव्या[12] गृभाय ॥
स्वादुष्संदः पितरो वयोधाः कृच्छ्रश्रितः शक्तीवन्तो[13] गभीराः ।
चित्रसेना[14] इषुबला[15] अमृधाः सतोवीरा उरवो व्रातसाहाः[16] ॥
ब्राह्मणासः पितरः सोम्यासः[17] शिवे नो द्यावापृथिवी उभे स्ताम् ।
पूषा नः पातु दुरितादृतावृधो रक्षा[18] माकिर्नो अघशꣳस[19] ईशत[20] ॥
ऋजीते परिवृङ्ग्धि[21] नो ऽश्मा[22] भवतु नस्तनूः ।

---

1) So P; die Samh. Mss बहूनां; Kâṭh. 5, 6, 1 बह्वीनां 2) So P; die Samh. Mss शिश्वा; Kâṭh. 5, 6, 1 चिच्चा 3) P अश्वाः । 4) Die Samh. Mss क्षीणंति; Kâṭh. 5, 6, 1 क्षिणंति 5) So die Mss; P शत्रून् । अनपव्ययंत इत्यनप · व्ययंतः । 6) P भूयाः । 7) P वीडयस्व । आस्थातेत्या · स्थाता । 8) P आवृतमित्या · वृतं । 9) So H; P आवृतमित्या · वृतं ।; in Bb u. B °वृत्त° 10) Die Samh. Mss सेमं; P सः । इमां । 11) Die Samh. Mss देवरथः; P देव । रथ 12) Bb हव्यं; 13) P शक्तीवंतः । शक्तिवंत इति शक्ति · वंतः ।; B शक्तिवंतो 14) P चित्रसेना इति चित्र · सेनाः । 15) P इषुबला इतीषु · बलाः । 16) Die Samh. Mss व्रातसहाः; P व्रातसाहाः । व्रातसहा इति व्रात · सहाः । 17) P सोम्यासः । 18) P रक्ष । 19) P अघशꣳस इत्यघशꣳसः । 20) So P; die Samh. Mss ईशते 21) P परि । वृङ्धि । 22) P अश्मा

सोमो अधिब्रवीतु नो ऽदितिः शर्म यछतु ॥
सुपर्णो वस्ते मृगो अस्या[1] दन्तो गोभिः संनद्धा पतति प्रसूता ।
यत्रा[2] नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन् ॥
अहिरिव भोगैः पर्येति बाहुं ज्याया[3] हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांसं परि पातु विश्वतः ॥ 5
आजङ्घन्ति सान्वेषां जघनं[4] उपजिघ्नतु[5] ।
अश्वाजनि प्रचेतसो ऽश्वान्त्समत्सु[6] नोदय[7] ॥
उपश्वासय[8] पृथिवीमुत द्यां पुरुत्रा ते मनुता विष्ठितं जगत् ।
सं दुन्दुभे सजूरिन्द्रेण देवैरारादत्रवीयो अपसेध शत्रून् ॥
आक्रन्दय बलमोजो ना आधा[9] निष्टनिहि दुरितं बाधमानः । 10
अपप्रोथ दुन्दुभे दुछुना इत[10] इन्द्रस्य मुष्टिरसि वीडयस्व ॥
आमूरज[11] प्रत्यावर्तयेमाः[12] केतुमद्दुन्दुभिर्वावदीति ।
समश्वपर्णाश्चरन्तु नो नरो ऽस्माकमिन्द्र रथिनो जयन्तु ॥ ३ ॥

Vgl. TS 7, 4, 20 (jîvato ṣevasyopacârah); 4, 6, 6 (mahâprshṭham); Kâṭh. 5, 6, 1; VS 23, 5 u. 6; 29, 37—57; Mân. Çr. 9, 2, 3 u. 4.

समिद्दिशामाशयानः[13] स्वर्विन्मधु रेतो[14] माधवः पात्वस्मान् ।
अग्निर्देवो[15] दुष्टरीतुरदब्ध इदं क्षत्रं रक्षतु पात्वस्मान् ॥ 15
रथन्तरं सामभिः पात्वस्मान्गायत्री छन्दसा विश्वरूपा ।

---

1) P अस्याः ।; die Saṃh. Mss अस्या 2) P यत्र । 3) P ज्यायाः । 4) P जघनान् । 5) P उपजिघ्रति । 6) P अश्वान् । समत्स्विति समत् - सु । 7) So die Saṃh. Mss; P चोदय; desgl. Kâṭh. 5, 6, 1. 8) B उपाश्वासय 9) P नः । आ । धाः । 10) P दुछुनाः । इतः । 11) Bb आमूरजः; H आमरजः; desgl. B, ohne Accent; P आ । अमूः । अज ।; Kâṭh. 5, 6, 1 आमूरज 12) P प्रत्यावर्तयेति प्रति - आवर्तय । इत्याः । 13) P दिशां । आशयानः । 14) P स्वर्विदिति स्वः - वित् । मधुः । अतः । Bb मधु रेतो; H मधु रेतो; desgl. B, ohne Accent. 15) So B, ohne Accent; P अग्निः । देवः ।; H u. Bb अग्निर्देवो

चिवृत्नो[1] विष्टया[2] स्तोमो अह्ना समुद्रो वात[3] इदमोजः पिपर्तु ॥
उषा दिशामभिभूतिर्वयोधाः शुचिः शुक्रो अहन्नोजसीनः ।
इन्द्राधिपत्यैः पिपृतादतो नो महि क्षत्रꣳ विश्वतो धारयेदम् ॥
बृहत्साम क्षत्रभृद्वृद्धवृष्णं[5] चिष्टुभौजः[6] शुभितमुग्रवीरम्[7] ।
इन्द्रः स्तोमेन पञ्चदशेन मध्यमिदꣳ वातेन सगरेण रक्षतु ॥
प्राची दिशꣳ सहयशा[8] यशस्वती विश्वे देवाः प्रावृषाह्नाꣳ[9] स्तृवती ।
वैरूपे सामन्नधि तञ्चकेयं[10] जगत्यैनꣳ[11] विक्ष्वावेशयामि ॥
इदं क्षत्रं दुष्टरमस्त्वोजो ऽनाधृष्टꣳ[12] सह३स्यꣳ सहस्वत् ।
विश्वे देवाः[13] सप्तदशेन वर्चसेदं[14] क्षत्रꣳ सलिलवातमुग्रम्[15] ॥
धर्त्री दिशां क्षत्रमिदं दाधारोपस्थाशानां[16] मित्रवदस्त्वोजः ।
मित्रावरुणा शरदाह्ना[17] चिकित्तमस्से[18] राष्ट्राय महि शर्म यच्छतम् ॥
वैराजे सामन्नधि मे मनीषानुष्टुभा[19] संभृतꣳ वी३र्यꣳ सहः ।
इदं क्षत्रं मित्रवदा दृदानु मित्रावरुणा रक्षतमाधिपत्यैः ॥
सम्राड् दिशꣳ सहसाम्नी सहस्वत्यृतुर्हेमन्तो[20] विष्टया[21] नः पिपर्तु ।

---

1) P चिवृदिति चि. वृत् । नः । 2) B रिष्टया 3) P वातः । 4) P अहन् । ओजसीने । 5) Die Samh. Mss. वृद्धवृष्णिं; P वृद्धवृष्णमिति वृद्ध. वृष्णं ।; Kâṭh. 22, 14 वृद्धवृष्ण्यं 6) P चिष्टुभा । चिस्तुभेति चि. स्तुभा । ओजः । 7) So corrigirt; die Samh. Mss. शुष्कीतमुꣳ; P शुफितं ।; TS 4, 4, 12, 2 शुभितम्, auch Kâṭh. 22, 14 शुभितम 8) P सहयशा इति सह. यशाः । 9) So corrigirt; die Samh. Mss. प्रावृषाह्नाः; P प्रावृषा । अह्ना ।; TS 4, 4, 12, 2 प्रावृषाह्नाꣳ; Kâṭh. 22, 14 प्रवृषाह्नां 10) P तत् । शकेयं । 11) P जगत्या । एनं । 12) P अनाधृष्टं । 13) P देवाः । 14) P वर्चः । 15) So mit P; सलिलवातमिति सलिलं. वातं ।; (cf. TS 4, 4, 12, 3); Hu. Bb सलिलवतिम°; B सलिलꣳवतिम° 16) P दधार । उपस्थ इत्युप. स्थे । आशानां । 17) P शरदा । अह्ना । Kâṭh. 22, 14 शरदाह्नां 18) So ist wohl zu lesen; die Mss. schwanken; H चिकित्त्वंम°; desgl. B, ohne Accent; Bb चिकित्वंम°; P चिकितम् ।; Kâṭh. 22, 14 जिगतू 19) P मनीषा । अनुष्टुभा । अनुस्तुभेत्यनु. स्तुभा । 20) So im Anschluss an P संहस्वती । ऋतुः । (cf. TS 4, 4, 12, 3); die Samh. Mss, संहस्वदृतुꣳ 21) So corrigirt; die Mss. विष्टया; cf. oben u. TS 4, 4. 12, 3.

अवस्युवाता बृहती न शंकरी दिशां तेव्यवतु[1] नो घृताची ॥
स्तृवती सुदुघा नः पयस्वतीमꣳ यज्ञमवतु या घृताची।
त्वं गोपाः पुरएतोत पश्चाद्बृहस्पते यांम्या[2] युङ्ग्धि वाचम् ॥
ऊर्ध्वा दिशाꣳ रन्तीराशौषधीनाꣳ[3] सꣳवत्सरेण सविता नो अंहूा।
रेवत्सामातिछन्दा[4] उ छन्दों[5] ऽजातशत्रुः[6] स्योना नो अस्तु ॥
स्तोमस्त्वयस्त्रिꣳशे भुवनस्य पत्नी[7] विवस्वद्वाते[8] अभि नो गृणीहि।
घृतवती सवितुराधिपत्ये[9] पयस्वती रातिराशा[10] नो अस्तु ॥
अन्वद्य[11] नो अनुमतिर्यज्ञं देवेषु मन्यताम्।
अग्निश्च हव्यवाहनो भवतं दाशुषे मयः ॥
अन्विदनुमते त्वं मन्यासै शं च नस्कृधि।
क्रत्वे दक्षाय नो हिनु प्र ना[12] आयूꣳषि तारिषत् ॥
वैश्वानरो न[12] ऊत्या प्रयातु परावतः।
अग्निरुक्थ्येन वाहसा ॥
पृष्ठो दिवि ॥
ध्रुवा दिशाꣳ विष्णुपत्न्यघोरास्येशाना[13] सहसो या मनोता।
बृहस्पतिर्मातरिश्वोत[14] वायुः सꣳध्याना[15] वाता[16] अभि नो गृणन्तु ॥

---

1) So H! In Bb तेव्यवतु; desgl. B, ohne Accent; P तेवी। अवतु।; TS 4, 4, 12, 4 देव्यवतु; Kâṭh. 22, 14 इमं यज्ञमवतया घृताची 2) Hu.Bb यान्याꣳ; Kâṭh. 22, 14 याम्या 3) So corrigirt; Hu.Bb रंतीरꣳ; in B रतीरꣳ; P रंतिः। आशा। औषधीनां।; Kâṭh. 22, 14 रंतिर 4) P साम। अतिछंदाः। 5) P उछंद इत्युत-छंदः। 6) P अजातशत्रुरित्यजात-शत्रुः। 7) P पवित्रि।; Kâṭh. 22, 14 पत्नि 8) P विवस्वद्वात इति विवस्वत्-वाते। 9) So die Mss.; P सवितुः। आधिपत्य इत्याधिपत्ये। 10) So im Anschluss an P रातिः। आशा न। die Saṃh. Mss. रातीरꣳ; Kâṭh. 22, 14 रंतिरꣳ 11) B अन्विदनुमते द्य 12) P नः। 13) P अघोरा। अस्य। ईशाना। 14) P मातरिश्वा। उत। 15) P संधाना इति सं-धानाः। 16) P वाताः।

विष्टम्भो दिवो धरुणा पृथिव्या[1] अस्येशाना[2] जगतो विष्णुपत्नी।
व्यचस्वतीषयन्ती[3] सुभूतिः शिवा नो अस्त्वदितेरुपस्थे[4] ॥
कया नः ॥
को अद्य युङ्क्ते धुरि गा[5] ऋतस्य शिमीवतो[6] भामिनो दुर्हणायून्।
आसन्निषून्हृत्स्वसो[7] मयोभून्य एषां भृत्यामृणधत्स[9] जीवात् ॥ ४ ॥

Vgl. TS 4, 4, 12 (yâjyânuvâkyâḥ, açvamedhaprakaraṇe); Kâṭh. 22, 14.

अग्नेर्मन्वे प्रथमस्यामृतानाꣳ यꣳ पाञ्चजन्यं बहवः समिन्धते।
विश्वस्याꣳ विशि प्रविविशिवाꣳसमीमहे सꣳ नो मुञ्चत्वꣳहसः ॥
यस्येदं प्राणन्निमिषद्यदेजति[10] यस्य जातं जनमानं च केवलम्।
स्तौम्यग्निं[11] नाथितो जोहवीमि सꣳ नो मुञ्चत्वꣳहसः ॥
इन्द्रस्य मन्वे प्रथमस्य प्रचेतसो वृचद्भः स्तोमा[12] उप मामुपागुः[13]।
यो दाशुषः सुकृतो हवमुप गन्ता सꣳ नो मुञ्चत्वꣳहसः ॥
यः संग्रामं नयति सꣳ वशी युधे यः पुष्टानि सꣳसृजति चयाणि।
स्तौमीन्द्रं नाथितो जोहवीमि सꣳ नो मुञ्चत्वꣳहसः ॥
मन्वे वां मित्रावरुणा तस्य वित्तꣳ सत्यौजसा दुर्हणा यꣳ नुदेथे[14]।
या राजाना सरथꣳ यात[15] उग्रा तां नो मुञ्चतमागसः ॥
यो वाꣳ रथ[16] ऋजुरश्मिः सत्यधर्मा मिथुचरन्तमुपयाति[17] दूषयन्।

---

1) P पृथिव्याः। 2) P अस्य ईशाना। 3) P व्यचस्वती। ईषयंती। Kâṭh. 22, 14 विश्वव्यचा इषयंती 4) P अदिते। उपस्थ इत्युप. स्थे। 5) P गाः। 6) So im Anschluss an P शिमीवत इति शिमी. वतः।; (cf. RV 1, 84, 16); die Samh. Mss. शुभ्रवतो 7) P आसन्निषूनित्यासन्. इषून् । 8) P यः। 9) So corrigirt; die Samh. Mss. भृत्यामृणधत्; P भृत्यां। ऋणधत्। 10) P प्राणत्। निमिषदिति नि. मिषत्। यत्। एजति। 11) P स्तौमि। अग्निं। 12) P स्तोमाः। 13) P उपमामित्युप. मां। उपमां। (!!) 14) Die Samh. Mss. दुर्हणायतुदेथे; P दुर्हणेति दुः. हणा। यं। नुदेथे। 15) P यातः। 16) P रथः। 17) P मथूचरंतमिति मथू. चरंतं।

स्तौमि मित्रावरुणौ नाथितो जोहवीमि तौ नो मुञ्चतमांगसः ॥
वायोः सवितुर्विदथानि मन्महे यौ आत्मन्वद्बिभृतो यौ च रक्षतः ।
यौ विश्वस्य परिभू बभूवथुस्तौ नो मुञ्चतमांगसः ॥
उप श्रेष्ठा न[2] आशिरो देवयोर्धर्मा[3] अस्थिरन् ।
स्तौमि वायुꣳ सवितारं नाथितो जोहवीमि तौ नो मुञ्चतमांगसः ॥ 5
रथीतमौ रथीनामह्व[4] ऊतये शुभं गमिष्ठौ सुयमेभिरश्वैः ।
ययोर्वी देवी[5] देवेष्वनिषितमोजस्तौ[6] नो मुञ्चतमांगसः ॥
यदयातꣳ[7] वहतुꣳ सूर्यायास्त्रिचक्रेण सꣳसदमिच्छमानौ ।
स्तौमि देवौ[8] अश्विनौ नाथितो जोहवीमि तौ नो मुञ्चतमांगसः ॥
मरुतां मन्वे अधि नो ब्रुवन्तु प्रेमाꣳ वाचꣳ[9] विश्वामवन्तु विश्वे । 10
आप्नून्हुवे सुयमानूतये तें नो मुञ्चन्त्वेनसः ॥
तिग्ममायुधꣳ वीडितꣳ सहस्वद्दिव्यꣳ[10] शर्धः पृतनासु जिष्णु[11] ।
स्तौमि देवान्मरुतो नाथितो जोहवीमि तें नो मुञ्चन्त्वेनसः ॥
देवानां मन्वे अधि नो ब्रुवन्तु प्रेमाꣳ वाचꣳ[9] विश्वामवन्तु विश्वे ।
आप्नून्हुवे सुयमानूतये तें नो मुञ्चन्त्वेनसः ॥ 15
यदिदं माभिशोचति पौरुषेयेण दैव्येन ।
स्तौमि विश्वान्देवान्नाथितो जोहवीमि तें नो मुञ्चन्त्वेनसः ॥
अन्वद्य नो अनुमतिरन्विदनुमते त्वꣳ[v] वैश्वानरो न ऊत्या ॥

---

1) P यौ । 2) श्रेष्ठाः । नः । 3) P धर्माः । 4) So Bb; H रथिनामङ्ह; desgl. B, ohne Accent; P रथीनां । अङ्हः ।; Kâṭh. 22, 15 रथीनां ऊव 5) So P; die Saṃh. Mss देवी; 6) So die Saṃh. Mss; in P देवेष । अनिष्पितमित्वनिः . पितं ।; Kâṭh. 22, 15 देवेष्वनिषितमꣳ 7) H u. Bb यदयातꣳ; B यदायातꣳ oder यादायातꣳ; P यत् । आयातमित्या . यातं ।; s. aber auch TS 4, 7, 15, 4; Kâṭh. 22, 15 यदयातं 8) P देवौ 9) So corrigirt; die Saṃh. Mss प्रेमाꣳ वाचꣳ; P प्र । इमां । वाचं । 10) P सहस्व । (!) दिव्यं । 11) So corrigirt; alle Mss, auch P, lesen जिष्णुः; Kâṭh. 22, 15 जिष्णु

त्वमग्ने शोचिषा शोशुचानाँ आ रोदसी अपृणा जायमानः[2]।
त्वं देवाँ[3] अभिशस्तेरमुञ्चो वैश्वानर जातवेदो महित्वा ॥
उर्वी रोदसी वरिवस्कृणोतं क्षेत्रस्य पत्नी[4] अधि नो ब्रुवाथः।
स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमꣳहसः ॥
5 ये अप्रथेतामभितेभिरोजोभिर्ये[5] प्रतिष्ठे अभवताꣳ वसूनाम्।
स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमꣳहसः ॥
यच्चिद्धि ते पुरुषत्रा यविष्ठाचित्तिभिश्चकृमा कच्चिदागः[6]।
कृधी ३ष्वस्माँ अदितेरनागानेनाꣳसि शिश्रथो विष्वगग्ने ॥
यथा ह त्यद्वसवो[8] गौर्यं चित्पदि षिताममुञ्चता[9] यजत्राः।
10 एवो[10] ३ष्वस्मन्मुञ्चता[11] व्यꣳहः प्रतार्यग्ने प्रतरं ना[12] आयुः ॥ ५ ॥

Vgl. TS 4,7,15 (açvamedhasambandhinyo yâjyânuvâkyâḥ); Kâṭh. 22,15.

॥ इत्युपरिकाण्डे षोडशः प्रपाठकः ॥

॥ इत्युपरिकाण्डं समाप्तम् ॥


---

1) P शोशुचानः। 2) Die Saṃh. Mss अपृणाज्जायमानः; aber P अपृणाः। जायमानः। 3) P देवान्। 4) So mit P पत्नी इति पत्नी।; die Saṃh. Mss पत्नीः; cf. TS 4, 7, 15, 6. 5) So corrigirt nach Anleitung von Kâṭh. 22, 15 °ममितेभिरोजोभि°; die Mss. schreiben °ममृतेभिर°; auch P अमृतेभिः।; beachte den Accent, der auf den Fehler hinweist. 6) P कत्। चित्। आगः। 7) P कृधि। सु। अस्मान्।; die ३ ist von mir hinzugesetzt. 8) So im Anschluss an P त्यत्। (s. auch unten 4, 11, 1 u. RV. 4, 12, 6); die Saṃh. Mss. तद्वसवो 9) P सितां। अमुंचत। 10) P एवो इत्येवो। 11) So corrigirt; die Mss. ष्वस्मिन्मुंचता (ohne ३); P सु। अस्मत्। (cf. RV 4, 12, 6). 12) P नः।

Corrigenda.

S. 5 Z. 3 lies °विद्दुत्तरया statt °विन्द्दुत्तरया
„ 8 „ 7 „ गृह्णन्ति statt गृह्णाति
„ 39 „ 3 „ शान्तरथो पराङ् statt शान्तरथो ऽपराङ्
„ 40 „ 14 „ स्त्रो statt स्त्रो
„ 42 „ 6 „ प्रत्यैकरूपा statt प्रत्यैकरूपा
„ 42 „ 17 „ होचुर्या statt होतुर्या
„ 59 „ 12 u. 13 lies दीक्षते statt दीक्षते
„ 64 „ 3 lies प्रापिपद्य statt प्रापिबद्य
„ 72 „ 12 ist das Zeichen ऽ vor आहृते zu streichen.
„ 75 „ 1 lies इमा न प्राजान statt इमानप्रजान
„ 75 „ 4 „ साब्रवीन् statt सो ऽब्रवीन्
„ 77 „ 8 „ °मजयत् statt °मयजत्
„ 84 „ 12 u. 13 lies सोमविक्रयिन्त्सोमं statt सोमविक्रयित्सोमं
„ 96 „ 12 lies ऽविदामहीति statt विदामहीति

Druck von Gebr. Unger in Berlin, Schönebergerstr. 17a.



Digitized with financial assistance from the
Government of Maharashtra
on 23 January, 2019